KRITYA KAUMUDI

BY

BRIHASPATI

बृहस्पतिप्रणीता कृत्यकौमुदी

An ancient treatise of orissan
School of Dharmashastra.

CSUGCKL 1
Q2:4
16999
Acc.No: 16999

Edited with notes 'Raka'
By
DR. JAYA KRISHNA MISHRA
Post Graduate Department of Dharmashastra
Sri Jagannatha Sanskrit University
Shri Vihar, Puri, Orissa.

2358
HOLD ID: 3992
BOOK No: 1
LOCATION: 20-A-2

Presented by the Union
Ministry of Human Resource
Development, Govt. of India.

Presented by the Union Ministry
of Human Resource Development (Education)

CAT No. 2358.
HOLD ID. 3992
Book No. 1
Location. 20-A-2

KRITYA KAUMUDI

BY

BRIHASPATI

An ancient treatise of Orissan School of Dharmashastra

Critically Edited with introduction and notes "Raka".

BY

DR. JAYA KRISHNA MISHRA

Dharmashastracharya, Advaitavedantacharya,
Vidyavaridhi (Ph.D.), Vidyavachaspati (D. Litt.)
Post-Graduate Department of Dharmashastra
Shri Jagannath Sanskrit University
Shrivihar, Puri, Orissa.

KERALA 680 551

●

Foreward by

PROF. BATAKRISHNA MOHANTY

KJLAPATI (VICE-CHANCELLOR)
Shri Jagannath Sanskrit University, Shrivihar, Puri. Orissa.

●

Preface by

DR. VACHASPATI SHARMA TRIPATHI

HEAD
P. G. Deptt. of Dharmashastra
K. S. D. Sanskrit University, Darabhanga, Bihar.

1989

Published with the Financial assistance given by the
Union Ministry of Human Resource Development,
Department of Education
Govt. of India.

SANSKRIT VIDYAPEETHA
Accession No 16999
Date 16-6-93
GURUVAYOOR

First Edition—1989

© By the author

92:4

Available at :

Sadgranth Niketan
Ananda Bazar
Sri Jagannath Temple, Puri, Orissa

◆

Smt. Swarnalata Mishra, B.A
C/o. Dr. J. K. Mishra,
P. G Deptt. of Dharmashastra,
Shri Jagannath Sanskrit University, Puri, Orissa

PRICE—Rs. 99/-

Printed by ;

SRI NARAYAN PRESS,
Bali Sahi, Puri, Orissa

पित्रोः चरणकमलेषु भक्तिकौमुदीमिमां

कृत्यकौमुदीं

समर्पयति

जयकृष्णः

SHRI JAGANNATH SANSKRIT VISHVAVIDYALAYA

Prof. B. K. Mohanty,
KULAPATI
(VICE-CHANCELLOR)

PURI
Dated 9.2.89

FOREWARD

I have the great pleasure in introducing "A Critical Study of Kritya Kaumudi of Brihaspati" authored by Dr. J. K. Mishra. Since long Orissa developed its own school of Dharmashastra traditions with large number of rituals, festivals and parvanas which throws light on socio-religious life of Orissa of the period 12th to 15th century during which Orissa was under the firm administration of powerful Hindu Rulers.

Brihaspati Suri is a notable smruti writer of Orissa and lived in 14th century and "Kritya Kaumudi" is his magnificient contribution. It is divided into three prakaranas, such as Kalaviveka Prakarana, Prayaschitta Prakarana and Dana Prakarana.

Dr. J. K. Mishra's work is a critical analysis of Kritya Kaumudi and is a scholarly approach to smrutishastra. Dr. Mishra deserves warm congratulations for this masterly work which will be of immense benefit to the sanskrit scholars of the world.

Sd/-
PROF. B. K. MOHANTY

डॉ० वाचस्पतिशर्मा त्रिपाठी
एम. ए. (द्वय), आचार्य (त्रय)
बि. एड्., पी. एच्. डी.,
विभागाध्यक्ष,
स्नातकोत्तर-धर्मशास्त्रविभाग
का. सि. द. संस्कृतविश्वविद्यालय,
दरभंगा, बिहार, पिन—846004

Dr. V. S. Tripathy
M.A.(Double), Acharya(Tri)
B.Ed., Ph.D.
Head,
P.G. Deptt. of Dharmashastra
K.S.D. Sanskrit University
Darabhanga (Bihar) 846004

PREFACE

अशेषकल्याणनिलयानामायुष्मतां श्रीमतां डॉ० जयकृष्णमिश्रमहोदयानां प्रभूतपरिश्रमस्य परिणतिरूपेण तैः ससमीक्षणं सटिप्पणञ्च सम्पादिता "कृत्यकौमुदी" प्राकाश्यं नीयत इति नूनमेव परमप्रमोदावहोऽयमवसरः। ग्रन्थरत्नमिदं सानन्दमवलोकितं मया। धर्मशास्त्रीयनिबन्धग्रन्थेषु बृहस्पतिसूरिप्रणीतायाः कृत्यकौमुद्याः स्थानमत्युच्चैः विद्यते। उत्कलराज्यसंग्रहालये चिरकालात् संरक्षितायाः तालपत्रनिबद्धायाः कृत्यकौमुद्याः संपादनं समीक्षात्मकमनुशीलनञ्च डॉ० मिश्रेण महता श्रमेण निष्ठया च अभिनवसरणिमवलम्ब्य विहितमित्यत्र नास्ति कश्चन विसंवादः। 'राका'भिधेया टिप्पणी ग्रन्थरत्नस्यास्याभिरामतां नितरां वर्धयतितराम्। ग्रन्थादौ निबद्धः भूमिकाभागः धर्मशास्त्रछात्राणां परमोपयोगाय, गवेषकाणां ज्ञानवर्धनाय, समालोचकानां सन्तोषाय, विदुषाञ्च विनोदाय कल्पिष्यत इति दृढो मे विश्वासः।

निलाचलनिवासिनः भगवतः श्रीजगन्नाथस्य चरणयोरहमस्य विद्वद्वरेण्यस्य पुरुषायुषजीवित्वमुत्तरोत्तरनूतनतत्त्वान्वेषणप्रवृत्ति, क्रियासमभिहारेणैतादृशग्रन्थरचनाध्यवसायञ्च कामये। धर्मशास्त्ररहस्योद्घाटने प्रणिहितमनसः श्रीमन्तः सदा सारस्वतयागानुष्ठानफलं लभन्तामिति मे शुभाशिषः।

स्वा/-
डॉ० वाचस्पतिशर्मा त्रिपाठी

उपोद्घातः

देवभूमिरियं भारतभूमिः । देवभूमावस्यां भारतीयार्यजनसंस्कृतिसंरक्षणार्थं देवानां भाषाऽपि प्रचलिता आसीत् । तस्मादेव कालादार्यजनपरम्परया प्रथिता सा देवभाषा अद्यापि जनानां मुखान्निस्सरति । पुनश्च मुखनिःसृततया सा जीविता सती श्रवणमाध्यमेन स्मर्यमाणत्वात् श्रुतिरिति वेदस्य नाम अभवत् । स च वेदः सनातनीयानां भारतीयानां मूलधर्मग्रन्थश्चासीत् । अनन्तरञ्च प्राक्तनैः महर्षिभिः जनानामाचरणव्यवहारसौकर्यार्थं स्मृतिशास्त्राणि विरचितानि । तत्र पुनः महर्षिप्रणीतानां स्मृतिशास्त्राणां मध्ये कदाचिच्च समुपस्थितानां विषममतानामेकवाक्यताकरणाय भाष्यकाराः प्रयत्नं कृतवन्तः । अनन्तरं देशकालादिधर्माणां व्यवहारसौकर्यार्थं विभिन्नेषु प्रान्तेषु धर्मशास्त्रीयनिवन्धग्रन्थाः विरचिताः । ते च निवन्धकाराः प्रादेशिकानुष्ठितधर्माणां धर्मकृत्यानां च वर्णनं मुख्यरूपेण कृतवन्तः । तथा चोत्कलेष्वपि प्रादेशिकधर्मप्रतिपादयद्भिः धर्मधुरीणैः निवन्धकारैः उत्कलेषु प्रचलिताचाराणां व्यवहृतपर्वणां चोल्लेखनपूर्वकं निवन्धग्रन्थाः प्रणीताः । एवमेवोत्कलेषु विरचितानां धर्मशास्त्रीयनिबन्धग्रन्थानामनुशीलनमपि दुष्करं भवति । ते च लोकलोचनागोचरीभूताः शतसहस्रसंख्यकाः तालपत्रात्मकग्रन्थाः प्राप्यन्ते । अद्यावधि चोत्कलराज्यसंग्रहालये पञ्चाशत्सहस्रसंख्यकाः तालपत्रात्मकाः ग्रन्थाः संगृहीताः, संरक्षिताश्च वर्त्तन्ते । ते च निवन्धग्रन्थाः देशेविदेशेष्वपि प्रकाशिताः भवन्ति, प्रसिद्धि चापि भजन्ते ।

अतः शोधकर्मणि प्राचीनदुर्लभग्रन्थसम्पादनमावश्यकमिति कर्तृपक्षैः निर्दिष्टत्वात् ग्रन्थनिरूपणावसरे चक्षुगोचरीभूतेषु बहुष्वप्रकाशितेषु ग्रन्थेषु अयमेव कृत्यकौमुदीग्रन्थः दृष्टिपथारूढः संजातः । सोऽपि कृत्यकौमुदीग्रन्थः उत्कलीय धर्मशास्त्रनिवन्धग्रन्थेषु प्राचीनः प्रामाणिकश्चेति मत्वा तस्य समीक्षणात्मकाध्ययने प्रवृत्तिर्जाता । गुरुजना अपि तस्यैव ग्रन्थस्य समीक्षणे मर्यादावृद्धिर्भविष्यति इति कृत्वा मां प्रवर्त्तयामासुः ।

कृत्यकौमुद्याः षट् प्रतिलिपयः मया अद्यावधि दृष्टाः । उत्कलस्य विभिन्नस्थलेभ्यः संगृहीताः ताः प्रतिलिपयः उत्कलराज्यसंग्रहालये अधुना संरक्षिताः वर्त्तन्ते ।

सेयं कृत्यकौमुदी प्रकरणत्रयात्मिका । कालविवेक-प्रायश्चित्तदानप्रकरणेषु विभक्ता सा कृत्यकौमुदी द्विशताधिकतालपत्रात्मिका वर्त्तते । तत्र पुनः कालविवेक-प्रकरणं महद्भागमावहति । कृत्यकौमुदीग्रन्थे धर्मशास्त्रस्य मुख्यविषयत्वेन पर्व-श्राद्ध-स्नान-दान-प्रायश्चित्तानि प्रदर्शितानि । तत्र प्रथमतः कालविवेकप्रकरणे सर्वेषां व्रतोपवासादीनां जयन्तीव्रत-एकादशी-श्राद्ध-पौर्णमासी-संक्रान्ति-ग्रहण-युगादि-अपर-पक्ष अधिमास-देवशयन-पार्श्वपरिवर्त्तनोत्थापनादीनां पुण्यकर्मणां ग्राह्यकालश्च निरूपितः । तिथिनक्षत्रवाराद्यः पापपुण्ययोः साधनमिति गार्ग्यवचनानुसारं प्रथमतः सर्वेषु कर्मसु पालनकालश्च दृष्टिपथारूढः भवति । अतः कालनिर्णयानन्तर बृहस्पतिः पूजाविधि-कथा-प्रतिष्ठा-फलादीनां वर्णनं करोति । लौकिकव्रतोपवासादयः एव धन-पुत्रायुरारोग्यादीनां लौकिकफलानां दातारः । अतः ऐहिकफलदातृत्वात्, सारल्यात्, लोकव्यवहारे प्रचलितत्वात्; भोगसाधनत्वात्, मोक्षप्रदायकत्वाच्च लौकिकव्रतानां प्रसिद्धिस्तथा प्राचुर्येण प्रचारो अवलोक्यते । अतः आर्यजनसंस्कृतिसंरक्षणार्थमभिलाषपूरणार्थं च लौकिकव्रतानां महत्वमत्यधिकमिति मत्वा बहु धर्मशास्त्रनिबन्धकारैः व्रतसम्बन्धिनः निबन्धग्रन्थाः प्रणीताः । तदनन्तरं पुरुषोत्तमक्षेत्रे विहितानां स्नान-योगादीनां तथा गङ्गास्नानविध्यादीनां वर्णनं बृहस्पतिना कृतम् । पितृभक्तिप्रयुक्तं तथा पितृ-पितामह-प्रपितामहादीनां स्मरणार्थं पुत्र-पौत्र-प्रपौत्रादिभिरविच्छिन्न-सम्बन्धरक्षणार्थं पितृयज्ञरूपं श्राद्धकर्म तदनन्तरं वर्णितम् ।

द्वितीयप्रकरणे प्रायश्चित्तानि निरूपितानि । प्रकरणेऽस्मिन् द्वादशवार्षिकादि वार्षिकप्रायश्चित्तपर्यन्तानि गोवधास्पृश्यस्पर्शनाभक्ष्यभक्षणादीनि प्रायश्चित्तानि प्रतिपादितानि । दानधर्मस्य कलियुगे एव विशेषितत्वादन्ते तस्यापि प्रतिपादनमेतैः महानुभावैः कृतम् ।

ग्रन्थोऽसौ उत्कलीयपर्वसम्वन्धिनिवन्धग्रन्थेषु प्राचीनतमं स्थानं प्राप्नोति । पुनश्च परवर्त्तिभिः उत्कलीयनिवन्धकारैः ससम्मानं वारं वारमुद्धृतत्वात् कृत्यकौमुद्याः महत्वं सर्वथा वर्त्तते । उत्कलीयधर्मसमाजे धर्मनिर्णयप्रसंगेऽपि अस्याः कृत्यकौमुद्याः भूयसी प्रतिष्ठा वर्त्तते । अतः प्राचीनोत्कलधर्मशास्त्रीयनिवन्धग्रन्थरूपायाः कृत्यकौमुद्याः सम्पादने उत्कलीयधर्मसमाजस्य महानुपकारः भविष्यतीति मत्वा मया ग्रन्थोऽयं गृहीतः ।

ग्रन्थस्य समीक्षणे मया नवीना प्रणाली अनुसृता । तत्र च ग्रन्थस्य प्रतिपादितविषयाः मया संक्षेपतः चर्चिताः । ततश्च अन्यैः धर्मशास्त्रीयनिवन्धकारैः कृत्यकौमुद्याः समीक्षणं मया कृतम् । अन्तिमे कृत्यकौमुदीग्रन्थस्य वैशिष्ट्यं प्रतिपादितम् । तत्र ग्रन्थकारस्य वृहस्पतेः पाण्डित्यञ्चाकलितम् । अयमेव ग्रन्थकारः उत्कलीय इति यत्र तत्रापि प्रमाणानि विद्यन्ते । तानि प्रमाणानि आश्रित्य तस्योत्कलीयत्वं मया प्रवलयुक्तिमाध्यमेन प्रमाणितम् । उत्कलीयत्वाद् असौ ग्रन्थकारः उत्कलीयधर्मनिवन्धृभिः प्रायः चर्चितः । अतः कतिवारं, कुत्र, केन च निवन्धकारेण सम्मानितः, अपमानितो वा, तदपि मया उपयुक्तस्थले प्रदर्शितम् । अन्तिमे परिशिष्टभागे पाठकानां सौकर्यार्थं प्रयुक्तानां सहायकग्रन्थानां प्रकाशनस्थानकालपुरःसरं मया संयोजितम् । ग्रन्थस्यास्य समीक्षणे आधुनिकसमीक्षणप्रणाली मया प्रायः अनुसृता ।

शोधप्रवन्धनिमित्तं बहुशः वैदिक-स्मार्त्तग्रन्थानां पुराणनिवन्धग्रन्थानां च साहाय्यं प्राप्तम् । तेषां ग्रन्थानाममूल्यविचारैः मम शोधप्रवन्धः परिमार्जितः सुसंस्कृतश्च । लौकिकैः शब्दैः कृतज्ञताज्ञापनं तु प्रथामात्रं वर्त्तते, परं तु वास्तविककृतज्ञताज्ञापनमन्तःकरणद्वारा एव विधेयम् । अतः महानुभावाः ते ग्रन्थकाराः मम हार्दिकीं कृतज्ञतां स्वीकरिष्यन्तीत्यहं प्रार्थये । अस्य ग्रन्थस्योपरि स्वाभिमतं प्रकाशयद्भ्यः श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिमहोदयेभ्यः प्रोफेसर वटकृष्णमहान्तिमहाभागेभ्यः कृतज्ञतां समर्पयामि । अयं शोधप्रवन्धः विहारराज्यस्य दरभङ्गा संस्कृतविश्वविद्यालयस्य धर्मशास्त्रविभागमुख्यपदवीमलंकुर्वतां विद्याविद्योतितान्तःकरणानां डॉ० वाचस्पतिशर्मत्रिपाठिमहोदयानां पर्यवेक्षणे मया विरचितः । तान् प्रति कृतज्ञताज्ञापनमशोभनं मत्वा तेषां पदकमलेषु श्रद्धापूर्वकं विनम्रप्रणामाञ्जलीः समर्प्य तुष्टो भवामि ।

शोधकर्मणि प्रवर्त्तकानामाद्यन्तमुपदेष्टृणां मम सकलज्ञानराशेः जन्मदातृणामुत्कलस्य मूर्धन्यधर्मशास्त्रज्ञानां निष्कपट-निर्मलन्यायबुद्धिविशिष्टानां राष्ट्रपतिसम्मानितानां पण्डितप्रवराणां श्रीकुलमणिमिश्रशर्मणां चरणारविन्देषु साष्टाङ्गप्रणाममात्रं निवेद्य तोषमनुभवामि ।

ग्रन्थेऽस्मिन् अमूल्याभिमतनिमित्तं विद्वद्वरेण्यानां सकलसद्गुणमण्डितानां आचार्यवर्याणां डॉ० गयाचरणत्रिपाठिमहोदयानां पदयुगलेषु मया विनम्रभक्तिपूतप्रणतयः विनिवेद्यन्ते । अस्या एव कृत्यकौमुद्याः समीक्षणार्थमुत्कलराज्यसंग्रहालयस्य श्रीयुक्तनीलमणिमिश्र-श्रीयुक्तभगवानपण्ड़ामहोदयानां, श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य धर्मशास्त्रविभागाध्यापकानां डॉ० व्रजकिशोर स्वाईं महाभागानां प्रोत्साहन-साहाय्य-सत्प्रेरणानिमित्तं चाहं तेषां समीपे चिरकृतज्ञः ।

अनन्तरं मध्ये मध्ये साहाय्यार्थं प्रार्थितानां पण्ड़ितप्रवराणां, मित्राणां समीपेऽप्यहं हार्दिकाऽभिवन्दनानि निवेदयामि ।

कर्मण्यस्मिन् प्रवर्त्तकानामुत्साहदातॄणां पितृपादानां डॉ० श्रीदामोदर-मिश्रशर्मणां, ज्येष्ठभ्रातॄणां श्रीयुक्तहरेकृष्णमिश्रशर्मणां सविधेऽप्यहं चिरकृतज्ञो भवामि ।

सर्वेषां सौकर्यार्थं मुद्रणालयमाध्यमेन नवीनरूपदातृभ्यः पुरीस्थ श्रीनारायणप्रेसपरिचालकेभ्योऽपि अहं शुभेच्छा ज्ञापयामि ।

ग्रन्थश्चैषः स्वक्षमतानुरूपसुनिष्ठया सात्त्विकपरिश्रमेण चोपस्थापित इति सुधियां समक्षं विज्ञापयामि । तथापि मानवस्वभावसुलभदोषेण संभवन्तः प्रमादाः सहृदयैः पाठकैः क्षन्तव्याः । इति ।

महविषुवसंक्रान्तिः
13-4-1989
स्नातकोत्तरधर्मशास्त्रविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः; पुरी, उत्कलः

डॉ० जयकृष्णमिश्रः

ABBREVIATION

संकेतः		विवरणम्
अग्नि. पु.	...	अग्निपुराणम्
अंगि. स्मृ.	...	अङ्गिरास्मृतिः
अत्रि. स्मृ.	...	अत्रिस्मृतिः
अथर्व,	...	अथर्ववेदः
अमर.	...	अमरकोषः
आ. द.	...	आचारादर्शः
आप. धर्म.	...	आपस्तम्बधर्मसूत्रम्
आप. श्रौत.	...	आपस्तम्बश्रौतसूत्रम्
आश्व. श्रौत.	...	आश्वलायनश्रौतसूत्रम्
ऋग्.	...	ऋग्वेदः
ऐत. ब्रा.	...	ऐतरेयब्राह्मणम्
एका. त.	...	एकादशीतत्त्वम्
ओडि. पर्व.	...	ओडिशार पर्व पर्वाणि ओषाव्रत ओ यानियात्रा
कठोप.	...	कठोपनिषत्
का. मा.	...	कालमाधवः
का सा.	...	कालसारः
कूर्मपु.	...	कूर्मपुराणम्
कृत्यकल्प.	...	कृत्यकल्पतरुः
कृत्यर.	...	कृत्यरत्नाकरः
ग. पु.	...	गरुड़पुराणम्
चतु. चिन्ता.	...	चतुर्वर्गचिन्तामणिः
छान्दो. उप.	...	छान्दोग्योपनिषत्
तैत्ति. ब्रा.	...	तैत्तिरीयब्राह्मणम्

संकेतः	विवरणम्
तैत्ति. उप.	तैत्तिरीयोपनिषत्
दा. म.	दानमयूखः
देवीभा.	देवीभागवतम्
धर्म. इति.	धर्मशास्त्र इतिहास
धर्म. शब्द.	धर्मशास्त्रशब्दकोषः
पद्म. पु.	पद्मपुराणम्
परा. माध.	पराशरमाधवीयम्
पूर्वमी.	पूर्वमीमांसा
प्राय. वि.	प्रायश्चित्तविवेकः
बौधा. धर्म.	बौधायनधर्मसूत्रम्
ब्रह्माण्डपु.	ब्रह्माण्डपुराणम्
मत्स्यपु.	मत्स्यपुराणम्
मद. पारि.	मदनपारिजातम्
मनुस्मृ.	मनुस्मृतिः
महाभा.	महाभारतम्
महाभा.	महाभाष्यम्
याज्ञ. स्मृ.	याज्ञवल्क्यस्मृतिः
यो. शा.	योगशास्त्रम्
रामा.	रामायणम्
व. पु.	वराहपुराणम्
वसि. धर्म.	वसिष्ठधर्मसूत्रम्
विष्णु. पु.	विष्णुपुराणम्
विष्णु. स्मृ.	विष्णुस्मृतिः
वैशे. सू.	वैशेषिकसूत्रम्
शब्द. महा.	शब्दस्तोममहानिधिः

संकेतः	विवरणम्
शत. ब्रा.	शतपथब्राह्मणम्
शाश्व. धर्म.	शाश्वतधर्मदीपिका
शु. यजु.	शुक्लयजुर्वेदः
श्रा. वि.	श्राद्धविवेकः
श्रीधर्म.	श्रीधर्मकल्पद्रुमः
सत्सि.	सत्सिद्धान्तमार्तण्डः
सम. प्र.	समयप्रकाशः
सौरपु.	सौरपुराणम्
स्कन्दपु.	स्कन्दपुराणम्
स्मृ. च.	स्मृतिचन्द्रिका
स्मृ. स.	स्मृतिसमुच्चयः
हैम.	हैमकोषः

विषयक्रमः

विषयः पृष्ठा

भूमिका 1-130

- धर्मशब्दार्थः ... 1
- धर्मस्य मुख्यपुरुषार्थत्वम् ... 6
- धर्मविभागः ... 10
- धर्मशास्त्रस्य शास्त्रत्वम् ... 13
- धर्मशास्त्रसाहित्यस्योद्भवः विकासश्च ... 16
- धर्मसूत्रसाहित्यम् ... 19
- स्मृतिसाहित्यम् ... 20
- टीकासाहित्यम् ... 21
- निबन्धसाहित्यम् ... 22
- धर्मशास्त्रं प्रति उत्कलीयानामवदानम् ... 25
- धर्मशास्त्रस्य त्रयो विभागाः ... 34
- त्रिषु विभागेषु आचारस्य स्थानम् ... 36
- धर्मस्य आश्रमैः सह सम्बन्धः ... 38
- व्रत-श्राद्ध-दानानामाचाराध्यायेऽन्तर्भावः ... 40
- व्रतस्वरूपम्, तद्व्यापकत्वं च ... 42
- दानस्वरूपम्, तद्व्यापकत्वं च ... 50
- श्राद्धस्वरूपम्, तद्व्यापकत्वं च ... 55
- प्रायश्चित्तस्वरूपम्, तद्व्यापकत्वं च ... 58
- कृत्यकौमुदीकर्त्तुः वृहस्पतेः परिचयः ... 62
- वृहस्पतेः कालः ... 65
- वृहस्पतेरुत्कलीयत्वम् ... 71
- कृत्यकौमुद्यामुद्धृतग्रन्थाः ग्रन्थकाराश्च ... 75
- कृत्यकौमुदीग्रन्थस्य विषयवस्तु ... 80
- पूर्ववर्त्तिनिबन्धग्रन्थानां कृत्यकौमुद्यां प्रभावः ... 97
- अर्वाचीननिबन्धग्रन्थेषु कृत्यकौमुद्याः प्रभावः ... 102
- इतरनिबन्धग्रन्थापेक्षया कृत्यकौमुद्याः वैशिष्ट्यम् ... 112
- वृहस्पतेः वैशिष्ट्यम्, पाण्डित्यप्रकर्षश्च ... 122

—*—

कृत्यकौमुदी (राकाटिप्पणीसमन्विता)

विषयः	पृष्ठा
मूलग्रन्थः	1-440
मङ्गलाचरणम्	1-2
कालविवेकप्रकरणम्	3-296
अशोकाष्टमीनिर्णयः	3
दमनकचतुर्दशी	4
मेषसंक्रान्तिकृत्यम्	14
अक्षयतृतीया	18
नृसिंहचतुर्दशी	20
आरण्यकषष्ठी	20
दशहरा	21
चम्पकद्वादशी	22
ज्येष्ठपौर्णमासी	23
भूमिरजस्वला	25
श्रीगुण्डिचा	25
देवशयनपक्षः	26
गणेश्वरचतुर्थी	27
आषाढशुक्लैकादशी	27
आषाढपौर्णमासी	30
व्यालपञ्चमी	31
श्रावणपौर्णमासी (बलोत्थापननिर्णयः)	32
श्रावणपौर्णमास्यां रक्षाबन्धनम्	33
उपाकर्मनिर्णयः	34
तत्रायमनुष्ठानक्रमः	
श्रवणाकर्मविधिः	43
रक्षापञ्चमी	46
कृष्णजन्माष्टमी	48
वर्षवृद्धिः	58
भूपालत्रयोदशी	67
सप्तपूरिकामावास्या	68
हरितालिकाचतुर्थी	68

विषयः	पृष्ठा
ऋषिपञ्चमी	69
षष्ठीपूजा	69
कुक्कुटीव्रतम्	69
शक्रोत्थापनम्	70
श्रवणाद्वादशी	73
अनन्तव्रतम्	77
अनन्तव्रतप्रतिष्ठा	93
अगस्त्यर्घ्यविधिः	97
अगस्तिप्रतिष्ठा	105
महाष्टमीविधिः	108
कूष्माण्डदशमी	117
कौमुदीपौर्णमासी	120
आकाशदीपदानम्	122
प्रदीपामावास्या	123
सुखरात्रिविधिः	124
नागचतुर्थी	127
भीष्मपञ्चकम्	128
कार्त्तिकमासकृत्यम्	131
देवोत्थापनैकादशी	133
महावर्त्तिः	135
प्रथमाष्टमीनिर्णयः	135
दीपावलिकोत्सवः	137
प्रावरणषष्ठी	138
पाषाणचतुर्दशी	138
अग्नीष्टिक दानकालः	138
पुष्यवन्दापना	139
घृतकम्बलम्	139
बकुलामावास्या	140
माघमासकृत्यम्	140
माघकृष्णचतुर्दशी	144

विषयः	पृष्ठा
श्रीपञ्चमी	145
माघसप्तमी	146
भीष्माष्टमी	152
भैम्येकादशी	152
वह्न्युत्सवपौर्णमासी	154
शिवरात्रिः	155
दोलायात्रा	160
षड्जयन्तीकथनम्	161
अथ स्नानादिपुण्ययोगाः	166-184
व्यतीपातयोगः	166
महावैशाखीयोगः	166
महाज्यैष्ठीयोगः	167
महाकार्त्तिकीयोगः	168
रोहिणीप्रतिपद्योगः	168
महोदध्यमावास्या	170
अर्धोदययोगः	172
महामाघीयोगः	175
पापनाशिनीयोगः	175
गोविन्दद्वादशीयोगः	176
वारुणीयोगः	179
सिंहबृहस्पतियोगे गोदावरीस्नानयोगः	179
कृष्णागङ्गास्नानविधिः	182
सागरस्नानविधिः	182
संगमस्नानयोगः	184
गङ्गास्नानार्थं यात्राविधिः	185
दैवव्रतानुरूपतिथिनिरूपणम्	189
एकादशी	194
प्रवेशिनी	
यद्येकादशी सम्पूर्णा सति वर्धते द्वादशी च क्षयं गता	
एकादश्याः सम्पूर्णत्वे सति यद्येकादशीद्वादश्योर्वृद्धिः	

विषयः पृष्ठा

एकादश्याः सम्पूर्णत्वे द्वादशीमात्रवृद्धौ
कलाकाष्ठादिविवेकः द्वादश्याः
रविवारादिपाते व्यवस्था 206
संकल्पग्रहणम् 210
दशम्यादिषु नियमः 211
नक्तव्रतकालनिरूपणम् 213
नक्षत्रव्रतानुष्ठानकालनिरूपणम् 214
अथ श्राद्धकालाः 215-241
एकोद्दिष्टश्राद्धकालनिरूपणम् 215
एकदिनेऽनेकश्राद्धानुष्ठानकालनिरूपणम् 218
अविदितमृताहकालनिरूपणम् 219
विघ्नितश्राद्धकालनिरूपणम् 220
सपिण्डीकरणविषयः 223
सांवत्सरिकश्राद्धनिषेधकालः 224
ऊनश्राद्धम् 226
वृद्धिश्राद्धादिकालनिर्णयः 226
मृताहश्राद्धनिर्णयः 227
अमावास्याश्राद्धनिरूपणम् 229
अमावास्यावृद्धौ निर्णयः 238
द्वादशपौर्णमासीनिरूपणम् 241
ग्रहणनिरूपणम् 243
संक्रान्तिनिरूपणम् 255
युगादिनिरूपणम् 269
अष्टकानिरूपणम् 268
अन्वष्टका 268
अपरपक्षः 264
अधिमासनिरूपणम् 280
देवशयन-पार्श्वपरिवर्त्तन-उत्थापनकालाः 287
व्रतादौ निषिद्धकालनिरूपणम् 292

विषयः पृष्ठा

प्रायश्चित्तप्रकरणम् 297-338

जलजपविधिः 297

अथ प्रायश्चित्तानि 298

प्रायश्चित्तार्थं परिषदुपस्थानम् 298

अनुष्ठानक्रमः

द्वादशवार्षिकप्रायश्चित्तम् 305

षड्वार्षिकप्रायश्चित्तम् 306

त्रैवार्षिकप्रायश्चित्तम् 306

द्वैवार्षिकप्रायश्चित्तम् 307

वार्षिकप्रायश्चित्तम् 307

गोवधप्रायश्चित्तम् 309

विप्राय दण्डोद्यमनादौ प्रायश्चित्तम् 313

अस्पृश्यस्पर्शनप्रायश्चित्तम् 313

उच्छिष्टस्य ब्राह्मणस्याबुद्धिपूर्वंब्राह्मणस्पर्शे प्रायश्चित्तम्

उच्छिष्टस्य ब्राह्मणस्य चाण्डालादिस्पर्शे प्रायश्चित्तम्

पारम्परिकस्पर्शे प्रायश्चित्तम् 320

रजस्वलायाः रजस्वलान्तरस्पर्शे प्रायश्चित्तम् 321

स्पर्शप्रायश्चित्तम् 325

श्वकाकमुखस्पृष्टतन्नखलिखितयोः प्रायश्चित्तम् 326

श्वदष्टप्रायश्चित्तम् 326

गृहस्थस्य, स्नातकस्य, सव्रतस्य, ब्राह्मण्याः, अशक्तादेः

व्रणे कृम्युत्पत्तिप्रायश्चित्तम् 329

अभक्ष्यभक्षणप्रायश्चित्तम् 331

प्रेतश्राद्धभोजनप्रायश्चित्तम् 336

संस्काराङ्गश्राद्धभोजने प्रायश्चित्तम् 337

यज्ञोपवीतं विना भोजनादिकरणे प्रायश्चित्तम् 338

नित्यकृत्याकरणप्रायश्चित्तम् 339

अथ दानप्रकरणम् 339-440

ग्रहपूजाविधिः 339

महाव्याहृतिहोमः 359

विषयः	पृष्ठा
व्रतनिरूपणम्	360
प्रजापत्यसमानि	365
कृच्छ्रपादकृच्छ्रार्धपादोनकृच्छ्राः	365
ब्रह्मकूर्च्चः	366
चान्द्रायणम्	368
व्रतप्रतिनिधिः	374
दानप्रतिग्रहे कर्त्तव्यतानिर्णयः	376
विष्णुदैवतभूमिदानम्	378
प्रजापतिदैवतधान्यदानम्	379
प्रजापतिदैवततिलदानम्	380
सोमदैवतलवणदानम्	381
सोमदैवतदुग्धदधिदानम्	381
विष्णुदैवतघृतदानम्	381
वरुणदैवतगुडलवणेक्षवदानम्	382
प्रजापतिदैवतान्नदानम्	382
गन्धर्वदैवतताम्बूलदानम्	382
गन्धर्वदैवतगन्धद्रव्यादिदानम्	383
बृहस्पतिदैवतवस्त्रदानम्	383
विष्णुदैवतयज्ञोपवीतदानम्	384
विष्णुदैवतछत्रदानम्	384
उत्तानाङ्गिरोदैवतोपानद्दानम्	385
उत्तानाङ्गिरोदैवतकाष्ठपादुकादानम्	385
वरुणदैवतजलभाजनदानम्	386
विष्णुदैवतनानापात्रदानम्	387
वायुदैवतव्यजनदानम्	387
विष्णुदैवतरत्नदानम्	387
विष्णुदैवतालंकारदानम्	388
विष्णुदैवतगृहदानम्	388
प्रजापतिदैवतशय्यादानम्	389
प्रजापतिदैवतासनदानम्	390
रुद्रदैवतधेनुदानम्	390

विषयः	पृष्ठा
अलंकृतगवीदानम्	395
उभयतोमुखीदानम्	395
महाशृङ्गीदानम्	396
वैतरणीदानम्	396
यमदैवतमहिषीदानम्	398
सोमदैवतदुग्धदधिदानम्	399
दशमहादानानि	399
कनकदानम्	399
अश्वदानम्	400
तिलपुरुषदानम्	401
गजदानम्	403
दासीदानम्	404
रथदानम्	405
शकटदानम्	406
महागृहदानम्	406
विपुलगृहदानम्	408
अनुपकरणगृहदानम्	408
कन्यादानम्	409
गोचर्मभूमिदानम्	410
सोपकरणगृहदानम्	412
कपिलाधेनुदानम्	413
पूर्णचक्रदानम्	414
कालचक्रदानम्	415
विष्णुदैवतदीपदानम्	416
पाकदानम्	417
विद्यादानम्	419
कालपुरुषदानम्	419
लोहदण्डदानम्	421
नारदीये सालग्रामदानविधिः	421
हिरण्यकूष्माण्डदानविधिः	422
पद्मपुराणस्य कर्मविपाकोक्तपुत्रहीनतानिदानम्	425

विषयः पृष्ठा
बौधायनोक्तकूष्माण्डदानविधिः 425
बौधायनोक्तमेषदानविधिः 431
शिवसम्प्रदानकानि 433
हरिसम्प्रदानकानि 434
दानद्रव्यदैवतानि 435
प्रतिग्रहनिर्णयः 436
मूल्याध्यायज्ञानम् 438
मकरतण्डूलसाधनम् 438
होमद्रव्यपरिमाणम् 439

इति कृत्यकौमुद्याः विषयक्रमः समाप्तः ।

परिशिष्टम्

(क) कृत्यकौमुद्यामुद्धृतग्रन्थाः ग्रन्थकराश्च
(ख) सहायकग्रन्थसूची

—*—

धर्मशब्दार्थः

"धर्मो विश्वस्य जगतः प्रतिष्ठा। लोके धर्मिष्ठं प्रजा उपसर्पन्ति। धर्मेण पापमपनुदन्ति। धर्मे सर्वं प्रतिष्ठितम्। तस्माद् धर्मं परमं वदन्ति॥"

(तै. आर. १० ६३, महानारायणोपनिषत्)

विश्वसंसारवासिनां जनानामभ्युदयनिःश्रेयससिद्ध्यर्थं जगति राजमानस्य धर्मस्य महती प्रतिष्ठा। स्वावयवार्थप्रतिपादकत्वेऽपि धर्मशब्दः भारतीयानां प्राणभूतवेदस्य बहुत्र बहुष्वर्थेषु प्रयुक्तः। वैदिककाले नराः यज्ञैर्देवान् सन्तोष्य धर्ममार्गे आसन्। देवानां सन्तोषाय यज्ञान् विधाय धर्ममार्गं दृढीचक्रुः। ततस्तदानीं यज्ञ एव मुख्यः धर्म आसीत्[1]। ऋग्वेदे[2] धर्मन् शब्दः प्रायशः धारणार्थे पालनार्थे च पुंलिंगे एव प्रयुक्तः। यजुर्वेदे[3] धर्मन् शब्दः धारणार्थे [4]धारकार्थे च दृश्यते।

1- यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। शु. यजु. (३१-१६)

2- इममञ्जस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनम्।

ऋग्. (१० - ९२ -२)

त्वे धर्माण आसते जुहूभिः सिञ्चतीरिव॥ ऋग्. (१०-२१-३)

3- मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्ट्यै
यजमानस्य परिधिरस्यग्निरिड ईडितः॥ वाज. स. (२-३)
उद्दिवं स्तभानान्तरिक्षं पृण दृंहस्व पृथिव्यां द्युतानस्त्वा मारुतो मिनोतु
मित्रावरुणौ ध्रुवेण धर्मणा॥ वाज. स. (५-२७)

4- पितुं नु स्तोषं महो धर्माणं तविषीम्॥ शु. यजु. (३४-७)

ऋग्वेदे यजुष्यपि[5] बहुषु स्थलेषु धार्मिकविधिषु क्रियासंस्कारेषु च धर्मशब्दः नपुंसकलिङ्गेऽपि प्रयुक्तः।

[6]अथर्ववेदे धर्मशब्दः धार्मिकक्रियाजनितगुणार्थे प्राप्यते। एते धर्मस्य गुणाः खलु मानवसमाजस्य विकाशनस्य बीजम्। अनन्तरं ब्राह्मणग्रन्थेष्वपि धर्मशब्दः बहुवारं प्रयुक्तः। तत्र [7]ऐतरेयब्राह्मणे धर्मशब्दः सकलधार्मिककृत्येषु व्यवहृतः। [8]छान्दोग्योपनिषदपि धर्मस्य महत्त्वपूर्णमर्थं व्यनक्ति। तदनुसारं धर्मः यज्ञाध्ययनदानेषु अभिहितः। ताश्च दानादिशाखाः नैष्ठिकब्रह्मचारि-गृहस्थवानप्रस्थाख्यमाश्रमत्रयमभिव्याप्य तिष्ठन्ति। अत्र पुनः धर्मशब्दः आश्रमाणां विलक्षणकर्त्तव्येषु संकेतितः। [9]तैत्तिरीयोपनिषद्यपि धर्मशब्दः नियमाचरणाय निर्दिष्टः। एवमेवाऽसौ समयानुसारं परिवर्त्तितो भूत्वा अन्ते च मानवस्य विशेषाधिकारेषु, कर्त्तव्येषु, नियमेषु, आचारविधौ च प्रसिद्धो जातः।

5- त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः।
अतो धर्माणि धारयन्। ऋग्. (१-२२-१८)
समिधानः सहस्रजिदग्ने धर्माणि पुष्यसि।
देवानां दूत उक्थ्यः। ऋग्. (५-२६-६)
तानि धर्माणि प्रथमान्यासन्॥ शु. यजु. (३१-१६)

6- ऋतं सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च।
भूतं भविष्यदुच्छिष्टे वीर्यं लक्ष्मीर्बलं बले॥ अथर्व. (९ ९-१७)

7- धर्मस्य गोप्ताजनीति तमभ्युत्क्रुष्टमेवं विदभिषेक्ष्यन्नेतयार्चाभिमन्त्रयेत।
ऐत. ब्रा. (७-१७)

8- त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एवेति द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्। सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति॥ छान्दो. उप (२-२३)

9- सत्यं वद धर्मं चर। तैत्ति. उप. (१-११)

अनन्तरं स्मृतिकाले धर्मशब्दः पूर्णविकाशमभजत । तत्र सर्वत्र धर्मशब्दः पुंलिङ्गे एव दर्शितः । तस्यैव विशेषव्याख्यानाद् धर्मशास्त्रमिति नाम । तस्मिन् काले परमाराध्यः वैदिककालस्य पूज्यः स्मार्त्तधर्मस्य प्रतिष्ठापकः मनुः [10]धर्मस्य सुस्पष्टं गाम्भीर्यपूर्णमर्थं प्राकाशयत् । तस्य मतमिदं यत्-विद्वांसः विचारपूर्वकं यानि कर्माणि नित्यमाचरन्ति तान्येव धर्मपदेनाख्यायन्ते । वानप्रस्थाश्रमप्रकरणेऽपि [11]मनुः साधारणधर्मस्य परिभाषायां धृत्यादीन् दशगुणान् धर्मस्य लक्षणत्वेन व्याचष्टे ।

स धर्मस्य मूलत्वेन वेदं स्वीकृत्यापि पुनः स्मृतिसदाचारात्मतोषान् त्रीन् धर्ममूलत्वेन प्रत्यपादयत् । एतेषां चतुर्णां धर्ममूलानां प्रामाण्यं स्वीकृत्य सर्वे स्मृतिकाराः धर्मलक्षणानि कृतवन्तः । मनुमहर्षेरनन्तरं स्मृतिकारेषु सम्मानास्पदः स्मृतिकारः याज्ञवल्क्यः[12] धर्मलक्षणे तान्येव प्रमाणीकृतवान् । [13]वसिष्ठोऽपि श्रुतिस्मृत्योः धर्मे प्रथमतः प्रामाण्यं स्वीकृत्य अनन्तरं शिष्टाचारमपि गृहीतवान् । [14]आपस्तम्बबोधायन[15]हारीत[16]-गौतमा[17] अपि धर्मे श्रुतेः प्राथम्यं स्वीकृत्य अनन्तरं स्मृतेः प्रामाण्यं

10- विद्वद्भिः सेवितः सद्भिः नित्यमद्वेषरागिभिः ।
हृदयेनाऽभ्यनुज्ञातः यो धर्मस्तं निबोधत ॥ मनुः (२-१)

11- धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥ मनुः (६-९२)

12- श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥ याज्ञ. (१-७)

13- श्रुतिस्मृतिविहितो धर्मः । तदलाभे शिष्टाचारः प्रमाणम् ।
वसि ध. (१/३-४)

14- धर्मज्ञसमयः प्रमाणं, वेदाश्च । आप. धर्म. (१-१ १,२)

15- उपदिष्टो धर्मः प्रतिवेदम् । स्मार्त्तो द्वितीयः । तृतीयः शिष्टाचारः ।
बोधा. धर्म. (१-१-१-१, ३, ४)

16- श्रुतिप्रमाणको धर्मः । तदभावे स्मृतिः । हारीतः मन्व. मु, मनु. (२-१)

17- वेदो धर्ममूलम् । तद्विदाञ्च स्मृतिशीले । गौ. धर्म. (१-१ १, २)

स्वीकृतवन्तः । गौतमस्तु शीलमपि तृतीयम् । एषु कश्चिदपि आत्मतुष्टिं प्रमाणत्वेन न स्वीकरोति । [18]विश्वामित्रः आगम-वेदविदामाचरणं धर्मत्वेन वर्णयति । [19]विष्णु [20]वृहस्पति [21]याज्ञवल्क्य[22]देवल[23]शङ्खलिखित-[24]यमाः मनूक्तं साधारणधर्ममनुसृत्य धर्मलक्षणं व्याख्यान्ति । अन्येऽपि शास्त्रकाराः धर्मस्य महत्त्वमनुभूय तस्य लक्षणाकरणेन शास्त्रस्य मर्यादाहानिभीत्या धर्मस्य लक्षणं कृतवन्तः । तेषु वेदमीमांसाकारो [25]जैमिनिः स्वशास्त्रस्य प्रारम्भे एव धर्मलक्षणं कृतवान् । तन्मते वैदिकमन्त्रोपदेशानुष्ठितकर्मभिरुत्पादितं पुण्यमेव धर्मः ।

18- यमार्याः क्रियमाणं हि शंसन्त्यागमवेदिनः ।
स धर्मो यं विगर्हन्ति तमधर्मं प्रचक्षते ॥ विश्वामित्रः, कृ. र. (पृ-७)

19- क्षमा सत्यं दमः शौचं दानमिन्द्रियनिग्रहः ।
अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया ॥
आर्जवं लोभशून्यत्वं देवब्राह्मणपूजनम् ।
अनभ्यसूया च तथा धर्मः सामान्य उच्यते ॥ विष्णुः, कृ. र. (पृ.-१४)

20- दया क्षमाऽनसूया च शौचानायासमङ्गलम् ।
अकार्पण्यास्पृहत्वञ्च सर्वसाधारणानि च ॥ बृहस्पतिः, कृ. र. (पृ. १४)

21- इज्याचारदमाऽहिंसादानस्वाध्यायकर्मणाम् ।
अयं तु परमो धर्मो यद् योगेनात्मदर्शनम् ॥ याज्ञ. (अ. १-८)

22- शौचं दानं तपः श्रद्धा गुरुसेवा क्षमा दया ।
विज्ञानं विनयः सत्यमिति धर्मसमुच्चयः ॥ देवलः, कृ. र. (पृ.-१४) ।

23- देशः काल उपायो द्रव्यं श्रद्धा पात्रं त्याग इति समस्तेषु धर्मोदयः साधारणोऽन्यथा विपरीतः । शंखलिखितौ, कृ. र. (पृ.-४१)

24- वेदाः प्रमाणं स्मृतयः प्रमाणं, धर्मार्थयुक्तं वचनं प्रमाणम् ।
यस्य प्रमाणं न भवेत् प्रमाणं कस्तस्य कुर्यात् वचनं प्रमाणम् ॥
यमः, कृ. र. (पृ.-४०)

25- चोदना लक्षणोऽर्थः धर्मः । पूर्वमी. (१-१२) ।

[26]वैशेषिकशास्त्रमपि येन कर्मणा इहलौकिक पारलौकिक-कल्याणसिद्धिः भवति स एव धर्म इति धर्मलक्षणं बबन्ध। [27]योगशास्त्रमपि धर्मप्रभावादेव विश्वस्य स्थितिः सम्भाव्यते इति प्रतिपादयति। शास्त्रोपदिष्टं यागादिकर्म एव धर्मः इति केचित्। विहितकर्मजन्योऽपूर्वविशेषो धर्म इत्यपरे विहितकर्मजन्यापूर्वजन्यो धर्म इति अन्ये। विधेयत्वेनोपदिष्टमपि धर्मः यथा ब्रह्मचारिधर्मः, विहितानुष्ठानं निषिद्धवर्जनं च धर्म इति शास्त्रकाराः।

अनन्तरं पुराणकाले विशेषतः महाभारतकाले धर्मस्य प्रशंसाभिवृद्धिरभवत्। सर्वेषु पुराणेषु धर्मः मुख्यध्येयरूपेण स्तुतिमवाप। महाभारतस्यारण्यक[28]वन[29]कर्ण[30]शान्त्यनु[31]शासनपर्वसु धर्मस्वरूपं विवेचितम्। मत्स्यपुराण[32] गरुडपुराण[33] भागवतादिषु[34] आत्मतुष्टि विनाऽन्यानि त्रीणि

26- अथातो धर्मं व्याख्यास्यामः। यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।
वैशे. सू. (१-१-१/२)

27- निरालम्बा निराधारा विश्वाधारा वसुन्धरा।
यच्चावतिष्ठते तत्र धर्मादन्यन्न कारणम्। यो. शा. (४ ८)
आप्लावयति नाम्भोधिराश्वासयति चाम्बुदः।
जन्महिंसा प्रभावोऽयं ध्रुवं धर्मस्य नेतरः ॥ यो. शा (४-९६)

28- वेदोक्तः परमो धर्मो धर्मशास्त्रेषु चापरः।
शिष्टाचीर्णश्च शिष्टानां त्रिविधं धर्मलक्षणम्॥ महाभा. आर. (११८-७८)

29- इज्याध्ययनदानानि तपः सत्यं क्षमा दमः।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः॥ महाभा. वन. (२-७४)
आनृशंस्यं परो धर्मः॥ वनपर्व (३७३-७६)

30- धारणाद् धर्ममित्याहुः धर्मो धारयते प्रजाः॥ कर्णपर्व (४९-५०)

31- सदाचारः स्मृतिर्वेदास्त्रिविधं धर्मलक्षणम्।
चतुर्थमर्थमित्याहुः कवयो धर्मलक्षणम्॥ महाभा. शान्ति. ८६ अध्याये

32- धर्मेण धारणे धातुर्महत्त्वे चैव उच्यते॥
अधारणे महत्त्वे वा धर्मः स तु निरूप्यते॥

33- श्रुत्युक्तः परमो धर्मो स्मृतिशास्त्रगतोऽपरः।
शिष्टाचारेण शिष्टानां त्रयो धर्माः सनातनाः॥ गरुड.पु. (१-२०५-४)

34- वेद प्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः॥ भाग. (६-१-४०)

मनूक्तानि प्रमाणानि धर्मलक्षणेऽन्तर्भावितानि । पुनश्च केचन धारणाद् धर्म इति लक्षणं कुत्रापि लक्षयन्ति ।

[35]अन्यत्रापि धर्मेण स्वर्गफलं तथाऽधर्मेण नरकफलं निर्दिष्टम् । स्मृतिकालानन्तरं तत्परवर्तिभिः निबन्धकारैः ऋषीणां धर्मलक्षणानि सम्यग् व्याख्याय तेषां निगूढोऽर्थः प्रकाशितः ।

कोशेष्वपि धर्मशब्दः बहुधा व्याख्यातः । श्रौत-स्मार्त्त-कर्मजन्यः शुभादृष्टः धर्मः । [36]केचिदपि विहितक्रियया यः साध्यते सः धर्म इति व्याख्यान्ति । धर्मशब्दस्य जीवाचार-वस्तु-गुण-रूप-स्वभाव-यागाद्यहिंसा-न्यायोप-निषद्यम-सोमाध्यायी-सत्सङ्ग-दानाद्यर्थेषु व्यवहारः दृश्यते ॥

[37]अमरसिंहस्तु विश्वं धर्मः धारयति, जनाः धर्मं धारयन्ति इति धर्मशब्दं व्युत्पादितवान् । [38]मेदिनीकोष[39]हैमकोषयोस्तु पुण्यार्थे धर्मशब्दः प्रयुक्तः ।

धर्मस्य मुख्यपुरुषार्थत्वम्

हिन्दुधर्मस्य चरमोद्देश्यं पुरुषार्थचतुष्टयप्राप्तिः । पुरुषस्याभिलषित-वस्तून्येव पुरुषार्थपदेनोच्यन्ते । ते च पुरुषार्थाः शास्त्रेषु धर्मार्थकाममोक्षभेदेन चतुर्द्धा [40]प्रतिपादिताः । अपौरुषेयस्य वेदस्यानुमापकतया स्मृत्यादीनामपि वेदानुकरणेन धर्मे प्रामाण्यात् धर्मशास्त्रं पुरुषार्थचतुष्टयस्य प्रमुखं प्रतिपादकम् ।

---

[35] धर्मेण गमनमूर्ध्वं गमनमधस्तादधर्मेण ।

[36] शास्त्रविहितकर्मानुष्ठानजन्ये भाविफलसाधनभूते शुभादृष्टे श्रुतिस्मृति-भ्यामुदितं यत् स धर्मः । विहितक्रियया साध्यो धर्मः । (शब्दस्तोममहानिधिः)

[37] धरति विश्वम् इति । धरति लोकान् ध्रियते वा जनैरिति ।
अमर. (१-६-३)

[38] धर्मोऽस्त्री पुण्य आचारे स्वभावोपमयोः क्रतौ ।
अहिंसोपनिषन्न्याये नाधनुरभिसोमपे ॥ इति मेदिनी (१०९-१६)

[39] सुकृते पावने धर्मे । इति हैमको. (२-३७५)

[40] विद्यन्ते धर्मादयः पुरुषार्थाः यैस्ते वेदाः । इति बह्वृक्प्रातिशाख्यम् ।

तेषु सर्वेषु पुरुषार्थेषु जीवनस्य मार्गप्रवर्त्तकरूपेण तथा नियन्त्रकरूपेण धर्म एव सर्वथा वरीवर्त्ति । जीवनस्य सर्वेषु कालेषु धर्मस्य प्रभावः साक्षात् परम्परया वा वर्त्तते । अतः पुरुषार्थचतुष्टयेषु धर्मस्य श्रेष्ठत्वं सर्वदा स्वीक्रियते । धर्मेणैवार्थकामौ सिद्धयतः । मोक्षरूपत्रिविधदुःखानामात्यन्तिकनिवृत्तिरपि धर्मेणैव भवति । अतः [41]वैशेषिकशास्त्रानुसारं येनाभ्युदयस्य अर्थकामयोः निःश्रेयसस्य मोक्षसिद्धिः भवति स एव धर्मः । पुरुषार्थेषु पुरुषस्य प्रवृत्तिः सुखायैव भवति । जीवमात्रस्य सुखमत्यन्ताभीष्टं, तस्मात् धर्मार्थकामाः पुरुषार्थाः प्रथमत आहरणीयाः । अनन्तरमनायासेनैव मोक्षः सिद्धयति । एतेषां पुरुषार्थानां नियन्त्रकः धर्मः । सः मनुष्यं नियन्त्रितं कृत्वाऽन्येषु पुरुषार्थप्राप्तिषु[42] कारणं भवति । अर्थः यद्यपि अनर्थस्य कारणं तथापि धर्मेणोपार्जितार्थः अनिन्द्य एवो मनुष्यं सर्वविधानन्देन सयोज्य तस्य परवर्त्ति-जीवनमपि सुखमय करोति धर्मशास्त्रम् । अतः मनुरपि कामाख्यं पुरुषार्थं मनुष्यस्योपभोगाय वर्णयित्वा तस्मिन्ननिमज्याविश्रृङ्खलितजीवनधारणायोपदिशति ।

पुनश्च सकामभावेन धर्माचरणं न कृत्वा निष्कामभावेन कुर्यात् । अर्थोपार्जनं त्यागाय, कामसेवनं पुनः शरीररक्षणायैवाऽऽचरणीयम् । एतेषां धर्मार्थकामानां पुरुषार्थत्रयाणां विशुद्धाचरणेन मोक्षप्राप्तिः नाम चतुर्थः पुरुषार्थः[43] सिद्धयति । चतुर्वर्गे अर्थकाममोक्षाणां पुरुषार्थानां मूलः धर्मः । धर्मकामयोः सिद्धयेऽर्थः आवश्यकः । शरीरस्य मुख्यधर्मसाधनस्य उत्पादनाय कामोऽप्युपादेयः ।

41- यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः ॥ वैशे. (१-२)

42- धर्मात् सञ्जायते ह्यर्थो धर्म्मात् कामोऽभिजायते ।
धर्म्मादेव परं ब्रह्म तस्माद् धर्मं समाश्रयेत् ॥ हे. व्रत. (१-१२)

43- तत्रापि मोक्ष एवार्थ आत्यन्तिकतयेष्यते ।
त्रिवर्गोऽर्थो यतो नित्यं कृतान्तभयसंयुतः ॥ भाग. (४-२२-३५)

पुरुषार्थचतुष्टयस्य विशदविवरणं धर्मशास्त्रे एव प्राधान्येन प्राप्यते । सर्वेषु विषयेषु पुरुषार्थाः प्रधानीकृत्य वर्ण्यन्ते । यतः धर्मशास्त्रं मनुष्यस्य शृंखलितजीवनधारणायैवोपदिष्टम् अतः मनुष्यस्य परमाकाङ्क्षितपुरुषार्थानां वर्णनं तत्रैव सान्निविष्टम् । प्रथमतः 'सत्यं वद, धर्मं चरे'त्यादिना धर्मस्य तथा शरीरस्य विना क्लेशं सत्यपथे स्थित्वा अवृत्तिमिथ्यादिवर्जनपूर्वकं धनार्जनं विधेयमित्यादिनाऽर्थस्य, पर्वकालं विहाय स्त्रियां रतिवासनां प्रपूरयेदित्यादिना कामस्य पुनश्च सर्वमात्मनि सम्पश्येदित्यादिना मोक्षस्य वर्णनं विद्यते ।

धर्मशास्त्रे एते पुरुषार्थाः आश्रमचतुष्टयेषु मनोरमशैल्या प्रतिपादिताः । यथा धर्मपालनं ब्रह्मचर्याश्रमे मुख्यतया विहितम् । गृहस्थाश्रमे धर्म्योपायेनार्थकामयोरर्जनं सेवनञ्च विहितम् । पुनश्च वानप्रस्थाश्रमे संन्यासाश्रमे च मोक्षे चित्तं निवेश्य कामार्थौ परित्यज्य तत्र च धर्मपालनमुपदिष्टम् । निरतिशयानन्दलक्षणस्यात्यन्तिकदुःखनिवृत्तिलक्षणस्य मोक्षस्यैव निरुपाधीच्छाविषयत्वात् पुरुषेणाभ्यर्थ्यमानतया मुख्यं पुरुषार्थत्वम् । तदा तु तस्य मोक्षस्य धर्म एव साधनरूपेणाऽऽपतति । तत्रापि धर्ममात्र यथायोगं सर्वेषां साधनम् । अतः प्रवृत्तिनिवृत्त्यात्मकतया [44]द्विविधस्यापि धर्मस्य पुरुषार्थसाधनतोक्ता ।

अर्थकामयोः प्रवृत्तिलक्षणकधर्मात् तथा मोक्षस्य निवृत्तिलक्षणकधर्मादेवोत्पत्तिः । धर्मादेवैहलौकिकं पारलौकिकं च सुखं जायते । अतः पुरुषार्थचतुष्टयप्राप्तये धर्मशास्त्रमेव सर्वथाऽऽदरणीयं सर्वेषाम् ।

धर्मस्य महत्त्वं सर्वजनविदितम् । अनियतेऽपि संसारे धर्मस्यैव नियतत्वं सर्वैरनुभूयते । अतः तस्य प्रतिपादकशास्त्रत्वेन धर्मशास्त्रस्यापि महत्त्वं सर्वथा अत्यन्तं राजते । धर्मशास्त्रमेव मानवचारित्रस्य नियामकम् । धर्मशास्त्रस्योद्देश्यं प्रत्यक्षसिद्धम् । मनुष्यः स्वाभिलाषितपदार्थान् यस्मात् प्राप्तुं शक्नोति तस्य प्रतिपादनम् एव धर्मशास्त्रस्योद्देश्यम् । मनुष्यस्य

44- प्रवृत्तिलक्षणे धर्मे फलमभ्युदयो मतः ।
निवृत्तिसंज्ञके धर्मे फलं निःश्रेयम मतम् ॥
मनुरपि- प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥

९ ॥

मृत्युरवश्यम्भावी, परन्तु धर्मस्य मृत्युर्नास्ति। अतः स एव सर्वेषां कर्मफलं विचारयति। परलोकेऽपि कर्मानुसारं फलं ददाति। अतः परलोकविश्वासः हिन्दुधर्मस्य मुख्यः आधारः। मनुष्यस्य मरणकाले यद्यपि प्रियजनः न कोऽपि [45] सहायको भवति तथापि असौ धर्मः एक एव तमनुसरति इत्येव धर्मस्य वैशिष्ट्यम्। वेदोपनिषद्यपि धर्मस्य माहात्म्यं प्रतिपादितम्। संसारः धर्मेणैव चलति। धर्मं विना विश्वस्य स्थितिरपि न सम्भवति। धर्म एव मनुष्यं दुष्कर्मभ्यः मद्यपानस्तेयादिभ्यः वारयति, सुकर्मसु व्रतोपवासदानादिषु च प्रवर्त्तयति। पुण्यार्जनाय प्रवर्त्त्य तं सन्मार्गायोपदिशति। स्वस्वकर्त्तव्येषु च मनुष्यान् स्थापयति। धर्मस्यैव प्रभावेण हिंस्राः न च हिंसन्ति। श्रुतिस्मृतिप्रतिपादितधर्माणामाचरणं कृत्वा मानवः परत्रेह च सुखस्याधिक्यं फलं प्राप्तुमर्हति। [46]स्कन्दपुराणमपि धर्मस्य प्रशंसां कृत्वा धर्माद्राज्यवनसुखादीनां प्राप्तिर्भवतीति प्रतिपादयति। [47]हेमाद्रौ धर्मादेव पुरुषार्थचतुष्टयसिद्धिः वर्णिता। [48]धर्मः रक्षितो रक्षकं रक्षति। यः धर्महानिं करोति धर्मोऽपि तं नाशयति। अतः सर्वथा [49]धर्मयुक्तकर्माणि विद्वानाचरेदिति शास्त्रकाराणामादेशः॥

45- एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्वमन्यद्धि गच्छति। मनु. (८-१७)

46 धर्माद्राज्यं धनं सौख्यमधर्माद् दुःखसम्भवः।
तस्माद् धर्मं सुखार्थाय कुर्यात् पापञ्च वर्जयेत्॥
स्क. पु., हे. व्र. (१-१४)

47- धर्मात् सञ्जायते ह्यर्थो धर्मात् कामोभिजायते।
धर्मादेव परं ब्रह्म तस्माद् धर्मं समाश्रयेत्॥ हे. व्र. (१-१२)

48 धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।
तस्माद्धर्मो न हन्तव्यो मा नो धर्म्मो हतोऽवधीत्॥ मनु. (८- ५)

49- धर्मादपेतं यत्कर्म यद्यपि स्यान्महाफलम्।
न तत् सेवेत मेधावी शुचिः कुशतिलं यथा॥ व्यास, हे. व्र. (१-५)
धर्मे मतिर्भवतु वः सततोत्थितानां।
स ह्येक एव परलोकगतस्य बन्धुः॥ महाभा, आदि. (२-३९१)

धर्मविभागः

पूर्वप्रतिपादितः नानालक्षणविशिष्टः धर्मः आचरणदृष्ट्या बहुभिः बहुधा विभक्तः। धर्मः आचरणसंहितासंज्ञार्हत्वाद् द्वेधा विभज्यते। [50]मत्स्यपुराण[51]माधवाचार्यादयः धर्मस्य श्रौतस्मार्त्तभेदेन विभागद्वयं स्वीकुर्वन्ति। श्रौतधर्मे वैदिकसंहिता - ब्राह्मणग्रन्थेषु वर्णितानां दर्शपौर्णमासादियज्ञानां समावेशं कुर्वन्ति। स्मार्त्तधर्मे विशेषतः स्मृतिप्रतिपादितान् वर्णाश्रमसम्बन्धि शौचाचमननियमानन्तर्भावयन्ति। [52]बौधायनधर्मसूत्रेऽनुशासन[53] शान्ति[54] पर्वादिषु च धर्मः वेदस्मृतिशिष्टागमप्रतिपाद्यरूपेण त्रेधा वर्णितः। [55]हेमाद्रि-

---

50- दाराग्निहोत्रसम्बन्धमिज्याश्रौतस्य लक्षणम्।
स्मार्त्तो वर्णाश्रमाचारो यमैश्च नियमैर्युतः॥ म. पु. (१४४-३०, ३१)

51- अग्न्याधानादिपूर्वकोऽधीतप्रत्यक्षवेदमूलो दर्शपौर्णमासादिः श्रौतः।
अनुमितपरोक्षशाखामूलः शौचाचनादिः स्मार्त्तः॥
परा माध. (१-६४)

52- उपदिष्टो धर्मः प्रतिवेदम्। स्मार्त्तो द्वितीयः। तृतीयः शिष्टागमः॥
बौ. ध. सू. (-१ , ४)

53- वेदोक्तः परमो धर्मः स्मृतिशास्त्रगतोऽपरः।
शिष्टाचीर्णः परः प्रोक्तस्त्रयो धर्माः सनातनाः॥ अनु. शा. (१४१-६५)

54 वेदोक्तः परमो धर्मः धर्मशास्त्रेषु चापरः।
शिष्टाचारश्च शिष्टानां त्रिविधं धर्मलक्षणम्॥ शान्तिपर्व (३५४ ६)

55- वर्णधर्मः स्मृतस्त्वेक आश्रमाणामतः परम्।
वर्णाश्रमस्तृतीयस्तु गौणो नैमित्तिकस्तथा॥
वर्णत्वमेकमाश्रित्य यो धर्मः सम्प्रवर्त्तते।
वर्णधर्मः स उक्तस्तु यथोपनयनं नृप॥
आश्रमश्च समाश्रित्य यो धर्म सम्प्रवर्त्तते।
स खल्वाश्रमधर्मस्तु भिक्षादण्डादिको यथा॥
वर्णत्वमाश्रमत्वञ्च योऽधिकृत्य प्रवर्त्तते।
स वर्णाश्रमधर्मस्तु स्यान्मौञ्जी मेखला तथा॥
यो गुणेन प्रवर्त्तेत गुणधर्मः स उच्यते।
यथा मूर्धाभिषिक्तस्य प्रजानां परिपालनम्॥

(अग्रेऽपि)

[56]विज्ञानेश्वरादयः धर्मं भविष्यपुराणदृष्ट्या षोढा विभजन्ति । यथा–वर्णधर्मः आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्च । तत्र वर्णधर्मः यथा- ब्राह्मणो नित्य सुरां विवर्जयेत् । आश्रमधर्मः ब्रह्मचारी नित्यं दण्डं गृह्णीयात् ।

वर्णाश्रमधर्मः-ब्राह्मणः ब्रह्मचारी पलाशदण्डं गृह्णीयात् । गुणधर्मः-राज्ञः प्रजापालनम् । निमित्तधर्मः- विहितस्याननुष्ठाने प्रतिषिद्धकर्मकरणे च प्रायश्चित्तम् । साधारणधर्मः अस्तेयाहिंसादयः । साधारणधर्मोऽपि [57]मनु-[58]विष्णु [59]महाभारतादिषु विस्तृततया वर्णितः । [60]मेधातिथिः भविष्योक्त्यनुसारं सामान्यधर्मं विहाय पञ्चधा प्रतिपादयति । [61]मनुः लोकप्रचलितधर्मं महत्त्वमर्पयति । अतः लोकप्रसिद्धं धर्मं [62]केचन बहुधा प्रतिपादयन्ति ।

निमित्तमेकमाश्रित्य यो धर्म्मः सम्प्रवर्त्तते ।
नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा ॥
साधारणधर्मोऽपि महाभारते विष्णुधर्मसूत्रे च वर्णितः ॥
हेमाद्रि. व्रतखण्ड. (१-४)

56- मिता., या. स्मृ. (१-१)

57- अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रह ।
एतं सामासिकं धर्मं चातुर्वर्ण्योऽब्रवीन्मनुः ॥ मनुस्मृ. (१०-६३)

58- क्षमा सत्यं दमः शौचं दानमिन्द्रियसंयमः ।
अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया ॥
आर्जवं लोभशून्यत्वं देवब्राह्मणपूजनम् ।
अनभ्यसूयता तथा धर्मः सामान्य उच्यते ॥ विष्णु. स्मृ. (२-१६, १७)

59- श्राद्धकर्म्म तपश्चैव सत्यमक्रोध एव च ।
स्वेषु दारेषु सन्तोषः शौच नित्यानसूयता ॥ महाभारते

60- मेधातिथिभाष्य । मनु. स्मृ. (२-२५)

61- अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु । याज्ञ. स्मृ. (१-१५६)

62- धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ।
द्वितीयं धर्मशास्त्रं तु तृतीयं लोकसंग्रहः ॥ सत्सि. (पृ - ४६८)

[63]मनुस्मृत्यानु[64]शासनिकपर्व[65]देवीभागवत[66]बृहस्पत्यादयः देशधर्मजातिधर्मकुलशर्मगुणधर्मवयोधर्मशरीरधर्मकालधर्मापद्धर्मग्राम्यधर्मयुगधर्मादीनां विभागं दर्शयन्ति ।

एते धर्मा कदाचिदपि परिवर्त्तिताः सन्तः युगधर्मादिवत् वैरूप्यं धारयन्ति । युगधर्मा अपि कृतयुगे यथावदनुष्ठिता भवन्ति, युगसामर्थ्येन त्रेतादिषु क्रमेण क्षीयमाणाः धर्माः कलियुगावसाने सर्वात्मना विनष्टाः भवन्ति । एते धर्माः लोकाचाररूपाः न कदापि अनादरणीयाः भवेयुः ।

एतेषु नानाविधेषु धर्मविभागेषु वर्त्तमानेषु लोकाचारनिमित्तमावश्यकनियमाः प्राधान्येन एषु धर्मेष्वन्तर्भुक्ताः । मुनिभिः प्रतिपादितेष्वाश्रमेष्वेव एते सर्वे धर्माः अन्तर्भाविताः । तथापि गौतमबौधायनादयः जातिदेशधर्मादीनां परस्परविप्रतिपत्तिनिवारणाय तेषां पृथक् स्वरूपं स्पष्टीकृतवन्तः ।

63- देशधर्म्मान् जातिधर्म्मान् कुलधर्मांश्च शाश्वतान् ।
पाखण्डगुणधर्म्मांश्च शास्त्रेऽस्मिन्नुक्तवान्मनुः ॥ मनु (१-११८)

64- धर्माः बहुविधा लोके श्रुतिभेदमुखोद्भवाः ।
देशधर्माश्च दृश्यन्ते कुलधर्मास्तथैव च ॥

जातिधर्म्माः वयोधर्म्माः गुणधर्म्माश्च शोभने ।
शरीरकालधर्म्माश्च आपद्धर्म्मास्तथैव च ॥
एतद् धर्मस्य नानात्वं क्रियते लोकवासिभिः ॥
महाभारतस्यानुशासनपर्वणि, परा. माध. Vol I (पृ. ७४)

65- ग्रामधर्मा जातिधर्म्माः देशधर्माः कुलोद्भवाः ।
परिग्राह्या नृभिः सर्वैः नैव तान् लङ्घयेन्मुने ॥ देवीभाग (१-१-१७)

66- कृतेऽभूत् सकलो धर्मस्त्रेतायां त्रिपदः स्थितः ।
पादः प्रविष्टोऽधर्मस्य मत्सरः द्वेषसम्भवः ॥

धर्म्माऽधर्मौ समौ भूत्वा द्विपादौ द्वापरे स्थितौ ।
तिष्येऽधर्मस्त्रिभिः पादैः धर्मः पादेन संस्थितः ॥ परा. माध. (१-७५)

धर्मशास्त्रस्य शास्त्रत्वम्

धर्मस्य मूलं वेद एव । परन्तु धर्मादयः पुरुषार्थाः यतः विद्यन्ते स एव वेद इति व्युत्पत्त्या इतरपुरुषार्थानां वेदे वर्त्तमानत्वेऽपि धर्मस्य मुख्यतया वर्णनं विहितम् । अनन्तरं धर्मस्य विस्तृतवर्णनं धर्मशास्त्रे एव क्रियते । अतः तस्य धर्मशास्त्रं नाम । तस्यापरा संज्ञा स्मृतिः । अनयोः स्मृतिधर्मशास्त्रयोः नान्तरं महत् । यतः [67]मनुना वेदधर्मशास्त्रयोः भेदप्रदर्शनावसरे धर्मशास्त्रस्यैव स्मृतिपदवाच्यता प्रदर्शिता । तस्य धर्मशास्त्रस्य पुनः वेदस्मरणमाध्यमेन प्रतिपादितत्वात् स्मरन्ति वेदमनया इति स्मृतिः अथवा महर्षिभिः वेदार्थचिन्तनं स्मृतिरिति सिद्धमेव ।

याज्ञवल्क्योक्त्यनुसारं विद्यायाः चतुर्दशत्वे सिद्धे सति वेदातिरिक्ता अन्याः दशविद्याः स्मृतिशब्दरूपाः । ताः चतुर्दशविद्याः [68]याज्ञवल्क्येनाचाराध्याये प्रतिपादिताः । ताश्च "पुराणं ब्राह्मादि वक्ष्यमाणम्, न्यायः गौतमीयं काणादं कापिल पातञ्जलमिति चतुर्विधं प्रमाणादिनिरूपणशास्त्रं गौतमादिप्रणीतम् । मीमांसा जैमिनिप्रणीता कर्ममीमांसा, शाण्डल्यप्रणीता भक्तिमीमांसा, वादरायणप्रणीता ब्रह्ममीमांसा च ।

धर्मशास्त्रं च मनुयाज्ञवल्क्यादिप्रणीतम् । अङ्गानि शिक्षा, कल्पो, व्याकरणं, निरुक्त, छन्दो, ज्योतिषमिति । एतैरुपेताश्चत्वारो वेदाः । एतासां चतुर्दशविद्यानां स्वर्गाद्यपवर्गसाधनकर्मब्रह्मज्ञानानां स्थानानि धर्मस्य च निमित्तानि । अतएवैतेषां धर्मस्थानत्वमित्युक्तम् । [69]अङ्गिरास्तु शास्त्रीयज्ञानवर्जितं यत् किञ्चिदपि कर्म विचारपूर्वकं क्रियते तत्सर्वं बालकानां क्रीडेव

67- श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ॥ मनुः (२-१०)

68- पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ या. स्मृ. (१-३)

69- स्वाभिप्रायकृतं कर्म यत् किञ्चिद् ज्ञानवर्जितम् ।
क्रीडाकर्मेव बालानां तत्सर्वं निष्प्रयोजनम् ॥
आङ्गिरास्मृतिः उत्तराङ्गि. (१-१०)

निष्फलं भवतीति प्रतिपादयति । स्मृतिशब्दस्योक्त-दशविद्यावाचकत्वे प्रमाणं श्रुतिः स्मृतीति [70]याज्ञवल्क्यवचनमेव । अत्र स्मृतिपदस्य मन्वादिप्रणीत-धर्मशास्त्रमात्रपरत्वे पुराणन्यायेत्यादिना पूर्वोक्तवाक्येन सह विरोधो दुष्परिहर एव स्यात् । अत्र च श्रुतिः स्मृतीति पञ्चानामेव धर्ममूलत्वेन प्रतिपादनाद् एतादृशविरोधपरिहाराय चात्र स्मृतिपदेन दशानामपि विद्यानां ग्रहणस्यावश्याभ्युपेयत्वात् । अतएव व्याकरणस्मृतिः सांख्यस्मृतिरिति व्यवहारोपि सङ्गच्छते । सङ्गच्छते च स्मृतिप्रामाण्यनिरूपणप्रकरणे व्याकरणप्रामाण्यनिरूपणं जैमिनीयम् । एवं स्मृतिपदस्य विशेषतो ब्रह्ममन्वादिप्रणीतधर्मशास्त्रवाचकत्वमपि । अतः मनुना स्मृतिधर्मशास्त्रयोरैक्यं प्रदर्शितम् । पुनश्च याज्ञवल्क्यस्य चतुर्दशविद्याव्याख्यानावसरे [71]विष्णुपुराणं धनुर्वेदायुर्वेदादीनामपि विद्यात्वं स्वीकृत्याष्टादशत्वं साधयति । अतः आयुर्वेदादीनां चतसृणां विद्यानामपि न स्मृतित्वं नापि श्रुतित्वशङ्का । यतः विद्यानामष्टादशत्वेऽपि स्वर्गापवर्गसाधनकर्मब्रह्मज्ञानैकस्थानभूतानां धर्मप्रधानानामेव विद्यानां याज्ञवल्क्यमहर्षिणा चतुर्दशतया परिगणनम् । विष्णुपुराणे तु दृष्टार्थप्रधानाश्चतस्रायुर्वेदादिविद्या अपि सम्मिल्याष्टादशतया परिगणिता इत्यविरोधः । याज्ञवल्क्योक्तचतुर्दशविद्याः प्रधानतः धर्ममेव प्रतिपादयन्ति परन्तु आयुर्वेदाद्यास्तु चतस्रोऽनुषङ्गतो धर्मं प्रतिपादयन्त्योऽपि प्राधान्यादर्थकामावेव प्रतिपादयन्तीति सर्वबुधजनप्रसिद्धम् । एतत्सूचनायैव याज्ञवल्क्योक्तवाक्येन धर्मस्य च चतुर्दश स्थानानीत्युक्तम् ।

प्राधान्येन धर्मप्रतिपादकान्येव शास्त्राणि स्मृतिपदेनोच्यन्ते क्वचिदव्यवहृतत्वाच्चार्थकामप्रधानानां चरमाणां चतसृणां न स्मृतित्वम् । न हि श्रुतिभिन्नत्वमात्रं स्मृतित्वे प्रयोजकम् । काव्यादीनामपि स्मृतित्वप्रसङ्गात् ।

70- याज्ञ. स्मृ. (१-७)

71- अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
'धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश ॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः ।
अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव ताः ॥ वि. पु.

[72]श्रुतिस्मृतिविरोधे दृष्टलोभादिमूलकत्वे वा स्मृतेरप्रामाण्यमेव । जैमिन्यनुसारं सांख्ययोगपाञ्चरात्रपाशुपताद्यसाधारणधर्म्माधर्मप्रतिपादकानां तथा म्लेच्छाचारादीनां प्रतिपादकस्मृतिवाक्यानामप्रमाणता सिद्धयत्येव । नोचेत् तैषामपि शास्त्राणां धर्मे प्रमाणत्वमागमिष्यति । पुनश्च तेषु धर्मनिर्णयशास्त्रत्वप्रसङ्गे धर्मशास्त्रस्यैव प्राथम्यं वरीवर्त्ति । पूर्वप्रतिपादितधर्मस्यैव प्रतिपादकं शास्त्रं धर्मशास्त्रम् ।

वेदस्य निखिलभागस्य धर्मप्रतिपादकत्वेन तस्यैव शास्त्रत्वे प्रामाण्यम् । अतः सर्ववेदद्रष्टृत्वेन मनुरेव प्रमाणम् । परन्त्वन्येषां वेदाङ्गानां मीमांसादीनामपि वेदैः परंपरया सम्बन्धानां न धर्मशास्त्रवत् प्रत्यक्षसम्बन्धः । पुराणानामपि वर्णनीयपुरुषप्रवृत्तिवर्णनपरतया नैकान्ततो धर्मपरता इति न तेषां प्राधान्येन धर्मशास्त्रत्वम् । अतः मन्वादिप्रणीतान्येव शास्त्राणि धर्मशास्त्राणीति आर्यजनपरम्पराप्रसिद्धानि । धर्मशास्त्रस्य वेदैः सह प्रत्यक्षसंम्बन्धस्त्वस्माभिः धर्मशास्त्रस्योद्भवविषये विचारितः । अतः धर्मशास्त्रस्यैव शास्त्रत्वसिद्धिः, नान्यस्येति ।

अनन्तरमन्यत्रापि तैत्तिरीयारण्यक - पाणिनीयव्याकरणादिषु स्मृतिशब्देन वेदैः सह सम्बन्धितशास्त्रत्वेनैव व्याख्या विधेया । परन्तु धर्मशास्त्रस्यैव स्मृतित्वं प्रसिद्धं, नान्यस्य शास्त्रस्येति । स्मृतिशब्दस्य अर्थद्वये प्रयुज्यमानेऽपि वेदानुमापकग्रन्थेषु श्रेष्ठत्वात् धर्मशास्त्रस्यैव स्मृतित्वसिद्धिः युक्ता प्रतिभाति । यतः व्यापकार्थविशिष्टः धर्मः समग्रवेदवाङ्मयस्य विधिनियमाननुसरति । अतः यद्यपि वेदार्थानुमापकत्वेन व्याकरणगृह्यसूत्रपुराणादीनां शास्त्रान्तराणामपि स्मृतिसंज्ञा यौगिकी तथापि धर्मशास्त्राणां पङ्कजादिशब्दवत् सा योगरूढा ।

72- यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च ।
श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां हि तामसी ॥ कूर्मपूराण

धर्मशास्त्रसाहित्यस्योद्भवः विकासश्च

वेदान्तर्गतानां निखिलविषयाणां प्रतिपादकत्वाद् धर्मशास्त्रं भारतीयधार्मिकसाहित्ये विशिष्टं स्थानं बिभर्त्ति । श्रुत्यनन्तरं धर्मविषये स्मृतेरेव मान्यतायाः स्वीकृतत्वात् श्रुतेश्च विप्रकीर्णत्वेन अलब्धत्वात् सनातनीये धर्मे धर्मशास्त्रग्रन्थानामेव मौलिकं महत्त्वं विद्यते। तस्य च धर्मशास्त्रस्य कालः पि. भि. काणे. महोदयानां मतेन निरुक्तकारयास्कस्य कालादेव प्रारभ्यते । तत्र [73]निरुक्तस्य तृतीयकाण्डे दायभागस्य विषयः विचारपथमागच्छति । [74]कौशीतक्युपनिषद्यपि दायसंबन्धिनौ मनूक्तश्लोकौ उदाहृतौ । अतएवोपनिषत्कालेऽपि धर्मशास्त्रस्य प्रामाण्यमवर्त्तत । गौतमधर्मसूत्रेऽपि "तस्य च व्यवहारो वेदाः धर्मशास्त्राणि" इत्यादिना गौतमवचनेन एतत् स्पष्टीभवति यत् तदानींन्तनेऽपि काले धर्मशास्त्रस्य प्रचलनं वरीवर्त्तते स्म । पुनश्च गौतमप्रोक्त-धर्मसूत्रग्रन्थोऽप्यस्माभिः प्राप्यते । तेषां कथनानुसारं ज्ञायते यद् वैदिककालादारभ्यैव धर्मशास्त्रस्य प्रचलनं मानवसमाजे आसीत् । ख्रीष्टात् प्राग् षष्ठशताब्द्यामेव गौतमस्याविर्भावकालः । धर्मशास्त्रस्य क्रमविकासविषये प्रथमतः धर्मसूत्रकाराः गौतमापस्तम्बबौधायनादयः, तदनन्तरं स्मृतिकाराः मनुयाज्ञवल्क्यादयः धर्मशास्त्रग्रन्थान् व्यरचयन्निति केषाञ्चिन्मतम् । अपरे तु—[75]गौतमबौधायनापस्तम्बादिसूत्रग्रन्थानां पूर्वमेव मनुस्मृतेरुत्पत्तिरिति प्रमाणयन्ति । पुनश्च

---

[73] अथैतां जाम्या रिक्थप्रतिषेध उदाहरन्ति ।
ज्येष्ठं पुत्रिकाया इत्येके ॥ निरुक्त (३ । ४५)

[74] अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे ।
आत्मा वै पुत्र नामासि स जीव शरदः शतम् ॥
अविशेषेण पुत्राणां दायो भवति धर्मतः ।
मिथुनानां विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत् ॥ (कौशीतक्युपनिषद्)

[75] श्रीदेवयानः द्वितीयसंख्या पृ. ५६

[76]महाभारत[77]रामायणादौ मनूक्तधर्मशास्त्रस्य विस्तृतवर्णनं, बहुषु स्थलेषु नामोल्लेखोऽपि दृश्यते । अतः महाभारतरामायणादीनां कालतः प्रागेव धर्मशास्त्रस्योत्पत्तिः । पतञ्जलेः [78]व्याकरणमहाभाष्येऽपि धर्मशास्त्रीयग्रन्थानामुदाहरणानि इतस्ततः उद्धृतानि । अतः एभ्यः प्रमाणेभ्यः ज्ञायते यद् धर्मशास्त्रग्रन्थानां रचना ख्रीष्टात् प्राग् ७०० तः प्रारब्धा । अतः वैदिककालादारभ्यैव धर्मशास्त्रस्योत्पत्तिरिति भारतीयपरम्पराऽवितथरूपेण प्रमाणमुपगच्छति ।

पूर्वप्रतिपादितधर्मलक्षणानां पर्यालोचनेन एतत्स्पष्टीभवति यत् प्रथमतः निखिलैरपि शास्त्रकारैः वेद एव धर्ममूलत्वेनाङ्गीकृतः । किन्तु वेदेषु धर्मशास्त्रान्तर्गताः सर्वे विषयाः न सन्ति । अतः वेदानां विप्रकीर्णत्वात् सर्वतोभावेनानुपलब्धत्वात् च ते तेऽशाः स्मृतिष्वनुसन्धेयाः । एतदपि जैमिनिना पूर्वमीमांसायां स्मृतीनां प्रामाण्याधिकरणे सिद्धान्तितम् । सर्वे वेदगताः विषयाः धर्मशास्त्रेऽस्मिन् प्रतिपादिताः । अत्र शङ्कानिरासार्थं मनुनाऽपि स्पष्टीकृतम् । वेदः साधारणानां कृते दुर्गमः भवति अतः मन्वादिभिः सर्वेषां ज्ञानार्थं नियमपालनार्थं च सरलसुबोधशैल्या धर्मशास्त्रे वेदार्थः प्रतिपादितः । अतएव वेदविषयानुद्धृत्य धर्मशास्त्रं मानवसमाजं सन्मार्गमुपदर्शति । क्वचिद् वेदवाक्यान्यपि धर्मशास्त्रेषु प्रमाणरूपेणोदाह्रियन्ते ।

वेदेषु विवाहवर्णाश्रमपुत्रभेदोत्तराधिकारिधनविभागश्राद्धादिविषयकाः बहवः प्रसङ्गाः उपलभ्यन्ते । ते प्रसङ्गाश्च कालक्रमेण धर्मशास्त्रस्य विषयीभूताः । यास्कमतानुसारं पुत्रिकापद्धतिः ऋग्वेदे दृश्यते । भ्रातृहीना कन्या

76- तैरेवमुक्तो भगवान् मनुः स्वायम्भुवोऽब्रवीत् ।
शुश्रूषध्वं यथावृत्तं धर्मं व्याससमासतः ॥ (महाभारते)

77- राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः ।
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ॥

शासनाद्वा विमोक्षाद्वा स्तेनः पापात् प्रमुच्यते ।
राजा त्वशासन् पापस्य तदवाप्नोति किल्बिषम् ॥
रामा. किष्किन्धा. (१८ - ३३, ३४), मनु. (८ - ३१६, ३१८)

78- महाभाष्य, (पा. १-१-४६)

दरं लब्धुं न शक्नोति इति [79]ऋग्वेदे दृश्यते । मनुयाज्ञवल्क्यस्मृत्यादिष्वपि तत्त्वमिदं स्पष्टमुद्घोषितम् । ऐतरेयब्राह्मणे शुनःशेपोपाख्याने औरसपुत्रस्य विद्यमानतायामपि दत्तपुत्रग्रहणं युज्यते इति प्रतिपादितम् । तैत्तिरीयसंहिताग्रामत्र्युपाख्याने दत्तपुत्रग्रहणपद्धतिः प्रचलिताऽऽसीत् । ज्येष्ठपुत्रस्य श्रेष्ठभागः वर्त्तते इति [80]तैत्तिरीयसंहितायामुक्तम् । आपस्तम्बधर्मसूत्रे, बौधायनधर्मसूत्रे चायमेव विषयः गृहीतः । [81]ऋग्वेदे ब्रह्मचारिणः प्रशंसनं क्रियते तदाचरणविधिश्च निर्णीयते । तथैव मनुसंहितायामपि ब्रह्मचारिणः कर्त्तव्यं निरूपितम् । शतपथब्राह्मणे [82]तैत्तिरीयारण्यके च पञ्चमहायज्ञानामुल्लेखोऽस्ति । धर्मशास्त्रेऽपि पञ्चमहायज्ञाः मानवस्य कर्त्तव्यरूपेण उपदिष्टाः । अतएव विविधैरुदाहरणैः प्रतिपाद्यते यद् वेद एव धर्मशास्त्रस्य मूलमिति ।

वेदस्तु कर्मकाण्ड-ज्ञानकाण्डभेदेन द्विविधतया विभिद्यते । धर्मशास्त्राणां तथा धर्मसूत्राणां मूलं वेदः इति न काचित् विप्रतिपत्तिरस्ति । पुनश्च धर्मशास्त्रस्याङ्गविशेषैः धर्मसूत्रैः सह वेदाङ्गभूतस्य कल्पस्य साक्षात् सम्बन्धसत्त्वादस्य प्रमाणं वेदा एव इति निश्चप्रयम् । परवर्तिनिकाले धर्मसूत्रकाराः श्रौतसूत्राणां गृह्यसूत्राणाञ्च विधानान्यनुसृत्य स्वग्रन्थेषु कर्मविधानं निर्दिशन्ति ।

अस्य धर्मशास्त्रस्य वाङ्मयः मालायां महत्त्वं धारयति । असौ वाङ्मयः विशालवृक्षरूपः । अतः अस्य वाङ्मयस्येतिहासः काणेमतेन कालत्रयेण विभज्यते । यथा— १) स्मृतिकालः - ३०० ई. पू. तः ५०० ई. पर्यन्तम् । २) सूत्रकालः - ३०० ई. पू. तः ५०० ई. पर्यन्तम् । ३) निबन्धकालः - ८०० ई. पृ. तः १८०० ई. पर्यन्तम् ।

79- अमाजूरिव पित्रोः सचा सती समानादा सदसस्त्वामिये भगम् ।
कृधि प्रकेतमुपमास्या भर दद्धि भागं तन्वो येन मामहः ॥
ऋग्. (२-१७-७)

8 - तस्माज्ज्येष्ठपुत्रं धनेन निरवसाययन्ति । (तैत्तिरीयसंहिता)

81· ऋग् (१०-१०९) सूक्तं ।

82- पञ्च वा एते महायज्ञाः शतति प्रतायन्ते । शतति संतिष्ठते । देवयज्ञः पितृयज्ञः भूतयज्ञः, मनुष्ययज्ञः ब्रह्मयज्ञश्चेति ।

धर्मसूत्रसाहित्यम्

तत्र धर्मसूत्रं वेदाङ्गभूतस्य कल्पसूत्रस्याङ्गविशेषः। धर्मसूत्राण्यपि वैदिकशाखावत् भिन्नभिन्नशाखासु भिन्नानि वर्त्तन्ते। यद्यपि सर्वे धर्मसूत्रग्रन्थाः नोपलभ्यन्ते तथापि श्रोतसूत्रगृह्यसूत्रादिवत् धर्मसूत्राण्यपि निर्दिष्टान्यासन्। अतः कुमारिलस्य तन्त्रवार्त्तिकानुसारं गौतमगोभिलादीनां ग्रन्थान् सामवेदिनः वसिष्ठादीनामृग्वेदिनः, शंखलिखितादीनां वाजसनेयिनः, आपस्तम्बबौधायनादीनां तैत्तिरीयकाः, शौनकादीनामथर्ववेदिनः अनुसरन्ति। अतः कालक्रमेण धर्मसूत्राणि वेदैः सम्पृक्तत्वात् वैदिकशाखासु प्रामाणिकतया व्यवह्रियन्ते स्म।

धर्मसूत्राण्यपि बहूनि रचितानि। तत्र गौनमापस्तम्बबौधायनवसिष्ठविष्णुहारीतशंखलिखितात्रिकश्यपोशनाकण्वगार्ग्यच्यवनजातूकर्ण्यदेवलपैठीनसिबुधभरद्वाजसुमन्तुशातातपादीनां धर्मसूत्राणि प्रमुखानि।

धर्मसूत्रेषु वर्णितसामाजिकस्थितिभ्यः तेषां रचनाकालः स्पष्टमनुमीयते। गौतमापस्तम्बबौधायनानां प्राचीनधर्मसूत्राणां कालः ६०० ई. पू. तः १०० ई. पू. मध्ये निश्चीयते।

धर्मसूत्रस्य मुख्यविषयाः यथा मनुष्यजीवनस्याचारः तथा कर्त्तव्यवर्णनम्। धर्मसूत्रे मुख्यतः वर्णानामाश्रमाणां च नियमाः, उच्चवर्णानां दैनिकधर्मकृत्यं, गृह्ययज्ञः, सायं प्रातः पूजनं, पाकयज्ञः, विवाहपुंसवनादयः षोडशसंस्काराः, ब्रह्मचारिस्नातकादिनियमाः, मधुपर्कः, श्राद्धकर्म, धर्मस्य पादयता, चतुर्वर्णानामाचारः, कर्त्तव्यं जीवनवृत्तिश्च, चतुराश्रमाणामाचारः, उपजातिवर्णसङ्करधर्माः, सपिण्डसगोत्रादिनिरूपणं, पाप-प्रायश्चित्त-व्रता-शौचशुद्धिः, ऋणसाक्षिन्यायव्यवहाराः,राज्ञ कर्त्तव्यं स्त्रीपुंधर्मः, पुत्रभेदा, उत्तराधिकारादयश्च दर्शिताः। धर्मसूत्रस्य वातावरणमधिकं सामाजिक नैतिकञ्च। धर्मसूत्रग्रन्थाः वर्णाश्रमधर्मान् व्यवहारिकधर्मान् चानुशास्ति। एते धर्मशास्त्रग्रन्थाः धर्मचरित्रान्वेषिणां परमोपकारमाचरन्ति। तत्रापि विशिष्य धर्मसूत्रग्रन्थाः वैदिककाले भारतीयानां लोकयात्रायाः नित्यनैमित्तिकात्मकैरुच्चावचैः

कर्मजालैराक्रान्तत्वं घोषयन्तः प्राक्तनीं भारतवर्षीयसंघस्थितिं मीमांसमानानां पुरस्तात् तत्त्वार्थमुपस्थापयन्ति । धर्मसूत्रग्रन्थः समायाचारिकान् धर्मान् प्रतिपादयति । धर्मसूत्रग्रन्थसमुदायोऽयं भारतवर्षीयाणां लौकिक व्यवहारधर्माणां मूलभूतः ।

स्मृतिसाहित्यम्

धर्मशास्त्रस्य स्मृतिकाले मन्त्रादिप्रणीतानां सर्वेषामपि धर्मशास्त्राणां प्रामाण्यमङ्गीक्रियते, न कस्याप्यप्रामाण्यमिति महती गौरवावहेयं भारतीयपरम्परा । तेषु धर्मशास्त्रग्रन्थेषु मनुस्मृतिः यथा सर्वमान्या तथैव सर्वप्राचोना । अतः योगीश्वरेण धर्मशास्त्रकाराणां नामानि व्याहरता मनुः सर्वप्रथमं प्रदर्शितः । सर्वैः [83]स्मृतिकारैरपि मनुः प्रथमधर्मशास्त्रकाररूपेण उद्घोषितः । तत्र स्मृतिग्रन्थेषु मनु-याज्ञवल्क्य-पराशर-नारद-बृहस्पति-कात्यायन अङ्गिरो-कार्ष्णाजिनि-दक्ष-पितामह ऋष्यशृङ्ग-पुलस्त्य-प्रचेता-प्रजापति-मरीचि-यम-लौगाक्षि विश्वामित्र-व्यास-सम्वर्त-हारीतादीनां स्मृतयः प्रसिद्धाः । केचिदपि स्मृति-उपस्मृतिभेदेनाधिकमपि विवृण्वन्ति । एतेषां कालस्तु परस्परमुदाहरतां धर्मशास्त्राणां पौर्वापर्यपरिज्ञानादाकलनीयम् ।

भारतीयसमाजं व्यवस्थितरूपेण परिचालयितुमेव स्मृतिकाराणां प्रधानकर्म आसीत् । भारतीयसमाजस्य सुव्यवस्था तथा संगठनमेवास्य मूललक्ष्यमासीत् । चतुर्णां वर्णानामुत्पत्तिरपि मनोवैज्ञानिकरीत्या स्मृतिकारैः प्रतिपादिता । सामाजिकदृष्ट्याऽपि स्मृतीनां महत्त्वं सर्वाधिकम् । हिन्दूनां षोडशसंस्काराणां विस्तृतवर्णनं स्मृतिष्वेव उपलभ्यते । भारतीयव्यवहारज्ञानाय स्मृतिनामनुशीलनमनिवार्यम् ।

---

[83] वेदार्थोपनिवद्धत्वात् प्राधान्यं हि मनोः स्मृतेः ।
मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते ॥
बृहस्पतिः, मन्वर्थ, मु- (मनु. १ १)

स्मृतीनां वर्ण्यविषयाः प्रधानतः आचार-व्यवहार-प्रायश्चित्तभेदेन त्रिधा विभज्यन्ते । आचारकाण्डान्तर्गतेषु यथा— ब्राह्मणक्षत्रियवैश्यशूद्राणां चतुर्णां वर्णानां संकरजातीनां चतुर्णामाश्रमिणां च कर्त्तव्यानां विधानं, षोडशसंस्काराणां वर्णनम्, तीर्थस्थानदानादीनां वर्णनम्, देवपूजा, व्रतोपवासादीनां वर्णनम्, विशेषतः षड्विधधर्मेषु गुणधर्म-निमित्तधर्मव्यतिरिक्ताः अन्ये धर्माः आचारकाण्डान्तर्गताः । द्वितीये व्यवहारकाण्डे राज्ञः प्रजापालनमात्मरक्षणं, शत्रुपराजयः, अष्टादशव्यवहारपदानीति सर्वे विषयाः आलोचिताः। तृतीये प्रायश्चित्ताध्याये धार्मिकसामाजिककृत्याकरणजनितपापक्षयाय प्रायश्चित्तविधानानि, प्राजापत्य-चान्द्रायण-कृच्छ्रादीनां स्वरूपाणि पालनविधानानि वर्णितानि ।

टीकासाहित्यम्

धर्मशास्त्रस्य तृतीयश्चान्तिमः कालः भाष्यकाराणां निबन्धकाराणाञ्च कालः । धर्मशास्त्रस्य टीकासाहित्यमपि सुविस्तृतम् । प्राक्कालादारभ्य स्मृतिसूत्रग्रन्थानां प्रणयनानन्तरं तेषां टीकासाहित्यस्य प्रारम्भोऽभवत् । अस्य कालस्य प्रथमभागः सुवर्णयुगनाम्ना प्रथितः । धर्मशास्त्रस्य भाष्यकालः ८०० ई. तः प्रारब्धः । भाष्यग्रन्थानां महत्त्वं निबन्धेभ्यः अपि न कुत्रापि न्यूनतामवाप । अतः विज्ञानेश्वर-मेधातिथि-गोविन्दराजा-परार्कादीनां भाष्याणि निबन्धग्रन्थेभ्योऽपि अधिकां प्रसिद्धिं प्राप्तानि ।

भाष्यकारेषु असहायः प्रथमः । स च मनुस्मृति-गौतमधर्मसूत्र-नारदस्मृतीनां भाष्यं व्यरचयत् । अनन्तरञ्च भर्तृयज्ञस्य गौतमधर्मसूत्रभाष्यं, कात्यायनश्रौतसूत्रभाष्यं, विश्वरूपस्य याज्ञवल्क्यस्मृतिटीका, भारुचेः विष्णुधर्मसूत्रमनुस्मृत्योष्टीका, मेधातिथेः मनुस्मृतिटीका, विज्ञानेश्वरस्य याज्ञवल्क्यस्मृतेः मिताक्षराटीका, मस्कराचार्यकृतं गौतमधर्मसूत्रस्य मस्करीभाष्यं, गोविन्दराजस्य मनुस्मृतिटीका, अपरार्कस्य याज्ञवल्क्यटीका, हरदत्तस्य गौतमधर्मसूत्रस्य मिताक्षराटीका, आपस्तम्बधर्मसूत्रस्योज्ज्वलाटीका, कुल्लूकभट्टस्य मनुस्मृतेः मन्वर्थमुक्तावलीटीका, माधवाचार्यस्य पराशरस्मृतेः टीका,

शूलपाणेः याज्ञवल्क्यस्मृतेः दीपकलिकाटीका, नन्दपण्डितस्य विष्णुधर्मसूत्रस्य केशववैजयन्तीटीका, पराशरस्मृतेः पराशरमाधवीयटीका, वसिष्ठधर्मसूत्रस्य विद्वन्मनोहराटीका, श्रीकृष्णतर्कालङ्कारस्य दायभागटीका, बालम्भट्टस्य विज्ञानेश्वरस्य मिताक्षरोपरि बालम्भट्टीटीका। सम्प्रत्यपि अनेके विद्वांसो धर्मशास्त्राणां सुबोधाय टीकां रचयन्ति यथा — पण्डितकुलमणिमिश्रकृता वसिष्ठधर्मशास्त्रस्य तत्त्वप्रकाशिकाटीका, पारस्करगृह्यसूत्रस्य मार्गदर्शिनीटीका, कालदीपस्य तेजनीटीका, श्राद्धदीपस्य शलाकाटीका भाष्यग्रन्थेषु प्रसिद्धिं भजन्ते।

निबन्धसाहित्यम्

धर्मशास्त्रस्यान्तिमपर्यायरूपस्य निबन्धसाहित्यस्याकारोऽतिविशालः। निबन्धसाहित्यस्य प्रारम्भकाले टीकाग्रन्थाः रचिताः। प्राचीननिबन्धग्रन्थाः केचित् स्मृतिपथमनागतानामपि निबन्धकाराणां नामानि स्मारयन्ति। ते च निबन्धकर्त्तारः अन्येषु परवर्त्तिषु निबन्धग्रन्थेषूदाह्रियन्ते। यथा— श्रीकर-धारेश्वर-भोजदेव-देवस्वामी-जितेन्द्रिय-बालक-बालरूप-योग्लोकादीनां निबन्धग्रन्थाः दुर्लभाः। केवलं तेषामुद्धरणानि परिचयं दातुं शक्नुवन्ति। कालोऽपि तेषामुद्धृतग्रन्थानां पौर्वापर्येणानुमातुं शक्यते।

निबन्धसाहित्यस्य कालः १००० ई. तः इतिहासे लिपिबद्धः। धर्मशास्त्रप्रवर्त्तकानां मतेषु कदा कदा वैषम्यमपि समुपागच्छति। अतः श्रुतिमूलकतया स्मृतीनां समं प्रामाण्यमिति विविच्य सुतरां तेषां सामञ्जस्यसङ्घटनाय पूर्वमीमांसासरणिमवलम्ब्य बृहस्पतिवचनानुसारेण पूर्वमीमांसाधिकरणविचारपरायणैर्हलायुध--शम्भुकर-शूलपाणि-श्रीनाथ-रघुनन्दन-विद्याकर-बृहस्पति-गदाधर-दिव्यसिंह-विश्वनाथप्रमुखैः निबन्धकारैर्देशभेदेनाचारपद्धतिमवलम्ब्य स्मृतिनिबन्धाः प्रणीताः।

साम्प्रतं प्रचलितेषु धर्मशास्त्रनिबन्धेषु वर्णाश्रमधर्म्मास्तिथिविशेषकृत्यानि च भारतवर्षीयजनोपकारबद्धदीक्षैः प्रेक्षावच्छिरोरत्नैर्महतापरिश्रमेण विविध-श्रुति-स्मृतिपुराणैः वाक्यतानिरूपणपुरःसरं निरूपितानि विजयन्ते।

ते निबन्धकाराः पुनः देशाचारभेदेन भिन्नभिन्ननिबन्धग्रन्थान् रचितवन्तः । अतः विभिन्नप्रान्तीयानां लेखकानां नामानि पुस्तकानि च प्रदर्श्यन्ते ।

(क) मिथिलायाः निबन्धकाराः — मिथिलायाः निबन्धकारेषु चण्डेश्वरस्य कृत्यरत्नाकरदानरत्नाकरादिसप्तरत्नाकरोपेतः स्मृतिरत्नाकरग्रन्थः, श्रीदत्तोपाध्यायस्य श्राद्धकल्प-समयप्रदीपा-चारादर्शग्रन्थाः, वाचस्पतिमिश्रस्य विवादचिन्तामण्या-चारचिन्तामणि-कृत्यचिन्तामण्याह्निकचिन्तामणि-तीर्थचिन्तामणि-व्यवहारचिन्तामणि-शुद्धिचिन्तामणि-श्राद्धचिन्तामणि-तीर्थनिर्णय-द्वैतनिर्णय-महादाननिर्णय-शुद्धिनिर्णय-कृत्यमहार्णवा-चारमहार्णव-व्यवहारमहार्णव-दानमहार्णव-शुद्धिमहार्णव-पितृयज्ञमहार्णवादयः ग्रन्थाः, हरिनाथस्य स्मृतिसारः, रुद्रधरस्य श्राद्धविवेकः, मिसरूमिश्रस्य विवादचन्द्रादयः धर्मशास्त्रीयनिबन्धग्रन्थाः प्रसिद्धिं भजन्ते ।

(ख) वङ्गीयनिबन्धकाराः— वङ्गीयनिबन्धकारेषु जीमूतवाहनस्य-कालविवेक-व्यवहारमातृका-दायभागात्मकः धर्मरत्नग्रन्थः, शूलपाणेः प्रायश्चित्तविवेक-श्राद्धविवेकादिचतुर्दशविवेकविशिष्टः स्मृतिविवेकग्रन्थः, अनिरुद्धस्य हारलता-पितृदयिताग्रन्थौ, राज्ञो वल्लालसेनस्याचारसागराद्भुतसागर-दानसागरादयः ग्रन्थाः, गोविन्दानन्दस्य वर्षक्रियाकौमुदी-शुद्धिक्रियाकौमुदी-श्राद्धक्रियाकौमुदी-प्रायश्चित्तक्रियाकौमुदी-दानक्रियाकौमुद्याद्याः चतुर्दशक्रियाकौमुदीशब्दयुक्तः स्मृतिक्रियाकौमुदीग्रन्थः, रघुनन्दनस्य व्रततत्त्व-श्राद्धतत्त्व-शुद्धितत्त्व-मलमासतत्त्व-यात्रातत्त्व-दानतत्त्व-तीर्थतत्त्व-दुर्गोत्सवतत्त्वाद्यष्टाविंशतितत्त्वसंयुक्तः स्मृतितत्त्वग्रन्थश्च प्रसिद्धाः ।

(ग) दाक्षिणात्यनिबन्धकाराः— दाक्षिणात्यनिबन्धकारेषु देवणभट्टस्य संस्काराह्निक-व्यवहार-श्राद्ध-शुद्धिभागसमन्वितः स्मृतिचन्द्रिकाग्रन्थः, हेमाद्रेः कालप्रायश्चित्तव्रतदानादिना विभक्तः चतुर्वर्गचिन्तामणिग्रन्थः, माधवाचार्यस्य पराशरमाधवीय-कालमाधव-मुहूर्त्तमाधव-गोत्रप्रवरनिर्णय-व्रात्यस्तोमपद्धति-स्मृतिसंग्रहादयः ग्रन्थाः, श्रीधरस्य स्मृत्यर्थसारादयः ग्रन्थाः निबन्धग्रन्थेषु प्रमुखं स्थानं बिभर्त्ति ।

(घ) **काशीनिबन्धकाराः** — काशीनिबन्धकारेषु नारायणभट्टस्यान्त्येष्टिपद्धति-त्रिस्थलीसेतु-प्रयोगरत्नग्रन्थाः, नन्दपण्डितस्य त्रयोदशग्रन्थेषु श्राद्धकल्पलता-शुद्धिचन्द्रिका-स्मृतिसिन्धु--दत्तकमीमांसा--विष्णुधर्मसूत्रस्य केशववैजयन्तीटीकादयः ग्रन्थाः, कमलाकरभट्टस्य द्वाविंशतिग्रन्थेषु निर्णयसिन्धु-दानकमलाकर-पूर्त्तकमलाकर-शान्तिकमलाकर-कमलाकराह्निक-शूद्रकमलाकर-विवादताण्डव-प्रायश्चित्तरत्न-गोत्रप्रवरदर्पणादयः ग्रन्थाः, रामकृष्णभट्टस्य जीवत्पितृकनिर्णयः, शंकरभट्टस्य द्वैतनिर्णयः, दिनकरभट्टस्य शान्तिसारग्रन्थः, लक्ष्मणभट्टस्य आचाररत्नग्रन्थः, मित्रमिश्रस्य श्राद्धप्रकाश समयप्रकाश-तीर्थप्रकाश-शुद्धिप्रकाश-दानप्रकाशादि द्वाविंशतिप्रकाशोपेतः स्मृतिप्रकाशनामा महानिबन्धग्रन्थः, लक्ष्मीधरभट्टस्य व्रतकल्पतरु-श्राद्धकल्पतरु-प्रायश्चित्तकल्पतरु-दानकल्पतरु-नियतकालकाण्ड-शुद्धिकल्पतरु-मोक्षकाण्डादिविभागैर्युक्तः कृत्यकल्पतरुग्रन्थः, मदनपालस्य मदनपारिजातः, एते निबन्धग्रन्थाः नितरां प्रसिद्धाः ।

(ङ) **महाराष्ट्रीयनिबन्धकाराः** — महाराष्ट्रीयनिबन्धकारेषु अनन्तदेवस्य संस्कारकौस्तुभग्रन्थः, नीलकण्ठभट्टस्य समयमयूख-तीर्थमयूख-दानमयूख-शुद्धिमयूख-श्राद्धमयूख-व्यवहारमयूखादिद्वादशमयूखविशिष्टः भगवन्तभास्करग्रन्थः, धर्मप्रकाशग्रन्थः, नागोजीभट्टस्य तीर्थेन्दुशेखरा-चारेन्दुशेखरा-शौचेन्दुशेखर--तिथीन्दुशेखर-प्रायश्चित्तेन्दुशेखर श्राद्धेन्दुशेखर-सपिण्डमञ्जरी-सापिण्ड्यनिर्णयादयः, काशीनाथोपाध्यायस्य धर्मसिन्ध्वादयः ग्रन्थाः निबन्धग्रन्थेष्वतिप्रसिद्धाः ।

(च) **उत्कलीयनिबन्धकाराः** — उत्कलीयधर्मशास्त्रीयनिबन्धकारेषु भवदेवभट्टस्य व्यवहारतिलक-कर्मानुष्ठानपद्धति-प्रायश्चित्तनिरूपणग्रन्थाः, शतानन्दस्य धर्मशास्त्रसंग्रहः, शङ्खधरस्य स्मृतिसमुच्चयः, शम्भुकरवाजपेयिनः श्राद्धपद्धति-विवाहपद्धत्यग्निहोत्रहोमपद्धत्य-ग्निहोत्रहोमप्रायश्चित्तपद्धति-दर्शपौर्णमासेष्टिपद्धति दुर्बलकर्मपद्धति-निरूढपशुबन्धपद्धति-स्मार्त्तरत्नावल्यादयः ग्रन्थाः, विद्याकरवाजपेयिनः क्रमदीपिका-दिनकृत्यदीपिका-मोक्षपरीक्षा-नित्याचारपद्धत्यादयः ग्रन्थाः, रामचन्द्रवाजपेयिनः प्रायश्चित्तदीपिका-कुण्डल-

क्रमविवृत्ति-कर्माङ्गपद्धति-समरसारादयः ग्रन्थाः, बृहस्पतेः कृत्यकौमुदी, कालिदासचयिनिनः शुद्धिचन्द्रिका, योगेश्वरपात्रस्य दानदीपाद्भुतसागरग्रन्थौ, गोदावरमिश्रस्याचारचिन्तामणि-नीतिचिन्तामणि-शारदाशरदर्च्चनपद्धत्यादयः ग्रन्थाः, गजपतिपुरुषोत्तमदेवस्य मुक्तिचिन्तामणि-गोपालार्च्चनविधिग्रन्थौ, गजपतिप्रतापरुद्रदेवस्य सरस्वतीविलास-प्रतापमार्तण्ड-निर्णयसंग्रहादयः ग्रन्थाः, चिन्तामणिमिश्रस्य कृत्यपुष्पावलिग्रन्थः, नरसिंहमिश्रवाजपेयिनः नित्याचारप्रदीप-वर्षप्रदीप-समयप्रदीप-भक्तिप्रदीप-प्रायश्चित्तप्रदीपनयनप्रदीपादयः अष्टादशप्रदीपग्रन्थाः, गजपतिरामचन्द्रदेवस्य दुर्गोत्सवचन्द्रिका, विश्वनाथमिश्रस्य स्मृतिसारसंग्रहः, विप्रमिश्रस्य श्राद्धप्रदीपः, दिव्यसिंहमहापात्रस्य श्राद्धदीप-कालदीपौ, गदाधरराजगुरोः कालसारा-चारसार-शुद्धिसार व्रतसार-दानसारादयः अष्टादशग्रन्थाः, कृष्णबृहत्पण्डितस्य नीतिरत्नाकरः,रघुनाथदाशस्य कालनिर्णय श्राद्धनिर्णयो-त्पाततरङ्गिण्यादयः, महामहोपाध्यायकृष्णमिश्रस्य कालसर्वस्व-शुद्धिसर्वस्वे, धर्म्मपाठिनः कालचन्द्रिका, विश्वम्भरमिश्रस्य स्मृतिदीपिका, वासुदेवरथस्य स्मृतिप्रकाशग्रन्थः, गोविन्दकविभूषणसामन्तरायस्य सूरिसर्वस्वं, गोविन्ददाशस्य सर्वस्मृतिसारसंग्रहः, दीनबन्धुमिश्रस्य प्रायश्चित्तमुक्तासंग्रहः, वासुदेवत्रिपाठिनः प्रायश्चित्तविलोचनं, दिव्यसिंहमिश्रस्य संस्कारकल्पलतिका, भुवनेश्वरमिश्रस्य वार्षिकपर्वसंग्रहः, महामहोपाध्यायसदाशिवमिश्रस्य कल्यापदधर्मसर्वस्वं, पण्डित कुलमणिमिश्रस्य धर्मशास्त्रशब्दकोषः इत्येते ग्रन्थाः मुख्यस्थानं धारयन्ति ।

धर्मशास्त्रं प्रति [८४]उत्कलीयानामवदानम्

उत्कलेषु संस्कृतभाषायाः धार्मिकसाहित्यस्य च परम्परा बहुप्राचीनकालतः अद्यापि प्रवहति । उत्कलेषु प्राप्यमाणेभ्यः प्राचीनताम्रलेखशिलालेखेभ्यः ज्ञायते यत् ख्रीष्टीयतृतीयशताब्दीतः सप्तदशशताब्दीमध्ये एवोत्कलस्य

---

८४ - शीर्षकमिदं निम्नलिखितानां पुस्तकानां साहचर्येणाहं प्रस्तौमि ।

क) चतुरङ्ग मासिकपत्रिका - ओड़िशार संस्कृतसाहित्यकु दान -

पं कुलमणिमिश्रशर्मा

अग्रेपि—

संस्कृतसाहित्ये महत्यभिवृद्धिः सञ्जाता । तेषु शिलालेखेषु पञ्चदशशताब्द्याः गोपीनाथपुरशिलालेखः प्रधान । तदैवोत्कलीयसंस्कृतसाहित्यं गौरवमयावस्थायामुपनीतमभवदिति स्पष्टमनुमीयते । तस्मात् कालादद्यावध्युत्कलीयग्रामेषु ब्राह्मणशासनेषु लोकलोचनागोचरीभूताः ताडपत्रात्मक ग्रन्थाः बहुलतया प्राप्यन्ते । उत्कलेषु रचिताः अमूल्यसंस्कृतग्रन्थाः देशविदेशेष्वपि प्रसिद्धिं भजन्ते । तेषामनुध्यानमपि दुःसाध्यम् ।

भारतीयसंस्कृतेः संरक्षणार्थं भारतस्य विभिन्नप्रान्तेषु ये ये मनीषिणः संस्कृतसाहित्यस्य समृद्धिसाधनं कृतवन्तः, तेषूत्कलीयपण्डितानामनुदानमुल्लेखयोग्यम् । उत्कलेषु ख्रीष्टीयतृतीयशताब्दीतः पञ्चमशताब्दीमध्ये तथा तत्परवर्त्तिकाले रचितसंस्कृतशिलालेखेषूत्कलीयपण्डितानां सर्वशास्त्रेषु पारंगमता प्रतीयते । वर्णाश्रमधर्मानुपालनतत्पराः उत्कलीयाः यथा साहित्यकाव्यालंकारशास्त्रलिखनमाध्यमेन स्वपरिचयं प्रकटितवन्तः तथैव समाजसंस्कृतिसंरक्षणार्थं देशधर्मादीनां प्रतिपादनार्थमपि धर्मशास्त्रे सहस्राधिकग्रन्थान् विरचयामासुः । तेषां सविवरणमुपस्थापनमत्र न सम्भाव्यते ।

प्राचीनकालेपि शङ्खलिखितादयः ऋषयः उत्कलीयधर्मशास्त्रस्य परिचालकत्वेन परिचायकत्वेन प्रबन्धकत्वेन च समृद्धपथं परिष्कृतवन्तः । धर्मक्षेत्रेऽस्मिन्नुत्कले धर्मशास्त्रस्याभिवृद्धये च तौ महात्मानौ गङ्गामण्डलान्तर्गत [85]बाहूदानदीतीरवासिनौ शङ्खलिखितौ शङ्खस्मृतिं लिखितस्मृतिं शङ्खलिखितस्मृतिं च कृतवन्तौ । तयोः स्मृतयः [86]युगधर्मानुसारेण द्वापरे युगे महतीं प्रतिष्ठां लब्धवत्यः ।

ख) ओडिशार संस्कृत लेखा ओ लेखक - श्रीयुक्त नीलमणि मिश्र ।

ग) ओड़िशार सांस्कृतिक इतिहास - डा० भगवान पण्डा ।

घ) A Descriptive Catalogue of Sanskrit Manuscripts.
(Smrti part) - Orissa State Museum.

85- महाभा. शान्ति. राजधर्म. — त्रयोविंशाध्याये - १८-१९

86- कृते तु मानवो धर्मस्त्रेतायां गौतमः स्मृतः ।
द्वापरे शङ्खलिखितौ कलौ पाराशरः स्मृतः ॥(पराशरस्मृतिः- १-१३)

तदनन्तरमपि पञ्चमशताब्दीतः दानपत्रादिमाध्यमेन स्वाचरणेनाऽपि लोके धर्मशास्त्रं प्रचलितमासीत् । तदनन्तरं लिपेरभिवृद्धिकालतः तेषां ग्रन्थानां संरक्षणमभवत् । परन्तु दशमैकादशशताब्दीतः तेषां ताडपत्रात्मकानां ग्रन्थानां संग्रहो विहितः । तेषां ग्रन्थानां विस्तृतालोचनाया असम्भवाद् ग्रन्थगौरवभिया यावच्छक्यं संक्षिप्य तेषां नाम-कृति-देश-कालपुरःसरं किञ्चिदुपस्थाप्यते ।

१) आचार्यः शतानन्दः — काल -१०२१ शकाब्दः, १०९९ खीष्टाब्दः । कृतयः - शतानन्दसंग्रहः, भास्वती, शतानन्दरत्नमाला । असौ शतानन्दः [87]पुरुषोत्तमपुरीवास्तव्यः आसीत् । मातृनाम सरस्वती, पितृनाम शङ्करश्चेति स्वरचितभास्वतीग्रन्थस्यान्तिमे लिखतवान् । भास्वतीग्रन्थस्य द्वाविंशतिटीकाः आसन्निति गवेषकहीरालालस्य मतम् ।

२) श्रीधरशर्मा — (११००-११५०) इति कश्चिद् धर्मशास्त्रविद्वान्नासीत् । एषां महानुभावानां ग्रन्थाः दुर्लभाः । परन्तु तेषां सूचना बहुषु स्थलेषु प्राप्यते । सः विशेषतः श्रुतिस्मृतिज्योतिःशास्त्रेषु प्रवीणः विद्वान्नासीत् । उत्कलस्य गञ्जाममण्डलान्तर्गत-घुमुसरस्थ अन्तिग्रामशिलालेखतः ज्ञायते यत् सः सपरिवारं पुरीमण्डलस्य कोतरवङ्गवास्तव्यः आसीत् ।

३) नीलाम्बरआचार्यः — (११७५-१२००) एषां महानुभावानां कृतिः दुर्लभा । असौ कविरुदयनाचार्यस्य पिता आसीत् । एषां परिचयः कटकमण्डलान्तर्गत निआलीस्थ शोभनेश्वरमन्दिरशिलालेखाद् (११९०-११९८) ज्ञायते ।

---

[87] खगाश्विवेदे प्रमिते युगाब्दे,
दिव्योक्तितिः श्रीपुरुषोत्तमस्थः ।
श्रीमान् शतानन्द इतीदमाह,
सरस्वतीशङ्करयोस्तनूजः ॥ — चतुरङ्गपत्रिका

"ओडिशार संस्कृतसाहित्यकु दान" (पं० कुलमणिमिश्रशर्मा)

४) शङ्खधरः — (त्रयोदशशतके) अस्य कृतिः स्मृतिसमुच्चयः । स्मृतिसमुच्चयस्य प्रसारः वङ्गोत्कलमिथिलासु वर्त्तते । वङ्गीयस्मृतिनिबन्धकारः जीमूतवाहनः स्वकालविवेकग्रन्थे विंशतिवारमुद्धृत्य अस्य वचनानां प्रामाण्यं प्रकटयति । शङ्खधरस्य स्मृतिसमुच्चयः शूलपाणि–श्रीकराचार्य-रघुनन्दन-चण्डेश्वरादिभिः प्रमाणितः ।

स्मृतिसमुच्चयः कृत्यकौमुदीकारेण बृहस्पतिना पञ्चवारं, नरसिंहमिश्र-वाजपेयिकृत-नित्याचारप्रदीपे द्विवारं, विश्वनाथमिश्रस्य स्मृतिसारसंग्रहे चतुर्वारमुद्धृतः । एषां महानुभावानां चतुर्दशशताब्दीतः सप्तदशशताब्दीमध्ये रचितोत्कलीयधर्मशास्त्रग्रन्थेष्वप्रतिहतप्रभावः परिलक्ष्यते ।

५) शम्भुकरमिश्र वाजपेयि — (१२६०-१३३०) उत्कलस्य प्रख्यात-गङ्गवंशीयराजनरसिंहदेवसमये(१२७८-१३०६)वरेण्यविद्वान् तथा ख्यातनामा धर्मशास्त्रनिबन्धकाररूपेण परिचितः । सः यजुर्वेदीयः भरद्वाजगोत्रीयश्चासीत् । तेषां कृतयः यथा— श्राद्धपद्धतिः, विवाहपद्धतिः, अग्निहोत्रहोमपद्धतिः, अग्निहोत्रहोमप्रायश्चित्तपद्धतिः, दर्शपौर्णमासेष्टिपद्धतिः, दुर्बलकर्मपद्धतिः, निरूढपशुबन्धपद्धतिः, स्मार्त्तरत्नावली । अनेन कश्चित् मूल्यवान् धर्मशास्त्रग्रन्थोऽपि रचित इति तत्पुत्रेण विद्याकरेण लिखितं "त्रिंशद्वर्ष स काश्यां कृतवसतिरभूद् धर्मशास्त्रस्य कर्त्ता" इति । स इदानीं न लभ्यते । अयं पुरी-मण्डलान्तर्गतश्चासीत् ।

६) विद्याकरमिश्रवाजपेयी — (१२८५-१३५०) अयं महानुभवः पूर्वोक्तशम्भुकरमिश्रवाजपेयिनः पुत्रः आसीत् । पि. भि. काणे महोदयोऽपि एतेषां विषये सूचनामात्रं प्रदत्तवान् । तेषां कृतयः यथा— क्रमदीपिका, दिनकृत्यदीपिका, मोक्षपरीक्षा, नित्याचारपद्धतिः ।

७) रामचन्द्रमिश्रवाजपेयी — (चतुर्दशशतकस्यान्तिमभागे) असौ विद्याकरवाजपेयिनः शिष्य आसीत् । अस्य कृतयः यथा– प्रायश्चित्तदीपिका, कुण्डलक्ष्मविवृतिः, कर्म्माङ्गपद्धतिः, समरसारः, शारदातिलकटीका ।

८) बृहस्पतिः — कृत्यकौमुद्याः कर्त्ता, स ग्रन्थस्य परिचयभागे आलोच्यते ।

९) कालिदासचयिनी —(१४७०-१५२०) असौ धर्मशास्त्रनिबन्धकारः शुद्धिचन्द्रिकाग्रन्थस्य रचयिता । नरसिंहवाजपेयिना नित्याचारप्रदीपे शुद्धिचन्द्रिकावचनमुद्धृतमित्यसौतत् पूर्ववर्त्ती एव ।

१०) योगीश्वरपात्र: — (१४१३ १४३४) गङ्गवंशस्यान्तिमनरपतिनिःशङ्कभानो (१४१३-१४३४)सभाकविरासीत् । कृतयः यथा—दानदीपावली, अद्भुतसागर: ।

११) गोदावरमिश्रः — (१४८०–१५३५) पितृनाम बलभद्रमिश्रः । सूर्यवंशकालीननरपतिषु अयं ग्रन्थकारः प्रसिद्धः । कृतयः यथा– तन्त्रचिन्तामणि ,योगचिन्तामणिः, अद्वैतदर्पणम्, शारदाशरदर्च्चनपद्धतिः, आचारचिन्तामणिः, जयचिन्तामणिः, नीतिचिन्तामणिः, हरिहरचतुरङ्गम् ।

१२) गजपतिपुरुषोत्तमदेवः — (१४६६ - १४९४) असौ उत्कलस्य गजपतिमहाराजपदव्यां त्रिंशत्सम्वत्सराण्यतिवाहितवान् । कृतयः यथा- मुक्तिचिन्तामणिः, गोपालार्च्चनविधिः ।

१३) गजपति प्रतापरुद्रदेवः — (१४९७-१५३५) गजपतिपुरुषोत्तमदेवस्य पुत्रः । अष्टत्रिंशत् सम्बत्सराण्युत्कलस्य गजपतिमहाराजपदव्यामासीत् । तस्य कृतयः विदेशेषु प्रथममुद्रणमलभत । विशेषत: सरस्वतीविलासग्रन्थः परां प्रसिद्धिमवाप्य व्यवहारेष्वद्यापि प्रचलति । अन्या: कृतयः यथा– प्रतापमार्त्तण्डः, निर्णयसंग्रहः, कौतुकचिन्तामणिः ।

१४) कवि चिन्तामणिमिश्रः — (१५५०) असौ पुरीमण्डलान्तर्गत आसीत् । कृतिः - कृत्यपुष्पावलिः ।

१५) नरसिंहमिश्रवाजपेयी — (१५५९-१५६८) गोदावरमिश्रस्य सम्पर्कीयभ्राताऽऽसीत् । धर्मशास्त्रेऽष्टादशप्रदीपग्रन्था: तेन रचिताः । यथा— नित्याचारप्रदीप:, समयप्रदीप:, वर्षप्रदीप:, भक्तिप्रदीपः, प्रायश्चित्तप्रदीपः प्रतिष्ठाप्रदीपः, चयनप्रदीप: व्यवस्थाप्रदीपादयः ।

१६) गजपतिरामचन्द्रदेवः — (१५६०-१६००) उत्कलस्य गजपतिराजत्वेन बहुकालं व्यतीतं कृतवान् । कृतिः- दुर्गोत्सवचन्द्रिका ।

१७) विश्वनाथमिश्रः— (१६००-१६५०) असौ स्मृतिसारसंग्रहस्य रचयिता । अस्य महती प्रसिद्धिः वर्त्तते । पुस्तकस्यास्य प्रचलनमुत्कलसमाजेऽद्यापि वर्त्तते । कृत्यकौमुद्याः मतमनेनाष्टवारमुट्टङ्कितम् ।

१८) विप्रमिश्रः — (१६१५-१६५०) असौ श्राद्धविषयोपरि पाण्डित्यपूर्णपुस्तकमेकं विरचितवान् । तस्य कृतेः श्राद्धप्रदीपस्य समादरः वर्त्तते। श्राद्धप्रदीपः श्राद्धदीपे दिव्यसिंहेनोद्धृतत्वाद् दिव्यसिंहात् प्राचीन एव ।

१९) दिव्यसिंहमहापात्रः— (१६५०-१७००) असौ वत्ससामन्तवंशीयः । गदाधरराजगुरुः यद्यपि दिव्यसिंहस्य नाम नोद्धरति तथापि मतमुद्धरति अतः गदाधरतः दिव्यसिंहः प्राचीनः, पुनश्च श्राद्धदीपे विप्रमिश्रस्य श्राद्धप्रदीपं गदाधर उद्धरति अतः विप्रमिश्रादर्वाचीनः । कृतः श्राद्धदीपः, कालदीपः ।

२०) कृष्णबृहत्पण्डितः — (१६३० - १७१५) असौ गदाधरराजगुरोः पितामह आसीत् । अयं नीतिरत्नाकरस्य रचयिता ।

२१) गदाधर राजगुरुः — (१७१५ - १७३०) गजपतिहरेकृष्णदेवस्य समकालिकः । कृतिः — गदाधरपद्धतिः । गदाधरपद्धतिः अष्टादशधा विभज्यते यथा- कालसारा-चारसार-शुद्धिसार-व्रतसार-दानसारादयः । तेषु कालचाराचारसारौ प्रकाशितौ सुलभौ च । उत्कलीयसमाजेऽद्यावधि विधिनिर्णायकरूपेण प्रचलितोऽयं ग्रन्थः । कृत्यकौमुदीग्रन्थं बहुवारमुद्धरत्यसौ ग्रन्थकारः ।

२२) रघुनाथदाशः — (१७१५ - १७३०) असौ कटकमण्डलान्तर्गतसुन्दरग्रामवास्तव्यः। अनेन बहवः ग्रन्थाः रचिताः । तेषु धर्मशास्त्रविषये कालनिर्णय-श्राद्धनिर्णयौ ग्रन्थौ रचितौ। अनेन कृत्यकौमुदीग्रन्थः बहुवारमुद्धृतः ।

२३) महामहोपाध्यायकृष्णमिश्रः — (सप्तदशशतकस्य पूर्वार्धे) अस्य पितुः नाम परमानन्दमिश्रः। असौ कौत्ससगोत्रोत्पन्नः। कृतीः यथा—

कालसर्वस्वम्, शुद्धिसर्वस्वम् । अनेनैकादशवारं कृत्यकौमुदीग्रन्थः उद्धृतः । असौ पुरीमण्डलस्य नयागडवास्तव्यः ।

२४) जगन्नाथमिश्रवाजपेयी — (१३६० - १४००)

कृतिः — अग्निष्टोमपद्धतिः (कारिका) ।

२५) धर्म्मपाठी — (१७५० - १८००)

कृतिः — कालचन्द्रिकाग्रन्थः । अनेन कृत्यकौमुदीग्रन्थः द्विवारमुद्धृतः ।

२६) विश्वम्भरमिश्रः — (१६५० - १७००)

कृतिः — स्मृतिदीपिका ।

२७) वासुदेव रथः — (अष्टादशशतकीयः)

कृतिः — स्मृतिप्रकाश-मीमांसाप्रकाशाद्यष्टादशप्रकाशग्रन्थः ।

२८) गोविन्दकविभूषणसामन्तरायः — (१७७८ - १८००)

कृतिः — सूरिसर्वस्वम् । समग्रग्रन्थे द्विचत्वारिंशत्संग्रहाः अध्यायाः सन्ति । नागरलिप्यां प्रकाशितोऽयं ग्रन्थः ।

१९) छोटा गोविन्ददाशः — (१८२० - १८४०)

कृतिः — सर्वस्मृतिसारसंग्रहः ।

३०) दीनबन्धुमिश्रः — (ख्रीष्टीयाष्टादशशतके)

कृतिः — प्रायश्चित्तमुक्तासंग्रहः ।

३१) आदित्यसूरी — (ख्रीष्टीयसप्तदशशतकं) कृतिः - कालदीपः ।

३२) लक्ष्मीधरमिश्रः — (१६०० - १६५०) कृतिः - शैवकल्पद्रुमः ।

३३) मुरारिमिश्रः — (षोडशशतकीयः) कृतिः - प्रायश्चित्तमनोहरः ।

३४) वासुदेवत्रिपाठी — (अष्टादशशतकस्य पूर्वार्धे)

कृतिः — प्रायश्चित्तविलोचनम्, वासुदेवपद्धतिः ।

३५) योगीप्रहराजमहापात्रः — (१७५८ - १७८१)

कृतिः — स्मृतिदर्पणम्, वैद्यहृदयानन्दः ।

३६) पण्डितरायनारायण आचार्यः — (अष्टादशशतकीयः)

कृतिः — षड्जयन्तिविधानम्, नृसिंहार्च्चनचन्द्रिका ।

३७) कृष्णदाशः — कृतिः - नित्याचारक्रमसूचिका ।

३८) महामहोपाध्यायरुद्रमिश्रवाजपेयी — (ख्रीष्टीयाष्टादशशताब्दी) कृतिः- सप्तप्रकरणविशिष्टः क्षेत्रकल्पतरुग्रन्थः ।

३९) हलधरमिश्रः—(१६२३-१६४७) कृतिः- हलधरकारिका, सङ्गीतकल्पलता च ।

४०) रामदेव वाजपेयी—(ख्रीष्टीयाष्टादशशतकीयः) कृतिः- तिथिनिर्णयप्रदीपिका ।

४१) कृष्णशर्मा— (ख्रीष्टीयाष्टादशशतकीयः) कृतिः- शुद्धिप्रकाशः ।

४२) दिव्यसिंहमिश्रः- (ख्रीष्टीयाष्टादशशतकीयः) कृतिः- संस्कारकल्पलतिका ।

४३) सुरमिश्रः— (ख्रीष्टीयाष्टादशशतकीयः) कृतिः- जगन्नाथप्रकाशः ।

४४) मृत्युञ्जयमिश्रः — (ख्रीष्टीयाष्टादशशतकीयः) कृतिः- सत्समयः, शुद्धिमुक्तावली च ।

४५) जलेश्वरमिश्रः— (ख्रीष्टीयाष्टादशशतकीयः) कृतिः- जलेश्वरपद्धतिः ।

४६) भुवनेश्वरमिश्र बडपण्डा— (ख्रीष्टीयोनविंशशतकीयः) कृतिः— वार्षिकपर्वसंग्रहः (नागरोत्कललिपिभ्यां प्रकाशितः), आनन्ददामोदरचम्पूः (उत्कललिप्या प्रकाशिता)।

४७) गोपिनाथपट्टनायकः— (ख्रीष्टीयोनविंशशतकीयः) कृतिः- शुद्राह्निकपद्धतिः ।

४८) गोपीनाथतुङ्गः — (ख्रीष्टीयाष्टादशशतकीयः) कृतिः- वीरसर्वस्वम् (प्रकाशितम्) ।

४९) श्रीधरशर्मा— (ख्रीष्टीयोनविंशशतकीयः) कृतिः- दानवाक्यावली ।

५०) मागुणिपाठी—(ख्रीष्टीयोनविंशशतकीयः) कृतिः- जलाशयप्रतिष्ठा ।

५१) मागुणिमिश्रः— (ख्रीष्टीयोनविंशशतकीयः) कृतयः- प्रतिष्टापञ्चकम्, प्रतिष्ठासारपद्धतिः, शैवपद्धतिः ।

५२- चन्द्रशेखरः- (ख्रीष्टीयोनविंशशतकीयः) कृतिः - प्रतिष्ठासारसंग्रहः ।

५३- वासुदेवनन्दः- (ख्रीष्टीयोनविंशशतकीयः) कृती - वीरपराक्रमः, कृत्यरत्नावलो च ।

५४- चिन्तामणिमिश्रः - (ख्रीष्टीयोनविंशशतकीयः) कृतिः - कृत्यपुष्पावलिः ।

५५- श्रीनिवासमिश्रः - (ख्रीष्टीयोनविंशशतकीयः) कृतिः - शुद्धिदीपिका ।

५६- मृत्युञ्जयमिश्रः - (ख्रीष्टीयोनविंशशतकीयः) कृतिः - शुद्धिमुक्तावलिः ।

५७- वलभद्रमिश्रः - कृतिः - बलभद्रसंग्रहः ।

५८- पीताम्बरमिश्रः - कृतिः- श्रीकृष्णार्चनपद्धतिः ।

५९- बालुङ्किपाठी - (ख्रीष्टीयोनविंशशतकीयः) कृतिः - यात्राभागवतम् ।

६०- देवः (ख्रीष्टीयोनविंशशतकीयः) कृतिः - पण्डितसर्वस्वम् । ग्रन्थोऽयं प्रकाशितः । उत्कलीय धर्मशास्त्रेऽद्यावधि व्यवहृतः भूरिप्रशंसितश्च ।

६१- महामहोपाध्याय सदाशिवमिश्रः (१८८० - १९१०) कृतिः - कल्यापद्धर्मसर्वस्वम् (प्रकाशितम्) ।

६२- चिन्तामणिपट्टनायकः - पुरुषार्थचिन्तामणिः (अंशतः प्रकाशितः) ।

एतान् विहाय पुनरन्यत्र प्रकरणमाश्रित्य व्रतमाश्रित्य च उदाहृतान् नोदाहरामः ।

पुनश्च धर्मशास्त्रीयटीकासाहित्येऽपि कृतभूरिपरिश्रमाः बहवः विद्वांसः उत्कलक्षेत्रे राजन्ते । सर्वेषां नामलिखने ग्रन्थगौरवभयान्न लिखित्वा केवलं मम गुरुपादानां पण्डितश्रीकुलमणिमिश्रशर्मणां केचन टीकाग्रन्थाः प्रदर्श्यन्ते ।

ग्रन्थनाम		टीकानाम	
क) वसिष्ठधर्मशास्त्रम्	—	तत्त्वप्रकाशिका	(हस्तलिपिः)
ख) कालदीपः (दिव्यसिंहमहापात्रकृतः)		तेजनी	(प्रकाशिता)
ग) श्राद्धदीपः (दिव्यसिंहमहापात्रकृतः)		शलाका	(हस्तलिपिः)
घ) पारस्करगृह्यसूत्रम्	—	मार्गदर्शिनी	(प्रकाशिता)
ङ) कौटलीयमर्थशास्त्रम्	—	प्रज्ञा	(प्रकाशिता)

धर्मशास्त्रस्य त्रयो विभागाः

श्रुत्यनुमापकत्वेन प्रमाणीभूतस्य धर्मशास्त्रस्य निखिलाः विषयाः सामान्यतः विभागत्रयेण विभज्यन्ते । सर्व एव विषयाः धर्मधर्माविव प्रतिपादयन्ति ।

स चायं धर्मः कर्त्तुरभिमतफलवर्षणा[८९]न्मन्वादिभिः वृष इत्युच्यते । भगवान् [९०]वेदोपि धर्मं वृषाकृतिमाचष्टे । अस्य विलक्षणवृषभरूपस्य धर्मस्य चत्वारि शृङ्गाणि यथाक्रमं धर्मस्य वेदस्मृतिसदाचारात्मतुष्ट्यादि लक्षणानि । तदनन्तरं तस्यैव धर्मवृषस्य त्रयः पादाः । ते च आचारव्यवहारप्रायश्चित्तकाण्डत्रयरूपाः । अतः धर्मशास्त्रस्य विषयाः आचारव्यवहार प्रायश्चित्तभेदेन विभज्यन्ते ।

धर्मशास्त्रे पुरुषार्थचतुष्टयसिद्धिः वर्णिता । धर्ममेवाधारीकृत्य मोक्षादीनां पुरुषार्थानां प्राप्तिः प्रतिपादिता । धर्मः श्रौतस्मार्त्तभेदेन द्विधा विभक्तः । तत्र स्मार्त्तधर्मः धर्मशास्त्रस्य विषयीभूतः । आर्याणां क्रियमाणानां सकल धर्मार्जनविधयः तथाऽधर्मनिवारणाय प्रतिषेधाः अपि वर्णिताः । वर्णाश्रमधर्म्म-षोडशसंस्कार-गार्हस्थधर्म-पञ्चमहायज्ञ-भक्ष्याभक्ष्यनिरूपण-द्रव्यशुद्धिनिरूपणजन्ममृत्युशौचाशौचनिरूपण-श्राद्धविधान स्त्रीपुंधर्मा-ष्टादशव्यवहारपदापद्धर्मप्रकरण-प्रायश्चित्तनिरूपण-कृच्छ्रचान्द्रायण-व्रतोत्सर्गप्रतिष्ठातीर्थयात्रादयः विषयाः धर्मशास्त्रे सन्निविष्टाः । अतएव धर्मस्य तत्त्वं मानवस्य समग्रजीवनमभिव्याप्योपदिष्टम् ।

एते सर्वे धर्मशास्त्रस्य विषयाः पूर्वोक्ताचारव्यवहारप्रायश्चित्ताध्यायत्रयेऽन्तर्भवन्ति । तेषु प्रथमतः आचार एव विशेषरूपं विदधाति । मनुष्यस्य

89- वृषो हि भगवान् धर्मः ॥ मनु. (८-१), महा० शान्ति. (३४२।९८)

90- चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्ता सो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ॥-
ऋक्० (४-५८-३), यजुः (१७-९१) इति देवयानपत्रिकायां पं कुलमणिमिश्रस्य 'धर्मप्रतिष्ठानम्" शीर्षके ।

दिनचर्या, देशाचार-कुलाचार-जात्याचारादीनां वर्णनं, सर्वेषां वर्णानां तथा ब्रह्मचारिगृहस्थाश्रमयोः वर्णनं, तेषां विशेषाधिकाराश्च, सर्व गर्भाधानादन्त्येष्टिपर्यन्त संस्काराः, ब्रह्मचारिनियमाः, अनध्यायाः अभक्ष्यभक्षणं, स्नातकधर्माः, गृहस्थाश्रमस्य विवाहादितः वानप्रस्थग्रहणपर्यन्तं सर्वे नियमाः, व्रतोपवासः, दानानि प्रतिष्ठाः, देवपूजा-पितृपूजा-नृपूजादीनां पञ्चमहायज्ञानां विस्तृतस्वरूपमाचरणं, द्रव्यशुद्धिः, श्राद्धस्य भेदाः कर्त्तव्यविधिः निखिलनियमानां प्रतिपादनम्, तीर्थस्नानम्, इत्येते विषयाः आचारान्तर्गताः । आचाराध्याये सर्वविधधर्मोत्पादककर्मणां प्रतिपादनाद् धर्मशास्त्रे स एव मुख्यरूपं धारयति ।

व्यवहारभागे क्षत्रियधर्माः प्रतिपादिताः । अत्र राज्ञः प्रजापालनमेव परमो धर्मः । मनुष्येषूत्पादितेषु सर्वविधविवादानां तथा धर्म्यविभागानां प्रतिपादनं विभागेऽस्मिन् वर्णितम् । राज्ञः शत्रुकबलतः आत्मरक्षणं, देशरक्षणं, प्रजारक्षणं, दुर्गव्यूहादीनां रचनं, राज्यस्य षडङ्गानाममात्यदुर्गजानपदादीनां पालनं, प्राड्विवाकादीनां नियोगः, तेषां साहचर्येन व्यवहारपदानां समाधान, विवादानां विचारः, धनस्य धर्म्यविभाजनम् इत्यादयः विषयाः अध्यायेऽस्मिन् प्रतिपादिताः । अध्यायेऽस्मिन् गुणधर्मस्य वर्णनं विहितम् ।

अनन्तरमन्तिमभागः प्रायश्चित्तकाण्डः । तत्र विशेषतः निमित्तधर्मः वर्णितः । मोक्षप्रधानयोर्वानप्रस्थसंन्यासाश्रमयोरपि तत्र योगीश्वरेण समावेशः कृतः । शौचाशौचयोर्वर्णनं, अधर्मस्य तथा पापस्य लक्षणं, पापस्य स्वरूपप्रतिपादनं, पापकर्मणां महापातका-तिपातको-पपातक पातकसंकरीकरण-मलिनीकरणादिषु विभागेषु विभाजनं, तेषां पापानामपनोदनार्थं प्रायश्चित्तप्रतिपादनं, प्रायश्चित्तरूपव्रताङ्गभूतकृच्छ्र-प्राजापत्य-चान्द्रायणादीनां वर्णनं विभागेऽस्मिन्नभिहितम् । अतः धर्मशास्त्रस्य सर्वेऽपि विषयाः एष्वध्यायेषु त्रिषु प्रतिपाद्यन्ते ।

तेषु प्रथमतः वर्णधर्मा-श्रमधर्म-वर्णाश्रमधर्माणामाचारे भागे तथा गुणधर्मः व्यवहारे, निमित्तधर्मश्च प्रायश्चित्तभागे वर्ण्यन्ते । सामान्यधर्माश्च सामान्यतः सर्वेषु भागेषु संस्थाप्यन्ते ।

धर्मशास्त्रस्य त्रयोविभागाः, तेषु आचारस्य स्थानञ्च

धर्मशास्त्रे प्रायशः सर्वैः स्मृतिकारैः सूत्रकारैः निबन्धकारैश्च प्रथमतः धर्मलक्षणं तस्य स्वरूपञ्च विशदीकृतम् । सर्वेऽपि वेदधर्मशास्त्रयोः धर्मे प्राथम्यं प्रामाण्यं स्वीकृत्यानन्तरं सदाचार प्रमाणयन्ति । तच्चाचरणं पुनः धर्मज्ञानां शिष्टानामेव । शिष्टानां लक्षणमपि कतिपयैः स्मृतिकारैः वर्णितम् । परन्तु सर्वेषां धर्मप्रमाणानां बलाबलानुसारेण श्रुतिस्मृत्योरनन्तरं सदाचार एव प्रमाणम् । स्मृतिसदाचारावुभावपि वेदमूलकौ । तथापि तयोरुभयोः समुपस्थितौ स्मृतेरनन्तरं सदाचारस्य प्रामाण्यम् । अतएव [91]हारीतादयः सदाचारस्य समुल्लेखं कुर्वन्ति । बहुषु धमशास्त्रीयग्रन्थेषु देशजातिकुलानां परम्पराऽपि धर्मे प्रामाण्यमित्युक्तम् । अतः लोकाचार-देशाचार-कुलाचार-जात्याचार-कालाचारादीनामपि धर्म प्रामाण्यं स्वीक्रियते । [92]गौतम[93]बौधायन[94]वसिष्ठादयः वैदिकाविरुद्धान् देशजातिकुलपरम्परागताचारान् धर्मे प्रमाणरूपेण स्वीकुर्वन्ति । [95]मनुरप्येतेषां विचारपूर्वकं धर्मनिर्णयायोपदिशति । [96]देवल[97]बृहस्पत्यादयोऽपि तान् देशादिधर्मान् नावमानयितुं कथयन्ति ।

91- साधवः क्षीणादोषाः स्युः सच्छब्दः साधुवाचकः ।
तेषामाचरणं यत्तु स सदाचार उच्यते ॥ हारीतः (परा.माध. १-१४४)
तस्मिन् देशे य आचारः पारम्पर्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते ॥ (मनु. स्मृ. २ । १८)

92- देशजातिकुलधर्माश्चाम्नायैरविरुद्धाः प्रमाणम् ॥ (गौ. धर्म. ११-२०)

93- पञ्चधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतः । (बौधा. धर्म.)

94- देशधर्मजातिधर्मकुलधर्मान् श्रुत्यभावादब्रवीन्मनुः ॥ (वसिष्ठ. १-१७)

95- जातिजानपदधर्मान् श्रेणीधर्मांश्च धर्मवित् ।
समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत् ॥ (मनु. ८ । ४१)

96- यस्मिन् देशे गृहे ग्रामे त्रविद्ये नगरेऽपि वा ।
यो यत्र विहितो धर्मस्तं धर्मं न विचालयेत् ॥ देवलः (स्मृतिच. १-१०)

97- देशजातिकुलानाञ्च ये धर्मास्तत् प्रवर्त्तिताः ।
तथैव ते पालनीयाः प्रक्षुभ्यन्त्यन्यथा प्रजाः ॥ बृह. (स्मृतिच. १-१०)

आचारस्य वैशिष्ट्यमनुभूय [98]मनुनाऽऽचारस्य परमत्वं प्रतिपादितम् । आचारः सर्वदा परिवर्त्तनशीलः । अतः स्मृतिगताचारः कतिपयेषु स्थानेषु परिवर्त्तितो भवति । तथापि तस्याचारस्याभावे समाजः दुर्नीत्यत्याचारव्यभिचारादिना लिप्यते ।

मनुष्यः समाजे यं यं शास्त्रीयनियमं पालयति स एवाऽऽचारपदेनोच्यते । अतः भगवद्विश्वासः सदाचारः सामाजिकनियमाश्च धर्मे व्यवस्थिताः । अतिथिसेवाभगवत्सेवागुरुजनसेवादयः अप्याचारधर्मेऽन्तर्भवन्ति । धर्ममूलेषु सदाचारस्यास्तित्वं स्वीकृत्य [99]मनुः सदाचारैरेव धर्मस्य रक्षणं भवतीत्युक्तवान् । आचारो हि भारतीयधर्मस्य मूलाधारः । सर्वेषु धर्मशास्त्रीयग्रन्थेष्वाचारस्य प्राधान्यं परिलक्ष्यते । समाजस्य तथा व्यक्ते समुन्नतिराचारादेव सम्भवति । यावत् पर्यन्तं भारतीयसंस्कृतेरितिहासे आचारस्य प्राधान्यं वर्त्तते तावत्पर्यन्तं धर्मस्योद्देश्यसाधनं भविष्यति । अतः आचारस्य वैशिष्ट्यं [100]वसिष्ठेन प्रतिपादितम् ।

वेदादिसर्वशास्त्रज्ञपण्डितो यद्यप्याचारभ्रष्टोऽथवा धृतिदयाक्षमादमेन्द्रियनिग्रहादिमानवीयगुणविहीनो भवति तर्हि तस्य शास्त्रज्ञाने सत्यपि स आचारभ्रष्ट इति अनादृतो भवति । अधीतान्यपि शास्त्राणि तस्य निष्फलानि भवन्ति । आचारो हि व्यक्तेः सम्मानप्रवर्त्तकः तथा दीर्घजीवनस्य सुखस्य च

98- आचारः परमो धर्मः श्रुत्युक्तः स्मार्त्त एव च ।
तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः ।। (मनु. १-१०८)

99- श्रुतिस्मृत्युदितं सम्यङ् निबद्धं स्वेषु कर्मसु ।
धर्ममूलं निषेवेत सदाचारमतन्द्रितः ॥ (मनु. ४ । १५५)

100- आचारः परमो धर्मः सर्वेषामिति निश्चयः ।
हीनाचारपरीतात्मा प्रेत्य चेह च नश्यति ॥
आचारहीनं न पुनन्ति वेदाः यद्यप्यधीता सह षड्भिरङ्गैः ।
छन्दांस्येनं मृत्युकाले त्यजन्ति नीडं शकुन्ता इव जातपक्षाः ॥
(वसिष्ठ. ६-१, ३)

प्रदायक इति धर्मशास्त्रकारैरङ्गीकृतम् । आचारः धर्मज्ञानस्य परिपूरकरूपेण गृह्यते । आचारत्यागे धर्मशास्त्रेषु दण्डविधानव्यवस्थाऽपि विहिता । स्वपापकर्मणा मानवः पतितत्वं याति, किन्तु सदाचारद्वारा स्वर्गलोकं प्राप्नोति । यतः श्रुत्युक्ताः स्मृत्युक्ताश्च सर्वे धर्मा लोके आचारेषु हि पर्यवसिता भवन्ति । स चाचारः विदुषामविदुषां च जनानामादर्शत्वेनाश्रयणीयो भवति । तेन स्थूलदृष्ट्या सर्वोऽपि धर्मः आचारे परिदृश्यते, आचारादेव लक्ष्यते इति सुव्यक्तमेव । अतः विशिष्टजनानामाचरणरूप आचार एव श्रीकृष्णेन धर्मरूपेण धर्मप्रभवत्वेन च प्रदर्शितः । एवमन्यत्राप्याचारस्य महत्त्वं वर्णितम् । यतः जनाः सामान्येनाचाराद् धर्मं गृह्णन्ति तस्माद् धर्ममाचारप्रभवं मन्यन्ते बुधाः । आचारमन्तरा धर्मस्य स्थितिर्नास्ति, भगवत्प्राप्तिरपि नास्ति । अतएवाचारपालनं मानवानां परमो धर्मः । महाभारतानुसारमपि सुखदुःखभोगः कर्ममूलक एव । अतः सर्वदैव वर्णोचितधर्मं तादृशं कर्म वाऽऽचरेत् । तेनैव कर्मणा जन्मान्तरे [101]वर्णोत्कर्षमपि प्राप्नोति । इहजन्मनि अल्पायुरपि दीर्घायुर्भवति । अतः आचारस्य महत्त्वं धर्मशास्त्रेऽत्यधिकम् । आचारात् सर्वं प्राप्तुं शक्यते इति [102]धर्मशास्त्रकारैः स्पष्टमुद्घोषितम् । यतः आचारः इहलोके परलोके च फलदायक, ततः आचारः सर्वथा पालनीय इति धर्मशास्त्रकाराः विवृण्वन्ति । धर्मशास्त्रस्य मुख्यध्येयत्वेनाचारः पूज्यते ।

अतः इदानीन्तनाः जनाः अपि आचार परिपालयन्तु इति ।

धर्मस्य आश्रमैः सह सम्बन्धः

तेषामेवाश्रमिणां पुनः तत्वज्ञैः महर्षिभिः प्रतिपादिताः धर्माः षड्विधा यथा— वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्च । वर्णधर्मः— ब्राह्मणः नित्यं सुरां वर्जयेत् ।

101- वर्णोत्कर्षमवाप्नोति नरः पुण्येन कर्मणा ।
दुर्लभं तमलब्ध्वा हि हन्यात् पापेन कर्मणा ॥

102- आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः ।
आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम् ॥ (मनु. ४ । १५६)

आश्रमधर्मः— ब्रह्मचारिणः भिक्षाचरणदण्डग्रहण समिधाहरणादि कर्म । गृहस्थस्य पञ्चयज्ञानां सम्पादनं कर्म । वानप्रस्थस्य अर्थकामवासना वर्जनपूर्वकं धर्ममोक्षे च मनोनिवेशः । संन्यासिनः तपश्चरणपूर्वकं मोक्षाय प्राणोत्सर्गः । अतः भिन्नभिन्नाश्रमिणां भिन्नाभन्ननियमाः प्रदर्शिताः । तेषां पालनेनाश्रमधर्मः सिध्यति ।

वर्णाश्रमधर्मः यथा— ब्राह्मण ब्रह्मचारिणः पलाशदण्डमौञ्जीमेखलाधारणादिकमत्र दण्डमेखलादिधारणमाश्रमधर्मः । स च ब्राह्मणवर्णस्य पालाशमौञ्ज्यादिरूप इति । वर्णत्वमाश्रमत्व चेत्युभयमाश्रित्य वर्त्तमानोऽयं धर्मः वर्णाश्रमधर्मः इत्युच्यते । एवं क्षत्रियस्य ब्रह्मचारिणः बटखादिरदण्डधारणं, वैश्यस्य शणतान्तवी मेखला परिधातव्या । एवं भिन्नेषु वर्णेषु भिन्नेष्वाश्रमेषु च भिन्नानि धारणीयानीति विशिनष्टि । उपर्युक्ताः त्रयो धर्माः ब्रह्मचर्याश्रमे एव सिध्यन्ति, इत्थमाश्रमान्तरेऽपि ।

गुणधर्मः— अभिषेकादि गुणविशिष्टक्षत्रियस्य प्रजापालनादिकं गुणधर्मः । क्षत्रियत्वगुणविशिष्टस्य क्षत्रियस्य अभिषेकादिगुणविशिष्टः धर्मः गुणधर्मः । धर्मोऽयं प्रायशः गृहस्थाश्रमे एव सिध्यति ।

निमित्तधर्मः—मनुष्यः विहितनियमान् लङ्घयित्वा निषिद्धकर्माचरणं च कृत्वा निमित्तधर्मं चान्द्रायणकृच्छ्रप्राजापत्यद्वादशवार्षिकषड्वार्षिकादिप्रायश्चित्तरूपमाचरति । पापं निमित्तीकृत्य तस्य क्षयार्थं क्रियमाणत्वात् प्रायश्चित्तानि निमित्तधर्मान्तर्गतानि । अयं धर्मः यदा तदैव विहिताकरणे तथा प्रतिषिद्धकर्मसेवने च क्रियते । अतः सर्वेष्वाश्रमेष्वयं धर्मः साधारणः ।

साधारणधर्मः— अहिंसासत्यक्षमादयादयः गुणाः एव साधारणधर्मेऽन्तर्भवन्ति । अयमपि धर्मः सर्वेष्वाश्रमेषु सर्वेषु वर्णेषु सर्वासु अपि अवस्थासु पालनीयः । अतः अस्य साधारणधर्म इति संज्ञा । अतः पुरुषार्थचतुष्टयवत् षड्विधस्मार्त्तधर्मा अप्याश्रमचतुष्टयेन सह सम्बद्धाः ।

व्रतश्राद्धदानानामाचाराध्यायेऽन्तर्भावः

धर्मशास्त्रे वर्णितेष्वाश्रमेषु गृहस्थाश्रमस्य वैशिष्ट्यं सर्वैरङ्गीकृतम्। तत्रैव वैदिककालतः मम्पद्यमानाः ब्रह्मयज्ञ देवयज्ञ-पितृयज्ञ-मनुष्ययज्ञ-भूतयज्ञाख्याः पञ्चमहायज्ञाः [103]धर्मशास्त्रे विशिष्टस्थानमलभन्त। गृहस्थाश्रमस्य मुख्यकर्मरूपेण पञ्चमहायज्ञाः निर्दिष्टाः। एतेषां पञ्चमहायज्ञानां पूर्वः पूर्वः प्रबलः, उत्तरोत्तरः दुर्बलश्चेति। ब्रह्मचारिण नित्यं स्वाध्यायमध्येतव्यम्। पुनश्च गृहस्थाश्रमेऽपि पूर्वपठितानां वेदानामविस्मरणार्थं यो वेदाभ्यासः क्रियते स एव ब्रह्मयज्ञः। ब्रह्मचर्याश्रमे गुरुसेवया गुरोरनुकम्पया च तत्रैव स्वाध्यायाध्ययनमाध्यमेन ब्रह्मयज्ञः सम्पद्यते। देवानुद्दिश्य नित्यं होमयागादिकं वा यत् किञ्चित् कर्म क्रियते तेन देवयज्ञः सम्पादितो भवति। दिवंगतानां पितृपुरुषाणां कृते श्रद्धया निलतर्पणादिकं यत्कर्म क्रियते तदेव पितृयज्ञ इत्युच्यते। मनुष्ययज्ञः अतिथिसत्कारेण भवति। अतः स्वशक्त्यनुसारं गृहस्थैरतिथिसेवा विधेयेति कृत्वा मनुष्ययज्ञः पञ्चमहायज्ञेषु स्थानं लभते। देवादीनां पूजानन्तरं किञ्चिदन्नमुद्धृत्य श्वचाण्डालवायसेभ्यः निक्षिप्यते। तदेव भूतयज्ञनाम्नाख्यायते। [104]मनु[105]याज्ञवल्क्यादिभिरपि भूतयज्ञः प्रतिपादितः। भूतयज्ञाय भूमौ निक्षेपणं विधीयते।

103- पञ्चमहायज्ञाः मनुस्मृतौ यथा (४-२१)—

ऋषियज्ञं देवयज्ञं भूतयज्ञं च सर्वदा।
नृयज्ञं पितृयज्ञं च यथाशक्ति न हापयेत्॥

104- यिश्वेभ्यश्चैव देवेभ्यो बलिमाकाश उत्क्षिपेत्।
दिवाचरेभ्यो भूतेभ्यो नक्तञ्चारिभ्य एव च॥
पृष्ठवास्तुनि कुर्वीत बलिं सर्वात्मभूतये।
पितृभ्यो बलिशेषं तु सर्वं दक्षिणतो हरेत्॥ (मनु. स्मृ. ३। ९०-९१)
सर्वान् वैश्वदेवे भागिनः कुर्वीताश्वचाण्डालेभ्यः॥
(आप. धर्म. २। ४। ९। ५)

105- देवेभ्यश्च हुतादन्नाच्छेषाद् भूतबलिं हरेत्।
अन्नं भूमौ श्वचाण्डालवायसेभ्यश्च निक्षिपेत्॥ (याज्ञ. १-१०३)

अतः गृहस्थाश्रमे एतान् पञ्चमहायज्ञान् सम्पाद्य मनुष्यः अक्षयं फलं लभते । एतेषु महायज्ञेषु देवानां पूजनेन देवयज्ञः सिध्यति । तदानीन्तनकाले देवानुद्दिश्य होमोऽभवत्, स च वैश्वदेवहोमे पर्यवस्यति । इदानीं तस्य स्वरूपं प्रायः [देवपूजायामेव सीमितं वर्त्तते । गृह्यसूत्रेषु कतिपयेष्ववर्वाचीनस्मृतिग्रन्थेष्वपि देवपूजायाः स्वरूपं प्रकटितम् । देवोद्देशेन हूयमानं घृतं देवानां [106]प्रीत्यर्थमक्रियत । स्वाहान्तेन देवानां नामोच्चारणपूर्वकं तेषामाह्वानं क्रियते । देवपूजाया अर्वाचीनस्वरूपं पुनश्च मूर्त्तिपूजायामेवोपागतम् । अनन्तरं साकारपूजायां मनुष्याणां प्रवृत्तिरागता । समादृताऽपि सा साकारपूजा । अतः देवपूजा देवयज्ञस्य नामान्तरमात्रमिति ध्येयम् । तत्र पुनः देवानुद्दिश्य व्रतोपवासादीनामुत्पत्तिरभवत् । व्रतोपवासकरणे विशेषफलश्रवणात् तत्रैव मनुष्याणां निविडा प्रवृत्तिरजायत । अतः पुराणेषु तदनुसारि धर्मशास्त्रीय निबन्धग्रन्थेषु च व्रतोपवासादीनां भूरि वर्णना प्राप्यते ।

एतद्ग्रन्थकृता बृहस्पतिनाऽपि कृत्यकौमुदीग्रन्थेऽस्मिन् व्रतोपवासादीनां सुविस्तृतं वर्णनं कृतम् । अतः पञ्चमहायज्ञेषु देवपूजायाः अन्तर्भूतत्वादाचारभागे एव व्रतोपवासादीनामन्तर्भावः क्रियते ।

पितृयज्ञस्य स्वरूपं पूर्वपितृपुरुषाणां कृते तिलतर्पणं पिण्डदानंश्राद्धादि । अतः श्राद्धस्यापि पञ्चमहायज्ञाङ्गभूतता । ततः पितृयज्ञे सन्निविष्टत्वादाचाराध्याये श्राद्धवर्णनमपि विस्तरेणोपस्थाप्यते ।

दानम् ऐहिकामुष्मिकफललाभार्थं तथा शान्त्यादिकर्मसु च ब्राह्मणदक्षिणारूपेण दीयमानम् आचारभागमुपगच्छति । तीर्थस्नानमपि नित्यकाम्यरूपेण क्रियमाणत्वात् तस्य विषयवस्तून्याचाराध्यायेऽन्तर्भवन्ति । यदि कुत्रापि प्रायश्चित्ताङ्गत्वेन तीर्थस्नानं दानं वा क्रियते तर्हि तस्य आचरणविशेषत्वेन आचारान्तःपातित्वमेव । प्रायश्चित्ताङ्गत्वेन प्रायश्चित्तभागेऽपि तेषां समावेशः कर्त्तुं शक्यते यथा कृच्छ्रचान्द्रायणादीनाम् ।

---

[106]- अहरहः स्वाहा कुर्यादाकाष्ठात्तथैतं देवयज्ञं समाप्नोति ॥

(बौ. धर्म. २ । ६ । ४)

व्रतस्वरूपम् तद्व्यापकत्वम् च

व्रतशब्दस्यैतिह्यं बहुप्राचीनम् । [107]वेदेऽपि बहुषु स्थलेषु व्रतशब्दस्य व्यवहारः दृश्यते । [108]निरुक्तकारः यास्कः व्रतशब्दस्यार्थद्वयं प्रकाशयति । [109]ब्राह्मणो[110]पनिषदादिषु तस्य नियमपालनं निषेधपालनमित्यर्थद्वयं प्राप्यते । ब्राह्मणग्रंथे गौणार्थद्वयं प्राप्यते यथा व्यक्तेराचरणव्यवस्थो[111]पवासश्च ।

अन्यत्र गृह्यसूत्रधर्मसूत्रादिष्वपि उपर्युक्ताः एतेऽर्थाः प्रकाशिताः । परन्तु [112]मनुः संकल्पाध्यवसायो व्रतमिति कथयति । मनसि निश्चितं कार्ये परिणतं यदा भवति तदेव व्रतसज्ञ भवतीति मनोरभिमतम् । अतः

107- विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युजः सखा ॥
(ऋग्. १ । २२ । १९)
व्रतमुपैष्यन् ब्रूयादग्ने व्रतपते व्रतं चरिष्यामीति ॥
(तै. स. १ । ६ । ७ । २)
अग्ने व्रतपते व्रतं चरिष्यामि । (वाजसं. स. १ । ५)
व्रतेन त्वं व्रतपते समन्तो विश्वाहा सुमना दीदिहीह ॥
(अथर्व, ७ । ७४ । ४)

108- व्रतमिति कर्म नाम निवृत्तिकर्म वारयतीति सतः ।
इदमपीतरद् व्रतमेतस्मादेव वृणोतीति सतः ।
अन्नमपि व्रतमुच्यते । यदावृणोति शरीरम् ॥ (निरुक्त. २ । १४)

109- तस्य व्रतमुद्यन्तमेवैनं नेक्षेतास्तं यान्तं चेति ॥ (सांख्या. ब्रा. ६ । ६)

110- अन्नं न निन्द्यात् तद् व्रतम् । अन्नं बहु कुर्वीत तद् व्रतम् ॥
(तै.उप. ३ । ७-८), (आश्व.श्रौ.सू. ४।२।५-७), (सा.श्रौ.सू. २।३।२६)

111- ऐतरेय. ब्रा. (७ । २) ।

112- सकल्पमूलः कामो वै यज्ञाः संकल्पसम्भवाः ।
व्रतानियमधर्माश्च सर्वे संकल्पजाः स्मृताः ॥ (मनु. २ । ३)

सर्वे व्रतोपवासादयः संकल्पमूलाः भवन्ति । मनसि करणबुद्धौ जातायां मनुष्यः कर्त्तुं प्रभवति । अनन्तरं मनसि संकल्पयति । व्रते प्रवृत्ते संकल्पसिद्धिः भवति ।

[113]मनु [114]याज्ञवल्क्यादयः ब्रह्मचारिव्रत – स्नातकव्रतादीनि तथा प्रायश्चित्तप्रकरणे चान्द्रायणप्राजापत्यादीनि व्रतशब्देन मुख्यतः कथयन्ति । परन्तु [115]महाभारते व्रतशब्दः मुख्यतः धार्मिकसंकल्पे एव व्यवहृतः ।

प्रायश्चित्तव्रतं निमित्तधर्मान्तर्गतम् । ब्रह्मचारिस्नातकगृहस्थादीनां व्रतं वर्णाश्रमधर्मेष्वेव सन्निविष्टम् । संकल्पः व्रतव्यवस्था च सर्वधर्मेषु वर्त्तते । व्रतस्य परिभाषा सर्वैः ग्रन्थकारैः कृता । व्रतशब्दः संकल्पादेशविधिनिर्दिष्ट-व्यवस्थावशताज्ञापरतासेवावृत्तिव्यापाराचारिककर्मधार्मिककार्योपासनाकर्त्त-व्यताधार्मिकाचरणपुण्यकर्मादिषु प्रयुक्तः । [116]अग्निपुराणानुसारं शास्त्रेणोद्घोषितः नियमः व्रतम् । तपःशब्दः अस्य नामान्तरमात्रम् । यत्र व्रते इन्द्रियादीनां नियन्त्रणं क्रियते तत्र व्रतशब्दः नियमशब्दवाच्योऽपि भवति । [117]अमरकोशोऽपि नियमव्रतयोरैक्यमुपस्थापयति । मिताक्षरानुसारं व्रतं मानसिकसंकल्पमात्रमिति । कस्मिन्नपि कर्मणि सम्बन्धिते संकल्पो भवति ।

113- एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः ।
अवकीर्णिवर्ज्यं शुद्ध्यर्थं चान्द्रायणमथापि वा ॥
(मनु. ११-११७)

114- याज्ञ (३ । २५१, २५२, २५४, २५८) ।
यो येन संसृजेद्वर्षं सोऽपि तत्समतामियात् ।
पादन्यूनं चरेत् सोऽपि तस्य तस्य व्रतं द्विजः ॥ (व्यासः)

115- महाभा. वन. (२९६ । ३), उद्योग. (३१ । ७१), शान्ति. (३५ । ३९)

116- शास्त्रोदितो हि नियमो व्रतं तच्च तपो मतम् ।
नियमास्तु विशेषास्तु व्रतस्यैव दमादयः ॥
व्रतं हि कर्त्तृसन्तापात्तप इत्यभिधीयते ।
इन्द्रियग्रामनियमान्नियमश्चाभिधीयते ॥ (अग्नि. पु. १७५ । –३)

117- नियमो व्रतमस्त्री तच्चोपवासादिपुण्यकम् । अमरकोषस्य ब्रह्मवर्गे

अनन्तरं कर्मणि प्रवृत्ते व्रतस्योत्पत्तिरिति [118]श्रीदत्तादयः । संकल्पिते कर्मणि व्रतस्य प्रारम्भः इति [119]लघुविष्णुरपि प्रतिपादयति । शूलपाणि-लक्ष्मीधर-मित्रमिश्र-रघुनन्दन-नारायणभट्टादयः व्रतशब्दस्य तथैवार्थं समर्थयन्ति । परन्तु [120]धर्मसिन्धुकारः पूजादिसमन्वितधार्मिककृत्यविशेषं व्रतपदेन कथयति ।

अस्याः कृत्यकौमुद्याः कालविवेकप्रकरणं व्रतोपवासैः परिपूर्णम् । तत्र व्रतानि सविधि वर्णितानि । अतः व्रतस्याङ्गानां विषये तथा व्यापकत्वविषयेऽपि किञ्चिद् वर्ण्यते ।

वैदिकव्रतानि लौकिकव्रतेभ्यः पृथग् भवन्ति । वैदिकव्रतानां फलमपूर्वफलं स्वर्गप्राप्तिश्चासीत् । परन्तु [121]लौकिकव्रतानां फलानि धनपुत्रायुरारोग्यादीनि । अतः ऐहिकफलहेतुत्वात् लौकिकव्रतानां प्रसिद्धिरधिकाभवत् । सारल्यात् लोकव्यवहारे प्रचलितत्वाद् भोगसाधनत्वान्मोक्षप्रदायकत्वाच्च लौकिकव्रतानां पालनं सर्वैः स्वीकृतम् । वैदिकेषु च कृत्येषु बहुलायाससाध्येषु न सम्प्रति प्रवर्तन्ते जनाः । अतः स्मार्त्तानामेव कर्मणां प्राचुर्येण प्रचारोऽवलोक्यते । एतदपि निर्विवादं यद् भारतीयजनतायाः श्रीवर्चस्तपस्तेजोबुद्धिबलप्रज्ञाशतायुष्यनैरुज्यतादिगुणहीनतायाः अहर्निशप्रवर्धमानाया विकार्यताया निदानमविद्यानिबन्धनं वर्णाश्रमौपयिकोपवासव्रतानामनुष्ठानमेव । अतः भारतीयार्यजनसंस्कृतिप्रतिष्ठापनपूर्वकचतुर्विधपुमर्थसिद्धये नितान्तमावश्यकानि व्रतानि । अतः बहुधर्मशास्त्रनिबन्धकारैः व्रतसम्बन्धिनिबन्धग्रन्थाः रचिताः ।

प्रथमतः शतानन्दः धर्मशास्त्रसंग्रहपुस्तके कतिपयव्रतानामुल्लेखं कृतवान् । तदनन्तरं भोजराजः राजमार्तण्डग्रन्थे चतुर्विंशतिव्रतानि

---

[118] स्वकर्मविषयो नियतः संकल्पो व्रतम् । इति श्रीदत्तहरिनाथवर्धमानाः ।
दीर्घकालानुपालनीयः सङ्कल्पो व्रतमिति नारायणोपाध्यायः ।
एकादशीतत्त्व (पृ. ८), शास्त्रविहितो नियमो व्रतम् । (ए. त.- पृ. ८)

[119] प्रारम्भो वरणं यज्ञे संकल्पो व्रतजापयोः ।
नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया ॥ लघुविष्णुः

[120] धर्मसिन्धुः (पृ. - ९) (मद. पारि. - पृ. ४२३)

[121] कृत्यकल्प व्रत. (पृ. - १ - २) ।

अवर्णयत्। ततो लक्ष्मीधरः व्रतकल्पतरौ (१७५)पञ्चसप्तत्युत्तरैकशतव्रतानां विवरणं प्रादात्। जीमूतवाहनः कालविवेकग्रन्थे (७०) सप्ततिव्रतानां, शूलपाणिः व्रतकालविवेके (११) एकादशव्रतानां, हेमाद्रिः चतुर्वर्गचिन्तामणेः व्रतखण्डे (७००)सप्तशतव्रतानां, चण्डेश्वरः कृत्यरत्नाकरे (९०)नवतिव्रतानां, गोपीनाथकविराजश्च व्रतराजपुस्तके (११६) षोडशाधिकशतव्रतानां वर्णनं कृतवान्। तथाऽनेन बृहस्पतिनाऽपि अस्यां कृत्यकौमुद्यां सप्ततिव्रतानां सविस्तृतविवरणं प्रदत्तम्।

वैदिकयज्ञकर्मणि सर्वेषामधिकारो नासीत्। तेषु कर्मस्वनधिकृतानां धर्मोपार्जनाय इष्टसिद्धये च पुराणेषु व्रतोपवासादीनां कल्पना कृता। अतः लौकिकव्रतादिषु ब्राह्मणादिशूद्रान्तानां [122]सर्वेषां वर्णानां स्त्रीणां संकरजातीनां चाण्डालानामप्यधिकारः कल्पितः। यद्यपि पुराणनिबन्धादिषु स्त्रीणां कृते कतिचित् व्रतानि निर्दिष्टानि, तथापि [123]मनु[124]विष्ण्वादयः स्त्रीणामस्वातन्त्र्यं स्वामिपारतन्त्र्यं च प्रतिपाद्य स्त्रियः स्वामिसेवया स्वर्गफलं लभेरन्निति कथयन्ति। मध्यकालीननिबन्धकाराः पत्युरनुज्ञापूर्वकं स्त्री व्रताधिकारिणी भवितुमर्हतीति प्रत्यपादयन्।

व्रतकर्त्ता स्वयं यदि व्याध्यादिना व्रतपालनेऽसमर्थः भवति तर्ह्यनेन [125]प्रतिनिधिनाऽपि व्रतपूर्त्तिर्विधेया।

122- व्रतोपवासनियमैः शरीरोत्तापनैस्तथा।
वर्णाः सर्वेऽपि मुच्यन्ते पातकेभ्यो न संशयः॥
देवलः (चतु. चिन्ता. व्रत. १-३२५)

123- नास्ति स्त्रीणां पृथग् यज्ञो न व्रतं नाप्युपोषयेत्।
पतिं शुश्रूषते येन तेन स्वर्गे महीयते॥ मनुस्मृ. (५।१५५)

124- पत्यौ जीवति या योषिदुपवासव्रतं चरेत्।
आयुः सा हरते भर्त्तुः नरकं चैव गच्छति॥ विष्णु. धर्म. (२५।१६)

125- असामर्थ्ये शरीरस्य व्रते च समुपस्थिते।
कारयेद् धर्मपत्नीं वा पुत्रं वा विनयान्वितम्।
भ्रातरं भगिनीं शिष्यं ब्राह्मणं दक्षिणादिभिः॥
स्कान्द. (स्मृतिसारो. पृ. १०१)

पितृमातृपत्नीशिष्यभ्रात्रादयः [126]प्रतिनिधित्वं कर्त्तुमर्हन्ति । परन्तु काम्यव्रते प्रतिनिधिः नास्ति । कुत्रचित् प्रारम्भात् काम्यकर्मापि प्रतिनिधिना कर्त्तुं [127]विधिः वर्त्तते । पत्युर्व्रतं भार्या तथा भार्यायाः व्रतं पतिः कर्त्तुमर्हतीति [128]पैठीनसिरपि निर्दिशति । प्रतिनिधिना कारिते व्रते प्रतिनिधेरपि फलमस्ति । परन्तु व्रताधिकारी यद्यसामर्थ्यात्कर्त्तुं नार्हति तर्हि प्रतिनिधिना कारिते व्रते व्रतभङ्गो धर्महानिर्वा न जायते ।

व्रतं [129]त्रिविधं यथा मानसिकं वाचिकं कायिकञ्चेति । अहिंसासत्यमस्तेयब्रह्मचर्यमकल्कतादीनि हरिसन्तोषकारीणि मानसव्रतान्तर्गतानि । वेदाध्ययनसत्यभाषणापैशुन्यसहस्रनामकीर्त्तनादीनि वाचिकव्रतान्तर्गतानि । एकभक्तनक्तायाचितोपवासादीनि कायिकव्रतान्तर्गतानि ।

126- पितृमातृपतिभ्रातृगुर्वर्थं च विशेषतः ।
उपवासं प्रकुर्वाणः पुण्यं शतगुणं लभेत् ॥
तथा राजक्षत्रियार्थे चैकादश्यामुपोषितः ।
पुरोधाः क्षत्रिणा सार्धं फलमाप्नोति निश्चितम् ॥
कात्यायनः (स्मृ. सा. - पृ. १०१)

127- काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः ।
काम्येऽप्युपक्रमादूर्ध्वं केचित् प्रतिनिधिं विदुः ॥ (स्मृ. सा. – पृ. १०)

128- भार्या पत्युर्व्रतं कुर्याद् भार्यायाश्च पतिर्व्रतम् ।
असामर्थ्ये परस्ताभ्यां व्रतभङ्गो न जायते ॥
पैठीनसिः (का. मा. – पृ. २१३)

129- अहिंसासत्यमस्तेयं ब्रह्मचर्यमकल्कता ।
एतानि मानसान्याहुर्व्रतानि हरितुष्टये ॥
वेदस्याध्ययनं विष्णोः कीर्त्तनं सत्यभाषणम् ।
अपैशुन्यमिदं राजन् वाचिकं व्रतमुच्यते ॥
एकभक्तं तथा नक्तमुपवासमयाचितम् ।
इत्येवं कायिकं पुंसां व्रतमुक्तं नरेश्वर ॥ पद्मपु. (४ । ८४ । ४२-४४)

नित्यनैमित्तिककाम्यभेदेनान्यथा[130] व्रतस्य विभाजनमपि वर्त्तते। नित्यव्रतं यथा एकादशीजन्माष्टम्यादिः। नैमित्तिकव्रतं यथा चान्द्रायणादि प्रायश्चित्तरूपं, काम्य व्रतं यथा तत्तिथ्युपवासादिरूपं यथा अनन्तव्रतम्।

अन्यथा तिथिनक्षत्रवारयोगकरणपक्षमासऋत्वयनसंवत्सरानेकसंवत्सरव्यापीन्यपि व्रतानि सन्ति। तेषां संज्ञाः स्वरूपाणि च धर्मशास्त्रीयनिबन्धग्रन्थेषु पुराणेषु च बहुशः प्राप्यन्ते। हेमाद्रिः पुनः संक्रान्तिव्रतं प्रकीर्णकव्रतमपि योजयति। समयप्रदीपकारः देवताभेदेन व्रतभेदं विवृणोति।

गृहीतव्रतः व्रतदिवसे कतिचन नियमान् पालयेत्। तद्दिने प्रातः-[131]स्नानं कृत्वोत्तरमुखः औदुम्बरपात्रं हस्ते गृहीत्वा महावाक्यपुरःसरं सूर्यादिदेवताभ्यः निवेद्य संकल्पपूर्वकमेकभक्तनक्तायाचितोपवासादिव्रतं गृह्णीयात्। तस्मिन्न अहोरात्रे दिवाशयनाक्षक्रीड़ामैथुनादि वर्जयेत्। अत्यापदि जलपानं कुर्यात्। यतः [132]अम्मूलफलपयोहविर्ब्राह्मणकाम्यागुरु-

---

[130] तच्च नित्य नैमित्तिकं काम्यञ्च, नित्यमेकादश्यादि व्रतम्।
नैमित्तिकं चान्द्रायणादि व्रतं, काम्यं तत्तत्तिथ्युपवासादिरूपम्॥
श्रीवर्मकल्प. (८। २४५२)

[131] गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः।
उपवासस्तु गृह्णीयाद् यद्वा संकल्पयेद् बुधः॥
महाभारते. (व्रतकल्प. पृ, ४)
अभुक्त्वा प्रातराहारं स्नात्वाऽऽचम्य समाहितः।
सूर्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेत्॥
उपवासो विनश्येत दिवा स्वप्नाक्षमैथुनैः।
अत्यये जलपाने च नोपवासः प्रदुष्यति। देवलः (व्र. क. – पृ, ४)

[132] अष्टावेताव्रतघ्नानि आपो मूलो फलं पयः।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्॥
सर्वभूतभयं व्याधिः प्रसादो गुरुशासनम्।
अव्रतघ्नानि पठ्यन्ते सकृदेतानि शाश्वतः॥ देवलः (कृत्य. कल्प.- पृ. ५)

वचनौषधानि व्रतघ्नानि न भवन्ति । व्रती रजस्वलाहीनपतितपा[133]खण्डीभिः साकं वार्त्तालापं त्यक्त्वा [134]ब्रह्मचर्य्यपूर्वकमधःशय्यां कुर्यात् । केषुचित् व्रतेषु अहोरात्रमध्ये शयनाभावोऽपि विहितः ॥

ब्राह्मणकुलस्त्रीकुमारीभिक्षुकातिथीनपि भोजनादिना तोषयेत् । एवं शास्त्रोक्ताः सामान्या व्रतधर्माः व्रतिना पालनीयाः ।

व्रतपालनाय निर्दिष्टतिथिवारादयः द्रष्टव्याः । नोचेत् व्रतस्य फलहानिः भवति । अतः धर्मशास्त्रनिबन्धकाराः सर्वादौ व्रतकालं निरूपयन्ति, तदनन्तरञ्च व्रतविधिस्वरूपादीन् वर्णयन्ति । अतः कदा व्रतपालनं निषिध्यते कदाचिच्च निर्दिष्टकाले नियम्यते । [135]बृहस्पतिशुक्रयोरस्ते बालवृद्धावस्थायां मलमासे च व्रतानामारम्भोद्यापने न कार्ये । [136]रत्नमालानुसारं सोमवार-बुधवार-बृहस्पतिवार-शुक्रवाराः धार्मिककर्मसु शुभदाः फलदाश्च । [137]भुजबलग्रन्थानुसारं मङ्गलवारः सर्वकर्मणोऽनुपयोगी, परन्तु कृष्यध्ययनयुद्धेषु प्रशस्यते । व्रतारम्भे तिथेः शुद्धता विद्धता, कर्मकालव्याप्तिश्च द्रष्टव्या ।

133- पतितपाखण्डिनास्तिकसम्भाषानृताश्लीलादिकमुपवासदिने वर्जयेत् ।
हारीतः (व्र. का. वि. – पृ. १०)

स्त्रीशूद्रं पतितं चापि नाभिभाषेद् व्रतान्वितः ॥ महाभा. शा. ३५–३९

134- व्रतेष्वेतेषु सर्वेषु ब्रह्मचर्यं विधीयते ।
भोजने तु हविष्यान्नं सामान्यत उदाहृतम् ॥ नारदीय. पूर्वा. ११०-४८

135- नीचस्थे वक्रसंस्थेप्यभिचरणगते बालवृद्धास्तगे वा ।
सन्यासो देवयात्रा व्रतचरणविधिः कर्णवेधस्तु दीक्षा ॥

मौञ्जीबन्धोऽथ चूडापरिणयनविधिर्वास्तुदेवप्रतिष्ठाः ।
वर्ज्याः सद्भिः प्रयत्नात् त्रिदशपतिगुरौ सिंहराशिस्थिते च ॥
हेमाद्रि. (व्रत. १–२४५)

136- रत्नमाला- (३ । १५)

137- भुजबलः - पृ. २०९

[138]गर्गेणाप्युक्तं यत्— तिथिनक्षत्रवारादि पापपुण्ययोः साधनम्। व्रतस्य सहकारिरूपेणैते पुण्यपापे दत्तः । सर्वाः तिथयः कर्मकालव्यापिन्यः भवन्ति चेत्तदा व्रतपालनमुत्तमम् । कर्मकालव्याप्त्यभावे गौणकालपरिग्रहेण व्रत कुर्यात् । तस्यैव व्रतोपवासकालस्य नियमनाय युग्मादिवचनानि आदरणीयानि भवन्ति । येषु व्रतेषु विशेषकर्मकालवचनानि न सन्ति तेषु व्रतेषु युग्मवचनानुसारेण व्यवस्थोन्नेया । एवं तिथेः कर्मकालं वीक्ष्य व्रतानां पालनं क्रियते चेत् मनुष्यः व्रतफलं प्राप्तुमर्हति । अतः बृहस्पतिनाऽपि कृत्यकौमुद्यां व्रतादीनां पालननिषेधकालौ निरूपितौ ।

व्रतसाहित्यमतिविशालम् । वैदिकसाहित्य-धर्मसूत्र-स्मृतिग्रन्थ-रामायण-महाभारत–गरुडपुराण - मत्स्यपुराण–पद्मपुराण–विष्णुपुराण–स्कन्दपुराण–राजमार्त्तण्ड–कालविवेक–कृत्यरत्नाकरादिषु ग्रन्थेषु व्रतानामुल्लेखो वर्त्तते । तेभ्यः पुराणेषु व्रतानि विशालरूपं धारयन्ति । यथा भविष्यपुराणस्य ब्राह्मपर्वणि (७१००)सप्तसहस्रोत्तरपञ्चशतश्लोकाः, उत्तरखण्डे (५०००)पञ्चसहस्रश्लोकाः, मत्स्यपुराणस्य (१२३०)द्वादशशतोत्तरत्रिंशत्श्लोकाः, वराहपुराणस्य (७००)सप्तशतश्लोकाः, विष्णुधर्मोत्तरस्य (१६००)षोडशशतसंख्यकाः श्लोकाः व्रतविषयकाः एव ।

अनन्तरं स्मृतिपुराणज्योतिषग्रन्थानाधारीकृत्य बहवः धर्मशास्त्रीयनिबन्धग्रन्थाः रचिताः । तत्र लक्ष्मीधरस्य व्रतकल्पतरुः, जीमूतवाहनस्य कालविवेकः, हेमाद्रेः चतुर्वर्गचिन्तामणेः व्रतखण्डं, श्रीदत्तस्य समयप्रदीपः, चण्डेश्वरस्य कृत्यरत्नाकरः, शतानन्दस्य धर्मशास्त्रसंग्रहः, आदित्यसूरिणः कालादर्शः, माधवाचार्यस्य कालमाधवः, शूलपाणेः व्रतकालविवेक-तिथिविवेकौ, अलाडनाथस्य निर्णयामृतं, बृहस्पतेः कृत्यकौमुदी, गोविन्दानन्दस्य वर्षक्रियाकौमुदी, गदाधरस्य कालसार-व्रतसारौ, धर्मुपाठिनः कालचन्द्रिका, दिव्यसिंहमहा-

---

138- तिथिनक्षत्रवारादि साधनं पुण्यपापयोः ।
प्रधानगुणभावेन स्वान्त्रेण न ते क्षमाः ॥

गर्गः (तिथितत्त्वं पृ. - ४)

पात्रस्य कालदीपः, रघुनाथदाशस्य कालनिर्णयः, कमलाकरभट्टस्य निर्णयसिन्धुः, काशीनाथोपाध्यायस्य धर्मसिन्धुः, मित्रमिश्रस्य व्रतप्रकाश-समयप्रकाशौ, नीलकण्ठस्य समयमयूखः, रघुनन्दनस्य तिथितत्त्व-व्रततत्त्व-कृत्यतत्त्वानि, शङ्करभट्टस्य व्रतार्कः, दिवाकरस्य तिथ्यर्कः, विश्वनाथस्य व्रतराजः इत्येते व्रतविषयकाः उल्लेखयोग्याः ग्रन्थाः ।

दानस्वरूपं तद् व्यापकत्वं च

युगानुसारं धर्मः परिवर्त्तितो भवति । अतः मनुना चतुर्युगाणां चत्वारः धर्माः कथिताः । तेषु धर्मेषु कलौ [139]दानधर्मः विशिष्यते । तदेव दानं प्रायशः [140]गृहस्थानां कृते निर्दिष्टम् ।

वैदिककालेऽपि वेदसंहिताब्राह्मणोपनिषत्सु गो-रथाश्वोष्ट्र-दासी-भोजनान्न-भूमि-कनक-कन्या-दानादीनां वैशिष्ट्यमुल्लिखितम् । दानशब्दस्यार्थः प्राचीनकालेऽपि स्पष्टं प्रतिपादितः । तत्र यागहोमदानेषु भेदः दृश्यते । यागकर्मणि वैदिकमन्त्रैः वस्तुसमर्पणमात्रं भवति । होमकर्मणि वैदिकमन्त्रैः देवेभ्यः सकाशमग्नौ घृतं प्रक्षिप्यते । दानकर्मणि सविधिवाक्यं देयवस्तूनि स्वस्वत्वध्वंसपूर्वकपरस्वत्वापत्तिपूर्वकञ्च पात्राय दीयते । दानग्रहणं मानसिकवाचिकशारीरिकस्वीकाररूपेण वा भवति । दानविषयकधर्मशास्त्रीयनिबन्धग्रन्थेषु दानविधेः विशदविवरणं प्राप्यते । दानस्याङ्गप्रकारभेदादिविषये अधस्तात् किञ्चित् संक्षिप्य प्रस्तूयते ।

139- तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ॥ मनुस्मृ. (१ । ८६)
तपः पर कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमेवाहुः दानमेव कलौ युगे ॥ पराशरस्मृ. (१ । २३)

140- यतीनां तु शमो धर्मस्त्वनाहारो वनोकसाम् ।
दानमेव गृहस्थानां शुश्रूषा ब्रह्मचारिणाम् ॥
यमः (चतु. चिन्ता. दान. - पृ. ६)

[141]भविष्यपुराणे दानस्य षडङ्गान्युक्तानि । यथा-दाता, प्रतिग्रहीता श्रद्धा, धर्मयुक्तदेयः, उपयुक्तकालः, उपयुक्तदेशश्च । एषु प्रथमाङ्गचतुष्टयस्योल्लेखः मनुनाऽपि कृतः । दाता कतिपयविशिष्टगुणान्वितः स्यात् ।

[142]देवलव्यासादिभिः अपापरोगी, धर्मात्मा, अव्यसनः, शुचिरनिन्द्यकर्मजीवी दाता प्रशस्त इत्युक्तः । प्रतिग्रहीताऽपि कतिपयगुणविशिष्टो भवेत् । [143]दक्षानुसारं मातृपितृगुरुमित्रेभ्यः तथा चरित्रवते, तथोपकारिदरिद्रासहायेभ्यः दानेन पुण्यप्राप्तिर्भवति । [144]बृहद्यम[145]याज्ञवल्क्यप्रभृतयः पात्रपरिचयं ददति । एवमेव सुपात्रं दृष्ट्वा दानं दद्यात् । तच्च दानं पुनः सश्रद्धं दद्यादिति श्रद्धा दानाङ्गम् । [146]श्रद्धया यत् किञ्चिदपि सुपात्रे दीयते तदेव

141- दाता प्रतिग्रहीता च श्रद्धादेयं च धर्मयुक् ।
देशकालौ च दानानामङ्गान्येतानि षड्विदुः ॥
भविष्यपु. (शाश्वतधर्म. - पृ. ११७)

142- अपापरोगी धर्मात्मा दित्सुरव्यसनः शुचिः ।
अनिन्द्यजीवकर्मा च षड्भिर्दाता प्रशस्यते ॥
देवलः (चतु. चिन्ता., दान. - पृ. १४)

शतेषु जायते शूरः सहस्रेषु च पण्डितः ।
वक्ता शतसहस्रेषु दाता भवति वा न वा ॥ व्यासः (४ । ६०)

143- मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि ।
दीनानाथविशिष्टेषु दत्तं च सफलं भवेत् ॥ दक्षस्मृ. (३ । १७)

144- बृहद्यमस्मृ. (३ । ३४-३७)

145- न विद्यया केवलया तपसा वाऽपि पात्रता ।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्त्तितम् ॥ याज्ञ. स्मृ. (१-२००)

146- अन्यायाधिगतां दत्त्वा सकलां पृथिवीमपि ।
श्रद्धावर्जमपात्राय न काश्चिद् भूतिमाप्नुयात् ॥
प्रदाय शाकमुष्टिं वा श्रद्धाभक्तिसमुद्यताम् ।
महते पात्रभूताय सर्वाभ्युदयमाप्नुयात् ॥ देवलः (अपरार्क. पृ. २९०)

सफलं भवति, परन्त्वश्रद्धया कुपात्रे वा यत् किमपि दीयते तन्निष्फलं भवति। अतः स्वशक्त्यनुसारं सश्रद्धमेव दानं कुर्यात् । दानेषु गोभूमिविद्यानां दानमतिदानं सर्वोत्कृष्टदानमिति कथ्यते । नित्यनैमित्तिककाम्यभेदेन दानं त्रिविधम् । तत्र बलिवैश्वदेवानन्तरं दीयमानं दानं नित्यं, ग्रहणादिविशिष्टावसरेषु दीयमानं दानं नैमित्तिकं, तथा सन्तानोत्पत्तिविजयादिषु दीयमानं दानं काम्यम् ।

[147]सौरपुराणे विमलदाननाम्ना चतुर्थदानमप्युच्यते । यथा—ब्रह्मज्ञानिने सश्रद्धं भगवत्प्राप्तये दीयते यद्दानं तस्यैव विमलं नाम । [148]पद्मपुराणे एतैः त्रिभिर्दानैः सहाभ्युदयात्मकदानं परमदानं चेति पञ्चदानानि प्रतिपादितानि । [149]अन्यत्राप्यन्यथा धर्मार्थकामव्रीडाहर्षभयादीनि षड् दानस्याधिष्ठानान्युक्तानि । [150]भगवद्गीतायां सात्त्विकराजसतामसभेदेन दानस्य त्रिधा भेदः दर्शितः ।

147- नित्यं नैमित्तिकं काम्यं विमलञ्च चतुर्विधम् ।
दानं पात्रे प्रदातव्यं नापात्रेऽप्यणुमात्रकम् ॥ सौरपु. (१० । २)

148- नित्यं नैमित्तिकं चैव काम्यमभ्युदयात्मकम् ।
अन्यच्च परमं दानमिति पञ्चविधं स्मृतम् ॥
प्रातर्मध्याह्नापराह्णेषु त्रिषु कालेषु यत्नतः ।
यत् किञ्चिदपि दातव्यं नित्यमेव प्रकीर्त्तितम् ॥
मासेषु पुण्यकालेषु दानं नैमित्तिकं स्मृतम् ।
काम्यकालं प्रवक्ष्यामि यद्दानं फलदायकम् ॥
आभ्युदयं प्रवक्ष्यामि यच्च यज्ञादिषु स्मृतम् ।
जातकर्मादिकार्येषु मौञ्ज्याद्युद्वाहकर्मसु ॥
प्रजावृद्धिकरं भोग यशः स्वर्गसुखप्रदम् ।
अन्त्यञ्चैव प्रवक्ष्यामि शृणु दानं द्विजोत्तम ॥
पद्मपु. (३ । ९७ । ३१-३२, ४५, ४६, ५०)

149- शाश्वतधर्म. (पृ. ११५)

150- भगवद्गीता (१७ । २०-२२)

कतिचन पदार्थान् मनुष्यः दातुमनर्हः भवति । यथा (क) विश्वजिद् यागे मनुष्यः मातृपितृपुत्रपत्न्यादीनां दानेऽसमर्थः । (ख) राजा स्वसम्पूर्णराज्यं दातुमनर्हः । (ग) याज्ञिकस्य सेवकरूपेण नियोजितस्य शूद्रस्य दानं न भवेत् । (घ) ऋणपरिशोधायान्यस्मै दत्तं धनं न दद्यात् । (ङ) याचिताभूषणानां दानं न कुर्यात् । (च) न्यासधनं न दद्यात् । (छ) संयुक्तसम्पत्तिः दानयोग्या न भवति ।

दानकालविषये बहवः नियमाः दृश्यन्ते । नित्यदाने भिक्षुकविशिष्टातिथिभ्यः दानं दद्यात् । परन्तु तदतिरिक्तविशिष्ट[151]कालेष्वपि दानं सुफलं पुण्यप्रदञ्च मन्यते । [152]लघुशातातप[153]महाभारतादीनां वाक्यानुसारमयनस्य षडशीत्याश्च प्रारम्भदिवसे सूर्यचन्द्रग्रहणयोरमावास्यायां, तिथिक्षये, विषुवे, व्यतीपाते च दानेन उत्तरोत्तराक्षयफलमाप्यते । [154]शातातप[155]विश्वरूप[156]प्रजापत्य[157]त्र्यादिभिः दानकालविषये नियमाः वर्णिताः । [158]विष्णुधर्मसूत्रे पूर्णिमास्वनु[159]शासनपर्वणि कृत्तिकादिषु सप्तविंशतिनक्षत्रेषु च दानफलं प्रतिपादितम् ।

151- दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः ।
याचितेनापि दातव्यं श्रद्धापूतं स्वशक्तितः ॥ याज्ञ. स्मृ. (१ । २०३)

152- अयनादौ सदा दद्याद् द्रव्यमिष्टं गृहे वसन् ।
षडशीतिमुखे चैव विमुक्ते चन्द्रसूर्ययोः ॥लघुशाता. (अपरार्के पृ. २९१)
शतमिन्दुक्षये दानं सहस्रं तु दिनक्षये ।
विषुवे शतसाहस्रं व्यतीपाते त्वनन्तकम् ॥ लघुशाता. स्मृ. (श्लो. १५०)

153- अयने विषुवे चैव षडशीतिमुखेषु च ।
चन्द्रसूर्योपरागे च दत्तमक्षयमुच्यते ॥ महाभा. वनपर्व. (२०० । १२५)

154- शातातप स्मृ. १४६

155- विश्वरूप व्या. (याज्ञ. १ । २१४-२१७)

156- प्रजापति स्मृ. (२५, २८)

157- अत्रि स्मृ. (३२७)

158- विष्णुधर्मसूत्रे (८९ अध्याये)

159- अनुशासनपर्वणि (अध्याये ६४)

रात्रौ तु ग्रहणविवाहसंक्रान्तिपुत्रजन्मव्यतिरिक्तं दानं [160]वर्ज्यम् । भोजनदानं तु रात्रावपि कार्यम् ।

स्मृतिपुराणनिबन्धेषु दानदेशविषये प्रभूता चर्चा वर्त्तते ।[161]दानमयूखानुसारं गृहे दत्तं दानं दशगुणफलदं, गोशालायां शतगुणफलदं, तीर्थे सहस्रगुणफलदं तथा शिवलिङ्गसमक्षमनन्तफलदं भवति । [162]स्कन्दपुराणानुसारं तीर्थक्षेत्रेषु दत्तं दानमनन्तफलदायकं भवति । दानस्य पुनरन्यान्यङ्गानि दानविधिदक्षिणाद्रव्यदेवतान्यपि निबन्धकारैः यथायथं वर्णितानि ।

इदमेव दानसाहित्यमप्यतिविशालम् । तत्र पुराणेषु दानविषये बह्वोऽध्यायाः वर्णिताः । तत्रा[163]ग्निपुराण[164]मत्स्यपुराण[165]वराहपुराण[166]सौरपुराण[167]विष्णुधर्मोत्तर[168]महाभारत[169]रामायणादिष्वपि मुख्य-

---

160- अत्रि स्मृ. (३२७, ।

161- दान म. (पृ. ८) ।

162 वाराणसी कुरुक्षेत्रं प्रयागः पुष्कराणि च ।
गंगा समुद्रतीरश्च नैमिषामरकण्टकम् ।। स्कन्दपुराणे
श्रीपर्वतमहाकालं गोकर्णं वेदपर्वतम् ।
इत्याद्याः कीर्त्तिताः देशाः सुरसिद्धनिषेविताः ।।
सर्वे शिलोच्चयाः पुण्याः सर्वा नद्यः ससागराः ।
गोसिद्धमुनिवासाश्च देशाः पुण्याः प्रकीर्त्तिताः ।।
एषु तीर्थेषु यद्दत्तं फलस्यानन्त्यकृद् भवेत् ।। हेमाद्रि. दान. (पृ. ८३)

163- अग्निपु. (२०८-२१५) अध्यायेषु ।

164- मत्स्यपु. (८२-९१), (२७४-२८९) अध्यायेषु ।

165- वराहपु. (९९-१११) अध्यायेषु ।

166- सौरपु. १० अध्याये ।

167- पद्मपु. (३ । ९७) अध्याये ।

168- महाभारतस्य वनपर्वानुशासनिकपर्वशान्तिपर्वादिषु ।

169- रामायणस्यायोध्याकाण्डे ।

रूपेण दानविषयाः चर्चिताः। निबन्धग्रन्थेष्वपि लक्ष्मीधरस्य दानकल्पतरुः, वल्लालसेनस्य दानसागरः, हेमाद्रेः दानखण्डं, चण्डेश्वरस्य दानरत्नाकरः, मदनसिंहस्य दानरत्नं, दलपतेः दानसारः, गोविन्दानन्दस्य दानक्रियाकौमुदी, रघुनन्दनस्य दानतत्त्वं, नीलकण्ठस्य दानमयूखः, नन्दपण्डितस्य दानकौतुकं विद्यापतेः दानवाक्यावलिः, मित्रमिश्रस्य दानप्रकाशः, कमलाकरस्य दानकमलाकरः, अनन्तदेवस्य दानकौस्तुभम् इत्यादयः मुख्याः।

श्राद्धस्वरूपं तद् व्यापकत्वं च

आयुःप्रजाद्यैहिकफललाभाय, स्वर्गादिपारलौकिकफललाभाय सर्वोपरि मोक्षलाभाय च पितृयज्ञो धर्मशास्त्रेषु विहितः। स च पितृयज्ञः श्राद्धनाम्ना प्रसिद्धः। पुत्रैः क्रियमाणं श्राद्धकर्म पितॄणामस्तित्वप्रयुक्तमेव। अपिच तत्कर्म [170]पितृभक्तिप्रयुक्तम्। अतः अग्निष्वात्तादिपितृमन्त्रद्वारा पितृप्रसादकामुकैः पुत्रैरवश्यं श्राद्धादिकर्म कर्त्तव्यं स्वस्य पुत्रत्व चारितार्थ्यार्थमिति वेदाः शास्त्राणि पुराणानि च प्रकटयन्ति। यदिच पुत्रैः श्राद्धं नानुष्ठीयते तर्हि जीवतां पुत्राणाममङ्गलं भवेदित्यपि निरूपितमस्ति। अतः श्राद्धादिकर्म पितृभक्तिप्रयुक्तमिति स्फुटम्। श्राद्धशब्दः पैतृकेषु कर्मसु योगरूढः। एतस्य श्राद्धस्य [171]लक्षणं बहुभिः बहुधा प्रकटितम्। निर्दिष्टदेशे काले च पात्रगुण-

---

170- जीवतोर्वाक्यकरणान्मृताहे भूरिभोजनात्।
गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता॥ त्रिस्थली. (पृ. - ३१९)

171- श्राद्धलक्षणं यथा ब्रह्मपुराणे—
देशे काले च पात्रे च श्रद्धया विधिना च यत्।
पितॄनुद्दिश्य विप्रेभ्यो दत्तं श्राद्धमुदाहृतम्॥ श्राद्धप्र. (पृ. ३)

श्राद्धं नामादनीयस्य तत्स्थानीयस्य वा द्रव्यस्य प्रेतोद्देशेन श्रद्धया त्यागः। मिताक्ष. (याज्ञस्मृ. १-२१७)।

एतेन पितॄनुद्दिश्य द्रव्यत्यागो ब्राह्मणस्वीकारपर्यन्तं श्राद्धस्वरूपं प्रधानम्। श्राद्धकल्पतरौ (पृ. ४)।

विशिष्टेभ्यः विप्रेभ्यः पितॄनुद्दिश्य यद्दीयते तदेव श्राद्धशब्देनोच्यते । तच्च श्राद्धं द्वादशधेत्याह [172]विश्वामित्रः । परन्तु [173]अङ्गिरसा षण्णवतिधा भेदाः प्रदर्शिताः । तानि च द्वादशामावास्याः, चत्वारः युगादयः, चतुर्दश मन्वादितिथयः, द्वादशसंक्रान्तयः, त्रयोदश वैधृतयः, त्रयोदश व्यतीपाताश्चेति । [174]शाखाभेदेनापि श्राद्धभेदाः निरूपिताः । ते च नित्यनैमित्तिककाम्यत्वेन श्राद्धभेदाः भिन्नभिन्नकर्मसु योगारूढाः ।

श्राद्धं नाम वेदबोधितपात्रालम्भनपूर्वकप्रमीत पित्रादिदेवतोद्देश्यको द्रव्यत्यागविशेषः । श्राद्धविवेके (पृ. १) ।

देशे काले च पात्रे च विधिना हविषा च यत् ।
तिलैर्दर्भैश्च मन्त्रैश्च श्राद्धं स्याच्छ्रद्धया युतम् ॥

पराशरः (गौडीयश्राद्धप्र. पृ. १)

प्रेतं पितॄंश्च निर्दिश्य भोज्यं यत् प्रियमात्मनः ।
श्रद्धया दीयते यत्र तच्छ्राद्धं परिकीर्तितम् ॥

मरीचिः (गौडीयश्राद्धप्र. पृ. १)

देशकालपात्रेषु पित्राद्युद्देशेन विधिहविस्तिलदर्भमन्त्रश्रद्धादिभिर्दानं श्राद्धम् । गौडीयश्राद्धप्रकाशे (पृ. १)

[172] नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिण्डनम् ।
पार्वणं चेति विज्ञेयं गोष्ठ्यां शुद्ध्यर्थमष्टमम् ॥
कर्माङ्गं नवमं प्रोक्तं दैविकं दशमं स्मृतम् ।
यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतम् ॥

विश्वामित्रः (श्राद्धकल्पतरौ पृ. ६)

[173] अमायुगमनुक्रान्तिधृतिपातमहालयाः ।
अन्वष्टक्यं च पूर्वेद्युः षण्णवत्यः प्रकीर्तिताः ॥ पूर्वाङ्गि. स्मृ. श्लो.- ६०६

[174] दृश्यन्ते बहवो भेदाः द्विजानां श्राद्धकर्मणि ।
श्राद्धस्य बहवो भेदाः शाखाभेदैर्व्यवस्थिताः ॥

स्कन्दपु. नागर. (५ । २४-२५)

श्राद्धकर्मणः बहून्यङ्गानि सन्ति । तानि सर्वाण्यवहितत्वेन यजमानेन पालनीयानि । तान्यङ्गानि यथा—श्राद्धाधिकारी-श्राद्धकालः, पूर्वदिनकृत्यं पंक्तिपावनाः, अपाङ्क्तेयाः, आमन्त्रणविधिः, श्राद्धकर्त्तृनियमाः, श्राद्धभोक्तृनियमाः, श्राद्धे हविष्यवस्तूनि, श्राद्धे प्रयोज्यधनं, श्राद्धोपयोगिपात्रविचारः, श्राद्धानां पृथक्स्वरूपं, वैश्वदेवविधिः, पिण्डदानकालः, पिण्डप्रमाणं, ब्राह्मणभोजनम्, आमश्राद्धं, हेमश्राद्धं, श्राद्धदेशः, श्राद्धवर्ज्यकालैकोद्दिष्टसपिण्डीकरणाभ्युदयिकश्राद्धे दानदक्षिणा, वृषोत्सर्गः, जीवच्छ्राद्धं, मलमासे श्राद्धकृत्यं, क्रमिकश्राद्ध च ।

श्राद्धकर्म प्राचीनकालतः एव वर्त्तते । श्राद्धादिकर्मणां स्पष्टमुल्लेखः यद्यपि संहितासु न प्राप्यते तथापि [175]पितृलोक[176]पितृयज्ञादयः शब्दाः दृश्यन्ते । अतः तत्राऽपि पितृयज्ञाख्यस्य श्राद्धकर्मणः सत्ता आसीत् । अनन्तरं श्रौतसूत्रेष्वपि तद्विषयः विचारितः । बृहद्देवतायामपि श्राद्धदैवत्यसूक्तं प्राप्यते । गृह्यसूत्रग्रन्थेषु सुस्पष्टं श्राद्धपद्धतिः प्रदर्शिता । धर्मसूत्रग्रन्थेषु च श्राद्धशय्यासनादिश्राद्धसूतकप्रभृतयः शब्दाः प्रयुक्ताः । इतिहासोपनिषदि श्राद्धादिपितृकार्यस्य महती चर्चा वर्त्तते । [177]नारदपरिव्राजकोपनिषदि पिण्डोपनिषदि च पिण्डप्रदानस्य, योगशिखोपनिषदि पिण्डपातिनो वर्णनं प्राप्यते । रामायणेऽप्ययोध्याकाण्डे रामभद्रकर्त्तृकं श्राद्धं वर्णितम् । महाभारते तु बहुधा श्राद्धकर्मणामुल्लेखः प्राप्यते । [178]मनु[179]याज्ञवल्क्यादिभिरपि श्राद्धं सविवरणं प्रदर्शितम् ।

175- तै. स. (२ । ६ । २ । १) ।

178- मं. स. (१ । १० । १६) ।

177- नारदपरिव्राजकोप. (४ । ३८) ।

178- मनुस्मृ, (३ । २०८-२६५) ।

179- याज्ञ, स्मृ. (१ । २२६-२४९) ।

पुराणग्रन्थेष्वपि [180]मत्स्य[181]विष्णु[182]मार्कण्डेय[183]कूर्म[184]पद्म-[185]ब्रह्माण्ड[186]स्कन्द[187]विष्णुधर्मोत्तरा[188]ग्निपुराणानि मुख्यरूपेण श्राद्धकर्माणि व्याख्यान्ति । अनन्तरञ्च निबन्धग्रन्थेषु स एव मुख्यविषयरूपेण वरीवर्त्तते । तेषु श्राद्धकल्पतरु-श्राद्धकल्प-श्राद्धविवेक-श्राद्धमञ्जरी श्राद्धकल्पलता-श्राद्धदीप-श्राद्धप्रदीप-श्राद्धनिर्णय-स्मृतिचन्द्रिका-श्राद्धकाण्ड-श्राद्धसार-श्राद्धमयूख-श्राद्धक्रियाकौमुदी-श्राद्धप्रकाशादयः ग्रन्थाः मुख्याः । श्राद्धस्य स्वाभ्युदयनिमित्तत्वं पुत्रादिभिः सम्पर्करक्षणार्थञ्च विशेषितत्वात् तस्य महत्त्वं सर्वथा वर्त्तते ।

प्रायश्चित्तस्वरूपं तद् व्यापकत्वं च

धर्म्यकर्मव्यतिरिक्तेषु कर्मसु निमज्जनेन पापं जायते । अतः जैमिनिना धर्मलक्षणं कुर्वता पापस्य लक्षणं द्योतितम् । यज्ञादिकर्मकरणेन धर्मः भवति। तद्व्यतिरिक्तलशुनगृञ्जनादेः भक्षणेनाधर्मश्चोत्पद्यते । तस्यैवाधर्मस्य निर्मूलनाय यत् कर्म आदिश्यते तदेव प्रायश्चित्तमिति । [189]प्रायश्चित्त नाम

180- मत्स्यपु. (१७ । १२-६०) ।

181- विष्णुपु. (३ । १५ । १३-४९) ।

182- मार्कण्डेयपु. (२८ । ३७-६०) ।

183- कूर्मपु. (२ । २२ । २०-६२) ।

184- पद्मपु. सृष्टिख. (१ । १४०-१८६) ।

185- ब्रह्माण्डपु. (उपोद्घातपा. अध्याये १२) ।

186- स्कन्दपु. (६ । २२४ । ३-५१) ।

187- विष्णुधर्मोत्तरपु. (१ । १४० । ६-४४)।

188- अग्निपु. (१६३ । २-४२) ।

189- प्रायश्चित्तस्य लक्षण यथाऽऽह उत्तराङ्गिरसस्मृतौ (४ १)—

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तपोनिश्चयसंयोगात् प्रायश्चित्तमिति स्मृतम् ॥
प्रायः पापं विनिर्दिष्टं चित्तं तस्य विशोधनम् ॥

बालम्भट्टी (याज्ञ. स्मृ. ३ । २०६)

तपःकरणं तस्मात् पापकर्मणः निवृत्तिश्च । विहितस्याननुष्ठानान्, निन्दितस्य सेवनादिन्द्रियाणामनिग्रहाच्च पापमुत्पद्यते । तेषां क्षयार्थं प्रायश्चित्तं कर्त्तव्यमकरणे च मनुष्यः पतितो भवति, एवञ्च [190]याज्ञवल्क्य[191]गौतम-[192]महाभारतादिषु सर्वत्र पापकर्मणः प्रायश्चित्तस्य च वर्णनं विद्यते ।

तच्च प्रायश्चित्तं पापक्षयं निमित्तीकृत्य क्रियमाणत्वात् निमित्तधर्मे एवान्तर्भवति । पापं बहुधा भवति । अतः भिन्नभिन्नपापेषु भिन्नभिन्नप्रायश्चित्तान्यपि निर्दिष्टानि । [193]आपस्तम्बः पतनीयान्यशुचिकराणि च पापानीति द्विविधमुक्त्वा पुनश्च पतनीयेषु पापेषु महापातकोपपातकादीनामशुचिकरपापेष्वनुपातकजातिभ्रंशकरमलिनीकरणादीनामन्तर्भावं कृतवान् । [194]वसिष्ठः त्रिविधं पातकं कथयति । यथा-एनस्वी, महापातकी, उपपातकी । [195]बौधायनवर्णितं त्रिविधं पातकं यथा- पतनीयोपपातकाशुचिकराणि । कात्यायनादयः पातकं पञ्चविधं कथयन्ति यथा- महापापातिपापपातको-

---

प्रायशश्च समं चित्तं चारयित्वा प्रदीयते ।
पर्षदा कार्यते यत्तु प्रायश्चित्तमिति स्मृतम् ॥

पापिनोऽनुतापिनश्च चित्तं व्याकुलं सद् विषमं भवति तच्च पर्षदा येन व्रतानुष्ठानेन प्रायशोऽवश्यं समं कार्यते तद् व्रत प्रायश्चित्तम् ॥
परा. मा. (२-३) ।

प्रयतत्वाद् उपचितमशुभं नाशयतीति प्रायश्चित्तम् । प्राय. वि. (पृ. ४)

190 विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ।। याज्ञ. स्मृ. (३ । २१९)

191- अथ खल्वयं पुरुषो याप्येन कर्मणा लिप्यते यथैतदयाज्ययाजनमभक्ष्यभक्षणमवद्यवदनं शिष्टस्याक्रिया प्रतिषिद्धसेवनमिति । गौ. धर्म. १९-२

192- अकुर्वन् विहितं कर्म प्रतिषिद्धानि चाचरन् ।
प्रायश्चित्तीयते ह्येवं नरो मिथ्या तु वर्त्तयन् ॥ महाभा. शान्ति. ३४-२

193- आपस्तम्बधर्म. (१ । ७ । २१ । १२-१८)

194- वसिष्ठधर्म. (१ । १९-२३)

195- बौधा॰ धर्म. (२ । १ । ६०-६१)

पपातक-प्रासंगिकपापानि । [196]वृद्धहारीतः पञ्चविधं पातकं महापातकपातकानुपातकोपपातकप्रकीर्णकभेदेन विवृणोति । [197]विष्णुः नवविधं पातकं दर्शयति, यथा- अतिपातकमहापातकानुपातकोपपातकजातिभ्रंशकरसंकरीकरणापात्रीकरणमलावहप्रकीर्णकानि ।

एतेषां पातकानां क्षयोपायाः अपि तैरेव महर्षिभिः प्रदर्शिताः । ते यथा- [198]आत्मापराधस्वीकृति [199]पश्चात्ताप [200]प्राणायाम [201]तपो[202]होम[203]जप[204]दानो[205]पवास[206]तीर्थयात्राभेदेन नवधा । यद्यपि केचित् पापस्यातिशयनिवारणं प्रायश्चित्तेन न भवतीति कथयन्ति तथापि मन्वादिभिः [207]स्मृतिकारैः प्रमाणितत्वात् प्रायश्चित्तेन पापक्षयो भवतीत्यवगन्तव्यम् ।

पापी पापाचरणानन्तरं प्रायश्चित्तं कर्त्तुं मनसि निश्चित्य परिषत्समीपमायाति । तत्र परिषदादिष्टनियमानुसारं तावत्कालपर्यन्तं पापक्षयाय प्रयतेत । प्रायश्चित्तकरणानन्तरं पुनः समाजे स्थातुमर्हति । यदि पापनः प्रायश्चित्तं न कुर्वन्ति तदा राजा दण्डादिना प्रायश्चित्तं कारदित्यपि [208]शास्त्रसम्मतिः ।

---

196 वृद्धहारीतस्मृ. (९ । २१५-२१६)

197 विष्णुधर्म. (३३ । ३ - ५)

198- गौ धर्म. (२३ । १८), मनुस्मृ. (११ । १२२) ।

199- मनुस्मृ. (११ । २२९-२३०), विष्णुपुराण (२ । ६ । ४०) ।

200- मनुस्मृ. (११ । २४८), वसिष्ठधर्म. (२६ । ४) ।

201- गौ. धर्म. (१९ । १५), मनुस्मृ. (११ । २३९) ।

202- याज्ञ. स्मृ. (३ । ३०९), बौधा. धर्म. (३ । ७ । १) ।

203- मनुस्मृ. (११ । ४६), वसिष्ठधर्म. (२६ । ९-११) ।

204- गौ. धर्म (.९ । १६) ।

205- गौ. धर्म. (१९ । ११), मनुस्मृ. (११ । २०३) ।

206- विष्णुधर्म. (३५ । ६), पराशरस्मृ. (१२ । ५८) ।

207- गौ. (१९ । ७-१०) ।

208- मनुस्मृ. (९ । २२६), वसिष्ठधर्म (५ । ४-७) ।

हिन्दुधर्मे स्वर्गनरकभोगयोः [209]शास्त्रस्वीकृतत्वात् प्रायश्चित्ताकरणे नरकगमनं तथा प्रायश्चित्तादिना पापक्षये स्वर्गफलं लभ्येत ।

पापलक्षणं, प्रायश्चित्तलक्षणं, पापभेदाः, पापकरणे प्रवृत्तिः, परिषल्लक्षणं, परिषदि प्रायश्चित्तनिर्णयः, प्रायश्चित्तस्येतिकर्तव्यता, प्राजापत्यचान्द्रायणादीनि प्रायश्चित्तव्रतानि च प्रायश्चित्तस्याङ्गस्वरूपाणि । प्रायश्चित्तप्रकरणे एतान्यङ्गानि विचार्यन्ते ।

प्रायश्चित्तसम्बन्धे सर्वत्र [210]वेदो[211]पनिषद्[212]ब्राह्मण[213]स्मृति[214]सूत्र[215]पुराणग्रन्थेषु वर्णनं विद्यते । तत्र पुनः गौतमधर्मसूत्रे दशाध्यायाः वसिष्ठधर्मसूत्रे नवाध्यायाः, वसिष्ठधर्मसूत्रे नवाध्यायाः, मनुस्मृतेरेकादशाध्याये २२२श्लोकाः, याज्ञवल्क्यस्मृतेस्तृतीयाध्यायस्य १२२श्लोकाः, अङ्गिरास्मृतेः १६८ श्लोकाः, अत्रिस्मृतेः अष्टाध्यायाः, देवलस्य ९० श्लोकाः, बृहद्यमस्य १८२ श्लोकाः, शातातपस्मृतेः ७४श्लोकाः, प्रायश्चित्तविषयकाः । पुराणसाहित्येऽपि अग्निपुराण (अध्याय १६८-१७४) गरुडपुराण (५२ अध्याय) कूर्मपुराणोत्तरार्ध (अध्यायः ३०-३४) वराहपुराण (१३१-१३६ अध्यायः) ब्रह्माण्डउपसंहारपाद (नवमाध्यायः) विष्णुधर्मोत्तरा(२ । ७२)दिषु प्रायश्चित्तविषये वर्णितमस्ति ।

209- पापकृद्याति नरकं प्रायश्चित्तपराङ्मुखः । विष्णुपु. (४-५ । २१)
मनः प्रीतिकरः स्वर्गो नरकस्तद्विपर्ययः ।
नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तमाः ॥ ब्रह्मपु. (२२ । २४)

210- वाज. सं. (३० । १०), तैत्ति. सं. (६ । २ । ७ ।५), काठक. सं. (८ । ५)

211- बृहदार. उप. (४ । ४ । ५), छान्दोग्योप. (३।१४।१), कठोप. (५ । ७)

212 शतपथब्राह्मणे. (५ । ४ । ४ । ५), तैत्ति. ब्रा. (३ । ५ । ६) ।

213- मनुयाज्ञवल्क्याङ्गिरसात्रिबृहद्यमदेवलशातातपेषु स्मृतिषु ।

214- गौतमवसिष्ठविष्णुबोधायनापस्तम्बेषु धर्मसूत्रग्रन्थेषु ।

215- गरुडपुराणाग्निपुराण-कूर्मपुराण-वराहपुराण ब्रह्माण्डपुराण विष्णुधर्मोत्तरेषु पुराणेषु ।

सर्वत्र मिताक्षरापरार्कपराशरमाधवीयादिषु टीकाग्रन्थेषु मदनपारिजात-प्रायश्चित्तविवेक-प्रायश्चित्तकल्पतरु-प्रायश्चित्तमयूखेषु हेमाद्रेः प्रायश्चित्तखण्डे-प्रायश्चित्तप्रकाश-प्रायश्चित्ततत्त्व-स्मृतिमुक्ताफल प्रायश्चित्तसार-प्रायश्चित्तेन्दुशेखर-प्रायश्चित्तरत्नाकर-प्रायश्चित्तमनोहर-प्रायश्चित्तविलोचनादिषु प्रायश्चित्तसम्बन्धिनिबन्धग्रन्थेष्वपि प्रायश्चित्तविषयाः सविस्तरं वर्णिताः ।

कृत्यकौमुदीकर्त्तुः बृहस्पतेः परिचयः

कृत्यकौमुदीग्रन्थस्य कर्त्ता बृहस्पतिरेव । अन्ये ग्रन्थकाराः यथा-स्वरचितग्रन्थेषु महत्त्वप्रतिपादनार्थं स्ववंशजातिगोत्रादीनां विवरणं मङ्गलाचरणानन्तरं ग्रन्थमध्ये विषयच्छलेन ग्रन्थस्यान्ते वा श्लोकमाध्यमेन रचयन्ति, अनेन महानुभावेन बृहस्पतिना तथा न कृतम् । वंशजातिकुलगोत्राणाञ्च नामलेखने ग्रन्थस्य मर्यादाहानिः भवतीति मत्त्वा तेन तद्वंशः त्यक्त इति मयाऽनुमीयते । एवमपि स्वपितृमातृनाम अपि न दत्तं तेन । तेषां नामदानेन स्वपित्रोरात्मनश्च मर्यादावृद्धिः भवेत् परन्तु ग्रन्थस्य मर्यादा न वर्धतेति मत्त्वा तेन न लिखितं किन्तु ग्रन्थस्य कर्त्रन्तरशङ्कावारणाय स्वनाममात्रं ग्रन्थान्ते निवेशितम् । यथा अधुना कृत्यकौमुदीनाम्ना पुस्तकचतुष्टयं प्राप्यते, तेषु द्वयोः पुस्तकयोः कर्तृविषये संशयमापद्येतेति मत्त्वा तेन स्वनाममात्र ग्रन्थान्ते निवेशितम् । यथाऽनेन चिन्तितं तथेतिहासे कादाचित्कः सम्भवति । इतिहासोऽपि तेषां विषये पदमात्रं परिचयं न ददाति, ग्रन्थमात्रं प्रदर्शयति । अतः दुर्भाग्यस्य विषयोऽयं यः स्वमर्यादां त्यक्त्वा संस्कृतसाहित्यं समृद्धं करोति, सः न केनापि स्मर्यते परिचयाभावात् ।

निश्चितमिदं यत् अयं बृहस्पतिः भारतदेशे जातः हिन्दुश्चेति, हिन्दुधर्मे प्रचलितपर्वणामुल्लेखकत्वात् । पुनश्च उत्कलेषु तल्लिखितपुस्तकस्य सुलभत्वात् तथा पुस्तके निविष्टानां पर्वादीनामुत्कलप्रचलितत्वादुत्कलीय एव सः । पुनश्चान्यप्रदेशीयाः न कुत्रापि एतेषां मतमुद्धरन्ति, अपरपक्षे उत्कलीयधर्मशास्त्रनिबन्धकाराः सर्वे बारम्बारं मतग्रहणपूर्वकमुद्धरन्तीति

कृत्वा अस्य उत्कलीयत्वं स्फुटमेव । देशकालविषययोः चानन्तरं स्वस्वस्थानेषु विस्तृतविचारः विहितः । व्रतदानादीनां समन्त्रविधिपूर्वकं स्पष्टं वर्णितत्वादेषः जात्या ब्राह्मण इत्यपि स्वष्टीभवति । बृहस्पतिरित्यस्याभिधानमपि अस्य ब्राह्मणत्वं समर्थयति ।

मङ्गलाचरणे तेन प्रथमतः नृसिंह गणेश-सरस्वती-योगीश्वराणां नमस्करो विहितः । अतः ग्रन्थस्यासम्पूर्णत्वाद्यनिष्टनिवारणार्थं विघ्ननिराकरणार्थं चाविघ्नमस्त्वित्यादिना तान् चिन्तयित्वा पुनः श्रीपतेः परमपूज्यदेवजगन्नाथस्य स्तुतिमकरोत् । अत्र श्रीपतिपदेन जगन्नाथदेव एव व्यज्यते । अनन्तरञ्च स्वरचितग्रन्थः विदुषां दृष्टिपथमाकषयतु इति तस्याकाङ्क्षा ।

प्रायशः ग्रन्थकाराः गुरोर्महत्त्वप्रतिपादनार्थं गुरोः नाम अपि मङ्गलाचरणेऽन्तर्भावयन्ति । तदपि ग्रन्थेऽस्मिन् न कुत्रापि प्राप्यते ।

अस्य नामान्ते उपाधिरपि नास्ति । अन्यः कश्चन बृहस्पतिमिश्रः रघुवंशस्य टीकाकाररूपेणोत्कलेषु परिचितः । परन्तु सः कृत्यकौमुदीकर्ता बृहस्पतिः न । यतः तद्विरचितटीकायां वंशादीनामन्यकृतीनां च परिचयो लभ्यते । तत्र वर्णितकृतिषु कृत्यकौमुदी नान्तर्भवति ।

एवमपि संस्कृतसाहित्यजगति पी. भी. काणेमहोदयस्य धर्मशास्त्रेतिहासे बृहस्पतिसंज्ञकाः पञ्च ग्रन्थकाराः प्राप्यन्ते । तेषु प्रथमः बृहस्पतिः स्मृतिकाररूपेण परिचितः । तस्य समयः ख्रीष्टीयद्वितीयशतकतः चतुर्थशतकपर्यन्तम् ।

द्वितीयः बृहस्पतिः अर्थशास्त्रकारनाम्ना परिचितः । तं पुनः कौटिल्यकामन्दकादयः अर्थशास्त्रकाराः उद्धरन्ति । अतः नाऽसौ बृहस्पतिः कृत्यकौमुदीनिबन्धकारः ।

तृतीयः बृहस्पतिः ग्रहपूजापद्धतेः लेखकः । पुस्तकमिदं राज्ञा हरिसिंहेन प्रकाशितमभूत् । तस्यान्यस्य कस्यापि ग्रन्थस्य सूचना न प्राप्यते । हरिसिंहस्य कालः द्वादशशतकम् । कृत्यकौमुदीकारस्य बृहस्पतेः कालस्तु चतुर्दशशतकम् । अतः इयं कृत्यकौमुदी तस्यैव बृहस्पतेः कृतिः न भवितुमर्हति ।

चतुर्थः बृहस्पतिः मुहूर्त्तस्कन्धग्रन्थस्य रचयिता। तस्य नान्या सूचना प्राप्यते। अतः असौ बृहस्पतिः स एवेति कथयितुं न शक्यते।

पञ्चमः बृहस्पतिः मलमासरहस्यपुस्तकस्य कर्त्ता आसीत्। असौ बृहस्पतिः भवदेवस्य पुत्रः आसीत्। तस्य कालः ख्रीष्टीय ११५० तः १२०० मध्ये निश्चीयते। पुनश्च कृत्यकौमुद्यां बृहस्पतिः भवदेवमतमुद्धरन्नपि सम्मानपूर्वकं नोद्धरति। यदि पिता स्यात्तर्हि सम्मानपुरःसरमुद्धरेत्। न्यूनातिन्यूनं मतग्रहणपूर्वकं बहुवचनप्रयोगमपि कुर्यात्। परन्तु कुत्रापि स्वपितुः सूचनां परिचयमपि न ददाति। अतः नायं बृहस्पतिः कृत्यकौमुदीकार इति कथयितुं शक्यते।

धर्मशास्त्रसाहित्ये कृत्यकौमुदीनाम्ना ग्रन्थचतुष्टयं प्राप्यते। तत्र काणेमहोदयानां मतानुसारं प्रथमा कृत्यकौमुदी गोविन्दानन्दस्यैव। स च ग्रन्थः मलमासतत्त्वे रघुनन्दनेनोद्धृतः। द्वितीया कृत्यकौमुदी गोपीनाथमिश्रकृता। तृतीया तु कृत्यकौमुदी जगदानन्दप्रणीता। स च कृत्यकौमुदीग्रन्थः शुद्धिदीपिकामुद्धरति, चतुर्थी कृत्यकौमुदी सिद्धान्तवागीशभट्टाचार्यविरचिता। तत्र एकोद्दिष्टश्राद्धांशः वर्त्तते। अतः एतैः कृत्यकौमुदीग्रन्थैः साकं बृहस्पतेः कृत्यकौमुदीग्रन्थः ऐक्यं नोपगच्छति।

कृत्यकौमुदीकारस्य बृहस्पतेरुपाधिः न प्राप्यते। परन्तूत्कलस्य स्वनामधन्यैतिहासिकः केदारनाथमहापात्रः कृत्यकौमुदीकारबृहस्पतेः विषये सूचनादानकाले नामान्ते "सूरि" शब्दप्रयोगं कृतवान्। विषयेऽस्मिन् मया ते पृष्टा अकथयन् यत् स्वनामख्यातस्य विदुषः सम्मानार्थं मया सूर्युपाधिः संयोजितः इति, परन्तु तस्य प्रामाण्यं किञ्चिन्मनसि निश्चित्य न कृतम्। अतोऽधुना नामसम्बन्धिविप्रतिपत्तिः सुधीभिरुन्नेया। स तु सर्वत्र ग्रन्थस्य त्रिषु प्रकरणेष्वन्ते इति कृति बृहस्पतिविरचितायां कृत्यकौमुद्यां प्रकरणं समाप्तम् इति दत्त्वा विरमति।

बृहस्पतेः कालः

कृत्यकौमुदीग्रन्थे बृहस्पतिः न कुत्रापि स्वकालविषये स्पष्टीकरोति। बहवः ग्रन्थकाराः स्वस्वग्रन्थे ग्रन्थलेखनप्रारम्भसमाप्तिकालौ ददति परन्त्वनेन महात्मना न कुत्रापि तत्सम्बन्धिनी सूचनाऽपि दत्ता। अतः एतेषां कालनिर्णयः दुष्करः भवति। तथापि कृत्यकौमुदीग्रन्थे प्रदर्शितग्रन्थानां कालनिर्णयं कृत्वा पुनश्चाप्तवाक्येषु अस्यानुमानिककालः निर्णीयते। अस्य कालनिर्णयपद्धतिराभ्यन्तरबाह्यभेदेन द्विधा विभज्यते। आभ्यन्तरपद्धत्यनुसारं ग्रन्थे यावन्तो ग्रन्थाः उद्धृताः तेषां निर्णीतकालानुसारं बृहस्पतेः कृत्यकौमुद्याश्च कालनिर्णयः क्रियते।

उद्धृतेषु ग्रन्थेषु संहिता-ब्राह्मण-स्मृति-धर्मसूत्र-पुराणग्रन्थानां सम्बन्धे नालोचनीयम्। कृत्यकौमुदी एका धर्मशास्त्रीयनिबन्धपुस्तिका। अतः धर्मशास्त्रीयनिबन्धग्रन्थानामुत्तरोत्तरकालक्रमेणास्य कालः निर्णीयते।

कृत्यकौमुद्यामुद्धृतेषु सर्वप्राचीनेषु धर्मशास्त्रनिबन्धेषु शतानन्दः प्रथमः। तस्य शतानन्दसग्रहग्रन्थः शतानन्दनामान्वितः कृत्यकौमुद्यां षड्वारमुद्धृतः। शतानन्दश्च भास्वतीग्रन्थान्ते स्वकालः ४२०० युगाब्दः (१०९९ ख्रीष्टाब्दः) इति व्यलिखत्। अतः कृत्यकौमुदीकारः बृहस्पतिः तदनन्तरमेवाविर्भूतः।

अनन्तरश्चोत्पन्नेषु धर्मशास्त्रीयनिबन्धकारेषु भवदेवभट्टोऽपि कृत्यकौमुद्यामुद्धृतः। तस्य कालः काणेमहोदयस्य धर्मशास्त्रेतिहासानुसारमेकादशशतकस्यान्तिमभागे निश्चीयते। अतः बृहस्पतिः नूनं तदनन्तरवर्त्ती आसीत्। विज्ञानेश्वरः कृत्यकौमुद्यां दशवारमुद्धृतः। तस्य कालोऽपि ख्रीष्टीय १०८०-११०० मध्ये स्वीक्रियते। अतः कृत्यकौमुदीग्रन्थः तदनन्तरकालीनः।

कृत्यकल्पतरुकारं लक्ष्मीधरं कृत्यकौमुदीग्रन्थे बृहस्पतिः दशवारमुद्धरति। लक्ष्मीधरस्य कालः ख्रीष्टीय ११२५-११४५ मध्ये काणेमहोदयेन निर्णीतः। अतः कृत्यकौमुदीग्रन्थः तदनन्तरमेव प्रणीतः।

धारेश्वरभोजराजस्य राजमार्तण्डग्रन्थः कृत्यकौमुदीग्रन्थे ऊनविंशतिवारं गृहीतः। भोजस्य [216]कालस्तु ख्रीष्टीय १०४५-१०५१ मध्ये निश्चीयते। अतः कृत्यकौमुदीग्रन्थः तदनन्तरमेव।

बल्लालसेनस्य दानसागरः कृत्यकौमुद्यां द्विवारमुट्टङ्कितः। तस्य [217]कालः ख्रीष्टीय ११६९-१२०० मध्ये एव। अतः कृत्यकौमुदीग्रन्थः तत्परवर्त्ती।

पारिभद्रीय-जीमूतवाहनः तस्य कालविवेकग्रन्थश्च कृत्यकौमुद्यां चतुर्वारमुत्थापितः। तस्य कालः काणेमहोदयानां [218]धर्मशास्त्रस्येतिहासानुसारं ख्रीष्टीय १०९९-११३० मध्ये निश्चीयते। परन्तु कालविवके शङ्खधरस्य स्मृतिसमुच्चयः विंशतिस्थलेषु उद्धृतः। स्मृतिसमुच्चयस्य कालः उत्कलस्यैतिहासिक-स्वर्गत-केदारनाथ[219]महापात्रानुसार त्रयोदशशताब्द्यामेव। जीमूतवाहनस्य कालः तदनन्तरमेव। अतः तत्परवर्त्तिकालस्यैव कृत्यकौमुदीकारः।

कृत्यकौमुदीग्रन्थे बृहस्पतिः कालादर्शपुस्तकं द्विवारमुद्धरति। कालादर्शकारादित्यभट्टस्य [220]कालः त्रयोदशशताब्द्यामेव। अतः बृहस्पतिः तदनन्तरमेव कृत्यकौमुदीं प्रणिनाय।

बृहस्पतिना शङ्खधरस्य स्मृतिसमुच्चयः सप्तवारमुट्टङ्कितः। शङ्खधरकृतस्य स्मृतिसमुच्चयस्य कालः त्रयोदशशताब्द्यामेव निश्चीयते। अत कृत्यकौमुदीग्रन्थः तदनन्तरमेव। [221]कृत्यकौमुद्याः अमावास्याश्राद्धप्रकरणे बृहस्पतिः 'पितृयज्ञं तु निर्वर्त्ये'ति मनुश्लोकव्याख्यायामनुमासिकपदस्य प्रतिमासभवमिति

216- धर्म. इति. १ - ५९० ।

217- धर्म इति. १ - ७३४ ।

218- धर्म. इति. १ - ७०९ ।

219- दि ओरिसा हिस्टोरिकाल रिसर्च जर्नल (१ - १८९)।

220- दि ओरिसा हिस्टोरिकाल रिसर्च जर्नल (१ - १८९)।

221- कृत्यको. मूल. (पृ. २७१)।

व्याख्यानं कुर्वतः कुल्लूकभट्टस्य मतं दृढमपास्य मनुश्लोकव्याख्यागतानर्थत्वं दूरीकरोति । कुल्लूकभट्टस्य [222]कालः ख्रीष्टीय ११५०-१३०० मध्ये काणेमहोदयेन स्वीक्रियते । अतः कुल्लूकभट्टस्य मतमपास्यतः बृहस्पतेः कालः तदनन्तरमेव स्वीक्रियेत ।

तथैवा[223]मावास्याश्राद्धप्रकरणे बृहस्पतिः चण्डेश्वरठक्कुरस्य कृत्य-[224]रत्नाकरमतं विलिख्य "इति केचित्" पदेन चण्डेश्वरमाक्षिप्य तदसम्यगिति कथयित्वा खण्डयति । चण्डेश्वरस्य [225]कालं काणेमहोदयः ख्रीष्टीय १३१४-१३७०मध्ये स्वीकरोति । अतः तदनन्तरमेव कृत्यकौमुद्याः कालः ।

हरिनाथस्य स्मृतिसारः कृत्यकौमुद्यां द्विवारमुट्टङ्कितः । [226]हरिनाथः ख्रीष्टीय १३००-१४०० मध्ये स्मृतिसारं व्यलिखत् । अतः तेषां मतमुद्धरन् बृहस्पतिः तदनन्तरवर्त्ती आसीत् । उत्कलीयप्रख्यातधर्मशास्त्रनिबन्धकारस्य विद्याकरस्य मतमपि बृहस्पतिः कृत्यकौमुद्यां वारद्वयं समुपस्थापितवान् । विद्याकरस्य कालः ख्रीष्टीय १२८५-१३५० मध्ये निश्चीयते । अतः बृहस्पतिना उद्धृतग्रन्थकारेषु अन्तिमत्वात् तदनन्तरमेव बृहस्पतेः कालः भवितुमर्हति ।

तदनन्तरं [227]माधवाचार्यः (ख्रीष्टीयः १३३०-१३८५) कालनिर्णयपुस्तकं रचयित्वा कालनिर्णयसम्बन्धिसंशयानां विस्तरेण विचारं विहितवान् । विशेषप्रामाणिकत्वात्सर्वैः स्मार्त्तैः निबन्धृभिः विना क्लेशं कालमाधवानुसारं स्वसिद्धान्तः दीयते । परन्त्वनेन बृहस्पतिना द्विशतताडपत्रात्मककालविवेकप्रकरणे न कुत्रापि माधवाचार्यनाम तत्कृतग्रन्थ वोद्ध्रियते । अतोऽनुमीयते यत् माधवाचार्यस्य समकालीनोऽयं महानुभावः आसीदिति ।

---

[222] धर्म· इति. (१ -७५९) ।

[223] कृत्यको. मूल. (पृ. २७८) ।

[224] कृत्यर. (पृ. ६२५) ।

[225] धर्म. इति. १ - ७७५ ।

[226] धर्म. इति. (१ - ७७७) ।

[227] धर्म. इति. (१ - ७९०) ।

पुनश्च रामचन्द्र[228]वाजपेयी (ख्रीष्टीयः १३९० १४४०) [229]मदनपाल (ख्रीष्टीयः १३५०-१५००) [230]शूलपाणि (ख्रीष्टीयः १३६५-१४४५) रुद्रधर-वाचस्पतिमिश्र-नृसिहप्रसादादयः बृहस्पतेः समकालीनत्वात् कृत्यकौमुदीं नोद्धरन्ति न वा कृत्यकौमुदी तान् ग्रन्थानुद्धरति। तदनन्तरं पुनः गोविन्दानन्द[231]रघुनन्दनादयः किञ्चिदनन्तरवर्तित्वात् कृत्यकौमुदीग्रन्थस्यास्य महत्त्वप्रसाराभावात् तं ग्रन्थं न स्मरन्ति।

तदनन्तरं षोड़शशताब्द्यामुत्कलीयधर्मशास्त्रीयनिबन्धकाराः उत्कलस्य मान्यप्राचीननिबन्धृत्वेन बृहस्पतिं स्वस्वग्रन्थे वारम्बारमुद्धरन्ति। स्मृतिसारसंग्रहपुस्तके विश्वनाथमिश्रः [232]कृत्यकौमुदीमष्टवारमुद्धरति। स्मृतिसारसंग्रहोऽपि दिव्यसिंहेन (ख्रीष्टीयः १६७५) बहुवारमुद्धृतः। अतः तस्य विश्वनाथस्य कालः ख्रीष्टीयः १६४० तः पूर्वमिति निश्चीयते। तस्मात् तस्य पूर्ववर्त्तित्वेन बृहस्पतिः प्रायशः ख्रीष्टीयः १६००तः पूर्ववर्त्ती एव आसीत्।

श्राद्धप्रदीपकारः विप्रमिश्रः स्वग्रन्थे कृत्यकौमुदीग्रन्थं वारद्वयमुद्धरति। कालदीपकारेण दिव्यसिंहेनोद्धृतत्वात् विप्रमिश्रस्य कालः ख्रीष्टीये १५३०-१५५० मध्ये एव। अतः बृहस्पतेः कालः तस्मात् न्यूनातिन्यूनं पञ्चाशत् संवत्सरेभ्यः पूर्वमेव भवेत्। अतः तस्य बृहस्पतेः कालः पञ्चदशशताब्द्यामेवेत्यनुमीयते।

कालसर्वस्वकारः महामहोपाध्यायः कृष्णमिश्रः कृत्यकौमुदीग्रन्थमेकादश[233]वारमुद्धरति। तस्य कालस्तु सप्तदशशताब्द्यामेव। अतः तस्य पूर्ववर्त्तित्वेन वर्त्तमानः बृहस्पतिः पञ्चदशषोड़शशताब्द्यां वाऽऽसीत्। श्राद्धनिर्णय·

228- ओडिशार लेखा ओ लेखक (पृ - २५)।

229- धर्म. इति. (१ - ८०९)।

230 धर्म. इति. (१ - ८३९)।

231- धर्म. इति. (१ - ८८८)।

232- हिस्टोरिकाल रिसर्च जर्नल ऑफ़ ओरिसा (५ - १६५)।

233- उत्कलराज्यसंग्रहालयस्य ताडपत्रा(डि. एच् ४८ (B), डि. एच्, ११६ प्रतिलिपेः)त्मकग्रन्थस्य २५, ४३, ६४, ६५, ७५, ८०, ९५, ९७, १०४ ११० पृष्ठेषु।

कारः रघुनाथदाशः स्वग्रन्थे कृत्यकौमुदीग्रन्थं [234]सप्तवारमुद्धरति। तस्य कालः ख्रीष्टीय १७१५ मध्ये (श्रीमत् हरिकृष्णदेवस्य द्वितीयेऽङ्के श्रावणे मासि शुक्लपक्षे नवम्यां बृहस्पतिवासरे रघुनाथदाशेन लिखितमिदं पुस्तकम् १७१' ख्रीष्टाब्दः) इति ग्रन्थकारेण स्वकीयग्रन्थान्ते निवेशितम्। अतः तस्य स्मारकत्वेन बृहस्पतिः पञ्चदशषोडशशताब्दीमध्ये आसीदित्यनुमीयते।

कालसारकर्त्ता गदाधरराजगुरुः कृत्यकौमुदीग्रन्थस्य मतं बहुवारं स्वीकुर्वन् [235]पञ्चवारं कृत्यकौमुद्याः नाम स्मरणं करोति। गजपतिहरेकृष्णदेवस्य समकालीनत्वात् तस्य कालः १७१५-१७३० ख्रीष्टाब्दमध्ये एव। अतः तेन स्मृतो बृहस्पतिः पञ्चदशषोडशशताब्द्योर्मध्येऽवर्त्तत।

कालचन्द्रिकाकारः धर्म्मुपाठी स्वीयग्रन्थे कृत्यकौमुदीग्रन्थं द्विवारमुद्धरति। तस्य कालस्तु १७५० ख्रीष्टाब्दमध्ये एव। अतः बृहस्पतेः कालः तस्मात् पूर्वमेवाऽऽसीत्। अन्येऽर्वाचीनाः पण्डितसर्वस्वकारादयः स्मृतिनिबन्धारोऽपि कृत्यकौमुदीग्रन्थस्य मतग्रहणपूर्वकं तस्य प्रामाण्यं स्वीकुर्वन्ति। अतः एभ्यः अन्तरङ्गप्रमाणेभ्यः अयं निष्कर्षः अस्माभिः कथयितुं शक्यते यदसौ कृत्यकौमुदीकारः बृहस्पतिः प्राचीनत्वेन १४०० ख्रीष्टाब्दपर्यन्तं तथा चार्वाचीनत्वेन १५०० ख्रीष्टाब्दमध्ये एव वर्त्तमानः आसीदिति।

अन्तरङ्गप्रमाणैः पूर्ववर्त्तिपरवर्त्तिग्रन्थानां साहचर्येनास्माभिः बृहस्पतेः कालः निर्णीतः। अनन्तरं बहिरङ्गप्रमाणेन कालः निर्णीयते। यथा ये केचन ग्रन्थाः कतिचनविषयान् लक्ष्यीकृत्यानुमानिककालं सम्भावयन्ति ते एव मयाऽत्र बहिरङ्गप्रमाणत्वेन उपस्थाप्यन्ते।

कृत्यकौमुदीग्रन्थस्य पौर्वापर्यसम्बन्धिनीमालोचनां विधाय तथोत्कलस्य सांस्कृतिकेतिहासस्य निरीक्षणं कृत्वोत्कलराज्यसंग्रहालयस्य प्रतिष्ठाता तथा पुस्तकसंग्राहकः ऐतिहासिकः स्वर्गतः केदारनाथमहापात्रमहोदयः बृहस्पतिं पञ्चदशशताब्दीमध्ये स्थापयति।

---

[234] उत्कलराज्यसंग्रहालयस्य ताडपत्रा (डि. एच्. १६९)त्मक ग्रन्थस्य २७, ६९, ७०, ७१, ७२, ९६, १५२ पृष्ठेषु।

[235] उत्कललिप्यां मुद्रितपुस्तकस्य ७३, ११५, २३८, २३९, ४३२ पृष्ठेषु।

ताडपत्रलिखित प्राचीनसंस्कृतग्रन्थानां [236]संग्रहपुस्तके तेन बृहस्पतेः कालः निर्धारितः। तत्रापि कृत्यकौमुद्याः षट्सु प्रतिलिपिषु मुख्यप्रतिलिपेरन्तेऽविकृतलेखनकर्त्ता ग्रन्थलेखनसमाप्तिकालौ निवेशितौ। तदनुसारं तस्य लेखनकाल: १७२४तम ख्रिष्टाब्द: आसीत्। अधुनाऽपि ताडपत्रस्य संग्राहकपदव्यां वर्त्तमानस्य श्रीयुक्तनीलमणिमिश्रमहोदयस्य मतमपि केदारनाथमहापात्राणां मतमनुसरति। तृतीयतः उत्कलराज्यैतिहासिकगवेषणापत्रिकायामपि[237] शतानन्द-विद्याकर-शंखधर-गदाधर-कृष्णमिश्रादीनां कालनिरूपणावसरे केदारनाथमहापात्रादयः विद्वांसः उपर्युक्तकालं सम्भावयन्ति। पुनश्चाद्यतनसंग्राहकाः श्रीयुक्तनीलमणिमिश्रमहोदयाः 'ओडिशार संस्कृतलेखा ओ लेखक" पुस्तके बृहस्पतेः कालं चतुर्दशशतकस्यान्तिमे तथा पञ्चदशशतकस्य प्रारम्भे स्थापयन्ति।

“ओडिशार सांस्कृतिक इतिहास” [239]पुस्तके श्रीयुक्त भगवानपण्डा महोदयाः बृहस्पतिः चतुर्दशशतकोद्भव इति कथयन्ति। “ओडिशार पर्वपर्वाणि ओषाव्रत ओ यानियात्रा” [240]ग्रन्थे “ओडिआ ग्राम्यजीवन ओ पर्वपर्वाणि” शीर्षके श्रीयुक्त हेमन्तकुमारदास: बृहस्पतिं चतुर्दशशतके स्थापयति। “ओडिशा परिचय” [241]ग्रन्थे ऐतिहासिकः बलराममहान्ति महोदयः “संस्कृत साहित्यकु ओडिशार अवदान” शीर्षके लेखनप्रसङ्गे सूर्यवंशशासनकाले अर्थात् पञ्चदशशताब्द्यां बृहस्पतेः कृत्यकौमुदी रचिताऽभवदिति प्रतिपादयति।

अत: प्राचीनोद्धारकत्वेन विप्रमिश्रः यदा ख्रीष्टीय १५३०तः १५५०मध्ये कृत्यकौमुदीग्रन्थमुद्धरति तर्हि कृत्यकौमुदीग्रन्थः ख्रीष्टीय १५००तः पूर्वमेव

236- डेस्क्रि, काट. आफ़ सां. मानु. प्रथमखण्ड प्रिफेस (पृ - ३४)।

237- उत्कलराज्यैतिहासिकगवेषणापत्रिका, पञ्चमखण्ड (पृ - १८८, १६५)

238- ओडिशार संस्कृतलेखा ओ लेखक (पृ - २४)।

239- ओडिशार सांस्कृतिक इतिहास (पृ. - ९३)।

240- ओडिशार पर्वपर्वाणि ओषाव्रत ओ यानियात्रा (पृ. - ३४१)।

241- ओडिशा परिचय (पृ - ३३९)।

प्रायः लिखितोऽभवदिति सम्भावयितुं शक्यते। पुनश्च विद्याकरमतस्य ग्राहकत्वेन बृहस्पतिः १४०० ख्रीष्टाब्दानन्तरवर्त्ती आसीदिति सम्भाव्यते।

शतानन्दानन्तरं पर्वसम्बन्धिग्रन्थेषु बृहस्पतेः कृत्यकौमुदी प्रथमस्थानं बिभर्त्ति। निबन्धकारत्वेन प्रायशः द्विशतसम्बत्सरं यावत् निर्विवादमेतेषां मत प्रामाण्यमगात्। अनन्तरमपि विप्रमिश्र-दिव्यसिंह-विश्वनाथमिश्र-गदाधर-कृष्णमिश्रादयः ससम्मानमेतेषां मतं स्वीयग्रन्थेषूत्थापनपूर्वकमात्मनः ग्रन्थस्य गौरवमपि वर्धयन्ति। अतः उभयोरन्तरङ्गबहिरङ्गप्रमाणयोः बृहस्पतेः कालः १४०० ख्राष्टाब्दतः १५०० मध्ये एव भवेदिति निष्कर्षः।

बृहस्पतेरुत्कलीयत्वम्

बृहस्पतिः स्वकृत्यकौमुदोग्रन्थे न कुत्रापि स्वजन्मस्थानविषये किञ्चिदपि लिखति। अतः तस्य जन्मस्थाननिर्णयः दुस्साध्यः। ग्रन्थारम्भे ग्रन्थान्ते वा न कुत्रापि देशसम्बन्धिनी प्रत्यक्षवर्णना विद्यते। यथाऽन्ये गदाधरराजगुरु-देवणभट्ट-लक्ष्मीधर-हेमाद्र्यादयः स्वग्रन्थे देशकालादीनामुल्लेखं कुर्वन्ति तथाऽनेन महात्मना न कृतम्। न वेतिहासः स्पष्टं किञ्चित् कथयति। केवल ग्रन्थप्राप्ति कारणाकृत्य परम्परयोत्कलीयत्वमनुमीयते। अतः मयाऽपि तथैव प्रथमतः ग्रन्थं दृष्ट्वा यावत् अनुमातुं शक्यते तावदेव लिखामि, अनन्तरञ्च यत्र कुत्राप्येतेषामुत्कलीयत्वेन प्रमाणानि वर्त्तन्ते तान्यप्युपस्थापयामि।

बृहस्पतिः कृत्यकौमुद्याः ग्रन्थारम्भे प्रथमतः नृसिंह-गणेश-सरस्वती योगीश्वरान् नमस्करोति। अतः यद्युत्कलीयत्वमनुमातुं शक्यते तर्ह्युत्कलस्य गङ्गामवास्तव्यानां नृसिंहदेवः परमाराध्यः, तस्मादयं गङ्गाममण्डलीय इति कथ्येत। अनन्तरञ्च मङ्गलाचरणे यथाक्रमं नृसिंहं श्रीपतिञ्च प्रस्तौति। अत्र श्रीपतिपदेन पुरुषोत्तमपुरीक्षेत्राधिष्ठाता जगन्नाथदेवः स्पष्टं लक्ष्यते।

ग्रन्थकारेण सर्वविषयेषु कालस्य प्राथम्यं स्वीकृत्य तत्र पुनः सर्ववादिसम्मतत्वेन चैत्रमासतः पर्वणामालोचनं प्रारभ्यते । अन्येषां धर्मशास्त्रनिबन्धृणां विनानुकरणेन चैत्रमासशुक्लप्रतिपदादौ बलिराजोत्सवादीनामप्राधान्यादशोकाष्टम्यां भुवनेश्वरस्थश्रीलिङ्गराजदेवस्य तथा पुरुषोत्तमक्षेत्रस्य श्रीजगन्नाथदेवस्य यात्रामाधारीकृत्य प्राथम्यञ्च प्रददाति । अतः अस्मादप्युत्कलीयत्वमनुमीयते । न कोऽपि निबन्धकारः यदाऽशोकाष्टम्याः प्राथम्यं प्रददाति । तदाऽसौ बृहस्पतिरुत्कलस्य प्रसिद्धपर्वणः अशोकाष्टम्याः प्राधान्यं स्वीकृत्य ग्रन्थारम्भ एव सन्निवेशयति ।

उत्कलेषु वर्त्तमानेषु धर्मशास्त्रनिबन्धृष्वसौ विशिष्टं स्थानं बिभर्त्ति । यतः शतानन्दानन्तरं धर्मशास्त्रनिबन्धृषु बृहस्पतिः स्थानं प्राप्नोति । इतः पूर्वमुत्कलीयपर्वणां पुङ्खानुपुङ्खालोचनं नाऽभवत् । अतोऽनेनैव प्रदत्ताः सिद्धान्ताः परवर्त्तिनिबन्धारः सादरं गृहीत्वा स्वग्रन्थगौरवं वर्धयन्ति । उत्कलव्यतिरिक्तमन्यप्रदेशीयाः निबन्धकाराः न कुत्रापि बृहस्पतेः वचनानि उद्धरन्ति । न वैतस्य ग्रन्थस्य नाम न वा बृहस्पतेरपि नाम । महदाश्चर्यमेतत् यदयं बृहस्पतिः केवलमुत्कलीयैरेव प्रामाण्यं गच्छति । अतः एवास्य उत्कलीयत्वकथनेऽनौचित्यं नास्त्येव । उत्कलीयधर्मशास्त्रनिबन्धृणां स्मारकत्वेन बृहस्पतिरुत्कले प्रसिद्धं स्थानं प्राप्नोति । षोडशशताब्दीतः अष्टादशशतकमध्ये समुद्भूताः विप्रमिश्र-कृष्णमिश्र-विश्वनाथमिश्र-रघुनाथदाश-गदाधरराजगुरु-गोविन्ददाश-धर्मपाठी-पण्डितसर्वस्वकारादयः स्वेषु स्वेषु ग्रन्थेषूत्कलीयस्मार्त्तानां सम्मानार्थं तथा स्वग्रन्थप्रमाणार्थं अस्य नाम उद्धरन्ति ।

विशेषतः उत्कलीयपर्वणामालोचनाऽनेनैव स्वग्रन्थे कृता । प्रथमाष्टम्या एव बृहस्पतेरुत्कलीयत्वं स्फुटं प्रतीयते । मार्गशीर्षकृष्णाष्टम्यां हि प्रथमाष्टमी भवति । पर्व इदमुत्कलेषु एव पाल्यते । नान्यत्र कुत्रापि । तद् यथा ‘समाचारादुत्कलदेशे प्रथमगर्भोत्पन्नस्यायुर्विवृद्ध्यर्थं कलशे गणपत्यादिपञ्चदेवतापूजादिकं कुर्वन्ति ।” अत्र प्रथमतः समाचारादुत्कलदेशे इति कथयित्वोत्कलीयसमाचारं विवृणोति । “देशान्तरे नास्ति” इत्युक्त्वा स्वस्यानुत्कलीयत्व-

सन्देहमपि निराकरोति । पुनश्चान्तिमे व्रतस्य कालनिर्णयं कृत्वा परम्परया वचनस्यास्य प्रचलितत्वात् मूलवचनस्यावश्यकता नास्तीत्यपि सूचयति ।

एकाम्रचन्द्रिकाकपिलसंहितयोः वचनानि अनुत्कलीयधर्मशास्त्रीयनिबन्धग्रन्थेषु न कुत्रापि प्राप्यन्ते । परन्तु कृत्यकौमुद्यादिषूत्कलीयधर्मशास्त्रीयनिबन्धग्रन्थेष्वेव लभ्यन्ते । अस्मादपि बृहस्पतेरुत्कलीयत्वमनुमातुं शक्यते । सागरस्नानविधौ जगन्नाथानुज्ञां गृहीत्वा महोदधिं प्रति गमनसमये पथ्युग्रसेनभैरवादीनां मन्दिरेषु प्रार्थनाविधिरनेन वर्णितः । पापनाशिनीयोगे भुवनेश्वरस्थस्य श्रीलिङ्गराजदेवस्य समीपस्थ–पापनाशिन्यादिषु कुण्डेषु स्नानं विहितम् । अतः उत्कलस्य सूक्ष्मातिसूक्ष्मतथ्यानि तथा गमनमार्गोऽपि यदा बृहस्पतिना ज्ञायते तर्हि तस्य अनुत्कलीयत्वकथनमनुचितमेव ।

सिंहबृहस्पतियोगः उत्कले समादृतः । अन्यप्रदेशीयैः धर्मशास्त्रनिबन्धकारैः तस्य योगस्य सूचनाऽपि न दीयते । परन्तु बृहस्पतिना योगोऽसौ सविधि वर्णितः । अतः तस्योत्कलीयत्वमनुमातुं शक्यते ।

कृत्यकौमुद्यामालोचितेषूत्कलीयपर्वसु जगन्नाथदेवस्य श्रीगुण्डिचायात्रा, चम्पकद्वादशी, ज्येष्ठपौर्णमास्यां जगन्नाथदेवस्य स्नानयात्रा, षष्ठीपूजा, बकुलामावास्या, माघसप्तम्यां कोणार्कक्षेत्रे सूर्यपूजा, चन्द्रभागातीर्थस्नानं, कोणार्कक्षेत्रस्य सविवरणं वर्णनं, दोलायात्रा घृतकम्बलादीनां पर्वणामालोचनमनेन कृतम् । पुनश्च मेषसंक्रान्ति-दमनकचतुर्दश्य-क्षयतृतीया-ज्येष्ठपौर्णमासी-दशहरा गुण्डिचायात्राऽऽषाढशुक्लैकादश्याषाढपूर्णिमा-कार्त्तिकमासकृत्य-देवोत्थापनैकादशीष्वनेकेषु पर्वसु जगन्नाथदेवस्य दर्शनं समहिम प्रकटितम् । अस्मादेवानुमीयते यद् बृहस्पतिरुत्कलीयः इति ।

व्यतीपात-महावैशाखी-महाज्यैष्ठी-महाकार्त्तिकी-रोहिणीप्रतिपन्महोदध्यमावास्याऽर्धोदयामावास्या-महामाघी-पापनाशिनी-गोविन्दद्वादशी-वारुणीयोग-सागरस्नानादिषु वर्णितेषु स्नानयोगादिषु जगन्नाथदेवदर्शनं महोदध्यादौ स्नानं च विहितमस्ति । अतः न कोऽप्यनुत्कलीयः उत्कलीयपर्वसु तथा स्नानयोगादिषु सर्वत्र जगन्नाथदेवस्य दर्शनं, महोदध्यादावपि सर्वदा स्नानं वर्णयति न वा स्थानादीनां पुङ्खानुपुङ्खवर्णनं कर्त्तुमर्हति ।

अतः एभिरन्तरङ्गप्रमाणैः बृहस्पतिरुत्कलीय आसीदिति मयाऽनुमीयते । अनन्तरञ्च कतिपयग्रन्थेषु पूर्वोक्तानि प्रमाणानि आधारीकृत्य बृहस्पतिरुत्कलीय इति अपरे प्रमाणयन्ति । तान्येव प्रमाणानि बहिरङ्गप्रमाणरूपेणोपस्थापयामि ।

उत्कलराज्यसंग्रहालयस्योत्कले[242]तिहासानुसन्धानपत्रिकायां बहुवारं बहुभिः तेषामुत्कलीयत्वं प्रमाणितम् । उत्कलराज्यसंग्रहालयस्य [243]डेस्क्रिप्टिब् कैटलाग आफ़ सांस्क्रिट मानुस्क्रिप्ट पुस्तकस्य धर्मशास्त्रखण्डेऽपि बहुवारं बृहस्पतेरुत्कलीयत्वं स्वीकृतम् । उत्कलराज्ये[244]तिहासानुसन्धानपत्रिकायाः खङ्गगोविन्ददासस्य सर्वस्मृतिसारसंग्रहस्यालोचनाभागे बृहस्पतेरुत्कलीयत्वं प्रमाणितम् ।

'ओड़िशार सांस्कृतिक इतिहास' [245]पुस्तके उत्कलीयसंस्कृतरचनासु धर्मशास्त्रविभागे बृहस्पतेः कृत्यकौमुदीग्रन्थः सन्निविष्टः । अतः उत्कलीयधर्मशास्त्रकृतिषु परिगणितत्वाद् बृहस्पतिरुत्कलीयः । चक्रधरमहापात्रकृत 'उत्कल इतिहासर एक अज्ञात अध्याय' [246]पुस्तके बृहस्पतिरुत्कलीयस्मृतिनिबन्धकारेष्वन्यतमः तथा कृत्यकौमुदीग्रन्थोऽप्युत्कलीयस्मृतिनिबन्धग्रन्थेष्वन्तर्भुक्त इति प्रमाणितम् । 'ओडिशा परिचय' [247]पुस्तके 'संस्कृतसाहित्यकु ओडिशार अवदान' शीर्षके सूर्यवंशशासनकाले लिखितेषु प्रसिद्धस्मृतिशास्त्रेषु बृहस्पतेः कृत्यकौमुदीप्रभृतयः स्मृतिनिबन्धग्रन्थाः उल्लेखयोग्याः इति निरुपितं वर्त्तते । अतः बृहस्पतिरुत्कलीयरित्यनुमीयते । श्रीयुक्तनीलमणि

242- उत्कलराज्येतिहासगवेषणापत्रिका (पञ्चमखण्ड पृ. – १८८, १७५), (षष्ठखण्ड पृ. – ६८) ।

243- डेस्क्रिप्टिब् कैटलाग आफ़ सांस्क्रिट् मानुस्क्रिप्टस्- प्रथमभाग, प्रथमभाग - आपेण्डिक्स भाग, प्रथमभाग पृ. – ३४ ।

244- उत्कलराज्येतिहासगवेषणापत्रिका (नवमखण्ड पृ. – ६६९) ।

245- ओडिशार सांस्कृतिक इतिहास (पृ. – १६५) ।

246- उत्कल इतिहासर एक अज्ञात अध्याय (पृ. – १४८) ।

247- ओड़िशा परिचय (पृ. – ३३९) ।

ग्रन्थस्य 'ओडिशार लेखा ओ लेखक'[248] पुस्तके उत्कलीयस्मृतिनिबन्धकारेषु बृहस्पतिः श्रेष्ठस्थानं भजते । 'उत्कलर पर्वपर्वाणि ओषाव्रत ओ यानियात्रा'[249] पुस्तके 'उत्कलर ग्राम्यजीवन ओ पर्वपर्वाणि' शीर्षकस्य लेखकः डॉ॰ हेमन्तकुमारदासः लिखति यथा १५० पर्वणां विशदालोचकरूपेण वर्त्तमानः बृहस्पतिः कृत्यकौमुदीनाम्ना धर्मशास्त्रीयनिबन्धपुस्तिकां विरचय्योत्कलीयधर्मशास्त्रसाहित्यमुद्धिमत् चकार ।

बहुभिर्लेखकैरुत्कलीय इति निर्णीतत्वात् उत्कलीयैरर्वाचीननिबन्धृभिः स्मृतत्वात् उत्कलीयव्रतोत्सवानां स्फुटप्रदर्शकत्वात् अनुत्कलीयनिबन्धृभिरस्मृतत्वात् पुरुषोत्तमभुवनेश्वरक्षेत्रयोः सूक्ष्मातिसूक्ष्मतथ्यप्रदर्शनात् तथा एकाम्रपुराण-कपिलसंहितयोः प्रामाण्यग्रहणात् प्रदेशान्तरेऽस्य पुस्तकस्य प्रतिलिपेरदर्शनात् उत्कलेष्वेव प्रतिलिपीनामुपलब्धत्वादयं कृत्यकौमुदीकार उत्कलीय इति कथयितुं शक्यते ।

कृत्यकौमुद्यामुद्धृतग्रन्थाः ग्रन्थकाराश्च

कृत्यकौमुदीग्रन्थः प्रकरणत्रयात्मकः । तत्र प्रकरणेषु त्रिषु बृहस्पतिना पञ्चाशीति (८५) ग्रन्थकाराणां नामानि तथाऽशीति (८०) ग्रन्थानां च नामान्युट्टङ्कितानि । पुनश्च श्रुतिस्मृतिधर्मशास्त्रपुराणज्योतिःशास्त्रस्मृत्यन्तरसंग्रहादिच्छलेन बहूनि वचनान्युद्धृतानि ।

कृत्यकौमुद्यामुद्धृतग्रन्थकाराः यथा अङ्गिरा-त्र्या-पस्तम्बा-श्वलायनो-द्दालको-शन-ऋष्यशृङ्ग-कात्यायन-कार्ष्णाजिनि-काश्यप-कुथुमि-कृच्छ्रपाद-गर्ग-गार्ग्य-गालव-गोभिल-गौतम-च्यवन-छागलेय-जाबालि-दक्ष-देवल-धौम्य-नारद-पराशर-पितामह-पुलस्त्य-पैठीनसि-प्रचेतो-वृद्धगार्ग्य वृद्धवसिष्ठ वृद्धशातातप--बृहत्प्रचेतो-बृहन्मनु-बृहद्विष्णु-बृहद्वसिष्ठ-बृहस्पति-बौधायन-भारद्वाज-मनु मरीचि-मार्कण्डेय-यम-यवन-याज्ञवल्क्य-योगीयाज्ञवल्क्य-लघ्वापस्तम्ब-

---

248- ओडिशार लेखा ओ लेखक (पृ. - २४) ।

249- उत्कलर पर्वपर्वाणि ओषाव्रत ओ यानियात्रा (पृ. -३४१) ।

लघुहारीत लौगाक्षि-वसिष्ठ--व्यास-विरञ्चि--विश्वामित्र--विष्णु--विष्णुगुप्त-वैशम्पायन-शंख--शतानन्द-शातातप--सत्यतप-सम्वर्त्त--स्कन्द-सुमन्तु--सुव्रत-सौरभि-हारीत-जीमूतवाहन-पत्य-वराह-वादरायण-लिखित-विद्याकर-लक्ष्मीधर--व्याघ्रपाद--जातूकर्ण--शाट्यायनि-ज्योतिःपराशर--सत्यव्रत--माण्डव्य-विज्ञानेश्वर-मध्यमाङ्गिरा-पाणिनी-भवदेव-बृहद्व्यास श्लोकगौतम--योगीश्वराः।

कृत्यकौमुद्यामुद्धृतग्रन्थानां नामानि यथा— आग्नेयपुराणा-दित्यपुराणे काम्रपुराणे-कादशीविधान-कात्यायनपरिशिष्ट-काश्यपपञ्चरात्र-कपिलसंहिता-कूर्मपुराण-गरुडपुराण-गृह्यपरिशिष्ट-चन्द्रकेतुचरित-छन्दोगपरिशिष्ट-तत्त्वसागरसंहिता- देवीपुराण--नरसिंहपुराण--नन्दीपुराण--नारदीयपुराण-पद्मपुराण-ब्रह्मपुराण-ब्रह्मवैवर्तपुराण-ब्रह्माण्डपुराण-भगवतीपुराण-भविष्यपुराण-भविष्योत्तरपुराण--भागवत-महाभारत-मत्स्यपुराण-मार्कण्डेयपुराण-मृत्युञ्जयपुराण-मोहचूडोत्तर-यजुर्विधान-राजमार्त्तण्ड-रामायण-लिङ्गपुराण-वराहपुराण-वह्निपुराण-वायुपुराण-विष्णुपुराण-विष्णुधर्मोत्तर-विष्णुरहस्य-विष्णुसंहिता-शंकरगीता--शंकरसंहिता-शतपथस्मृति--शतानन्दसंग्रह--शब्दसमुच्चय--शाम्बपुराण-शिवपुराण--शुद्धिदीपिका-सनत्कुमारीय-स्कन्दपुराण-स्कन्दविजय-स्मृतिमीमांसा-स्मृतिसमुच्चय-स्मृतिसार--हरिवंश--कृत्यकल्पतरु-व्रतप्रदीप-संवत्सरप्रदीप-पुरुषोत्तमपुराण-विष्णुधर्म-पारिजात-हरिवंश-स्कन्दजामल-प्रपञ्चसार-धवलसंग्रह-प्रभासपुराण-शिवधर्म-पद्मावतीपुराण -निगम-सौरधर्मोत्तर--शुद्धिचन्द्रिका--तैत्तिरीयश्रुति--शिवरहस्य--चतुर्विंशतिमत--षट्त्रिंशन्मत-दानसागर-दानविवेकादीनि।

अनन्तरं कृत्यकौमुदीग्रन्थे कस्य ग्रन्थकारस्य ग्रन्थस्य च कतिवारं कति वचनानि उद्धृतानि तेषां सूची निम्ने दीयते।

नामानि	कतिवारम् कति वचनानि	नामानि	कतिवारम् वचनानि
१. अङ्गिरा	२२—४३	४. आग्नेयपुराणम्	१५—७१
२. अत्रिः	१— १	५. आपस्तम्बः	२६—३०
३. आदित्यपुराणम्	३— ७	६. आश्वलायनः	१— १

ग्रन्थाणां ग्रन्थकाराणाञ्च नामानि	कति वारम्	कति वचनानि
७. उद्दालकः	१—	१
८. उशना	५—	५
९. एकाम्रपुराणम्	२—	१६
१०. एकादशीविधानम्	१—	७
११. ऋष्यश्रृङ्गः	५—	६
१२. कात्यायनः	१८—	-
१३. कात्यायनपरिशिष्टम्	१—	४
१४. कालादर्शः	२—	३
१५. कार्ष्णाजिनिः	४—	६
१६. काश्यपपञ्चरात्रम्	१—	३
१७. कपिलसंहिता	१—	३
१८. काश्यपः	३—	६
१९. कुथुमिः	२—	२
२०. कूर्मपुराणम्	११—	२६
२१. कृच्छ्रगादः	२—	३
२२. कल्पतरुकारः	२—	-
२३. गर्गः	४—	८
२४. गरुडपुराणम्	१०—	८-
२५. गार्ग्यः	५—	६
२६. गालवः	३—	३
२७. गृह्यपरिशिष्टम्	२—	५
२८. गोभिलः	८—	११
२९. गौतमः	८—	९
३०. चतुर्विंशतिमतम्	२—	३
३१ चन्द्रकेतु चरितम्	१—	१
३२. च्यवनः	१—	१
३३. छन्दोगपरिशिष्टम्	७—	१०
३४. छागलेयः	२—	२
३५. जातूकर्ण्यः	२—	२
३६. जावालिः	१०—	११
३७. जीमूतवाहनः	२—	-
३८. ज्योतिः पराशरः	१—	४
३९. ज्योतिःशास्त्रम्	१७—	३२
४०. तत्त्वसागरसंहिता	२—	२
४१. तैत्तिरीयश्रुतिः	१—	१
४२. दक्षः	१—	२
४३. दानविवेकः	१—	३
४४. दानसागरः	२—	१६
४५. देवलः	१३—	२०
४६. देवीपुराणम्	११—	४७
४७. धर्मशास्त्रम्	१—	२३
४८. धवलसंग्रहः	१—	४
४९. धौम्यः	२—	२
५०. नरसिंहपुराणम्	२—	३
५१. नन्दीपुराणम्	५—	८
५२. नारदः	१—	१
५३. नारदीयपुराणम्	१४—	५५
५४. निगमः	३—	३
५५. पराशरः	१८—	३९

५६. परिशिष्टम्	१०—२२
५७. पद्मपुराणम्	८—७३
५८. पद्मावतीपुराणम्	१— ३
५९. पाणिनिः	१— १
६०. पारिजातहरिवंशः	१— १
६१. पितामहः	२— २
६२. पुरुषोत्तमपुराणम्	१— २
६३. पुराणम्	११—१७
६४. पुलस्त्यः	१— २
६५. पैठीनसिः	३— ३
६६. प्रचेताः	९—१४
६७. प्रपञ्चसारः	१— १
६८. प्रभासपुराणम्	१—१९
६९. ब्रह्मपुराणम्	३९—१७९
७०. ब्रह्मवैवर्तपुराणम्	२— ६
७१. ब्रह्माण्डपुराणम्	२०—३४
७२. बृहत्प्रचेताः	१— २
७३. बृहन्मनुः	२— ३
७४. बृहद्विष्णुः	३— ४
७५. बृहद्वसिष्ठः	३— ७
७६. बृहद्व्यासः	१— १
७७. बृहस्पतिः	९—१७
७८. बौधायनः	२०—६९
७९. भगवतीपुराणम्	३— ४
८०. भवदेवः	१— १
८१. भविष्यपुराणम्	१९—५१
८२. भविष्योत्तरपुराणम्	३७—४२
८३. भारद्वाजः	२— ५
८४. भागवतम्	४—२५
८५. भारतम्	९—२१
८६. मध्यमाङ्गिराः	१— १
८७. मनुः	१९—२१
८८. मरीचिः	५— ६
८९. महाभारतम्	१८—५०
९०. मत्स्यपुराणम्	३०—१३४
९१. मार्कण्डेयः	१७—२४
९२. मार्कण्डेयपुराणम्	२— २
९३. मृत्युञ्जयपुराणम्	१— ४
९४. मोहचूडोत्तरम्	१— ४
९५. यमः	२४—६४
९६. यवनः	१— २
९७. यजुर्विधानम्	१— १
९८. याज्ञवल्क्यः	२४—७०
९९. योगी याज्ञवल्क्यः	३—१३
१००. योगीश्वरः	१— ३
१०१. राजमार्तण्डः	१९—३९
१०२. रामायणम्	२—१८
१०३. लक्ष्मीधरः	७— ८
१०४. लघ्वापस्तम्बः	१— १
१०५. लघुहारीतः	४— ४
१०६. लिखितः	५— ५
१०७. लिङ्गपुराणम्	९—२३

१०८. लौगाक्षिः	१— १
१०९. वराहः	१—१४
११०. वराहपुराणम्	१०—२६
१११. वसिष्ठः	१२—२०
११२. वह्निपुराणम्	५—१४
११३. वादरायणः	१— ४
११४. वायुपुराणम्	१६—३५
११५. विज्ञानेश्वरः	१०— -
११६. विद्याकरः	२— ३
११७. विरश्चिः	१— २
११८. विश्वामित्रः	२— ६
११९. विष्णुः	१९—२७
१२०. विष्णुगुप्तः	१— १
१२१. विष्णुपुराणम्	३—११
१२२. विष्णुधर्मः	६—१९
१२३. विष्णुधर्मोत्तरम्	४९—२६०
१२४. विष्णुरहस्यम्	१२—७९
१२५. विष्णुसंहिता	१—१९
१२६. वृद्धगार्ग्यः	३— ३
१२७. वृद्धवसिष्ठः	५—१९
१२८. वृद्धशातातपः	८—१२
१२९. वैशम्पायनः	२— २
१३०. व्याघ्रपादः	१— १
१३१. व्यासः	९—४४
१३२. व्रतप्रदीपकारः	१— -
१३३. शंकरगीता	३— ४
१३४. शंकरसंहिता	१— ३
१३५. शंखः	१३—१५
१३६. शतपथस्मृतिः	२— २
१३७. शतानन्दः	२— -
१३८. शतानन्दसंग्रहः	३—११
१३९. शब्दसमुच्चयः	१— १
१४०. शातातपः	१८—३२
१४१. शाम्बपुराणम्	१—३६
१४२. शिवधर्मः	१—१७
१४३. शिवपुराणम्	४— ९
१४४. शिवरहस्यम्	१— १
१४५. शुद्धिचन्द्रिका	१— १
१४६. शुद्धिदीपिका	४— ७
१४७. श्रुतिः	५— ५
१४८. श्लोकगौतमः	१— १
१४९. षट्त्रिंशन्मतम्	४— ९
१५०. संवत्सरप्रदीपकारः	१— १
१५१. सत्यः	३— ३
१५२. सत्यतपः	३— ३
१५३. सत्यव्रतः	१— १
१५४. सनत्कुमारीयः	१— २
१५५. सम्वर्तः	८—२२
१५६. सौरधर्मोत्तरम्	९— ८
१५७. सौरभिः	१— १
१५८. स्कन्दः	१— ३
१५९. स्कन्दजामलम्	१—१२
१६०. स्कन्दपुराणम्	२६—८३
१६१. स्कन्दविजयम्	२— ७

१६२. सुमन्तुः	६—१०	१६७. स्मृतिसमुच्चयः	७—१७
१६३. सुव्रतः	१— २	१६८. स्मृतिसारः	२— ३
१६४. स्मृतिः	२४—३८	१३९. हरिवंशम्	१— १
१६५. स्मृत्यन्तरम्	१३—१७	१७० हारीतः	२१—३२
१६६. स्मृतिमीमांसा	२— ५		

कृत्यकौमुद्यां प्रायश. ३८७० वचनिकाः वर्त्तन्ते । तेषु ३२०० श्लोकानां कर्तृनाम मिलति । परन्त्वन्येषां श्लोकानां कर्तृनाम न लभ्यते ततः यथाशक्ति पुस्तकान्तरान्वेषणपूर्वकं मया कतिपयस्थानेषु कर्तृनाम दत्तम् । अन्ये श्लोकाः पुराणादीनां ग्रन्थानां दुष्प्राप्यमाणत्वाद् दुर्लभ्या एव ।

कृत्यकौमुदीग्रन्थस्य विषयवस्तु

बृहस्पतिकृतः कृत्यकौमुदीग्रन्थः कालविवेकप्रायश्चित्तदानात्मकैः त्रिभिः प्रकरणैः विभक्तः । कालविवेकप्रकरणं समुदायग्रन्थस्य महद्भागमावहति । ग्रन्थस्तु चतुरुत्तरद्विशततालपत्रात्मकः । निखिलधर्मशास्त्रीयनिबन्धग्रन्थेष्वयं कृत्यकौमुदीग्रन्थः विशिष्टरूपं धारयति । ग्रन्थेऽस्मिन्नभिनवप्रणाल्या विषयाः प्रतिपादिताः । आवश्यकस्थलेषु विचारचातुरीपरामर्शपरायणैः बृहस्पतिभिः खण्डनमण्डनपुरःसरं विषयाः वर्णिताः । कालविवेकप्रकरणे संवत्सरे पालिताः सनातनीयानां पर्वोत्सवविषयाः वर्णिताः । तत्र व्रतपालनकालाः विधयश्च सुस्पष्टं स्मृतिपुराणेभ्यः उद्धृताः । सर्वे निबन्धकाराः चैत्रशुक्लप्रतिपद प्रारभ्य वार्षिकपर्वाणि प्रारभन्ते, किन्तु बृहस्पतिः चैत्रशुक्लस्याद्यत्वं स्वीकृत्यापि चैत्रशुक्लप्रतिपदं परित्यज्य अशोकाष्टम्याः ग्रन्थारम्भमकरोत् । कृत्यकौमुद्यां प्रतिपादितविषयक्रमेण विषयाः संक्षिप्य अधुना प्रतिपाद्यन्ते ।

तत्र चैत्रमासस्य अशोकाष्टमीं दमनकचतुर्दशीं च पर्वद्वयमाधारीकृत्य बृहस्पतिना कालविवेकप्रकरणं प्रारब्धम् । चैत्रमासस्य शुक्लाष्टम्यामशोकाष्टमी नवमीविद्धा भवति । तत्राष्टाशोककलिकाप्राशनं समन्त्रं क्रियते । अत्र पुनर्वसुयोगे फलाधिक्येऽपि तिथेः प्राथम्यात् प्रधानत्वाच्चाष्टम्यामेव पालनीयम् । अत्र स्रोतः स्नाने वाजपेयफलं विहितम् । चैत्रमासस्य शुक्लपक्षचतुर्दश्यां

दमनकचतुर्दशी पाल्यते । यद्यपि सामान्यतया शुक्ला चतुर्दशी परविद्धा स्वीक्रियते, तथापि दमनकपर्वणि सा त्रयोदशीविद्धा ग्राह्या । दमनकचतुर्दश्यां सोपचारं शिवपूजनेन लक्षाश्वमेधफलं लभ्यते ।

वैशाखमासीय पर्वसु मेषसंक्रान्तिः अक्षयतृतीया नृसिंहचतुर्दशीति व्रतत्रयमनेन प्रतिपादितम् । तत्र मेषराशिं प्रति सूर्यस्य संक्रमणदिवसः मेषसंक्रान्तिरिति । तस्मिन् दिवसे मेषदानेन महापुण्यं भवति । विप्रेभ्यः पादुका च्छत्र-सक्तु-शर्करा-जलकुम्भ-व्यजनानां दानेन महत् पुण्यमाप्यते । महाभारत-भविष्योत्तर-विष्णुधर्मोत्तर-ब्रह्मपुराण-नन्दिपुराण-मत्स्यपुराणेषु जलकुम्भशक्तुदानादीनां महत्त्वं प्रतिपादितम् । तथाऽत्र विषुवश्राद्धमपि भवति ।

वैशाखमासस्य शुक्लतृतीया अक्षयतृतीया भवति । अत्र सुवर्णधान्यघृतादिदानेनाक्षयं फलं प्राप्यते भविष्यपुराणवचनात् । अत्र कृतिकानक्षत्रयोगे रोहिणीनक्षत्रयोगे वा फलाधिक्यमपि वर्णितम् । अस्मिन् दिवसे ब्रह्मपुराणे जगन्नाथदेवस्य दर्शनं प्रतिपादितम् । अत्र युगादिश्राद्धं पिण्डरहितं कुर्यात् । वैशाखशुक्लचतुर्दश्यां नृसिंहचतुर्दशी भवति । सा च परविद्धा ग्राह्या । अत्र नृसिंहजयन्तीव्रतं पाल्यते । व्रतपालने सायं मुख्यकालः "चतुर्दशी न वर्त्तते"ति वचनात्, त्रयोदशीसम्बन्धस्य निषिद्धत्वाच्च ।

ज्येष्ठमासस्य पर्वचतुष्टयं कृत्यकौमुद्यां विचारितम् । तत्र प्रथमतः ज्येष्ठमासि शुक्लषष्ठ्यामारण्यकव्रतं भवति । व्रतेस्मिन् पूर्वविद्धा तिथिर्ग्राह्या 'कृष्णाष्टमी स्कन्दषष्ठीति' वचनात् । अलाभे तु सामान्यव्रतव्यवस्थावत् परविद्धा ग्राह्या । दिवसेऽस्मिन् बिन्ध्यवासिनीदेव्याः पूजनं भवति । ज्येष्ठशुक्लदशम्यां दशहरा भवति । ब्रह्मचर्यपूर्वकं गङ्गादिषु तीर्थक्षेत्रषु स्नानेन मानसिककायिकवाचिकपापानि नश्यन्तीति स्कन्दपुराण-ब्रह्मपुराण-भविष्यपुराणादयः प्रतिपादयन्ति । दिवसेऽस्मिन् जगन्नाथदेवस्य दर्शनमपि विहितम् ।

ज्येष्ठशुक्लद्वादश्यां चम्पकद्वादशी भवति । चम्पकपुष्पैः हरेरर्च्चनं कृत्वा मनुष्यः सुखस्याधिकारी भवति । ज्येष्ठपौर्णमास्यां जगन्नाथदेवस्य

स्नानयात्रा विहिता । सा च ब्रह्मपुराणे सविस्तरं प्रतिपादिता । दिवसेऽस्मिन् जगन्नाथदेवस्य दर्शनमपि विहितम् । वायुपुराण-पुरुषोत्तमपुराणादिष्वपि विषयेऽस्मिन् विशेषो बिहितः ।

आषाढमासे प्रतिपादितेषु षट्सु पर्वसु प्रथमतः भूमिरजस्वला भवति । यथा– मिथुनसंक्रान्तेः पूर्वदिनं परदिनं तद्दिनञ्चेतद् दिनत्रयं भूमिरजस्वला भवति । तदा कृषिकर्म निषिद्धं भवति । आषाढशुक्लद्वितीयायां पुरुषोत्तमपुरीस्थ श्रीजगन्नाथदेवस्य रथयात्रा भवति । अस्याः नाम श्रीगुण्डिचेति । दिवसेऽस्मिन् श्रीजगन्नाथदेवस्य गुण्डिचामण्डपं प्रति गमनं भवति । तत्र नवदिनानि यावत् जगन्नाथबलभद्रसुभद्राः तिष्ठन्ति । अनन्तरञ्च प्रत्यावर्त्तनं भवति । तत्र जगन्नाथदेवस्य दर्शनेन महत् फलं प्राप्यते ।

आषाढशुक्लैकादशीतः देवानां शयनं भवति । परन्तु भिन्नभिन्नदेवानां वह्नि-स्कन्द-पुरन्दर गणपति-श्री-धर्मराड्-भास्कर-वायु-पार्वती वरुण-केशव-ब्रह्मादीनां क्रमेण प्रत्तिपत्तः पूर्णिमापर्यन्तं शयनं भवति, तथैव क्रमेणोत्तिष्ठन्ते चेत्ते वरदाः भवन्ति । आषाढशुक्लचतुर्थ्यां गणेश्वरचतुर्थी भवति । तत्र लड्डुकादिभिः गणेशस्य पूजनेन सर्वकामसिद्धिः भवति । अत्र च तिथिः पञ्चमीयुता ग्राह्या स्कन्दपुराणवचनात् । आषाढशुक्लैकादशीतः हरिशयनं भवति । दिवसेऽस्मिन्नुपोष्य सोपचारं केशवं सम्पूज्य शाययेत् । पुनश्च चातुर्मास्यव्रतनियमग्रहणपूर्वकं चातुर्मास्यव्रतपालनं कर्त्तव्यम् । भविष्योत्तर-विष्णुधर्म काश्यपपञ्चरात्र-विष्णुरहस्य-मत्स्यपुराणादिषु केशवशयनविधिः वर्णित. । चातुर्मास्यव्रतग्रहणं चतुर्धाऽपि कृत्यकौमुद्यां वर्णितम् । आषाढपूर्णिमायां श्राद्धे दाने उपवासे च कृते अनन्तफलं प्राप्यते इति भारतमतम् ।

श्रावणमासस्य शुक्लपञ्चम्यां व्यालपञ्चमी, पौर्णमास्यां बलभद्रजयन्ती-रक्षाबन्धनमुपाकर्म इति पर्वद्वयञ्चात्र कृत्यकौमुद्यां विवृतम् । श्रावणमासस्य शुक्लपञ्चम्यां व्यालपञ्चमी भवति । सर्पादिभयनिवारणार्थं द्वारादिषु गोमयेन सर्पाणां चित्रं कृत्वा दधिदूर्वाकुशाक्षतगन्धपुष्पोपहारैः सर्वान् नागान् सम्पूजयेत् । अत्र रात्रौ जाग्रद्गौरीमहोत्सवः क्रियते ।

श्रावणपौर्णमास्यां बलभद्रजयन्ती भवति । दिवसेऽस्मिन्नुत्कले गावोमहिष्यश्छागाद्याः पूजिताः अलंकृताश्च भवन्ति । वन्दापनाकरणानन्तरं पिष्टकादि सुभोजनं दीयते । दिवसेऽस्मिन् बलभद्रोत्थापनं भवति । श्रावणपौर्णमास्यां रक्षाबन्धनमपि भवति, रक्षाबन्धनस्य कर्मकालोऽपराह्णः । गोमयादिलिप्तभूमौ दूर्वावर्णकादिभिः गृहस्य रक्षां कुर्यात् । सर्वैः सपरिवारबन्धुजनामात्यराजापुरोहितादिभिः समन्त्रं रक्षाबन्धः कार्यः । श्रावणपौर्णमास्यां श्रावणपञ्चम्यां हस्तानक्षत्रयोगेन वोपाकर्म कुर्यात् । तत्र शाखाभेदेनाऽपि भिन्ना व्यवस्था वर्णिता । श्रावण्यां तैत्तिरायकाः, श्रवणानक्षत्रे बह्वृचाः, वाजसनेयिनः श्रावणपूर्णिमायां श्रावणपञ्चम्यां वा कुर्युः गार्ग्यवचनात् । ग्रहणसंक्रान्तिपाते तु नियतेष्वन्येषु दिवसेषु कर्त्तव्यम् । तत्रोपलिप्तभूमौ सदर्भं गौतमादीन् सप्तऋषीन् तर्पयेत् । अनन्तरञ्च समन्त्रं धूपदीपगन्धद्रव्यपुष्पादिभिरभ्यर्चयेत् । अष्टवसुदशविश्वदेवैकादशरुद्रद्वादशादित्यचतुर्दशविद्याकलाकाष्ठामुहूर्त्तपक्षमासर्त्तुसंवत्सरादीनां तर्पणमप्यनन्तरं कर्त्तव्यम् । ततः पितॄनपि तर्पयेत् । वंशब्राह्मणमन्त्रान्तिमाध्यायानपि पठेत् । उपाकर्मकरणेन देशे सुभिक्षं भवति । कृत्यकौमुद्यां मन्त्रब्राह्मणान्तिमाध्यायादीनां स्वरूपं सर्वे विधयश्च समन्त्रं वर्णिताः ।

भाद्रपदमासस्य त्रयोदशव्रतानि कृत्यकौमुद्यां चर्चितानि । तत्र प्रथमतः भाद्रपदे मासि कृष्णपञ्चम्यां रक्षापञ्चमी भवति । दिवसेऽस्मिन् पन्नगानां पूजनेन सप्तपुरुषं यावत् सर्पभयं न जायते । नागानां कृष्णवर्णादिवर्णकैः चित्रणं कृत्वा तानर्चयेत् । रात्रावेव रक्षाविधानं कर्म कर्त्तव्यम् । द्वारभित्तौ घण्टाकर्णमहावीरादि श्लोकद्वयं विलिख्य पिष्टकादिभिः पूजनीयम् ।

भाद्रकृष्णाष्टम्यां कृष्णजन्माष्टमी भवति । दिवसेऽस्मिन् भगवतः कृष्णस्य रोहिणीनक्षत्रयोगे जयन्तीव्रतमिति नामान्तरं भवति । कृष्णजन्माष्टमीव्रतेऽष्टमीपदश्रवणज्जयन्तीयोगाप्राप्तेऽपि केवलाष्टम्यामुपोषितव्यम् । तत्र तिथिः निशीथव्यापिनी ग्राह्या । तिथिनक्षत्रयोरेकतरान्ते नक्षत्रान्ते उभयान्ते वा योग्यकालप्राप्तौ पारणा कर्त्तव्या । कृत्यकौमुद्यां जन्माष्टमीपूजाविधिः

प्रतिपादितः। जन्मदिवसे एव वर्षवृद्धिविधिः क्रियते। जन्मतिथौ जन्मर्क्षपातं भवति यदा तत्संवत्सरं सुखदायकं भवति। अशौचादिपाते दिवसं वर्धयित्वा कर्त्तव्यम्। जन्मदिवसे भौमशनैश्चरवारयोः पाते विघ्नशान्त्यर्थं सर्वौषधिस्नानग्रहविप्रसुरार्चनादिना विघ्ननिवारणं कुर्यात्। जन्मतिथितः मासं व्याप्य क्षौरयात्रादि शुभकर्म निषिद्धम्। अनन्तरं कृत्यकौमुद्यां षष्ठीमार्कण्डेयादीनां पूजनं वर्णितम्।

भाद्रकृष्णत्रयोदश्यां भूपालत्रयोदशी भवति। सा तिथिः युगादिरिति। तत्र युगादिश्राद्धकरणे दाने च महत्फलमाप्यते। भाद्रकृष्णामावास्यायां सप्तपूरिकामावास्या भवति। कालसारेऽस्य सप्तपितृकामावास्येति नाम। सुभगा नार्यः दिवसेऽस्मिन् सुवर्णगोलकैः पतिमाराधयन्ति चेत्तासां वैधव्यदुःखं सप्तजन्मपर्यन्तमपसरति पुराणवचनात्। भाद्रशुक्लचतुर्थ्यां हरितालिका भवति। दिवसेऽस्मिन् चन्द्रदर्शनं निषिद्धम्। कदाचिच्चन्द्रदर्शने शान्त्यर्थमात्रेयिकावाक्यं पठेत्।

भाद्रशुक्लपञ्चम्यामृषिपञ्चमी भवति। सा तिथिः चतुर्थीविद्धा ग्राह्या। अत्र विश्वामित्राद्यृषयः तर्पणीया पूज्याश्च भवन्ति। अस्य कर्मकालोऽपराह्णः।

भाद्रशुक्लषष्ठ्यां षष्ठीपूजा भवति। दिवसेऽस्मिन् षष्ठीदेव्याः पूजनेन नार्यः धनपुत्रसौभाग्यवत्यश्च भवन्ति। भाद्रे मासि शुक्लसप्तम्यां कुक्कुटीव्रतं भवति। तिथिरियं पूर्वविद्धा ग्राह्या। ललितादेव्याः पूजनमत्र भवति। उत्कलीयग्रन्थेषु प्रायः व्रतमिदं वर्णितम्। उमामहेश्वरव्रतमित्यस्य नामान्तरम्। भाद्रपदशुक्लैकादश्यां शक्रोत्थापनं भवति। श्रवणानक्षत्रे तथा श्रवणायाः आद्यपादस्य बहुसम्मतत्वात् तत्रैव शक्रोत्थापनं कर्त्तव्यम्। कर्मकालः दिवा एव ज्योतिःशास्त्रवचनाद्। भरण्यामन्तपादे च शक्रं विसर्जयेत्।

भाद्रमासस्य शुक्लद्वादश्यां श्रवणानक्षत्रयोगे श्रवणाद्वादशी भवति। एकादशीश्रवणायोगे द्वादशीश्रवणायोगे च विष्णुशृङ्खलयोगः भवति। तदा अनन्तफलदायकं भवतीदं व्रतम्। भाद्रशुक्लचतुर्दश्यामनन्तव्रतं भवति।

“मध्याह्ने भोज्यवेलायामि”ति वचनान्मध्याह्नः कर्मकालः। कृत्यकौमुद्यां पूजाविधानं कथाऽनन्तव्रतप्रतिष्ठाऽपि सविस्तरं विद्यते। कन्यां प्रति सूर्यसंक्रमणात् सप्तदिनात् प्रागेवागस्त्यायार्घ्यं दातव्यम्। अगस्त्यस्य महाविधानेन पूजनेन च श्वेतद्वीपप्राप्तिर्भवति। अत्रोज्जयिनीक्षेत्रस्य फलविशेषोऽप्यस्ति। विष्णुरहस्योक्तव्रतविधिः कृत्यकौमुद्यां वर्त्तते। कृत्यकौमुद्यामगस्तिपूजनं प्रतिष्ठाविधिरपि वर्त्तते।

आश्विनमासस्य पर्वत्रयमत्र कृत्यकौमुद्यां सन्निविष्टम्। तत्र प्रथमतः आश्विनशुक्लाष्टम्यां महाष्टमो भवति। महाष्टमी परविद्धा ग्राह्या। भाद्रशुक्लाष्टमीमारभ्य षोड़शे दिवसे बोधनोक्तेः। सप्तमीदिने दिवा एव देवीमुत्थाप्य परदिने मूलाष्टमीविधिः कार्यः। पूजाया अर्द्धरात्रविहितत्वेन पूर्वापरदण्डद्वयोपेतमर्द्धरात्रमत्र कर्मकालः। बलिदानादिभिः सर्वविधोपचारैः दुर्गां पूजयेत्। कृत्यकौमुद्यां कर्मकालः पूजाविधिश्च वर्णितः।

आश्विनशुक्लदशम्यां कूष्माण्डदशमो भवति। ललितादुर्गादेव्याः पूजनं दिवसेऽस्मिन् भवति। शाम्बपुराणानुसारं दिवसेऽस्मिन् शिव-दशरथ-ललोदेवीनां पूजनं भवति। आश्विनपौर्णमास्यां कौमुदीपौर्णमासी भवति। अत्र लक्ष्मीपूजनेन ऐश्वर्यप्राप्तिर्भवति। रात्रिजागरणपूर्वकं चिपिटकनारिकेलरसादिपानपूर्वकश्चाक्षक्रीडा अत्र क्रियते।

कार्त्तिकमासस्य अष्टानां पर्वणां सन्निवेशोत्र कृतः। तत्र आकाशदीपदानं कार्त्तिके मासि क्रियते। कार्त्तिकमासे तिलतैलेन सन्ध्यासमये उच्चस्थाने वृक्षमूलचतुष्पथाऽवसथादिषु श्रीप्राप्तये दीपदानं कुर्यात्। कार्त्तिकामावास्यायां प्रदीपामावास्या भवति। तुलां गते सूर्ये उपास्तसमये पितृपुरुषाणां कृते एकैकस्य त्रयः दीपाः पितृयज्ञवद्दीयन्ते। श्यामावल्लीजकुसुमदीपधूपगन्धादिभिः पितॄन् सनकादिसप्तमनुष्यानपि तोषयेत्। दीपदानस्य प्राधान्यदियं प्रदीपामावास्येति। प्रदीपामावास्यानन्तरं प्रतिपद्दिवसे प्रभाते एव सुखरात्रिः पाल्यते। दीपवृक्षान् विधाय तेषु दीपान् दत्त्वा भोजनक्रीडनादिभिः दिवसमतिवाहयेत्। अङ्गशेषपरिशिष्टोक्तविधिना विश्वेषां देवानां पित्रादीनामपि दीपदानं कर्त्तव्यमिति कृत्यकौमुद्याम्। अमावास्यायां निशाशेषे द्यूतक्रीडामारभ्य प्रतिपत्पर्यन्तं क्रीड़ितव्यम्।

कार्त्तिकशुक्लचतुर्थ्यां नागचतुर्थी भवति कर्मकाल: मध्याह्नः। दिवसेऽस्मिन् क्षीरादिभिः नागानां पूजनेन ते न हिंसन्ति । पञ्चमीयोगाभावे चतुर्थी ग्राह्या, 'क्षीरेणाप्याय पञ्चम्यामि'ति वचनात् । कार्त्तिकशुक्लैकादशीतः पञ्चदिनपर्यन्तं भीष्मपञ्चकं भवति । भीष्मेणैतद् व्रतं कृतम्, अतः भीष्मपञ्चकमित्यस्य नाम । एतद्व्रताचरणेन पापानि नश्यन्ति । सम्पूर्णे कार्त्तिके मासि कार्त्तिकव्रतकरणेन परमं पदं प्राप्यते । स्नान-दान-हविष्य-ब्रह्मचर्य तैल-मत्स्य-मांस-मधु-कांस्यादिवर्जनपूर्वकं कार्त्तिकमासमतिवाहयेद् । कार्त्तिकशुक्लपक्षैकादश्यां विष्णोरुत्थापनं भवति । यथा शयनविधिः सोपचारं क्रियते तथैवाहनादिपुरःसरं घण्टावाद्यकाहलादिभिः ब्राह्मणभोजनदक्षिणादानादिभिः देवानुत्थापयेत् । देवोत्थापनानन्तरं देवालयेष्विष्टदेवेभ्यः दीपदानेन रूपसौभाग्यैश्वर्यप्राप्तिर्भवति ।

कृत्यकौमुद्यां वर्णितेषु पर्वसु मार्गशीर्षमासस्य चत्वारि व्रतानि प्रतिपादितानि । मार्गशीर्षकृष्णाष्टम्यां प्रथमाष्टमी भवति । दिवसेऽस्मिन् प्रथमगर्भोत्पन्नस्यायुर्विवृद्ध्यर्थं कलशे गणपत्यादिपञ्चदेवतापूजनादिकं क्रियते । विधानमिदमुत्कलव्यतिरिक्तमन्यत्र नास्ति । व्रतसामान्योक्तः कालः । दिनद्वैधे पूर्वविद्धा कर्त्तव्या, 'कृष्णपक्षेऽष्टमी चैवे'ति वचनात् ।

तुलां गते सूर्ये दीपदानादिना नरकगमनं न भवतीति कृत्वा चतुर्दश्यां कुहूसम्बन्धिन्यमायां दीपदानं क्रियते ।

मार्गशीर्षशुक्लषष्ठ्यां प्रावरणषष्ठी भवति । तद्दिने देवद्विजगुरुभ्यश्च शीतघ्नं प्रावरणादिवस्त्रं दीयते इति कृत्वा प्रावरणषष्ठ्यास्याः नाम । मार्गशीरशुक्लचतुर्दशी पाषाणचतुर्दशीति । अत्र गौरीं पिष्टकादिभिः पूजयेत् । मार्गशिरः पौर्णमास्यामार्द्रायुक्तायां चतुष्पथादिषु पञ्चभूसंस्कारतोऽग्निस्थापनपूर्वकं महाव्याहृतिभिराज्यं हुत्वाऽग्नीष्टिकां ब्राह्मणेभ्यः गुडपिष्टकभोजनादिनि च दद्यात् ।

पौषमासस्य पर्वत्रयं विशिष्य कृत्यकौमुद्यां वर्णितम् । पौषमासस्य पूर्णिमायां पुष्यानक्षत्रयोगे नववस्त्रं परिधाय पुष्पधूपाद्यैः नारायण-शक्र-चन्द्र-पुष्य बृहस्पत्यादीन् पूजयेत् । भोजनादिनाऽपि सर्वान् तोषयेत् । मकरसंक्रान्तौ

जागरनृत्यगीताद्यैः घृतकम्बलदानेन च शिवलोकप्राप्तिर्भवति । अत्र भुवनेश्वरस्थस्य श्रीलिङ्गराजदेवस्य यात्रा भवति । पौषमासस्यामावास्यायां बकुलक्षीरपायसैः पितृपुरुषांस्तर्पयेत् ।

माघमासि पर्वपञ्चकमनेन विचारितम् । माघे मासि माघमासस्य नियमपालनं कृत्वा मनुष्यः स्वर्गलोकं मोक्षञ्च प्राप्नोति । माघमासस्यारम्भादथवा मकरसंक्रान्तितः बहिः स्नातव्यम् । पुनश्चेन्धनकम्बलवस्त्रोपानत्कुसुमघृततैलान्नादीनां दानेऽक्षयफलं भवति । माघकृष्णचतुर्दश्यां रटन्त्याख्या चतुर्दशी भवति । दिवसेऽस्मिन्नरुणोदयवेलायां सरितः समीपे नियतः यमादीन् तर्पयेत् । तेन संवत्सरकृतं पापं नश्यति । माघशुक्लपञ्चम्यां श्रीपञ्चमी भवति । तत्र सरस्वतीपूजनं भवति ।

माघमासस्य शुक्लसप्तम्यामरुणोदयवेलायां स्नानं सूर्यग्रहणसमफलदायकं भवति । दिवसेऽस्मिन् सूर्यस्य फलगन्धाद्यर्घ्यादिभिः पूजनेन रोगाः पापानि च नश्यन्ति । कृत्यकौमुद्यां ब्रह्मपुराणोक्तोत्कलस्यार्कक्षेत्रस्य महत्त्वं तत्र सूर्यपूजनञ्च सविस्तरं प्रतिपादितम् । दिवसेऽस्मिन् हविष्यब्रह्मचर्यमप्याचरणीयम् ।

माघमासस्य शुक्लाष्टम्यां भीष्माष्टमी भवति । दिवसेऽस्मिन् भीष्मस्य तर्पणपूजाश्राद्धादीनि क्रियन्ते । सर्वे वर्णाः तत्रैकोद्दिष्टं श्राद्धं भीष्मोद्देशेन कुर्युः । अस्य नित्यत्वात् जीवत्पितृकेणाऽपि कर्त्तव्यम् । कृत्यकौमुद्यामस्य विशेषविधिः विहिताः ।

माघमासस्य शुक्लैकादश्यां भैम्येकादशी भवति । इयमेकादशी भीमेन समुपोषितेति कृत्वाऽस्याः नाम भैम्येकादशी । जागरणादिना निशामतिवाह्य ब्राह्मणान् भोजनदक्षिणादिना सन्तोष्य व्रतमुद्यापयेत् । माघमासस्य पूर्णिमा वह्न्युत्सवपौर्णमासीति । दिवसेऽस्मिन् अग्नेः ज्वालनं कृत्वा तस्य सन्तोषाय सुमिष्टपदार्थैस्तं पूजयेत् ।

फाल्गुनमासस्य शिवरात्रिः दोलायात्रा च कृत्यकौमुद्यां चर्चिता । फाल्गुनकृष्णचतुर्दश्यामेव शिवरात्रिः भवति । सा तिथिः निशीथव्यापिनी ग्राह्या भवति प्रदोषकालश्च गौणः । जयायोगे शिवरात्रिः पूर्वविद्धा भवति ।

कृत्यकौमुद्यां सविस्तरमस्याः पूजाविधिः वर्णितः। फाल्गुनपूर्णिमायां दोलायात्रा भवति। दिवसेऽस्मिन् जगन्नाथदेवस्य दर्शनेन विष्णुलोकप्राप्तिर्भवति ब्रह्मपुराणवचनात्।

कृत्यकौमुद्यां प्रतिपादितेषु षट्सु जयन्तीव्रतेषु प्रथमतः चैत्रमासस्य शुक्लपक्षनवम्यां रामनवमीव्रतं भवति। व्रतेऽस्मिन् मध्याह्नव्यापिनी तिथिर्ग्राह्या। नवमीपुनर्वसुयुक्ता भवति चेत् महापुण्यप्रदा भवति। कृत्यकौमुद्यां सविधि व्रतमिद वर्णितम्। नृसिंह-कृष्ण-शिव-दुर्गा-वामनानां जयन्तीव्रतानां विवरणं ग्रन्थमध्येऽपि विहितम्।

अनन्तरं स्नानयोगादीनां विषये कृत्यकौमुद्यां विशेषवर्णनं विद्यते। परन्तु तत्र सर्वत्रैव वचनान्यभ्रान्तप्रमाणानि। साधारणसंदेहस्थलेषु तेषां परिष्करणं केवलं तैः कृतम्। प्रायशः सर्वे स्नानयोगाः उत्कलक्षेत्रमाधारीकृत्यैव दर्शिताः। तत्रोत्कलस्य पुरुषोत्तमपुरीस्थ जगन्नाथदेवस्य दर्शनं, महोदधिस्नानं, भुवनेश्वरस्थ श्रीलिङ्गराजदेवस्य दर्शनं दानादीनि च सर्वदा विहितानि। तत्र व्यतीपात-महावैशाखी-महाज्यैष्ठी-महाकार्त्तिकी-रोहिणी-प्रतिपद्-महोदध्यमावास्या-अर्धोदय-महामाघी-पापनाशिनी-गोविन्दद्वादशी-वारुणी-सिंहबृहस्पतियोग-गोदावरीस्नानयोगाः वर्णिताः। अनन्तरञ्च कृष्णागङ्गास्नानविधिः वर्णितः। सागरस्नानविधौ पुरुषोत्तमपुरीक्षेत्रस्य महोदधितः जगन्नाथमन्दिरं प्रति मार्गे स्थापितानां मन्दिराणां वर्णनं विधाय सागरस्नानार्थं तेषामनुज्ञाऽपि वर्णिता। पुनश्च जगन्नाथदेवमन्दिराभ्यन्तरभागस्य वर्णनाऽपि तत्रैव सन्निविष्टा। पुनश्च गङ्गास्नानार्थं यात्राविधिरपि संकल्पवाक्यपुरःसरं सुन्दरशैल्या प्रतिपादितः।

अनन्तरञ्च प्रतिपदादिदैवतिथिनिरूपणे दैवपित्र्यतिथीनां ग्राह्यकालश्च निरूपितः। प्रतिपदादितिथिषु विहितानां दैवपित्र्यकर्मणामखण्डतिथौ निःसन्देहमेवानुष्ठानम्। यदा तु दिनद्वयेऽपि विहितकाले तत्तिथिः तिष्ठति वा उभयत्र न तिष्ठति, तदेव कुत्रानुष्ठातव्यमिति विचारस्य विषयः। यदोभयदिने पूर्वाह्णलाभस्तदा तत्र युग्मादरेणैवेति ध्येयम्। यत्र तु विशेषवचनमस्ति तत्र व्यस्ताऽपि तिथिर्ग्राह्या विशेषानुरोधात्। तत्र शुक्लप्रतिपदमावास्यां

युतैव पूज्या 'प्रतिपदे'ति वचनात्। तृतीया तु चतुर्थीयुतैवोपवासादिसर्वदैवकर्मसु ग्राह्या, 'एकादश्यष्टमी षष्ठीति' स्कन्दपुराणवचनाच्च। यस्य कर्मणः यः कालस्तत्कालव्यापिनीतिथिः ग्राह्या, तत्र ह्रासवृद्ध्यादयः कारणं न भवन्ति। पुनश्च यदा त्वेका तिथिर्दिनद्वये कर्मयोग्या विहितकाले लभ्यते न लभ्यते वा तदा युग्मवचनादेव व्यवस्था ज्ञातव्या। विशेषवचनेन युग्मवचनस्य बाधः भवति।

एकादशी शुद्धाविद्धादिभेदेन बहुधा भिद्यते। एकादश्याः नित्यत्वं काम्यत्वञ्च सर्वत्र प्रतिपादितम्। पुत्रवतां गृहिणां शुक्लैकादश्यामेवोपवासाधिकारः। अपुत्रस्य गृहीणोऽपि कृष्णैकादश्यादावुपवासाधिकारः। ब्रह्मचारिणस्तु सामान्यकालेषु पुत्रवद् गृहीणोऽपि निषेधात्तदितरत्वेनाधिकारः। यदि तु त्रयोदशोदिने द्वादशी न पारणायोग्या, तदा पूर्णायामुपोष्य परदिने द्वादश्यां पारणा गृहिभिः कार्या। यतिभिस्तु तत्रापि परैवोपोष्या। यदा पूर्वदिने दशमी मिश्रा, परदिने त्वेकादशी, द्वादशी रात्रिशेषे च त्रयोदशी, तदा गृहिभिर्यतिभिश्च तामेवोपोष्य त्रयोदश्यां पारणा कार्या। कृत्यकौमुद्यामपि बृहस्पतिः प्रवेशिन्येकादश्याः उपवासविधिं स्वरूपञ्च प्रदर्शितवान्। द्वादशीमात्राधिक्ये परेद्युरुपवासः, उभयाधिक्ये तु सर्वैः परैव कार्या। यदि त्रयोदश्यां न द्वादशी तदा दशमीमिश्रितैकादशी गृहीभिरुपोष्या। यदा एकादश्यां न द्वादशी तदा दशमीमिश्रितैव चतुर्भिरप्याश्रमिभिरुपोष्येति कृत्यकौमुदीकारः। 'एकादशीमुपोष्यैवेति' सौरधर्मोत्तरवचनात् बृहस्पतिः विधवानामुपवासद्वयं साधयति। एकादश्यां रविवारादिपाते गृही नोपवसेत्।

नक्तव्रतस्य कर्मकालः प्रदोषः। गौणश्च सायंकालः। सौरनक्ते त्वपराह्णस्य मध्यभागः कर्मकालः। नक्षत्रव्रते सूर्यास्तसमये तन्नक्षत्रं व्याप्नोति चेत् तर्ह्युपोषितव्यम्। समस्तनक्षत्रस्य व्याप्तिकालसमाप्त्यनन्तरं पारणं कर्त्तव्यम्। नक्तव्रतोक्तनियमाः निषेधाः अपि पालनीयाः।

श्राद्धप्रकरणे एकोद्दिष्टस्य कालः प्रथमं निरूपितः। तत्रैकोद्दिष्टस्य कर्मकालः मध्याह्नः। श्राद्धं च सर्वदा पूर्वविद्धं ग्राह्यं, 'दर्शश्च पौर्णमासश्चेति'

नारदीयवचनात् । तिथिद्वैधे पूर्वापरा वा मध्याह्नव्यापिनी तिथिर्ग्राह्या । कर्मकालः पुनश्च मध्याह्ने कुतपकालव्यापिनी ग्राह्या । अत्र बृहस्पतिना पञ्चदशमुहूर्त्तानां नाम दत्तम् । तत्र पञ्चदशमुहूर्त्तस्य नाम भग इति । एकदिने एकोद्दिष्टपार्वणयोः पाते पार्वणश्राद्धकरणानन्तरमेकोद्दिष्टं कर्त्तव्यम्, 'यदैकत्र भवेयातामि'ति जाबालिवचनात् ।

तत्र पार्वणममावास्यादिविहितं श्राद्धं कृत्वैवैकोद्दिष्टं पितृव्यादिसांवत्सरिकं श्राद्धं कुर्यात् । दर्शकाले मृतानां पार्वणवत् सदा श्राद्धं कर्त्तव्यम् । जातकर्मादिविहितं सांवत्सरिकञ्च नैमित्तिकश्राद्धं त्यक्त्वाऽन्यत्रैकस्मिन् दिने श्राद्धद्वयं न कर्त्तव्यम् । नित्यनैमित्तिकश्राद्धयोः पाते नैमित्तिकं कृत्वैव नित्यं समाचरेत्, 'नैमित्तिकं यदा श्राद्ध'मिति विश्वामित्रवचनात् । सन्निपातमरणे सम्बन्धासत्तिक्रमेण श्राद्धमाचरेत् । प्रवासमरणे मृताहाविदिते गमनमासस्य दर्शे, प्रवासमासस्याज्ञाने च श्रवणदिवसे कर्त्तव्यम, 'अपरिज्ञाने' इति प्रचेतोवचनात् । मासाज्ञाने मार्गशिरसि माघे वा तद्दिने कुर्यात् । मृततिथिमासयारपरिज्ञाने प्रस्थानदिनमासौ ग्राह्याविति ।

मृते रजसि सूतके वा श्राद्धविघ्ने समुत्पन्नेऽमावास्यायां शुद्धौ वा तत्कर्म कर्त्तव्यम् । लघुहारीतः कृष्णपक्षैकादश्यां कर्त्तुं कथयति । शुद्धावपि मृताहतिथौ कर्त्तव्यमेवेति ऋष्यशृङ्गः । रजसि रजःशुद्धौ पञ्चमे दिने कुर्यात् । अपत्नीकप्रवासीभार्यारजस्वलादिना श्राद्धविघ्ने द्विजातीनामामश्राद्धं कर्त्तव्यम् । शूद्रस्य सर्वदाऽऽमश्राद्धं कर्त्तव्यम् । मासिकसांवत्सरिके एकभार्यस्य रजोदोषेऽन्नेनैव स्वयं पाकेन कर्त्तव्ये । आमपात्रदानञ्च पाकासम्भव एव ज्ञेयमिति । विस्मृतिरूपविघ्ने त्वन्यस्मिन् तिथौ कर्त्तव्यम् । श्राद्धादौ-पाकक्रियाऽनन्तरं रजोदोषो नास्ति ।

सपिण्डीकरणश्राद्धं प्राप्तकाले न क्रियते चेद् हस्तायां मैत्रे वा कर्त्तव्यम् । अनग्नेः एकादशदिवसे, द्वादशदिवसे, तृतीयपक्षे, तृतीयमासे, षष्ठे मास्यैकादशमास्यब्दे सम्पूर्णे, शुभदिवसे वेत्यष्टकालाः सपिण्डीकरणस्य । साग्निकः द्वादशदिवसे सपिण्डीकरणं कुर्याद् गोभिलवचनात् । पितृसंवत्सरे

मातुः श्राद्धं न कर्त्तव्यम्। परन्तु मातुः संवत्सरे पितृसांवत्सरिकं कर्त्तव्यम्, 'पितर्युपरते पुत्रो मातुरि'ति बृहन्मनुवचनात्। पित्रोराब्दमाशौचं, मातुः षण्मासं, भार्यायाः मासत्रयं सार्धमासं च भ्रातृपुत्रयोराशौचं जायते। नन्दायां भार्गवदिने चतुर्दश्यादिषु नश्राद्धं गृही न कुर्याद् गार्ग्यवचनात्। गर्भाधानादिषु संस्कारेषु जातकर्मादिष्वपत्यसंस्कारेषु श्रवणकर्मादिषु प्रतिष्ठाकर्म कर्त्तव्यम्। आभ्युदयिकश्राद्धस्य कर्मकालः प्रातःकालः।

प्रत्याब्दिकेऽपराह्णिकी तिथिर्ग्राह्या। उभयदिनव्याप्तौ यस्मिन् दिने मृततिथिः अधिककालं व्याप्य तिष्ठति सा ग्राह्या। अपराह्णद्वये समत्वे उभयतिथेस्तुल्यत्वे च पूर्वविद्धैव ग्राह्या। उभयव्याप्तिपक्षे साम्येनैकदेशव्याप्तौ तिथेः साम्ये वृद्धौ च परदिने ग्राह्या। तिथेः क्षये च पूर्वद्युः श्राद्धं विधेयं, पूर्वोदाहृतवचनस्य दैवपित्र्यसाधारणेन निर्णीतत्वात्। यदामावास्यायां रविग्रहणे प्रत्याब्दिकमनेन कर्त्तुं न शक्यते तदाऽऽमेन हेम्ना वा कुर्यात्। अमावास्यायाममावास्याश्राद्धं कर्त्तव्यम्। तत्र प्रथमतः पितृयज्ञं विधायानन्तरं पिण्डान्वाहार्यकं श्राद्धं कर्त्तव्यम्। अमावास्या दिनद्वयं स्पृशति चेद् याऽपराह्णव्यापिन्यमावास्या तत्र श्राद्धं कर्त्तव्यम्। यदाऽमावास्यायाः न वृद्धिक्षयौ तदा चन्द्रगतेर्वैलक्षण्याद् उत्तरदिन एवामावास्याष्टमांशे श्राद्धं कर्त्तव्यमित्यर्थः। दिवसस्यान्तिममुहूर्त्तत्रये तु न कर्त्तव्यम्। पिण्डपितृयज्ञपूर्वकं श्राद्धं निरग्निर्न करोति, केवलं तु श्राद्धं कुर्यादेव।

पूर्णिमा राकानुमतिभेदेन द्विधा। पूर्वा पौर्णमास्यनुमत्युत्तरा च राकेति श्रुतिः। तिथिह्रसेऽनुमतिर्ग्राह्या, वृद्धौ साम्येऽपि राका स्यादिति ब्रह्मपुराणवचनात्। पौर्णमास्यां दानफलञ्च कृत्यकौमुद्यां सविस्तरं वर्णितम्। चन्द्रसूर्योपरागे तु ग्रहणं यावद्दर्शनगोचरं भवति तावदेव पुण्यकालः। चन्द्रसूर्योपरागः दर्शनयोग्यकालं व्याप्य तिष्ठति चेत्तर्हि सः पालनीयः। चन्द्रग्रहे रात्रौ तत्पूर्वं न भुञ्जीतेति। राहुदर्शनस्य चाक्षुषज्ञाने सति राहुचन्द्रादिसंयोगावच्छिन्नकालपर्यन्तं स्नानादिकमक्षयमिति पर्यवसितार्थः। अत्यन्ताऽसमर्थेन तु रविग्रहे यामचतुष्टयमध्येऽपि चन्द्रग्रहे यामत्रयाभ्यन्तरेऽपि भोक्तव्यम्। शक्तेन

न भोक्तव्यं प्रायश्चित्तश्रुतेः । ग्रहणे शावाशौचतुल्यमशौचं, विमुक्तौ च जन्माशौचतुल्यमशौचं ज्ञातव्यम् । अत एव ग्रस्तास्ते सूर्ये रात्रौ मुक्तिं निर्णीय स्नातव्यम् । मुक्त्यदर्शनेऽपि जननिवेदनादिना मुक्तिकालं ज्ञात्वा शुद्धिस्नानदेवार्चभोजनादिकं कार्यम् । मेघाच्छन्ने ग्रहणस्नानादिकं कर्त्तव्यमिति बृहस्पतिरपि कृत्यकौमुद्यां प्रतिपादयति । ग्रहणनिमित्तकोपवासः गृहीणा न कर्त्तव्यः । ग्रहणश्राद्धे 'ग्रहणे च व्यतीपाते' इति मार्कण्डेयवचनात् पिण्डश्राद्धस्य कर्त्तव्यताप्राप्तौ "ग्रहोपरागसंक्रान्तावि"ति यमवचनेन च विकल्पः । ग्रहणस्नानस्य फलं ग्रहणशान्तिविधिरपि कृत्यकौमुद्यां प्रतिपादितः ।

मेषादिषु द्वादशराशिषु क्रमेण सञ्चरतः सूर्यस्य पूर्वस्माद्राशेरुत्तरराशौ संक्रमणं संक्रान्तिः । ताश्च द्वादश संक्रान्तयः अयनविषुवषडशीतिविष्णुपदीभेदेन चतुर्धा विभक्ताः । तत्र धनुमिथुनकन्यामीनाः षडशीतिसंक्रान्तयः, वृषवृश्चिककुम्भसिंहाः विष्णुपद्यः संक्रान्तयः, मेषतुले विषुवसंज्ञके, कर्कटमकरौ चायनाभिधौ । अह्निसंक्रमणे दिवा पुण्यकालः । पुनश्च तत्र संक्रान्तीनां पुण्यकालनिर्णये देवलशातातपादीनां मतान्युद्धृतानि बृहस्पतिना । कर्कटसंक्रान्तौ पूर्वा त्रिंशन्नाड्यः पुण्यकालः । मकरे पराः विंशतिदण्डाः पुण्यकालः । तुलामेषयोरुभयतो दश नाडिकाः पुण्याः । षड़शीतिसंक्रान्तीनां परषोडश नाडिकाः पुण्यकालः । विष्णुपदीसंक्रान्तिषु उभयतः षोडशनाड़िकाः पुण्यकालः । दिवा विषुवषडशीतिसंक्रमणे तु मानार्द्धं पञ्चदशदण्डाः एव पुण्यकालः । अर्द्धरात्रात् पूर्वं संक्रमणेषु द्वादशस्वेव मानार्द्धं पुण्यमित्यनुषज्यते । सम्पूर्णेऽर्द्धरात्रे संक्रमणेषूदये चास्तमये च मानार्द्धं पुण्यम् । संक्रान्तिषु श्राद्धमपिण्डं भवति । संक्रान्तिषु दानफलमपि कृत्यकौमुद्यामुक्तम् ।

युगादयः चत्वारः । वैशाखशुक्लतृतीया, कार्त्तिकशुक्लनवमी, भाद्रमासस्य कृष्णत्रयोदशी, माघकृष्णपञ्चदशी चेत्येते चत्वारः युगाद्याः । युगादिषु श्राद्धे दाने च सहस्रसंवत्सरकृतश्राद्धस्य फलमाप्यते । अत्र युगादौ संक्रान्तिविधिना पिण्डरहितं श्राद्धं कर्त्तव्यम् ।

अष्टकाः तिस्रः। यथा पूर्णिमान्तपौषमाघफाल्गुनकृष्णाष्टम्यः । तत्र श्राद्धे दत्ते परत्रेह च मनुष्यः सुखभाग् भवति । अष्टकाश्राद्धात् परदिने परश्वे दिने वाऽन्वष्टका भवति । अत्र पितृपुरुषाणां कृते श्राद्धं भवति । अत्र मातुरपि पृथक् श्राद्धं भवति, 'अन्वष्टकासु वृद्धौ चेति' वायुपुराणवचनात् ।

आश्विनस्य कृष्णपक्षोऽपरपक्ष इति । आषाढीमवधिं कृत्वा पञ्चमपक्षः वाऽपरपक्ष इति । तत्र षोडशश्राद्धानि विहितानि । तिथिवृद्ध्या पक्षस्य षोडशदिनात्मकत्वेन षोडशश्राद्धानि इत्येकः पक्षः । भाद्रपदपूर्णिमया सहेति द्वितीयः । आश्विनशुक्लप्रतिपदा सहेति तृतीयः । भाद्रे चाधिकमासपाते मलमासे श्राद्ध न स्यात् । परन्तु श्रावणेऽधिकमासपाते सिंहेऽर्के श्राद्धं प्रसज्येतेति । षोडशतिथिसमुदायो यदि कन्याऽर्के स्यात् तदैवैतच्छ्राद्धं कर्त्तव्यम् । कन्यागतापरपक्षे यदि श्राद्धं कर्त्तुं नार्हति तर्हि कार्त्तिककृष्णपक्षे कुर्यात् । पुनश्च जन्मनक्षत्रप्राजापत्यपौष्णमघानक्षत्रेषु श्राद्धं निषिद्धम् । याज्ञवल्क्यः मघात्रयोदशीश्राद्धफलं विशिनष्टि । शस्त्रघाति-जलाग्निभृगुपातिनां श्राद्धं चतुर्दश्यां कर्त्तव्यम् । चतुर्दश्यां काम्यफलनिमित्तमपि श्राद्धं क्रियते ।

दर्शद्वयक्रोडीकृतमासो मलिम्लुच इति । मलमासः प्रायशः द्वात्रिंशन्मासोत्तरसप्तदशदिनानन्तरमापतति । अत्र अग्न्याधेय-यज्ञ दान-व्रत-प्रतिष्ठादीनां प्रारम्भं न कुर्यात् । परन्तूपाकर्मोत्सर्गाष्टकादयः मलिम्लुचेऽपि कर्त्तव्याः । प्रथमाब्दिकं श्राद्धं त्रयोदशे मलमासेऽपि भवति । द्वितीयाब्दिकं तु शुद्धमासे एव कार्यम् । त्रयोदशे मासेऽतीते चतुर्दशाद्यदिने शुद्धमासे एव कुर्यात् । मलमासमृतानां तु यदा स एव मलमासः स्यात्तदा तत्रैव प्रतिसांवत्सरिकं कार्यम् । प्रथमाब्दिकं मासद्वयेऽपि कार्यं, यमवचनात् । शुद्धशुक्लपक्षमृतानां तु मलशुक्लपक्षे एव सांवत्सरिकपातात् तत्रैव प्रथमाब्दिकं विधेयमिति मलमासकार्याकार्यविवेकः विस्तरेण प्रपञ्चितः बृहस्पतिना ।

विष्णुः मैत्राद्यपादे स्वपिति, वैष्णव्यमध्ये पार्श्वपरिवर्त्तनं करोति, पौष्णावसाने च मासचतुष्टयेनोत्थाप्यते । शयनं दिवा न कर्त्तव्यं, किन्तु रात्रावेव । तथा चोत्थापनमपि न रात्रौ अपितु दिवैव कर्त्तव्यम् । पार्श्व-

परिवर्त्तनं पुनः सन्ध्यासमये कर्त्तव्यम् । मैत्राद्यपादः यदि निशाकाले न व्याप्नोति, पौष्णस्यान्तपादोऽपि यदि दिवसं व्याप्य न तिष्ठति तर्हि द्वादश्यामेव शयनोत्थापनादि कर्त्तव्यम् । आषाढेऽधिमासपाते हरिशयनं कर्कटे एव कर्त्तव्यम् । विनाऽधिमासं दुर्गां त्रिमासं शाययेत् । शिवं कन्यायां, पार्वतीं तुलायां, हुताशनं कुम्भे चोत्थापयेत् । श्रावणे यदि वाऽऽषाढे मलमासपातो भवति तदाऽप्याषाढः मलिनः भवति, तत्र श्रावणे एव हरिशयन कर्त्तव्यम् । पञ्चमासान् कदाऽपि हरिं न शाययेत्, तथा करणे देशस्य हानिः भयादिकञ्च भवति । शुक्रस्य बाल्येऽस्तत्वे मलमासेऽपि नूतनदेवशयनादिकं वर्ज्यम् । बृहस्पतावस्तंगते शुक्रे वा विवाहादिकं शुभकर्मानुष्ठानं न कर्त्तव्यम् । शुक्रस्य बाल्यकालः दशदिवसं व्याप्य तिष्ठति । वृद्धत्वं च पञ्चदिवसं व्याप्य तिष्ठति । बृहस्पतिः पञ्चदशदिवसपर्यन्तं वृद्धत्वं बालत्वञ्च प्राप्नोति । तत्र यात्राक्षौरविवाहकर्णवेधव्रतकरणादयः वर्जनीयाः । नारीरजस्वलायां व्रतहानिः न जायते । आरब्धे व्रते विघ्नपाते शुद्ध्यनन्तरं तत्कर्म कर्त्तव्यम् । व्रतस्था नारी यदि रजस्वला भवति तदा त्रिरात्रमतिवाह्य व्रतशेषं समाचरेत् ।

बृहस्पतिः विशेषतः कालविषयं प्रधानीकृत्य कृत्यकौमुदीग्रन्थं रचितवान् । अतः तस्य मनसि स्थितानां सर्वेषां भावानामुदयस्तेषां विकशितरूपञ्च कालविवेकप्रकरणे एव दृश्यते । धर्मस्यापालनेनाधर्मः भवति । अधर्मस्य क्षयकारणं प्रायश्चित्तमेव । अतः बृहस्पतिः कालविवेकप्रकरणानन्तरं द्वितीयं प्रायश्चित्तप्रकरणं रचयित्वा समाजस्य स्थितिरक्षणार्थमेव प्रयत्नं कृतवान् । अत्र प्रायश्चित्तप्रकरणे कालविवेकप्रकरणवत् विभिन्नाः मतभेदाः युक्तयश्च न प्रदर्शिताः । केवलं विषयप्रतिपादनमेव तस्य मुख्योद्देश्यं प्रतीयते । आप्तवचनत्वेनोपदिष्टानि प्रायश्चित्तानि कर्त्तव्यान्येव । अतः तस्य प्रायश्चित्तस्य निर्णयार्थं युक्तिः नावश्यकीति मत्वा बृहस्पतिः प्रायश्चित्तप्रकरणं सरलतया प्रतिपादितवान् ।

तत्र बृहस्पतिना प्रथमतः जलजपविधिः समन्त्रं वर्णितः । प्रायशोऽन्यत्र धर्मशास्त्रीयनिबन्धग्रन्थेषु विषयोऽयं न कुत्रापि प्रतिपादितः । प्रायश्चित्तारम्भे

प्रायश्चित्तार्थं परिषदुपस्थानं क्रियते। तत्र परिषदि दशसंख्यकाः सदस्याः तिष्ठेयुः। ते च त्रैविद्य-हैतुक-तर्कि-नैरुक्त-धर्मपाठक-त्र्याश्रमिणः मिलित्वा दशसंख्यकाः भवेयुः। प्रायश्चित्तकामी भोजनत्यागं कृत्वा स्नानमौनादिनियम-पालनपूर्वकं परिषत्समीपमागच्छेत्। ततः परिषदि वृद्धाः व्रतादेशं कुर्वन्ति। यदि प्रायश्चित्तं कर्त्तुमनर्हः भवति तर्हि धेन्वादिमूल्यं दद्यात्। नोचेदुपवासादिना ब्राह्मणभोजनादिना वा प्रायश्चित्तं समापयेत्। द्वादशवर्षप्रायश्चित्तं षष्ठ्यधिकत्रिशतपरिमितं प्राजापत्यं भवति। तदशक्तौ तावत्यो धेनवो दातव्याः। धेनुमूल्यं निष्कं निष्कार्धपादं पञ्चत्रिकार्षापणानि वा भवेत्। तत्राप्यशक्तौ ब्राह्मणभोजनादिना व्रतं समापयेत्। द्वादशवर्षप्रायश्चित्ते शताधिकदशसहस्राणि ब्राह्मणभोजनानि दद्यात्। एवमेव द्वादशवार्षिक-षड्वार्षिक-त्रैवार्षिक-द्वैवार्षिक वार्षिकप्रायश्चित्तेषु सवाक्यं देश काल-वाक्य-नाम-गोत्राद्युच्चारणपूर्वकं व्रतं गृह्णीयात्।

अनन्तरञ्चोपपातकेषु मुख्यं गोवधप्रायश्चित्तं वर्णितम्। सर्वविधताडने मारणे चोक्तप्रायश्चित्तानि कुर्यात्। तत्र लक्ष्मीधरविज्ञानेश्वरादीनां प्रमाणवचनानि सन्निविष्टानि। अनन्तरं विप्राय दण्डोद्यमनादौ सर्वेषां वर्णानां प्रायश्चित्तमुपदिष्टम्। तत्र बृहस्पतिवचनं कृत्यकौमुदीकारः प्रमाणत्वेनोपस्थापयति। अस्पृश्यस्पर्शनप्रायश्चित्तं तदनन्तरं वर्णितम्। तत्र कामाकामभेदेन प्रायश्चित्तानि व्यवस्थितानि। हीनवर्णानामुच्चवर्णस्पर्शे, पारम्परिकस्पर्शे, रजस्वलायाः रजस्वलान्तरस्पर्शे च प्रायश्चित्तानि वर्णितानि। व्रणे कृम्युत्पत्तिप्रायश्चित्तमपि सर्ववर्णानां कृते निर्दिष्टम्। अभक्ष्यभक्षणप्रायश्चित्तञ्च वर्णयित्वा प्रेतश्राद्धाङ्गसंस्काराङ्गश्राद्धभोजनादिषु प्रायश्चित्तमपि तदनन्तरं वर्णितम्। यज्ञोपवीतं विना भोजनादिकरणे नित्यकृत्याकरणे च प्रायश्चित्तं वर्णयित्वा प्रायश्चित्तप्रकरणं समापयति बृहस्पतिः। तानि वर्णितानि सर्वाणि प्रायश्चित्तानि तात्कालिकसमाजप्रचलितान्येव। तत्र सर्वत्र सर्वेषां वर्णानां कृते कामाकामभेदेन प्रायश्चित्तानि विभिद्य वर्णितानि।

तृतीये दानप्रकरणे प्रथमतः ग्रहाणां पूजाविधिः वर्णितः। श्रीरायुष्पुष्टिकामिभिः ग्रहपूजा कर्त्तव्या। तत्र ग्रहानुद्दिश्य दानं दीयते इति कृत्वा दान-

प्रकरणेऽस्यान्तर्भावः क्रियते बृहस्पतिना। तत्र ग्रहाणां स्थानहोमगन्धधूपपुष्पभोजनादीनि अग्निपुराण-मत्स्यपुराण-विष्णुधर्मोत्तरपुराणादीनां वचनैरेव प्रतिपादितानि। तत्र ग्रहाणां शान्तिविधिरप्यन्ते प्रतिपादितः। अनन्तरं महाव्याहृतिहोमः देवोद्देश्यकदानरूपः इति मत्वा दानप्रकरणेऽन्तर्भावितः कृतिबृहस्पतिना इति मे मतिः। ततश्च प्रायश्चित्ताङ्गभूतकृच्छ्र-प्राजापत्य-चान्द्रायणादीनां स्वरूपं कर्त्तव्यविधिसहितश्चोपपादितम्। तत्रापि वैकल्पिकत्वेन दानस्य वर्त्तमानत्वात् दानप्रकरणे एव तानि बृहस्पतिना सन्निवेशितानि। व्रतप्रतिनिधिविषये प्रायश्चित्तानां मूल्यकल्पना क्रियते। तत्र दानविषयस्य प्रारम्भे प्रतिग्रहे विहितकर्त्तव्यता प्रतिपादिता। देशकालनामगोत्राद्युच्चारणपूर्वक दानं दद्यात्। सविधि च प्रतिगृह्णीयात्। तथा च दानकालाः अप्युक्ताः। गङ्गागयाप्रयागादौ तीर्थक्षेत्रेब्दपूर्त्तौ ग्रहणसंक्रान्त्यादौ शुभकाले प्राङ्मुखो भूत्वा सुपात्रे च दानं दीयते। नित्यनैमित्तिककाम्यभेदेन दानस्य स्वरूपाण्यपि तत्र विवेचितानि। अनन्तरं विष्णुदैवतानि भूमिनानापात्रघृतयज्ञोपवीतछत्ररत्नालंकारगृहदानानि, प्रजापतिदैवतानि धान्यान्नशय्यासनतिलदानानि, सोमदैवतानि लवणदधिदुग्धदानानि, वरुणदैवतानि गुडलवणेक्षवजलभाजनदानानि, गन्धर्वदैवतानि ताम्बूलगन्धद्रव्यदानानि, बृहस्पतिदैवतं वस्त्रदानम्, उत्तानाङ्गिरोदैवतान्युपानत्काष्ठपादुकादानानि, वायुदैवतं व्यजनदानं, रुद्रदैवतान्युभयतोमुख्यलंकृतगवीमहाशृङ्गीवैतरणीदानानि, यमदैवतं महिषीदानं च वर्णितानि। अनन्तरञ्च दशमहादानानि कनकाश्वतिलपुरुषगजदासीरथशकटमहागृहविपुलगृहगोचर्मभूम्यनुपकरणगृहकन्याकपिलाधेनुदानानि प्रतिपादितानि। ततश्च पूर्णचक्र-कालचक्र-विष्णुदैवतेन्वन-दीप-पाक-काल-पुरुष-लौहदण्ड-शालग्रामदानानि कथितानि। तत्र मृतवत्सा-बन्ध्या-विधवादिदोषनिराकरणार्थं ब्रह्मपुराणोक्त बन्ध्यापुत्रफलप्रदहिरण्यगर्भकूष्माण्डदानविधिश्च सन्निविष्टः। पद्मपुराणस्य कर्मविपाकोक्तपुत्रहीनतानिदानस्वरूपं सुवर्णप्रतिमादिदानं विहितम्। बन्ध्याग्निमान्द्यादिदोषनिवारणार्थञ्च बौधायनोक्तकूष्माण्डदानविधिः मेषदानविधिश्च प्रतिपादितः। अनन्तरं विष्णुधर्मोत्तरोक्तशिवसम्प्रदानकानि हरिसम्प्रदानकानि च

वर्णितानि । उपरि वर्णितानां दानानां दानकाले द्रव्यदेवतानां नामज्ञाननिमित्तं दानस्य द्रव्यदेवत्यानि अपि प्रतिपादितानि । द्रव्यप्रतिग्रहे ग्रहीतुरनुमोदनस्यावश्यकत्वाद् दानद्रव्यस्य स्पर्शारोहणप्रदक्षिणग्रहणादिभिः प्रतिग्रहः कर्त्तव्यः । पूर्वप्रतिपादितानां प्रायश्चित्तानां मूल्यकल्पनार्थं दानाध्याये मूल्यस्य ज्ञानमावश्यकमिति मत्वा इमं विषयमपि बृहस्पतिः लिखितवान् । सर्वेषु कर्मसु धर्मस्य साक्षित्वज्ञापनार्थं मकरतण्डुलसाधनं वर्णयित्वा सर्वकर्मणि होमस्य प्रयोजनं वीक्ष्य होमद्रव्यपरिमाणान्यपि सन्निवेशितानि । तत्र सर्वत्र दानपदार्थस्य स्वरूपनिर्माणविधिपुरःसरं दानविधिश्च प्रतिपादितः । तत्र मन्त्राः अत्यावश्यकीयेषु स्थलेषु प्रतिपादिताः । दानकर्मसु जनान् प्रवर्त्तयितुं प्रायः सर्वत्र दानफलं निवेशितम् ।

बृहस्पतिना कृत्यकौमुद्यामुपर्युक्तेषु प्रकरणेषु त्रिषूपर्युक्ताः विषयाः सप्रमाणं प्रतिपादिताः । संशयस्थलेषु उद्धृतप्रमाणवचनानां व्याख्यानमपि कृतम् । तत्रापि पुनः कालविवेकप्रकरणं सूक्ष्मातिसूक्ष्मं विचार्य सर्वत्र कथापूजाविधिभिः सह प्रतिपादितम् ।

पूर्ववर्त्तिनिबन्धग्रन्थानां कृत्यकौमुद्यां प्रभावः

धर्मशास्त्रस्य त्रिषु साहित्येष्वन्तिमसाहित्यं निबन्धसाहित्यम् । इदानीं कृत्याकृत्यनिर्णयविवेकवर्जिते विषमे काले धर्मशास्त्रमुपजीव्य निबन्धकारविवेचिते स्मृतिशास्त्रे विगतश्रद्धानामाधुनिकानामन्तिके श्रुतिमूलकस्यापि धर्मशास्त्रस्य प्रशस्तिवाचनं नितान्तदुःखजनकम् । तथापि समाजस्य गतिशीलतया विभिन्नेषु प्रदेशेषु व्यवहारोपयोगिधर्मकृत्यानां पार्थक्यमनुसृत्यैतेषां धर्मशास्त्रप्रवर्त्तकानां मतवैषम्ये समुपस्थिते मुनिवचनानामेकतावाक्यकरणाय तज्ज्ञैः शतानन्द-शङ्खधर-जीमूतवाहन-लक्ष्मीधर-हेमाद्रि-शम्भुकर-विद्याकर-चण्डेश्वर-बृहस्पति-रघुनन्दन-हलायुध-शूलपाणि-श्रीनाथ-विश्वनाथ-दिव्यसिंह-गदाधर-कृष्णमिश्र-धम्मुर्पाठि-कमलाकर-माधवाचार्य-हरिनाथ-वाचस्पति-देवणभट्टाऽनिरुद्ध-वल्लालसेन-गोविन्दानन्द-मिसरुमिश्र-श्रीधर-नारायणभट्ट-

नन्दपण्डित मित्रमिश्र मदनपाल-अनन्तदेव-नागोजीभट्ट-काशीनाथोपाध्याय-भवदेवादिभिः बहवः धर्मशास्त्रीयनिबन्धग्रन्थाः रचिताः । तैः पुनः प्रदेशभेदेन प्रादेशिकानुष्ठितधर्माणामाचारपद्धतिमवलम्ब्य पार्थक्यमुपगताः अनेके निबन्धग्रन्थाः प्रणीताः ।

इह खलु धर्मतत्त्वनिर्णयार्थमनेकमहर्षिप्रणीतानां स्मृतिवचसामतिसंक्षिप्तानामतिगूढार्थपरिज्ञानवैमुख्यहेतुकभेदबुद्धीनां जाड्यापगमाय निबन्धानारचितवतां देवदर्शनानां विदुषामेकतमः अयं गतानुगतिकः श्रीमान् बृहस्पतिः कृत्यकौमुदीनामानं स्मृतिनिबन्धं व्यरचयत् । धर्मशास्त्रस्य त्रिषु सूत्रस्मृतिनिबन्धसाहित्येषु निबन्धसाहित्यस्य कालः दशमशतकादेव प्रारभ्यते । यद्यपि स्मृतिकालः काणेमहोदयमतानुसारं तृतीयशतकं यावदागच्छति तथापि सूत्रस्मृतिसाहित्ययोः भाष्यकालः अष्टमशतकादसहायभाष्यादेव प्रारभ्यते । तदनन्तरं दशमशतकं यावद् भाष्यटीकाग्रन्थानां सुवर्णयुगम् । ते च भाष्यग्रन्थाः असहायभाष्यं विज्ञानेश्वरस्य मिताक्षराइत्यादयः निबन्धसाहित्यस्यापि उपजीवनीभूता अभवन् ।

अनन्तरं पुनः दशमशतकानन्तरमेकादशशतकस्य प्रारम्भे एव शतानन्दः 'भास्वती' 'शतानन्दसंग्रह'ग्रन्थौ विरचय्य निबन्धग्रन्थानां मूलभित्तिमस्थापयत् । अतः स निबन्धसाहित्यस्य प्रथमाचार्यः । बृहस्पतिरपि कृत्यकौमुद्यां शतानन्दसंग्रहग्रन्थस्य तथा शतानन्दस्य प्रमाणवचनानि, उद्धरति । यथा—उपाकर्मविषये पौषमास्युत्सर्जनाकरणे कालातीतप्रायश्चित्तपूर्वकं पुनराचरणं, बर्षवृद्धिविषये जन्मदिवसमारभ्य क्षौरादिनिषेधावधिः, अग्नीष्टिकालदानकालविषये आपूर्यमाणपक्षस्य रात्रौ कर्त्तव्यतानिरूपणं, देवव्रततिथिनिरूपणविषये 'तृतीया पौर्णमासीति' शतानन्दलिखितं श्लोकं लिखित्वा पौर्णमास्याः परविद्धात्वस्वीकारः इति एषु पञ्चवारं तन्मतमुद्धृतम् । उत्कलस्य प्रथमधर्मशास्त्रीयनिबन्धकाररूपेण ससम्मानं तेषां वचनान्युत्थाप्य स्वग्रन्थगौरवं वर्द्धयति, बृहस्पतिः न च कुत्रापि तेषां मतं खण्डयति ।

भवदेवमतमपि बृहस्पतिः एकवारमुद्धृतवान्। यद्यपि तेषां ग्रन्थाः स्पष्टतया न कुत्रापि लभ्यन्ते तथापि प्रायश्चित्तप्रकरणे उच्छिष्टभक्षणविषये तद्धीनतरब्राह्मणोच्छिष्टविषयमिति भवदेवमतमुद्धृत्य स्वयं स्वीकरोति ।

शङ्खधरस्य "स्मृतिसमुच्चयः" कृत्यकौमुद्यां सप्तसु उपाकर्ममाघसप्तम्येकादशीग्रहणापरपक्षविषयेषूद्धृतः। तत्र यथा– उपाकर्मविषये उपाकर्म च कर्त्तव्यमिति स्मृतिसमुच्चयवचनात् श्रावण्यां श्रवणायोगाभावे हस्तेन श्रावणपञ्चम्यां कर्त्तव्यत्वं निरूपयति । माघसप्तम्यां सूर्यग्रहणतुल्या हि शुक्लेति स्मृतिसमुच्चयोक्तं श्लोकं लिखित्वा माघसप्तम्यामरुणोदयवेलायां स्नाने सूर्यग्रहणस्नानसमफलमिति प्रकटयति । एकादश्यां रविवारादिपाते सप्तवारानुपोष्यैवेति स्मृतिसमुच्चयवचनं लिखित्वा रविवारादियोगे एकादश्युपवासस्य प्राशस्त्यं स्वीकरोति। ग्रहणविषये सूर्यग्रहः सूर्यवारेति श्लोकद्वयमुद्धृत्य चूडामणियोगं तस्य फलञ्च प्रकाशयति। पुनश्च 'उपमर्दे लक्षगुणेति' श्लोकमुट्टङ्क्य उपमर्दादीनां फलं वर्णयति । अपरपक्षविषये 'नन्दायां भार्गवदिने' इति श्लोकं विलिख्य प्रतिपत्षष्ठ्येकादशीषु नन्दातिथिषु जन्मतिथिजन्मचन्द्रजन्मनक्षत्रेषु भार्गवदिने त्रयोदश्यां मघायाञ्च पिण्डदानं निषेधयति । पुनश्च अपरपक्षे पिण्डमात्रं प्रदातव्यमिति स्मृतिसमुच्चयवचनेन विहितं पिण्डदानमात्ररूपं श्राद्धं निषिद्ध्य माघयुक्तादिप्रवृत्तौ च पिण्डाभावेऽपि श्राद्धस्य कर्त्तव्यतां विदधाति। एवं षट्सु विषयेषु शङ्खधरस्य मतानि स्वीकृत्य अपरपक्षे पिण्डदानमात्ररूपं श्राद्धमिति तन्मतं वारयति ।

शुद्धिदीपिकायाः मतं त्रिवारं कृत्यकौमुदीकारेण गृहीतम् । तत्र वर्षवृद्धिविषये 'जन्मर्क्षयुक्तेति' शुद्धिदीपिकोक्तश्लोकं विलिख्य जन्मतिथौ जन्ममासि च जन्मनक्षत्रप्राप्ते तद्वत्सरं सुखसम्मानारोग्यदायकञ्च भवतीति प्रतिपादयति । पुनश्च कृतान्तकुब्जयोः वारेति शुद्धिदीपिकायाः श्लोकचतुष्टयं लिखित्वा शनिमङ्गलवारयोः जन्मदिनपाते शान्तिविधिश्च प्रतिपादितः । पुनश्च 'यस्य जन्मर्क्षमासेति' शुद्धिदीपिकायाः श्लोकद्वयमुद्धृत्य जन्मर्क्षमासाद्ये संक्रान्तिपाते हानिरिति कथयित्वा शान्तिविधिञ्च प्रतिपादयति। एवञ्च

शुद्धिदीपिकायाः बहूनि विधायकानि वाक्यानि कृत्यकौमुद्यां प्रमाणरूपेण गृहीतानि । तत्र विधिवाक्यत्वेन स्वीकृतत्वाद् खण्डनस्यावसरो कृत्यकौमुदीकारेण न प्राप्तः ।

विघ्नितश्राद्धकालविषये बृहस्पतिः श्राद्धादौ पाकक्रियानन्तरं विघ्नपाते कर्मभावः नास्तीति, 'प्रारम्भो वरणं यागे' इत्यादिवचनेन शुद्धिचन्द्रिकाकारस्य मतं स्वीकरोति । भोजराजस्य ज्योतिः शास्त्रात्मकग्रन्थः 'राजमार्तण्डः' कृत्यकौमुद्यां विंशतिवारमागतः तथा तस्मात् चत्वारिंशदधिकश्लोकाश्चोद्धृताः । तत्र यथा देवशयनपक्षे-वर्षवृद्धि-शक्रोत्थापन-कार्त्तिकमासकृत्य-महामाघीयोग-गोविन्दद्वादशीयोग-दैवव्रतानुरूपतिथिनिरूपणे-कादश्ये-कोद्दिष्ट-श्राद्धकालनिरूपण-विघ्नितश्राद्धकालनिरूपण-द्वादशपौर्णमासीनिरूपण-ग्रहण-निरूपण-संक्रान्तिनिरूपणाधिमासनिरूपण-देवशयन-पार्श्वपरिवर्त्तनोत्थापन-काल-व्रतादौ निषिद्धकालनिरूपणेषु विषयेषु कृत्यकौमुदीकारः तेषां मतं गृह्णाति, न च कुत्रापि खण्डयति ।

हरिनाथस्य 'स्मृतिसारः' कृत्यकौमुद्यां वारद्वयमुट्टङ्कितः । विघ्नितश्राद्धकालविषये बृहस्पतिः श्राद्धयज्ञविवाहादिषु सूतकाद्यशौचं स्त्रीरजोदर्शनादि च बाधकं न भवतीति हरिनाथमतमङ्गीकरोति । पुनश्च गृहे मृते प्रसूते तस्करादिप्रवेशे च पूर्वपाकपरित्यागाच्छुद्धिरिति स्मृतिसारमतं स्वीकरोति ।

लक्ष्मीधरस्य कृत्यकल्पतरोः व्रत-श्राद्ध-प्रायश्चित्तकाण्डेभ्यः बृहस्पतिना प्रमाणानि उपाकर्मामावास्या-श्राद्ध-ग्रहण-गोवधप्रायश्चित्ता भक्ष्यभक्षणेषु विषयेषु सप्तवारं ससम्मानं गृहीतानि । तत्र यथा-- उपाकर्मप्रकरणे ब्रह्माणं तर्पयेदिति योगियाज्ञवल्क्यश्लोकस्य 'सनातनानिति ऋषिविशेषणमिति कल्पतरुकार:' । अमावास्याश्राद्धप्रकरणे द्वितीयारहितस्येष्टकालस्य प्राप्तौ तु स एव यागार्हं इति लक्ष्मीधरः । ग्रहणप्रकरणे तेन मेघादिच्छन्ने स्नानादिकं न कर्त्तव्यमिति लक्ष्मीधरः । गोवधप्रायश्चित्ते 'ताड़नादिनिमित्तन्तु प्रायश्चित्तं विद्यत एवेति लक्ष्मीधरः' । पुनश्च तत्रैव 'कामकृते रोधनादिना गोवधे चाङ्गिरसमापस्तम्बीयं प्रायश्चित्तमिति लक्ष्मीधरः' । उच्छिष्टस्य ब्राह्मणस्य चाण्डालादिस्पर्शप्रायश्चित्ते त्रिरात्रेणान्तरः शुचिरिति निमित्तगौरवशङ्कायाः

Accession No.............
Date..............
GURUVAYOOR

मिदमन्तिमं नहि ततोऽधिकमस्तीति लक्ष्मीधरः । अभक्ष्यभक्षणप्रायश्चित्ते अकामतोऽनभ्यास एतदिति लक्ष्मीधरः इति सप्तस्थलेष्वपि तन्मतान्युद्धृत्य तानि समर्थयति, न च कुत्रापि निजां विमतिं प्रदर्शयति ।

बृहस्पतिः जीमूतवाहनकृत 'कालविवेक'स्य नाम स्वकृत्यकौमुद्यां द्विवारमुद्धृतवान । तत्र शक्रोत्थापनविषये भरण्यामन्तपादे चेति जीमूतवाहनलिखितपाठस्तु शोभन एव इति, पाषाणचतुर्दशीविषये 'पाषाणकारः पिष्टक इति जीमूतवाहनः' इति लिखित्वा स्थानद्वयेऽपि सम्मानप्रदर्शनपुरःसरं स्वीकरोति तन्मतम् ।

उत्कलीयधर्मशास्त्रीयनिबन्धकारस्य विद्याकरस्य मतमपि कृत्यकौमुदीकारेण बृहस्पतिना स्वीकृतम् । तत्रामावास्याश्राद्धविषये परदिने यागकालाप्राप्तौ पूर्वदिने श्राद्धयागौ च कर्त्तव्यौ इति विद्याकरेणोक्तमिति तेषां मतं सम्मान्य स्वीकृतम् ।

दानप्रकरणे बल्लालसेनकृतदानसागरस्य वचनान्यपि बृहस्पतिना कृत्यकौमुद्यां सन्निवेशितानि । तथा च द्वयोः स्थानयोः पञ्चदशश्लोकानामुद्धरणं तेन कृत्यकौमुदीग्रन्थे कृतम् । तत्र यथा– विष्णुदैवतभूमिदाने उभयपार्श्वे पञ्चवंशाधिकमिति दानसागरवाक्यं कथयित्वा गोचर्मणः परिमाणं सूचयति । दानद्रव्यदैवतप्रकरणे दानसागरस्य चतुर्दशश्लोकानुद्धृत्य सर्वेषां दानद्रव्याणां दैवतानि विचारितानि ।

भाष्यग्रन्थेषु प्रसिद्धमापन्नायाः मिताक्षरायाः मतान्यपि कृत्यकौमुदीकारेण दशवारमुट्टङ्कितानि । तत्र प्रायश्चित्तार्थं परिषदुपस्थानविचारे महापातकादिष्वधिकं कल्प्यमिति विज्ञानेश्वरवचनात्, द्वादशविप्रभोजनं प्राजापत्यसममिति तन्निर्धनविषयमिति विज्ञानेश्वरः, वार्षिकप्रायश्चित्तविषये एतदुपपातकाद्यावृत्तिविषयमिति विज्ञानेश्वरः, गोवधप्रायश्चित्ते व्यवहितो व्यापारिणो निमित्तकर्त्तुरेवेति विज्ञानेश्वरः, कान्तारेषु च दुर्गेषु इत्यापस्तम्बवचनादिति विज्ञानेश्वरः, इदमशक्तविषयमापस्तम्बेन विशेषविधानादिति विज्ञानेश्वरः, अभक्ष्यभक्षणप्रायश्चित्तविषये कामतोऽनभ्यासत्रिषयमिति

विज्ञानेश्वरः, नित्यकृत्याकरणप्रायश्चित्ते प्रतिपदोक्तैष्ट्यादि प्रायश्चित्तैरुपवासस्य समुच्चय इति विज्ञानेश्वरः इत्येतेषु विषयेषु विज्ञानेश्वरस्य मतानि बृहस्पतिना स्वीकृतानि न च कुत्रापि तन्मतं निरस्तम् ।

एतानि निबन्धपुस्तकानि कृत्यकौमुदीग्रन्थे प्रामाणिकग्रन्थरूपेण स्वीकृतानि तथा तेषां मतान्यपि प्रायशः गृहीतानि । किन्तु क्वचित् क्वचित् स्वमतविरोधीनि युक्तिविरुद्धानि मतानि निःसंकोचं खण्डितान्यपि । एवमेव व्रतप्रदीप-संवत्सरप्रदीप-दानविवेकादीनां ग्रन्थानामपि प्रमाणानि कृत्यकौमुद्यां स्वीकृतानि । एतेषां ग्रन्थानां प्रमाणान्युद्धृत्य स्वग्रन्थस्य सम्मानवर्द्धनं चकार बृहस्पतिः । पुनश्च कुत्रचित् (अमावास्याश्राद्धादिषु) महतां (कुल्लूक-चण्डेश्वरादीनां) सम्मानहानिभयात्तेषां नामोट्टङ्कनमकृत्वाऽपि तेषां मतानि खण्डितानि । अतः पूर्ववर्त्तिनिबन्धग्रन्थानां साहचर्येणैव बृहस्पतेः कृत्यकौमुदीग्रन्थः परिपुष्ट इति नास्ति विप्रतिपत्तिः ।

अर्वाचीननिबन्धग्रन्थेषु कृत्यकौमुद्याः प्रभावः

एषः कृत्यकौमुदीधर्मशास्त्रीयमहानिबन्धः प्राचीनधर्मशास्त्रीयनिबन्धैः परिपुष्ट इत्यस्माभिरितः पूर्वं विचारितम् । अनन्तरमपि ये ये धर्मशास्त्रीयनिबन्धग्रन्थाः रचिताः, तेऽपि प्राचीनधर्मशास्त्रनिबन्धग्रन्थानां साहचर्येण पुष्टा इति नास्ति सन्देहस्यावकाशः । उत्कलीयधर्मशास्त्रनिबन्धकारेषु शतानन्दः प्रथमाचार्यः । परन्तु तेषां सम्पूर्णः ग्रन्थः नाद्यावधि प्राप्तुं शक्यते । तदनन्तरं शम्भुकरविद्याकरादीनां लिखितेषु बहुषु ग्रन्थेषु प्रायः एकः द्वौ वा मिलति, तेऽपि ग्रन्थाः पर्वविषयकाः न । अतः उत्कलेषु पर्वसम्बन्धिलिखितेषु ग्रन्थेषु कृत्यकौमुदी प्रथमा, तथा बृहस्पतिरपि प्रथमाचार्यः । अतः परवर्त्तिभिः प्रायशः सर्वे उत्कलीयनिबन्धकाराः बृहस्पतेः कृत्यकौमुदीं प्रामाणिकग्रन्थरूपेण स्वीकुर्वन्ति । स्वस्वग्रन्थेषु वारम्बारमुद्धृत्य स्वग्रन्थानां मर्यादां वर्धयन्ति ।

कृत्यकौमुदीग्रन्थः अन्यप्रदेशीयधर्मशास्त्रनिबन्धकारैः न कुत्राप्युद्धृत इति पूर्वमस्माभिरुक्तम् । केवलमुत्कलीयैर्धर्मशास्त्रनिबन्धृभिः बृहस्पतिः कृत्यकौमुदीग्रन्थश्च प्रमाणमधिगच्छति । प्रायशः शतानन्द-शङ्खधर-शम्भुकर-विद्याकरान् विहाय नान्यः उत्कलीयधर्मशास्त्रनिबन्धकर्त्ताऽन्यप्रदेशीयैः निबन्धृभिरुद्धृतो भवति । परन्तूत्कलीयपर्वणां प्रथमालोचकरूपेणोत्कलीयधर्मशास्त्रे राजमानः बृहस्पतिरनन्तरकालीनैः कालनिर्णयात्मकधर्मशास्त्रीयनिबन्धृभिः सर्वैः समम्मानं बहुवारमुट्टङ्कयते । तेषु विप्रमिश्रस्य श्राद्धप्रदीपग्रन्थे साम्बत्सरिकश्राद्धनिषेधकालविषये 'मातर्यपि च वृत्तायामि'ति शंखवचनं 'ऋते समा' इत्यत्र साम्बत्सरिकश्राद्धं वर्जयित्वा इदन्तु सन्निहितवाक्येनैव सम्बद्धयते इत्यत्र मातृसाम्बत्सरिके विकल्प इति ।

श्राद्धप्रदीपकारः विप्रमिश्रः, कालचन्द्रिकाकारः धर्म्मपाठी, कालनिर्णयकारः रघुनाथदाशः, कालसर्वस्वकारः महोमहोपाध्यायकृष्णमिश्रः, स्मृतिसारसंग्रहकारः विश्वनाथमिश्रः, कालसारकर्त्ता गदाधरराजगुरुः, सर्वस्मृतिसारसंग्रहकर्त्ता खड्गगोविन्ददाशः, पण्डितसर्वस्वकार इत्येते मुख्याः निबन्धकाराः स्वकीयग्रन्थेषु कृत्यकौमुद्याः वचनानि ग्रन्थमहत्त्वाभिवृद्धये प्रमाणत्वेन बहुवारमुद्धरन्ति । एतद्विषये विस्तरेण विचारः मया अग्रे करिष्यते ।

अतः निबन्धकाराणां नामानि तानि वचनान्यपि निम्ने मयोद्ध्रियन्ते, स्थाननिर्देशपुरःसरं चोपस्थाप्यन्ते ।

१- श्राद्धप्रदीपः[250] (विप्रमिश्रकृतः) प्रथमाब्दे साम्वत्सरिकश्राद्धनिषेधकाले-

[251]कौमुदीकारस्तु—

मातर्यपि च वृत्तायां श्राद्धं कुर्वीत पैतृकम् ।
तस्याः न वत्सरं कुर्यात प्रेते च पितरि क्वचित् ॥

250- उत्कलराज्यसंग्रहालयस्य धर्मशास्त्रीयताडपत्रात्मकग्रन्थानां संकेतः- डि.एच्. इति । अतः यत्र यत्र डि.एच्. आयाति, तत्र तत्र तादात्मिका बुद्धिः धारणीया । श्राद्धप्रदीपः उत्कलराज्यसंग्रहालयस्य डि.एच्. १४०, सदाशिवकेन्द्रीयसंस्कृतविद्यापीठस्य तालपत्रमातृका नं - ३५

251- कृत्यकौमुदी (पृ. २९३) ।

अत्र उपरि वत्सरपदसत्त्वेन प्रायः पाठात् पैतृकं साम्बत्सरिकम् । नञः क्रियापदसत्त्वेनोत्तरवाक्येनैव सम्बन्धः ।

२- स्मृतिसारसंग्रहः[252] - विश्वनाथमिश्रकृतः ।

(क) एकादशीप्रकरणे[253]—

यत्तु [254]कृत्यकौमुद्यामुभयाधिक्ये उपवासद्वयविधानं विधवां प्रतीति लिखितं तद् बहुनिबन्धकारैरलिखितत्वात् प्रत्यक्षशास्त्रविरोधित्वान्नोचितम् । सर्वस्मृतिकारसम्मतत्वात् शिष्टसमाचारात् सकृदुपवासः कर्त्तव्य एवेति ।

(ख) अक्षयतृतीया[255]—

'तृतीया चन्दनस्य च' इति वचनादत्र चन्दनदानं प्रशस्तम् । तदुक्त [256]कृत्यकौमुद्यां—

> दानात्तु चन्दनस्येह कञ्जजो नात्र संशयः ।

इह चन्दनदानात् कञ्जजो ब्रह्मा भवतीत्यर्थः ।।

(ग) उपाकर्मप्रकरणे[257] —

श्रावणेऽधिमासपाते मलिम्लुचे हरिशयनकर्त्तव्यमाह । तथा च [258]कृत्यकौमुदीये—

> कर्कटे तु हरौ सुप्ते सिंहे गोपतिरुत्थितः ।
> तत्रैव श्रवणाकर्म शक्रध्वजमतः परम् ।।

गोपतिः- बलभद्रः । अतो वचनादुपाकर्मदिने बलभद्रोत्थापनं कर्त्तव्यमेवेति गम्यते ।

---

[252] उत्कलराज्यसंग्रहालयस्य डि. एच् - १६ ।

[253] फोलिओ - १२ ।

[254] कृत्यकौ. (पृ - २३५) ।

[255] फोलिओ - १७ ।

[256] कृत्यकौ. (पृ - २३) ।

[257] फोलिओ - २३ ।

[258] कृत्यकौ. (पृ. - ४६) ।

(घ) श्रावणपौर्णमास्यां[259] बलोत्थापननिर्णये धवलसंग्रहे—

कार्त्तिके मासि शुक्लादौ तिथौ च कुसुमांशुकैः ।
सुखाय सुखरात्रिः स्यात्कार्या राष्ट्रसुखाय वै ॥

शुक्लादाविति अमावास्यायामित्यर्थः । अतएव [260]कृत्यकौमुद्यां स्मृतिः

अमावास्यां तुलादित्ये लक्ष्मीर्निद्रां विमुञ्चति ।
सुखरात्रेरुषः काले प्रदोपोज्ज्वलितालये ॥

(ङ) भीष्माष्टमीविषये[261] कृत्यकौमुद्यां[262]—

शुक्लाष्टम्यां तु माघस्य दद्याद् भीष्मस्य यो जलम् ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥ इति

पापक्षयवचनाज्जीवत्पितृकस्यापि तर्पणमात्रेऽधिकारोऽप्यस्ति ।

(च) दीपदानविषये[263] दीपदानस्थानमाह [264]कौमुद्यां—

चतुष्पथेषु रथ्यासु ब्राह्मणावसथेषु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारगहनेषु च ।
दीपदानाद्धि सर्वत्र महाफलमुपाश्नुते ॥

३- कालचन्द्रिका[265] धम्मुर्पाठिकृता—

(क) वर्षवृद्धिविषये[266] यथा [267]कृत्यकौमुद्यां—

अभिषेकदिने राज्ञो वर्षवृद्धिः प्रशस्यते ।
अन्येषां जन्मनक्षत्रे क्षीणायुस्त्वन्यथा भवेत् ॥

वर्षवृद्धिः प्रशस्यत इति वर्षवृद्धौ यद् विहितमभिषेके कुर्यादित्यर्थः इति वर्षवृद्ध्यभिषेकयोरेकाचरणत्वाद् वर्षवृद्धौ तिथिनक्षत्रयोगे तथा ग्राह्यः । वर्षवृद्धौ यथा [268]कृत्यकौमुद्यां—

259- फोलिओ - ३०
260- कृत्यकौ (पृ - ४१)
261- फोलिओ - ३२
262- कृत्यकौ (पृ - १७९)
263- फोलिओ - ३७
264- कृत्यकौ (पृ - १४५)
265- डि. एच्. - २९१
266- फोलिओ - ३९
267- कृत्यकौ (पृ - ७०)
268- कृत्यकौ (पृ - ७०)

जन्ममासस्य जन्माहे जन्मतारेन्दुसंयुते ।
तदलाभादृक्षमात्रे कुर्याद् वर्षविवर्द्धनम् ॥

(ख) वर्षवृद्धिविषये [269] पाद्मे—

श्रावणी दिवसे राजन् वैष्णव्यं चेन्न लभ्यते ।
नृपाभिषेकः कर्त्तव्यस्तदा श्रावणमात्रिके ॥

वैष्णव्यं - श्रवणा । नृपाभिषेककालीनमासाप्राप्तौ नक्षत्रमात्रके । जन्मदिनाज्जन्मनक्षत्रस्य वृद्धावेवेदं बोद्धव्यम् । जन्मनक्षत्रं जन्मदिवसस्योत्तरगामित्वे तु जन्मदिने एव इति [270]कृत्यकौमुदीव्याख्यानात् । प्रतिपदि द्वितीयायां वा श्रावणामायां सत्यां नक्षत्रमात्रेऽभिषेकः कर्त्तव्यः ।

४- कालनिर्णय:[271] - रघुनाथदाशकृत:—

(क) अपरपक्षनिर्णये[272]—

विषशस्त्रश्वापदाहितिर्यक् ब्राह्मणघातिनाम् ।
चतुर्दश्यां क्रिया कार्या अन्येषान्तु विगर्हिता ॥

इति श्लोकविचारे [273]कृत्यकौमुदीये—

मघाश्राद्धं न कुर्वीत अकृत्वा शस्त्रघातिने ।
कृत्वा तु विधिवत्तस्मै शेषं दर्शे समापयेत् ॥

शस्त्रहतानां चतुर्दश्यामिति वचनात् अन्यत्राप्राप्तौ वचनमिदम् । शस्त्रघातिनेऽकृत्वा मघाश्राद्धं न कुर्वीत । अपि तु शस्त्रघातिने कृत्वैव कुर्वीत । शस्त्रहतप्रभृतिषट्पुरुषेभ्यः कुर्यादिति यावत्, विधिवदिति । चतुर्दश्यामेकोद्दिष्टविधिना श्राद्धं कृत्वा दर्शे षाट्पुरुषिकं कुर्यादित्यर्थः।

(ख) श्रावण[274] पौर्णमास्यां बलोत्थापननिर्णये पक्षद्वयस्य देशाद्यपेक्षया विकल्पः । [275]कृत्यकौमुद्यां—

---

[269]- फोलिओ - ३९
[270]- कृत्यकौ (पृ - ७१)
[271]- डि. एच्.-१६९
[272]- फोलिओ-१५२
[273]- कृत्यकौ (पृ-३३२)
[274]- फोलिओ - ९६
[275]- कृत्यकौ (पृ - ४२)

श्रावणी पौर्णमी यत्र मध्याह्नव्यापिनी यदि ।
उत्थाने बलदेवस्य नन्दाविद्धा तु वर्जयेत् ॥
खर्वा दर्पा तथा हिंस्रा नन्दायां पौर्णमीयुता ।
उत्थापनं शीरपाणेः कारयेत् पूर्ववासरे ॥
यामद्वयं चतुर्दश्यां पौर्णमास्यां द्वियामिकम् ।
पूर्वेऽहनि बलेः पूजा पशुवन्दापना तथा ।
नन्दायुक्तां पौर्णमास्यां कृते उत्थापने बलेः ॥

(ग) एकादशीप्रकरणे[276] - वायुभक्षणमुपवासप्रतिनिधिरेव नतूपवासः । रामायणे पृथक्त्वेनोपादानात् ।

ततो वर्षशते पूर्णे तां तां वृत्तिमवर्त्तत ।
जलाशी मारुताहारो निराहारस्तथैव च ॥

कृत्यकौमुद्यां[277] तु —

अशक्तावुपवासस्य भक्ष्यं किञ्चित् प्रकल्पयेत् ।
सर्वथा पुरुषैः कार्यमेकादश्युपवासनम् ॥

(घ) एकादशीप्रकरणे[278] - कृत्यकौमुद्यां[279] स्कान्दे—

यानि कानि च वाक्यानि कृष्णैकादशीवर्जने ।
भरण्यादिनिषेधे च तानि काम्यफलार्थिनाम् ॥
कामिनोऽपि हि नित्यार्थं कुर्युरेवोपवासनम् ।
प्रीणनार्थं हरेर्नित्यं न तु काम्यव्यपेक्षया ॥

(ङ) एकादशी[280] प्रकरणे - ब्रह्मपुराणे —

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
त्र्यहस्पृक् तदहोरात्रं नोपोष्यं तत् सुतार्थिभिः ॥

---

[276] फोलिओ - ७२

[277] कृत्यको (पृ - २४३)

[278] फोलिओ - ७१

[279] कृत्यको (पृ २४०)

[280] फोलिओ (पृ - ७०)

कृत्यकौमुद्यां[281] भविष्योत्तरे—

यदा कौन्तेय संसिध्येदेकादश्यां तिथित्रयम् ।
तत्र क्रतुशतं पुण्यं द्वादशीपारणा भवेत् ।।

तिथित्रयमिति । दशम्येकादशीद्वादश्यः ।

(च) एकादशीप्रकरणे[282] कृत्यकौमुद्यां[283] तु—

दशमीशेषयुक्तैकादशी व्रतविधायकानि यान्युद्दालकवचनानि तानि च वैष्णवपराणि किन्तु धनदव्रतिनमधिकृत्यैव तद् विषयाणि द्रष्टव्यानि।

(छ) अक्षयतृतीयाविषये[284]- तृतीया चन्दनस्येति वचनात् अत्र चन्दनदानं प्रशस्तम् । यदुक्तं [285]कृत्यकौमुद्यां—

दानात्तु चन्दनस्येह कञ्जजो नात्र संशयः ।

इह चन्दनदानात् कञ्जजो ब्रह्मा भवतीत्यर्थः ।

५- कालसर्वस्वम्[286] महामहोपाध्यायकृष्णमिश्रकृतम्—

(क) वर्षवृद्धिविषये[287]—

अभिषेकदिने राज्ञामन्येषामृक्षकेऽथवा ।
वर्षवृद्धिः प्रकर्त्तव्या क्षीणायुस्त्वन्यथा भवेत् ॥ इति वाक्यम्।

तिथ्यृक्षयोर्यदुत्तरगामि तत्रैव वर्षवृद्धिरिति [288]कृत्यकौमुदीकारः ।

(ख) अक्षयतृतीयाविषये[289] - कृत्यकौमुद्यां[290]—

दानात्तु चन्दनस्येह कञ्जजो नात्र संशयः ।

कञ्जजो ब्रह्मा भवतीत्यर्थः ।

281- कृत्यको (पृ - २३१)
282- फोलिओ - ६९
283- कृत्यकौ (पृ - २३०)
284- फोलिओ - २७
285- कृत्यकौ (पृ - २३)
286- उत्कलराज्यसंग्रहालयस्य डि.एच् ४८ (B)
287- फोलिओ - २५
288- कृत्यकौ (पृ - ७१)
289 फोलिओ - ४८
290- कृत्यकौ (पृ - २३)

(ग) एकादशोद्वैवविचारे[291] यत्तु [292]कृत्यकौमुद्यां--
एकादशीमुपोष्यैव द्वादशीं समुपोषयेदिति सौरधर्मोत्तरोक्तक्त्वाप्रत्ययेनोपवासद्वयं विहितम् ।

(घ) एकादशीप्रकरणे[293] कौमुद्यादौ[294] तु पुत्रवत: परदिनमुक्तम् ।

कलाऽप्येकादशी यत्र द्वादश्यनुगता भवेत् ।
दिनक्षयेऽपि सा पूज्या यतीनामुत्तमा तिथिः ॥

इति स्कान्दाच्चेति वदन्ति । [295]कौमुदीकारस्तु—

एकादशी द्वादशी यत्र तत्र सन्निहितो हरिः ।
तमेवोपवसेत् कालमकामो विष्णुतत्परः ॥

इति मात्स्याद् विष्णुतत्पराणां निष्कामं महानिष्कामोपवास: स्यात् ।

(ङ) एकादशीविचारे[296] अतएव—

एकादशीद्वयं यत्र शुद्धं कुरुकुलोद्वह ।
अन्त्योपोष्या च यतिभिराद्या चाश्रमिभिस्त्रिभि: ॥

इति [297]कौमुद्युक्तभविष्यवाक्येन विरोध: ।

(च) एकादशीविचारे[298]—
'द्वौ तिथ्यन्तावेकवारे यस्मिन् स्यात्तद्दिनक्षय' इति पाद्मलक्षणसंक्षय दण्डमाश्रित्यप्रसरात् । अतएव कौमुद्यां[299] यद्येकादशी सम्पूर्णा सति वर्धते द्वादशी च क्षयं गतेत्युक्तिः । तथा द्वादशी क्षये न वक्ष्यमाणनक्तादि शङ्का सुतार्थिनाम् ।

(छ) एकादशीविचारे[300]—

पारणं तिथिवृद्धौ तु द्वादशीमुडुसंक्षयात् ।
वृद्धौ कुर्यात् त्रयोदश्यां तत्र दोषो न विद्यते ॥

---

29 .- फोलिओ - ९५
292- कृत्यकौ (पृ - २३५)
293- फोलिओ - ९७
294- कृत्यकौ (पृ - २२८)
295- कृत्यकौ (पृ - २२९)
296- फोलिओ - ७५
297- कृत्यकौ (पृ - २३३)
298- फोलिओ - ७५
299- कृत्यकौ (पृ - २३४)
300- फोलिओ - ६४

इति वचनात् वृद्धावित्यस्य नक्षत्रवृद्ध्यर्थत्वाद् द्वादशीवृद्धावुत्तरद्वादश्यां पारणम्। सार्क्षद्वादशोवृद्धौ तु त्रयोदश्यां तदिति वदतः [301]कौमुदीकारस्याप्ययं पक्षोऽभिप्रेतः।

(ञ) एकादशीविचारे[302] कौमुदीकारस्तु[303]—

द्वादशीवृद्धिकलाया अनृक्षं भवति तत्र पारणम्। सर्क्षत्वे तु त्रयोदश्यां तत् पारणं तिथिवृद्धौ तु द्वादश्यामुडुसंक्षयात्।

वृद्धौ कुर्यात् त्रयोदश्यां तिथिवृद्धिः प्रशस्यते।

इति वचनात् वृद्धौ ऋक्षस्यापि वृद्धावित्यर्थमाह।

(झ) श्रावणपौर्णमास्यां[304] बलदेवपूजाविषये—

संक्रान्तिग्रहणं वाऽपि पौर्णमास्यां यदा भवेत्।
उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः॥

इति विस्तरः [305]कृत्यकौमुद्यामुन्नेयः।

(ञ) श्रावणपौर्णमास्यां[306] बलोत्थापननिर्णये—

पक्षद्वयस्य देशाद्यपेक्षया विकल्पः। [307]कौमुद्यां—

श्रावणी पौर्णमासी यत्र मध्याह्नव्यापिनी यदि।
उत्थाने बलदेवस्य नन्दाविद्धां विवर्जयेत्॥

इति वचनान्मध्याह्नोऽस्य कालः।

(ट) संक्रान्तिविषये[308]—

अथ ऊर्ध्वं संक्रमकालात् त्रिंशत् षष्टि दण्डा इत्यर्थः। निमेषेष्वनिर्णीताहोरात्रसाध्योपवासपरातैलस्त्रीमांसवर्जनविषयेति [309]कौमुदीकारादयः।

301- कृत्यकौ (पृ. - ९२)
302- फोलिओ - ६५
303- कृत्यकौ (पृ - ९२)
304- फोलिओ - ८०
305- कृत्यकौमुद्या उपाकर्मप्रकरणे
306- फोलिओ - ८०
307- कृत्यकौ (पृ ४२)
308- फोलिओ - १०४
0 9 कृत्यकौमुद्याः संक्रान्तिप्रकरणे वाक्यमिदं न प्राप्यते।

(ठ) सक्रान्तिविषये[310]—

वृश्चिकस्थो यदा भानुर्वृश्चिकस्थो यदा शशी ।
अमा वै सोमवारेण सा तिथिमर्हति स्मृता ॥

इति वाक्यपरम्परा श्रूयते । तच्च कौमुदी-स्मृतिसार-वाजपेयादिभिरप्रदर्शनादप्रमाणम् ।

६- कालसारः – गदाधरराजगुरु कृतः (मुद्रितं पुस्तकम्)

(क) माघसप्तमीविषये[311] - अत्राक्षारभोजनं कुर्वन्तीति [312]कृत्यकौमुदीकाराः । तद्द्रव्याणि यथा—

गव्यमस्विन्नमन्नञ्च तिलमुद्गौ च मागधी ।
आमतण्डुलमुद्गाश्च दधिसद्यो घृतं पयः ॥
अक्षरा कथिता ह्येते अन्ये क्षाराः प्रकीर्त्तिताः ।
दन्तकाष्ठं तथैवापः त्रिकटु त्रिफला तथा ।
भोज्यपत्रं तथैवेतदक्षारं परिचक्षते ॥

(ख) एकादशीविषये[314] यत्तु [314]कृत्यकौमुद्यां—
उभयाधिक्ये विधवानामुपवासद्वयं लिखितं, तत् आचारविरोधात् प्रत्यक्षशास्त्रविरोधात् सर्वस्मृतिकारैरनादृतत्वाच्च सर्वथा नाद्रियते ।

(ग) साम्बत्सरिक[315]श्राद्धनिषेधकाले—

मातर्यपि च वृत्तायां श्राद्धं कुर्वीत पैतृकम् ।
तस्याः न वत्सरं कुर्यात् प्रेते पितरि च क्वचित् ॥

इति शङ्खोक्तेरिति [316]कृत्यकौमुदीकारादयः । कुर्यादिति पुनरुपादानात् नञ पूर्ववाक्ये सम्बन्धशङ्का नास्त्येवेति तन्मतं समीचीनम् । तस्माज्जनकमरणाब्दे मातृवार्षिकमपि न कार्यम् ।

310- फोलिओ - ११०

311- का. सा. (पृ - ७३)

312- कृत्यकौ (पृ. १७८)

313- का. सा. (पृ. - ११५)

314- कृत्यकौ (पृ - २३५)

315- का. सा. (पृ. - २३८)

316- कृत्यकौ (पृ. - २९३)

(घ) सांवत्सरिकश्राद्धनिषेधकाले[317]—

तथाचारस्य [318]कृत्यकौमुद्यादिषु अलिखितत्वेन अनादृतत्वात्, स्मृत्यपेक्षयाव्यवहितप्रामाण्येनाचारस्य दुर्बलत्वमिति सिद्धान्ताच्चेत्यलमतिविस्तरेण ।

(ङ) संक्रान्तिविषये—

तेन कर्कटके रवौ वर्त्तमाने पूर्वा विंशतिर्नाड्यः पुण्या इत्यर्थः । उभयत्रेति तुलामेषयोरित्यर्थः । न तु पार्श्वद्वययोरिति [320]कृत्यकौमुदीकारः ।

एवं बहुभिः परवर्त्तिनिबन्धकारैः कृत्यकौमुद्याः बहूनि वचनान्युट्टङ्कितानि । तत्र बहुषु स्थलेषु तेषां मतं सम्म्मानमुट्टङ्क्य स्वीकृतम् । कुत्रचिच्च वचनस्यानादरणीयताऽपि प्रदर्शिता । उत्कलीयनिबन्धकाराणामुपर्येवैतेषां प्रभावः सर्वथा वरीवर्त्तते, नान्यप्रदेशायेषु धर्मशास्त्रनिबन्धग्रन्थेषु । अतः प्राचीननिबन्धकारत्वेन सर्वथा समादरणीय एवासौ कृती बृहस्पतिरित्यलं बहुना ।

इतरनिबन्धग्रन्थापेक्षया कृत्यकौमुद्याः वैशिष्ट्यम्

धर्मशास्त्रीयतत्त्वप्रतिपादयिषद्भिः धर्ममर्मविद्भिः विज्ञानेश्वरादिभिः परमतखण्डनमण्डनपुरःसरमौचित्यप्रतिपादनार्थं बहुप्रयत्नेन निबन्धग्रन्थाः विरचिताः सर्वेषां स्मृतिवचसां तत्तन्निबन्धानाञ्च सारमादाय मन्दबुद्धीनां सौकर्याय तत्रभवता महाविदुषा बृहस्पतिना कृत्यकौमुदीनामा व्रतप्रायश्चित्तदानप्रकरणत्रयविशिष्टः निबन्धोऽयं न्यबन्धि । उत्कलीयसमाचारपरम्परादेशधर्मादीनां प्रतिपादनं कृत्वाऽसावुत्कलीयनिबन्धकारेषु प्रशंसाभाजनं भवति । भारतीयधर्मशास्त्रसाहित्ये वर्त्तमानानां निबन्धग्रन्थानां सम्यगध्ययनपूर्वकमौचित्यन्यायविचारपूर्वकं तैः प्रतिपादितानां विषयाणां खण्डनमण्डनञ्चानेन कृतम् । आवश्यकस्थलेषु भूरि प्रमाणवचनानि दत्त्वा निर्णयः प्रतिपादितः ।

317- का. सा. (पृ - २३९)
318 कृत्यकौ (पृ - २६३)
319- का. सा, (पृ. - ४३२)
320- कृत्यकौ (पृ - ३०४)

श्रीमता बृहस्पतिना कृत्यकौमुद्यां कतिपयस्थानेषु कतिचनानां धर्मशास्त्रीयनिबन्धग्रन्थानां मतानि खण्डितानि। कतिपयेषु स्थानेषु किञ्चिद् वैशिष्ट्यञ्च दर्शितम्। प्रायशः विशिष्टैः धर्मशास्त्रीयनिबन्धकारैः जीमूतवाहन-लक्ष्मीधर मित्रमिश्र--नीलकण्ठभट्ट--गोविन्दानन्द-देवण्णभट्ट--गदाधरादिभिः कालश्राद्धदानप्रायश्चित्तादिष्वेव ग्रन्थाः रचिताः। अनेन महानुभावेन बृहस्पतिनाऽपि कृत्यकौमुदीग्रन्थः कालप्रायश्चित्तदानैः त्रिधा विभज्यते। यद्यपि सर्वे निबन्धकाराः चैत्रशुक्लप्रतिपदं प्रारभ्य वार्षिकपर्वाणि प्रारभन्ते तथापि बृहस्पतिः चैत्रशुक्लस्याद्यत्वं स्वीकृत्यापि चैत्रशुक्लप्रतिपदं परित्यज्य अशोकाष्टम्याः प्रारम्भमकरोत्।

मेषसंक्रान्तौ विषुवच्छ्राद्धं भवति। तत्र अयनद्वितयेश्राद्धमिति मत्स्यपुराणवचनाद् पिण्डरहितं श्राद्धं कर्त्तव्यमिति कृत्यतत्त्वार्णव-कृत्यरत्नाकर-कृत्यकल्पतरुकारादयः प्रतिपादयन्ति। परन्तु बृहस्पतिः [321]कृत्यकौमुद्यां पिण्डदानस्य समाचारसिद्धत्वं 'ग्रहणे च व्यतीपाते' इति ब्रह्मपुराणवचनात् प्रमाणयति, तथा च गयाश्राद्धवत् अयनद्वितये विषुवद्वितयेऽपि पिण्डश्राद्धं पार्वणविधिना कर्त्तुं निर्दिश्यान्यसंक्रान्तिषु पिण्डाभावत्वं प्रतिपादयन् अन्यनिबन्धापेक्षया किमपि वैशिष्ट्यं प्रदर्शितवान्।

भाद्रपदेमासि अगस्त्योदयकालविषये कृत्यकौमुदीकारेण बृहस्पतिना किञ्चिन्नवीनं मतं प्रकटितम्। तत्र कन्यां प्रति सूर्यसंक्रमणकालात् सप्तदिनात् प्रागेवागस्त्यायार्घ्यं दातव्यम्। तत्र सौरभाद्रपदसप्तदशांशे निशान्तेऽगस्त्योदयः भवतीति [322]श्रीनाथः। विष्णुरहस्योक्तव्रतविधिः [323]निर्णयसिन्धौ [324]कृत्यकौमुद्याञ्च वर्त्तते। सूर्यस्य बृषसंक्रमोत्तरसप्तमदिनेऽगस्त्योऽस्तं प्रयाति। सिंहसंक्रान्त्युत्तरमेकविंशतितमे दिने उदयमेति। तत्र कन्यासंक्रान्तेः पूर्वं सप्तदिनमध्येऽगस्त्यपूजनं तदर्घ्यादिकं कार्यमिति [325]काशीनाथः।

321- कृत्यको. (पृ- २२)

322- कृत्यतत्त्वा. (पृ- १९५)

323- नि. सि. (पृ- १०८)

324- कृत्यको. (पृ- ११६)

325- ध. सि. (पृ- १५६)

कन्यांशक प्राचीनषडष्टकादिभूतांशकादारभ्य द्वाविंशतिमशंशान् यागदगस्त्योदयस्तत्र प्रथमोदयदिनादारभ्य सप्तदिनाभ्यन्तरैकदिवसेऽगस्त्यार्घ्यः आचारादिति [326]चण्डेश्वरः। [327]कृत्यकौमुद्यनुसारं दशनक्षत्रषडंशकषोड़शलिप्तिकाभोगे सूर्यस्यागस्त्योदयो भवेदिति।

मार्गशीर्षकृष्णाष्टम्यां प्रथमाष्टमी भवति। सा च तिथिः दिनद्वैधे पूर्वविधा ग्राह्या। पर्व इदं केवलमुत्कले एव पाल्यते। नान्यप्रदेशीयनिबन्धग्रन्थेष्वस्य सत्ताऽपि परिलक्ष्यते। उत्कले भुभनेश्वरस्थ श्रीलिङ्गराजस्याद्यायात्रा दिवसेऽस्मिन् प्रतिपादिता। तत्र पुनः उत्कलीयपर्वनिबन्धकारेषु बृहस्पतिः प्रथमतः अस्याः प्रथमाष्टम्याः वर्णनं करोति। अनन्तरञ्च [328]वीरसर्वस्वकार [329]पण्डितसर्वस्वकार–[330]गदाधर– [331]दिव्यसिंह- कृष्णमिश्र- रघुनाथदाशादयः उत्कलीयाः एतेषां मतमनुसरन्ति।

एकादशीप्रकरणे प्रवेशिन्येकादश्याः ग्राह्यकालनिर्णयप्रसंगे बृहस्पतिना अन्येभ्यः काचित् नवीनता प्रतिपादिता। तत्र पूर्वदिने दशमी परदिनैकादशी स्वल्पा, ततो द्वादशी रात्रिशेषे त्रयोदशीत्येवं द्वादशीक्षये त्रिस्पृशा, तदा सैव सर्वैरुपोष्येति [332]श्रीनाथः नालाभेऽपीति समूलत्वेऽप्यलाभे त्रयोदश्यां द्वादश्यलाभे संयुक्तां सूर्योदयात्प्रागवक्त्रावलोकनसमये दशम्यायुक्तां षष्टिदण्डात्मिकामेकादशीं कुर्यादित्यर्थः। द्वादश्याः त्रयोदश्यां निर्गमेऽपीत्यर्थः। यत्र सूर्योदयात् परतः परदिने चैकादशी रात्रिशेषे त्रयोदशी चेति त्रिस्पृशा। तत्र दशमीविद्धैकादशीनिषेधविषयोऽयम्। [333]कृत्यकौमुदीकारस्तु सूर्योदयादुपरिष्टात् दशम्याः श्लेषः प्रवेश उच्यते। परदिने एकादशी उदयस्यालाभेऽपि प्रवेशिनीं न कुर्यादित्यर्थः। एकादश्याः प्रवेशिनीत्वे यदा त्रयोदशोदिने द्वादश्यानिर्गमस्तदा त्रयोदश्यां पारणविधानादुपोष्या। द्वादशी च तत्रेति

326- कृ. र. (पृ- २९९)

327- कृत्यकौ (पृ- ११७)

328- का. सा. (पृ- १६३)

329- वी. स. (पृ- ९१)

330- प. स. (पृ- ७४)

331- का. सा. (पृ- ९९)

332- कृत्यतत्वा (पृ- ११६, १२४)

333- कृत्यकौ. (पृ- २२८, २३०)

वचनाच्च निर्गतायामेव द्वादश्यामुपवासः प्राप्नोति, किन्त्वेकादशीसहितायामेव कर्त्तव्यम्। द्वादशीमात्राधिक्ये परेद्युरुपवासः। उभयाधिक्ये तु सर्वैः परैव कार्या। [334]नीलकण्ठभट्टोऽपि अरुणोदयविद्धायां द्वादशीमात्राधिक्ये तु परेद्युरुपोष्येति। यदि चैकस्मिन् दिने दशमीविद्धा, परदिने किञ्चिदेकादशी-पारणादिने पारणायोग्यद्वादशी न लभ्यते तदा द्वादशीलङ्घनस्यात्यन्तगर्हितत्वात् दशमीविद्धाऽपि कार्येति [335]गोविन्दानन्दः। एकादशीमुपोष्यैवेति सौरधर्मोत्तरवाक्यात् [336]बृहस्पतिः विधवानामुपवासद्वयं कथयति। परन्तु [337]गदाधरविश्वनाथमिश्रादयः तद्वचनमुद्धृत्य आचारविरोधात् सर्वथा नाद्रियते। पुनश्च स्मृत्यन्तरमालम्ब्य माधवाचार्यैरुपवासद्वयासामर्थ्ये यो द्वादश्यामेकोपवासः लिखितः सोऽप्यस्मद्देशस्मार्त्तैर्नाद्रियते इति कथयन्ति। यदि त्रयोदश्यां न द्वादशी तदा दशमीमिश्रितैकादशी गृहिभिरुपोष्या। अथवा त्रयोदश्यां तु शब्दादेकादश्यां न द्वादशी यदा तदा दशमीमिश्रितैव चतुर्भिरप्याश्रमिभिरुपोष्येति [338]कृत्यकौमुदीकारः।

[339]बृहस्पतिना एकोद्दिष्टस्य कर्मकालनिरूपणावसरे पञ्चदशमुहूर्त्तानां नामानि स्पष्टतया प्रदत्तानि। तत्र पञ्चदशमुहूर्त्तस्य नाम 'भग' इति परन्त्वन्येषु निबन्धेषु यद्यपि मुहूर्त्तानां पञ्चदशत्व कथितं किन्तु पञ्चदशमुहूर्त्तस्य नाम न केनापि लिखितम्।

साम्बत्सरिकश्राद्धनिषेधकाले कृत्यकौमुदीकारस्य मतम् उत्कलीयार्वाचीननिबन्धकारः विप्रमिश्रः नाङ्गीकृत्य विकल्पत्वं स्वीकरोति। अतः गदाधरः कृत्यकौमुदीमतमाधारीकृत्य विप्रमिश्रमतमत्यन्तं निरस्यति। तत्र प्रथमसांवत्सरिकश्राद्धविवेचनप्रसङ्गेऽपि बृहस्पतिना पितुराब्दिके मातृसाम्बत्सरिकं न कार्यं पितर्युपरते पुत्रो इति बृहन्मनुवचनात्। परन्तु 'मातर्यपि च वृत्तायामिति' शङ्खवचनानुसारं मातृसाम्बत्सरिके पितुः श्राद्धं न

334- स. म. (पृ- ७४, ७५)
335- वर्षक्रि. (पृ- ५४)
336- कृत्यको. (पृ- २३५)
337- का. सा. (पृ- ११५)
338- कृत्यको. (पृ- २३८)
339- कृत्यको (पृ- २५२)

निषिद्धमिति ग्रन्थकृता बृहन्मनुशंखयोः वचनानुसारं सिद्धान्तितम् । परन्तु विप्रमिश्रः श्राद्धप्रदीपे देशाचारविरोधेन अनुषङ्गाधिकरणाश्रयणेन उभयोः सांवत्सरिके उभयोः श्राद्धं कार्यमिति प्रतिपादयति ।

परन्तु गदाधरराजगुरुः [340]कालसारे श्राद्धप्रदीपकारस्य विप्रमिश्रस्य मतमत्यन्तं निरस्य कृत्यकौमुदीमतं ससम्मानं गृह्णाति । प्रथमतः [341]कृष्णबृहत्पण्डितः विप्रमिश्रप्रतिपादित मातृसांवत्सरिकस्य पित्रोः सांवत्सरिके कर्त्तव्यतां निरस्य विप्रमिश्रैः यल्लिखितं, तन्न विचारसहमिति कथयति । पुनश्च गदाधरः उभयोः बृहन्मनुशंखवचनयोरपि पितृसंवत्सरे मातृसांवत्सरिकानुष्ठानाभावस्य स्पष्टमभिहितत्वेन विरोधाभावात् विकल्पः न स्वीकर्त्तव्यः इति वदन् तथाचारस्य कृत्यकौमुद्यादिषु अलिखितत्वेन अनादृतत्वात् स्मृत्यपेक्षयाव्यन्तरितप्रामाण्येनाचारस्य दुबलत्वमिति प्रतिपाद्य कृत्यकौमुद्याः गौरवं वर्द्धयति ।

अमावास्याश्राद्धे बृहस्पतिना कुल्लूकभट्टमेधातिथिचण्डेश्वरादीनां मतं दृढमपास्य स्वमतं च प्रतिपाद्य काचित् विशिष्टता प्रतिपादिता । अमावास्यायां श्राद्धद्वयं कर्त्तव्यम् । पिण्डपितृयज्ञः दर्शश्राद्धश्च । तत्र अमावास्या-तिथिद्वैधे चन्द्रक्षयदिने साग्नेः पिण्डपितृयज्ञदर्शश्राद्धयोः युगपत् प्राप्तौ पितृयज्ञन्तु निर्वर्त्येति मनूक्तश्लोकः क्रमं नियमयतीति स्मृतिचन्द्रिकाकारः । पिण्डपितृयज्ञः श्रुतावपराह्णे विहितत्वात् तदनन्तरभावि पिण्डान्वाहार्यक-श्राद्धं कदाचित् प्रतिपद्यपि भवेदिति हेमाद्रिः । पिण्डपितृयज्ञे साग्निनिरग्न्योः द्वयोरधिकारसत्त्वेऽपि साग्नेः पिण्डपितृयज्ञानन्तरं पिण्डान्वाहार्यकं विधेयमिति श्रीदत्तोपाध्यायाः । दर्शश्राद्धस्य पिण्डपितृयज्ञानन्तरभावित्वं कथयन्ति राघवानन्दनन्दनरामचन्द्रगोविन्दराजाः ।

पुनश्च पिण्डपितृयज्ञशब्दस्य व्युत्पत्तिर्बहुधा आचार्यैः वर्णिता, साऽपि अमावास्याश्राद्धप्रकरणे [342]राका(टिप्पण्यां) वर्णिता । [343]कृत्यकौमुदीकारः बृहस्पतिरपि पिण्डान्वाहार्यकशब्दस्य द्विविधं व्याख्यानं वर्णयति । पिण्डेभ्यः

340- का. सा. (पृ- २३८)

341- का. सा. (पृ- २३८)

342- कृत्यकौ (पृ- २७१, २७२)

343- कृत्यकौ (पृ- २७३)

मात्रा आहृत्य ब्राह्मणा भोज्यन्ते अस्मिन् इति व्युत्पत्त्या पिण्डान्वाहार्यकं पार्वणश्राद्धम् । अन्यत्तु पिण्डानां पिण्डपितृयज्ञसम्बन्धिनाम् अनु पश्चाद् आहार्यं कर्त्तव्यमिति पिण्डान्वाहार्यकं दर्शश्राद्धमित्युक्त्वा मनुपद्मपुराणयोः वचनान्यपि उपस्थापयति । पुनश्च पिण्डपितृयज्ञस्य श्रौतत्वात् प्राथम्य, दर्शश्राद्धस्य तदनन्तरवर्त्तित्वञ्च प्रकाशयति । अन्ते पुनः मासानुमासिकशब्दस्य पिण्डपितृयज्ञदर्शश्राद्धरूपार्थद्वयज्ञापकं नामद्वयं व्याख्याय मेधातिथिकुल्लूकादीनामनुमासिकशब्दस्य प्रतिमासभवमिति अर्थं [344]निराकरोति । तन्मते मासिकं पिण्डपितृयज्ञः अनुमासिकं दर्शश्राद्धम् एतद्द्वयमनयोः संज्ञाद्वयं, न तु पिण्डान्वाहार्यकशब्दस्य मासानुमासिकशब्दः विशेषणम् । अपरे सर्वे भाष्यकाराः निबन्धकाराश्च मासानुमासिकशब्दं पिण्डान्वाहार्यकशब्दस्य विशेषणं मन्यन्ते, परन्तु बृहस्पतिः मासानुमासिकशब्दस्य संज्ञाद्वयं च मन्यते इति सर्वेभ्यो वैशिष्ट्यमस्य ।

यदा अमावास्या पूर्वं दिनं समाप्य परदिने क्षीयमाणा भवति तदा पूर्वदिनेऽमावास्थावेलायां यथोक्तकाललाभे तदैव श्राद्धं, नोचेत् चतुर्दश्यन्ते । अमावास्यायाः क्षीयमाणत्वादि निमित्ते सति पूर्वदिने, वृद्धौ तूभयोः परदिन इति [345]श्राद्धकल्पे श्रीदत्तः । यदा च दिवसस्य चतुर्थप्रहरं चतुर्दश्यनुपूरयेदित्यमावास्या परदिने क्षयगामितया व्यतीपातापरनामापराह्णांशं न व्याप्नोति तदा परस्मिन्नहनि श्राद्धमिष्यते इति [346]जीमूतवाहनः, यदा चतुर्दशी सार्धसप्तविंशतिदण्डान्ता, अमावास्या तावती तत्र क्षयदिने श्राद्धम् । 'वर्धमानाममावास्यामि'ति वचनात् पूर्वदिने चन्द्रक्षयमनादृत्य अमावास्याऽष्टमांऽशे श्राद्धं कार्यमित्यर्थः । यदा चतुर्दश्यपेक्षया दर्शस्य न्यूनत्वं तदा पूर्वदिने श्राद्धं, क्षीयमाणास्मृतिः सावकाशत्वादिति [347]पण्डितसर्वस्वकारः । चतुर्दशीशेषे यदा अमावास्या श्राद्धयोग्यकालव्यापिनी तदैव श्राद्धं कर्त्तव्यमिति

344- कृत्यकौ, (पृ- २७०)

345- श्राद्धक. (पृ- ३९)

346- का. वि. (पृ- ३६८)

347- प. स. (पृ- २१४)

प्रथमः पक्षः इति [348]बृहस्पतिः। यदा स्तम्भेन दिनद्वयेऽप्यपराह्णसम्भवन्ध्यमावास्यासम्भवस्तदा पूर्वदिन एव श्राद्धमिति [349]चण्डेश्वरः। चन्द्रगतेर्वैलक्षण्यादष्टमांशे चतुर्दश्याः क्षीणो भवतीत्यादिप्रकारस्यासम्भवादुत्तरदिनएवामावास्याष्टमांशेऽपि श्राद्धं कर्त्तव्यमित्यर्थः। परन्तु यदा पूर्वदिने समग्रश्राद्धकालंव्यापिनी चतुर्दशी परदिनेऽपराह्णादर्वागमावास्या तदा प्रतिपदि श्राद्धं कुर्वीतेति [350]बृहस्पतिना सिद्धान्तितम्।

चन्द्रसूर्ययोर्ग्रहणविषयेऽपि बृहस्पतिना पुण्यकालनिरूपणे काचित् नूतनता प्रकटिता। तत्र ग्रहणदर्शनं द्विविधं भवति। यथा- प्रत्यक्षदृष्टं, शास्त्रीयञ्चेति। शास्त्रीयदर्शनमपि द्विविधं भवति। मेघाच्छन्नादिषु शास्त्रज्ञानादिना, अदृष्टा जननिवेदनादिना च। तत्र दर्शनं नाम शास्त्रतोदर्शनमङ्गीकर्त्तव्यम्। ततो मेघादिच्छन्नेऽपि दिवा सूर्यग्रहणे रात्रौ चन्द्रग्रहणे च स्नानाद्यधिकारोऽस्तीति [351]मदनसिंहः। परन्तु मेघादिच्छन्ने स्नानादिकं न कर्त्तव्यमिति [352]लक्ष्मीधर[353]गोविन्दानन्दादयः। यावद्दर्शनयोग्यः वर्त्तते, तावद्दर्शनानन्तरं स्नानादि क्रियेति चण्डेश्वरः। उपरक्तदर्शनानन्तरं यावद्दर्शनगोचरो दर्शनयोग्योपरागस्तावत् पुण्यकाल इति वाचस्पतिः।

अतः रात्रौ सूर्यग्रहणं, दिवा चन्द्रग्रहणं भवति चेत्तन्नाद्रियते, चाक्षुषज्ञानविषयत्वाभावादिति [354]बृहस्पतिः। जीमूतवाहनोक्तं दर्शनपदं चाक्षुषज्ञानपरम्। चाक्षुषज्ञानानन्तरं दर्शननिषेधः रागप्राप्तदर्शनपरक इति [355]गोविन्दानन्दः। [356]नीलकण्ठभट्टः ज्ञानं विनाऽपि शास्त्रीयोपरागे स्नानादिकं कर्त्तव्यमिति कथयति। परन्तु [357]कृत्यकौमुद्यां बृहस्पतिः ग्रहणे शास्त्रीयदर्शनं प्रत्यक्षदर्शनञ्चेत्युभयमपि स्वीकरोति। [358]ग्रहणश्राद्धे 'ग्रहणे च

348- कृत्यकौ. (पृ- २७७)
349- कृ. र. (पृ- ६२४)
350- कृत्यकौ. (पृ- २७८)
351- मद. पारि. (पृ- ५३६)
352- कृत्यकल्प. नियत. (पृ- ३६९)
353- वर्षक्रि. (पृ- ९४)
354- कृत्यकौ. (पृ- २८७)
355 वर्षक्रि. (पृ- ९६)
356 स. म. (पृ- १३४)
357- कृत्यकौ. (पृ- २८७)
358- कृत्यकौ. (पृ- २९५)

व्यतीपाते' इति मार्कण्डेयवचनात् पिण्डश्राद्धस्य कर्त्तव्यताप्राप्तौ 'ग्रहोपरागसंक्रान्तावि'ति यमवचनेन पिण्डश्राद्धस्य कर्त्तव्यताप्राप्तौ न विकल्पः। अत्र साग्निना सपिण्डं निरग्निना चापिण्डं श्राद्धं दातव्यमिति केचित्। अन्ये षोडशीग्रहणाग्रहणवद् विकल्पं स्वीकुर्वन्ति। यमवाक्ये पिण्डदानश्रवणादन्यादिभिः पिण्डनिर्वपणं कर्त्तव्यमिति केचिद्। 'होमो देवो बलिर्भौतः' इति श्लोके पिण्डविधानात् पिण्डदाने फलाधिक्यमिति लक्षयित्वा प्रायशः बृहस्पतिरपि पिण्डदानं समर्थयति।

संक्रान्तिप्रकरणे पुण्यकालनिरूपणादौ बृहस्पतिः गोविन्दानन्दस्य मतं निरस्य स्ववैशिष्ट्यं प्रकटयति। संक्रान्तीनां पुण्यकालवर्णनप्रसङ्गे [३५९] गोविन्दानन्दः 'वर्त्तमाने तुलामेषे' इत्युभयतः प्राक् पश्चादपि दश नाड्यः मिलित्वा विंशति नाड्यः पुण्यकालः इति कथयति। परन्तु 'त्रिंशत्कर्कटके' इति देवलशातातपयोः वचनानुसारं 'नाड्यस्तूभयतो दशे'त्यत्र [३६०] कृत्यकौमुदीकारः 'उभयत' इति तुलामेषयोः संक्रान्त्योः, न तु पूर्वतः उत्तरतश्च मिलित्वा विंशति घटिकाः इति विशेषं व्याख्याति। [३६१] कालसारे गदाधरोऽपि कृत्यकौमुदीमतोत्थापनपूर्वकमनुसरति बृहस्पतिम्।

युगादिनिरूपणे युगादीनां नामविषयेऽपि बृहस्पतेः महत्त्वं प्रतीयते। तत्रान्येषां मतान्यपास्य स्वमतं दृढमुपस्थापयति कृतिबृहस्पतिः। युगादीनां कालविषये बहवः मतभेदाः दृश्यन्ते। [३६२] ब्रह्मपुराणे माघे मासि पौर्णमास्यामिति माघपूर्णिमायाः, [३६३] भविष्यपुराणस्य 'दर्शे तु माघमासस्ये'ति वचनेन माघामावास्यायाश्च कलियुगादित्वं कथ्यते। अत्र [३६४] चण्डेश्वरः माघपौर्णमास्यां कलियुगस्याद्यत्वं कथयति। [३६५] कृत्यतत्त्वार्णवे नभस्यमासस्य तमिस्रपक्षे इत्यादि विष्णुपुराणवचनेन पञ्चदशीत्यत्र तमिस्रपदानुषङ्गान्माघमासस्यामावास्यैव कलियुगादिः। ब्रह्मपुराणवचनानुसारेणाऽपि पौर्णमासीशब्दस्य

360- वर्षक्रि. (पृ- २०६)
361- का. सा. (पृ- ४४८)
363- कृत्यकौ. (पृ- ३१५)
365- कृत्यतत्वा. (पृ- १४८)
359- कृत्यकौ. (पृ- ३०४)
362- कृत्यकौ. (पृ- ३१५)
364 कृ. र. (पृ- ५४२)

व्युत्पत्त्या पौर्णमासीपदममावास्यापरमिति । [366]गोविन्दानन्दोऽपि माघामावास्यां प्रसाध्यात्र पञ्चदशीसामान्यश्रुतेर्विशेषाकाङ्क्षायां तमिस्रपक्षानुषङ्गस्यौचित्यान्माघे पञ्चदश्यमावास्या न तु पौर्णमासी, अन्यथा चकार वैयर्थ्यादिति प्रतिपादयति । [367]वराहपुराणनिर्णयसिन्ध्वादावपि माघामावास्यैव प्रतिपादिता । [369]श्राद्धविवेकेऽपि अत्र चकारेण तमिस्रपक्षानुषङ्गात् पञ्चदश्यमावास्या प्रतीयते । न ब्रह्मपुराणविरोधेन अनुषङ्गायोगादिति । कृत्यकौमुदीकारोऽपि विविधवचनानि प्रमाणत्वेनोपस्थाप्य पौर्णमासीपदस्य व्युत्पत्ति[371]प्रदर्शनपूर्वकं माघामावास्याया एव कलियुगादित्वं साधयति । अत्र युगादौ संक्रान्तिविधिना पिण्डरहितं श्राद्धं कर्त्तव्यम् । [372]ब्रह्मपुराणवचनानुसारेण पिण्डश्राद्धं न कर्त्तव्यम् । केचित्तु [373]मत्स्यपुराणवचनानुसारं त्रिपिण्डप्रतीतेरुक्तवचनयोः समूलत्वे पिण्डदानादानयोर्विकल्पः षोड़शिग्रहणाग्रहणवदित्याहुः । परन्तु मत्स्यपुराणवचनं युगादौ न प्रसज्यते । 'युगादौ षडशीत्याञ्च'ेति मार्कण्ड़ेयवचनादप्यपिण्डत्वं सिद्ध्यतीति [374]कृत्यकौमुदीकारेण स्पष्टतया निर्णीतम् ।

अधिमासप्रकरणेऽपि मलिम्लुचः स्वरूपविषये तथाऽत्राब्दिकश्राद्धस्य कर्त्तव्यताविषये कौमुदीकारस्याभिनवं मतं स्फुटं प्रतिभाति । तत्र यथा— रविसंक्रान्तिवर्जितामावास्याद्वयावच्छिन्नो मासो मलिम्लुच इति [375]चण्डेश्वरः । तत्रैकमात्रसंक्रान्तिरहितः सितादिश्चान्द्रो मासो मलिम्लुच इति [376]कमलाकरः । दर्शद्वयक्रोडीकृतमासो मलिम्लुच इति [377]बृहस्पतिः ।

366- वर्षक्रि. (पृ- २८७)
367- वराह. पु. (१३ । ४०-४१)
368- नि. सि. (पृ- ६५)
369- श्राद्धवि. (पृ- २४०)
370- कृत्यकौ. (पृ- ३१५-३१६)
371- पूर्णो मासोऽस्यां वर्त्तते इति काशिका (४ । २ । ३०)
372- ब्रह्मपु. (२२० । ५४-५५)
373- मत्स्यपु. (१८ । २२-२३)
374- कृत्यकौ. (पृ- ३१८)
375- कृ. र. (पृ- ५३७)
376- नि. सि. (पृ- १३-१४)
377- कृत्यकौ (पृ- ३३५)

अपरपक्षे मलमासपाते मासद्वयेऽपि प्रथमाब्दिकं श्राद्धं कार्यमिति त्रिस्थलीसेतुकारः। मासद्वये करणं कमलाकरस्य नाभिप्रेतम्। पूर्णिमान्तमासपक्षे शुद्धकृष्णपक्षमृतानां वर्षान्तरेऽधिमासपातेऽपि मलमासस्य शुद्धकृष्णपक्षोत्तरभावित्वेन सांवत्सरिकानुष्ठाने शङ्का नास्त्येव। शुद्धशुक्लपक्षमृतानां तु मलशुक्लपक्षे एव सांवत्सरिकपातात् तत्रैव प्रथमाब्दिकं विधेयमिति[३७८] कृत्यकौमुदीकारस्याभिप्रायः।

बृहस्पतिः कालविवेकप्रकरणे एव स्वमनसि स्थितानां भावाना प्रकाशनं विस्तरेण कृतवान्। अतः तत्रैव भूरि मतभेदाः दृश्यन्ते। प्रायश्चित्तप्रकरणे प्रायश्चित्तविषयकनिबन्धग्रन्थैः सह अस्याः कृत्यकौमुद्याः विषयसाम्यं नावलोक्यते। प्रायशः सर्वेऽपि निबन्धकाराः प्रथमतः 'महापातकोपपातकादिभेदान्, पातकानां वर्गीकरणं च प्रस्तूय तदनन्तरं क्रमशः तेषां पातकानां विभिन्नानि प्रायश्चित्तानि प्रतिपादयन्ति। केचित् निबन्धकाराः महापातकोपपातकादीनामनुसारं प्रायश्चित्तानि आलोचयन्ति। परन्तु कृत्यकौमुदीकारः बृहस्पतिः पातकानां तादृशं विभागं तथा न कृत्वा पूर्वं द्वादशवार्षिक-षड्वार्षिक-त्रैवार्षिक-द्वैवार्षिक-वार्षिकप्रायश्चित्तानि वर्णयति। तत्र पुनः तेन महावाक्यपुरःसरं प्रायश्चित्तग्रहणविधिः वर्णितः। कतिपयस्थानेषु विज्ञानेश्वरलक्ष्मीधरभवदेवादीनां मतमनेन गृहीतम्। प्रकरणप्रारम्भे प्रथमतः जलजपविधिः वर्णित इतीदं प्रमुखं वैशिष्ट्यं बृहस्पतेः प्रतिभाति। न केनापि जलजपविधिः प्रायश्चित्तप्रकरणे वर्णितः। अनन्तरञ्च प्रायश्चित्तानां मातृकास्वरूपं, प्रायश्चित्तार्थं परिषदुपस्थानमपि चर्च्चितम्। तत्तु विषयप्रतिपादनस्थले प्रतिपादितम्। अत्र पुनः मुनिवचनानि संशयनिराकरणाय स्पष्टीकृतानि। एवमेव प्रायश्चित्तप्रकरणे केवलं प्रसिद्धानां भाष्यकारनिबन्धकाराणाञ्च मतं गृहीत्वा विषयाः प्रतिपादिताः।

दानप्रकरणेऽपि केवलं विषयाः एव प्रदर्शिताः। प्रकरणेऽस्मिन् त्रिसप्रतिविषयाः वर्णिताः। केवलं स्मृतिपुराणादीनां वचनानि चर्च्चितानि। तत्र ग्रहपूजाविधिः प्रथमतः वर्णितः। अनन्तरं व्रतनिरूपणविषये कृच्छ्रप्राजापत्य-

---

378- कृत्यको. (पृ- ३४०-३४१)

चान्द्रायणादयः स्वरूपविधिवर्णनपुरःसरं विशेषेण लिखिताः । अनन्तरञ्च दानानि वर्णितानि । तत्र केवलं स्वीकारविधयः कुत्रचिद् वर्णिताः । प्रायः सर्वत्र केवलस्मृतिपुराणवचनैः विषयाः प्रतिपादिताः ।

बृहस्पतिः कृत्यकौमुदीग्रन्थे विशेषतः अमावास्याश्राद्धग्रहणयुगादिविषयेषु अन्येषां मतं खण्डयित्वा स्वमतं स्थापयति । एकादशीसांवत्सरिकश्राद्धनिषेधकालविषयेषु कृत्यकौमुद्याः मतानि परवर्त्तिभिः विप्रमिश्र-विश्वनाथमिश्रैः स्वस्वनिबन्धे खण्डितानि । परन्तु कृत्यकौमुद्याः मतानि उत्कलीयधर्मशास्त्रीयनिबन्धग्रन्थेषु प्रायः सर्वत्र प्रशंसितानि । अतः सार्धशतद्वयसंवत्सरपर्यन्तमुत्कले अस्याः सम्पूर्णप्रभावः आसीदिति अनुमीयते ।

बृहस्पतेः वैशिष्ट्यं पाण्डित्यप्रकर्षश्च

कृत्यकौमुदीकारः बृहस्पतिः महाविद्वानासीत् । सर्वशास्त्रेषु तस्य पाण्डित्यमवर्त्तत । यद्यपि तस्यान्या कृतिः न प्राप्यते कुत्रापि, तथापि केवलं कृत्यकौमुदीं रचयित्वा तत्रैव पाण्डित्यस्य परिचयं प्रददाति । आवश्यकस्थलेषु कृत्यकौमुद्यामेव सर्वेषां शास्त्राणामवगाहनं तेन कृतम् ।

तत्र प्रथमतः धर्मनिर्णायकेषु शास्त्रेषु श्रुतेः सर्वप्रथमत्वेन निर्दिष्टत्वात् बृहस्पतिः कृत्यकौमुद्यां श्रुतेः साक्षात्प्रमाणवचनान्युपस्थापितवान् । तत्र उपाकर्माशौचिकादानकालमृताहश्राद्धामावास्याश्राद्धयुगादिहरिशयनप्रकरणेषु बृहस्पतेः श्रुतिज्ञानस्य स्पष्टपरिचयोऽस्माभिः प्राप्तुं शक्यते । पुनश्चोपाकर्मवर्षवृद्धिदमनकचतुर्दश्यनन्तपूजाप्रतिष्ठागस्तिप्रतिष्ठाचान्द्रायणादिषु विषयेषु प्रायशः सार्धशतमन्त्राः उद्धृताः । अतः अस्मादेव ज्ञायते यत् वेदेषु बृहस्पतेः निविडप्रवेशः आसीत् ।

वेदैः सह ब्राह्मणग्रन्थानां परस्परसंयुक्तत्वाद् ब्राह्मणग्रन्थेष्वपि बृहस्पतेः प्रगाढज्ञानमासीत् । कृत्यकौमुद्यां त्रिवारमुपाकर्मामावास्याश्राद्धादिविषयेषु शतपथब्राह्मणवचनान्युदघृत्य तथोपाकर्मविषये ब्राह्मणाध्यायवंशब्राह्मणादीनां विशदं वर्णनं कृत्वा बृहस्पतिः स्वब्राह्मणविषयकज्ञानस्य परिचयं प्रददाति ।

वेदार्थविचारायोद्दिष्टं मीमांसाशास्त्रं धर्मशास्त्रेऽपि धर्मनिर्णये प्रायशः प्रयुज्यते । अतः कृत्यकौमुद्यामपि बृहस्पतिः विभिन्नेषु स्थलेषु आरण्यकषष्ठीसुखरात्रिदेवव्रतानुरूपतिथिनिरूपणैकादशीग्रहणमृताहश्राद्धयुगादिसंक्रान्त्यधिमासास्पृश्यस्पर्शनप्रायश्चित्तादिविषयेषु बहुशः मीमांसातत्त्वानि उट्टङ्कयति अतः अस्मादेव ज्ञायते यद् बृहस्पतिः मीमांसाशास्त्रेऽपि प्रवीणः आसीदिति ।

सर्वदा शास्त्रव्याख्याने व्याकरणशास्त्रस्योपयोगिता वर्त्तते । कृत्यकौमुद्यामपि बृहस्पतिः उपाकर्मैकादश्यमावास्याश्राद्धयुगाद्यपरपक्षाधिमासोत्तानाङ्गिरो देवतोपानद्दानविषयेषु बहूनि गभीराणि व्याकरणतथ्यानि प्रतिपादयति । तस्माद् बृहस्पतेः व्याकरणशास्त्रेऽपि प्रगाढपाण्डित्यमासीदिति ज्ञायते ।

कृत्यकौमुदीग्रन्थे काश्यपपञ्चरात्रमोहचूडोत्तरस्कन्दविजयस्कन्दजामलप्रपञ्चसारसोमशम्भुपद्धत्यादयः तन्त्रविषयकग्रन्थाः बहुवारमुद्धृताः । दमनकचतुर्दशीविषये सूक्ष्मातिसूक्ष्मतन्त्रशास्त्रीयतथ्यानां विवरणं यथा— आवाहनाधिवासनसंस्थापनाऽऽमन्त्रणास्त्रैः प्रोक्षणहेतिमन्त्रकवचावगुण्ठनतनुत्राणकुशैः ताड़नवीक्षणवर्मणाभ्युक्षणखातमुद्धारपूरणसंमताशराणुनाकुट्टनास्त्रेण वज्रीकरणशस्त्राणुकव्यादंशपूरकरेचकविन्दुवह्निबीजादीनां प्रयोगेण तथा सर्वत्र तान्त्रिकविधिना पूजाविधिवर्णनेन तन्त्रागमशास्त्रयोः ज्ञानमपि बृहस्पतेः प्रगाढज्ञानमासीदिति नास्ति काचिद् विप्रतिपत्तिः ।

धर्मशास्त्रं ज्योतिःशास्त्रैः सह पूर्णरूपेण सम्बन्धम् । धर्मशास्त्रं विहाय ज्योतिःशास्त्रं क्षणं स्थातुं नार्हति । यतः धर्मशास्त्रेणैव तस्य उपयोगो विहितः । कालविवेकप्रकरणस्य सन्निविष्टत्वाद् दानेऽपि कालस्यावश्यकत्वाद् विशेषतः कृत्यकौमुदीग्रन्थः ज्योतिःशास्त्रेण सह संश्लिष्टत्वात् बृहस्पतिः ज्योतिस्तथ्यानां विवरणं दत्त्वा कृत्यकौमुदीग्रन्थं समृद्धं कृतवान् । कृत्यकौमुद्यां राजमार्तण्ड़-शुद्धिदीपिका-बृहत्संहिता-ज्योतिःशास्त्र -ज्योतिःपराशरादीनां वचनानि बहुशः उद्धृतानि । अशोकाष्टम्यां पञ्चाङ्गेषु तिथेः प्राथम्येन प्रधानत्वाच्चेति उक्तम् । वर्षवृद्धिविषये शुद्धिदीपिकाराजमार्तण्डादीनां वाक्यानि वर्णितानि । शक्रोत्थापनविषये भरण्याः अन्त्यपादाद्यपादादीनां

विचारोऽपि विहितः। अगस्त्योदयकालविषये बृहत्संहितावचनं बृहस्पतिः व्याख्याति। माघसप्तम्यां पुंनामनक्षत्राणि दोलायात्रायामर्यम्णिशब्दस्य, महाज्यैष्ठीयोगे प्राजापत्यनक्षत्रस्य, एकोद्दिष्टश्राद्धकाले पञ्चदशमुहूर्तानां नामानि तथा प्रातर्मध्याह्नादीनां स्वरूपं, सर्वत्र कुतपरोहिण्यादीनां कालानां स्वरूपं च विवेचितम्। ऊनश्राद्धे पुनर्वसुशनैश्चरादीनां योग, पौर्णमासी-निरूपणे विशाखानक्षत्रस्य स्वरूपमिति एते विषयाः आलोचिताः। संक्रान्तिप्रकरणसमुदायश्च ज्योतिःशास्त्रविषयकः। तत्रायनविषुवषडशीति-विष्णुपदा गोलोत्रुटिसंक्रमकालादयः ध्रुवामन्दामिश्राक्षिप्रादयः ज्योतिःशास्त्रीयशब्दाः। ध्रुवामन्दामिश्राक्षिप्रादिभेदेन सप्तविंशतिनक्षत्राण्यपि व्याख्यातानि। अतः बृहस्पतेः ज्योतिःशास्त्रेऽपि प्रकृष्टं पाण्डित्यमासीत्।

कृत्यकौमुद्यामग्निपुराणादित्यैकाम्रपुराण-कापिलसंहिता-कूर्मपुराण-गरुडपुराण-चन्द्रकेतुचरित-देवापुराण-नरसिंहपुराण-नन्दापुराण-नारदीय-पुराण-पद्मपुराण-ब्रह्मपुराण ब्रह्मवैवर्तपुराण-ब्रह्माण्डपुराण-भगवतीपुराण-भविष्यपुराण-भविष्योत्तरपुराण-भागवत-महाभारत--मत्स्यपुराण-मार्कण्डेय-पुराण-मृत्युञ्जयपुराण-रामायण-लिङ्गपुराण-वराहपुराण-वह्निपुराण-वायु-पुराण-विष्णुपुराण-विष्णुधर्मोत्तर--विष्णुरहस्य--शंकरगीता-शाम्बपुराण-शिवपुराण-सनत्कुमारीय-स्कन्दपुराण-हरिवंश-पुरुषोत्तमपुराण-विष्णुधर्म-पारिजात -हरिवंश-पद्मावतीपुराण-शिवधर्म-सौरधर्मोत्तर-शिवरहस्यादीनि सप्तचत्वारिंशत् पुराणान्युदाहृतानि। पुराणान्तर्गताः सार्धसहस्रश्लोकाश्चोद्धृताः। सर्वेषु विषयेषु पुराणवचनानि वर्णितानि। अतः तेषां सम्यक् पुराणज्ञानमासीदिति निःसंशयमेव। तैरर्थशास्त्रमपि पठितमिति मन्ये, नोचेत् विष्णुगुप्तस्य नाम नोदाहर्त्तव्यम्।

कोशग्रन्थेष्वपि तेषां पाण्डित्यमासीत्। यतः अमावास्याश्राद्धप्रकरणे "प्राह्णापराह्णमध्याह्न त्रिसन्ध्यमिति लिङ्गानुशासनवचनादिति। पुनश्च तत्रैव क्षीणशब्दस्य कृशपर्यायत्वेन चन्द्रमसः कार्श्यस्यान्यत्रापीति। प्रायश्चित्तार्थं परिषदुपस्थानविषये उत्कृष्टवर्णेषु वृत्तवत्सु वर्णेषु वर्णशब्दस्यानेकार्थत्वादिति वर्णितत्वात् बृहस्पतिः कोशशास्त्रज्ञोऽप्यासीदिति सिद्ध्यति।

आयुर्वेदादिशास्त्रेष्वपि तेषां ज्ञानमासीदिति ज्ञायते। यतः माघसप्तमीविषयेऽक्षारद्रव्याणि तथा त्रिकटुत्रिफलादयः आयुर्वेदे प्रयुक्ताः शब्दाः तेन व्याख्याताः।

बृहस्पतिः बहुतीर्थं भ्रमितवान्। यतः कृष्णागंगास्नानादिविधौ स्पष्टं लिखति यथा- आन्ध्रदेशे श्रीदुर्गाक्षेत्रे कृष्णागोदावर्योरन्तराले इन्द्रनीलमूलाद्र्योः मध्ये श्रीकृष्णागङ्गातीरे इत्युक्त्वा तेषां तीर्थदर्शनज्ञानस्य परिचयमपि प्रददाति। पुनश्चोत्कलस्यैकाम्रक्षेत्रस्यार्कक्षेत्रस्य पुर्याश्च सूक्ष्मातिसूक्ष्मविवरणं सूचयति। उत्कले घटितानां विशिष्टानां पर्वणां स्थानानां स्नानयोगादीनां समाचारोऽनेनैव विवृतः।

अतः बृहस्पतेः कृतिरपि सर्वशास्त्रात्मकत्वात् प्रसिद्धिं गच्छति। धर्मशास्त्रीय निबन्धसाहित्यं प्रति बृहस्पतेरियं "कृत्यकौमुदी" एकमतुलनीयमविस्मरणीयं दानं वर्त्तते।

कृत्यकौमुदीकर्ता बृहस्पतिः प्रकाण्डविद्वानासीत्। सः सर्वशास्त्रेषु प्रवीणश्चासीदिति प्रागेव प्रपञ्चितम्। तस्मादेव बृहस्पतेः पाण्डित्यस्य प्रौढ़ता ज्ञायते। अतः ज्ञानप्रौढ़ा सा कृत्यकौमुदी विदुषां दृष्टिपथमाकर्षयति। बृहस्पतिविरचिता कृत्यकौमुदी एकः उत्कलीयधर्मशास्त्रीयनिबन्धग्रन्थः। तत्र कालविवेकप्रकरणे वर्णितेषु पर्वसु प्रायशः उत्कलीयपर्वणामेवोल्लेखनं तम्। उत्कलीयाः सर्वैः निबन्धकाराः ससम्मानं तेषां वचनानि स्वीकुन्ति। अतः उत्कलीयैः प्रामाणिकग्रन्थरूपेण कृत्यकौमुदी सर्वदा पूज्या वति। कृत्यकौमुदी पुनः प्राचीननिबन्धत्वेन वरीवर्त्तमाना उत्कलीयग्रन्थसाहित्यस्य समृद्धिसाधनं करोति।

वा

धर्मशास्त्रसाहित्येऽपि देदीप्यमान-रत्नस्वरूपा सा कृत्यकौमुदी धर्मतत्त्वान्वेषिणां जनानां कृतेऽमायामालोकदात्रीव राजतेतराम् । स च बृहस्पतिः कृत्यकौमुद्यामपि उत्कलीयतीर्थानां तथा प्राचीनेतिहासाख्यायिकानां पर्वणाञ्चोल्लेखनं कृत्वा तान् जीवयति स्मारयति च । पुनश्च सर्वदोत्कलीय-पञ्जिकायामपि ग्रन्थस्यास्य प्रमाणवचनानि उत्कलीयधर्मसमाजं सत्पथं निर्दिशति । विदुषामपि एषा कृत्यकौमुदी महदुपकारं साधयति । अतः धर्मसमाजे अस्या कृत्यकौमुद्याः प्रतिष्ठा विराजतेतराम् । इति शम् ।

कृत्यकौमुदी

(मूलग्रन्थः)

कृत्यकौमुदी

[क]श्री नृसिंहाय नमः । [ख]अविघ्नमस्तु । [ग]श्री सरस्वत्यै नमः । [घ]श्री गणेशाय नमः ।

[च]ॐ नमो योगेश्वराय ।

[छ]नमितामरनिकाय मौलिरत्नविचित्रिताः ।
विघ्नं हरन्तु नखरा नृसिंहाङ्घ्रिसमुद्भवाः ।।

[ज]नमः श्रीपतये तुभ्यं श्रीवत्साङ्कितकायिने ।
कृष्णाय कमलाक्षाय सर्वाध्यक्षाय मायिने ।।

श्रुतिस्मृतिपुराणोक्तं कर्मौघं यस्य तृप्तये ।
अनुतिष्ठन्ति विद्वांसस्तस्मै श्रीपतये नमः ।।

ॐ नमः शिवाय

कृत्यकौमुद्याः टिप्पणी—राका

आरीप्सितग्रन्थसमाप्तौ विघ्ननिवारणार्थं ग्रन्थकारः क्रमशः आशीर्वादात्मकं नमस्कारात्मकं वस्तुनिर्देशात्मकं च त्रिविधं मङ्गलं स्वकीयग्रन्थारम्भे निवध्नाति । प्रथमतः आशीर्वादात्मकं मङ्गलं यथा—

तत्र नमितामरनिकायेति । नमिताः नम्रीकृताः अमरनिकायस्य देवगणस्य ये मौलयः शिरांसि तेषु यानि रत्नानि तैः विचित्रिताः नानावर्णमणिप्रतिविम्बसुशोभिताः नृसिंहाङ्घ्रिसमुद्भवाः भगवतो नृसिंहस्य चरणजाताः नखराः नखाः विघ्नं हरन्तु — ग्रन्थस्यारम्भात् समाप्तिं यावत् ये ये विघ्नाः आपतिष्यन्ति तान् सर्वान् नाशयन्तु इत्यर्थः ।

पाठान्तरम्—(क) पाठोऽयं खगघङ्च पु. नास्ति । (ख) पाठोऽयं घङ्च पु. नास्ति ।
(ग) पाठोऽयं खघङ्च पु. नास्ति । (घ) पाठोऽयं कगघङ्च पु. नास्ति ।
(च) पाठोऽयं कखग पु. नास्ति । (छ) श्लोकोऽयं खगघङ्च पु. नास्ति ।
(ज) श्लोकोऽयं खघङ्च पु. नास्ति ।

समुद्गता वेदपयोधिजन्मनः स्मृतिव्रजेन्दोः सुकृताब्धिवर्धना ।
धिनोतु सम्बित्ति–कुमुद्वती–सुहृत् सुधीचकोरान्मम कृत्यकौमुदी ॥

नमस्कारात्मकं मङ्गलं यथा— नमः श्रीपतये इति । श्रीवत्साङ्कितकायिने श्रीवत्सो महत्त्वलक्षणं श्वेतरोमावर्तविशेषो तेन अङ्कितः चिह्नितः यः कायः स विद्यते अस्य इति श्रीवत्साङ्कितकायि, तस्मै सर्वाध्यक्षाय आब्रह्मस्तम्बान्तानाम् अध्यक्षः कृताकृतनिरीक्षकः तस्मै, अध्यक्षत्वं चोक्तं गीतायाम्— (९–२०)

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।

मायिने— मायाविने । तस्य मायावित्वमपि उक्तं गीतायाम्— (७–४)

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥

कमलाक्षाय पङ्कजनेत्राय, कृष्णाय वासुदेवाय, तुभ्यं श्रीपतये लक्ष्मीपतये नमः ।

अन्यन्नमस्कारात्मकं मङ्गलं यथा— श्रुतिस्मृतीति । श्रुतिस्मृतिपुराणोक्तं श्रुतिषु ऋग्यजुस्सामाथर्वसु, स्मृतिषु मनुयाज्ञवल्क्याद्युक्तासु, पुराणेषु ब्रह्म–ब्रह्मांड–ब्रह्मवैवर्तादिषु उक्तं प्रतिपादितं कर्मौघं कर्मसमूहं विद्वांसः ज्ञानिनः, यस्य श्रीपतेः तृप्तये सन्तोषाय, अनुतिष्ठन्ति आचरन्ति तस्मै श्रीपतये नमः । एतेन ग्रन्थकारः स्वकृतग्रन्थप्रतिपाद्यस्य सदाचारस्य भमवत्तृप्तिहेतुत्वं निर्दिशन् स्वग्रन्थस्यापि उपादेयतां सूचयति ।

अन्ते वस्तुनिर्देशात्मकं मङ्गलं यथा— समुद्गतेति । वेद एव पयोधिः समुद्रः तस्मात् जन्म यस्य तस्मात् स्मृतिव्रजेन्दोः स्मृतीनां मनुयाज्ञवल्क्याद्युक्तानां व्रजः समूहः स एव इन्दुः चन्द्रः तस्मात् समुद्गता समुद्भूता सुकृताब्धिवर्धना सुकृतं पुण्यमेव अब्धिः सागरः तस्य वर्धनं यया सा सम्बित्तिः सम्यक् ज्ञानमेव कुमुद्वती कैरवं तस्याः सुहृत् प्रिया सा प्रसिद्धा, मम मत्कृता कृत्यकौमुदी कृत्यानि विधेयानि कर्माणि कौमुदी ज्योत्स्ना इव प्रकाशयन्तीति तन्नामाग्रन्थविशेषः सुधीचकोरान् सुधीरूपचकोरान् तन्नामजीवविशेषान् धिनोतु प्रीणयतु इति भावः ।

कालविवेकप्रकरणम्

अशोकाष्टमीनिर्णयः

तत्र चैत्रशुक्लपक्षादिमासग्रहणादादावशोकाष्टमीनिर्णयः —

तत्र लिङ्गपुराणे[1]—

चैत्रे मासि सिताष्टम्यां ये पिवन्ति पुनर्वसौ ।
अशोकस्याष्टकलिका न ते शोकमवाप्नुयुः ॥

अत्राष्टमीपुनर्वसुयोग उत्तमः । भेदे तु प्रथमपठितस्य मुख्यत्वात् पञ्चांगेषु तिथेः[2] प्राथम्येन प्रधानत्वाचाष्टम्यामेव ।

अशोककलिकापानमन्त्रो [3]यथा—

त्वामशोकहराभीष्ट मधुमाससमुद्भव ।
पिवामि शोकसन्तप्तो मामशोकं सदा कुरु ॥

यदेयं बुधवासरे स्यात्तदा विशेषः [4]पृथ्वीचन्द्रोदये—

चैत्रमासि सिते पक्षे वृषलग्ने पुनर्वसौ ।

स्मृतयः वेदेभ्यो निर्गताः । तासां विचारः अस्यां कृत्यकौमुद्यामस्ति । अस्याः पठनेन आचरणेन च धर्मो वर्द्धिष्यते । सम्यक् ज्ञानं च लप्स्यते । ततः सुधियः एतां कृत्यकौमुदीं पठित्वा प्रीता भवन्तु इति कारणनिर्देशपुरःसरमाशास्ते ग्रन्थकारः ।

(1) राजमा. पृ. 127, ए. च. अ. 11 पृ. 92

(2) पञ्चांगे तिथेः प्राधान्यमुक्तं जयसिंहकल्पद्रुमे—पृ. 289—

तिथिः शरीरं देवस्य तिथौ नक्षत्रमाश्रितम् ।
तस्मात्तिथिं प्रशंसन्ति न नक्षत्रं तिथिं विना ॥

(3) ए. च. अ. 11 पृ. 92, का. वि. पृ. 422, का. सा. पृ. 76

(4) व्रतरा. पृ. 173, ए. च. अ. 11 पृ. 91, का. सा. पृ. 77

स्रोतः स्नातो बुधाष्टम्यां [1]वाजपेयफलं लभेत् ॥
अशोकैरर्चयेदुग्रमशोककलिकाः पिवेत् ॥

॥ इति अशोकाष्टमीनिर्णयः ॥

अथ दमनकचतुर्दशी

तत्र [2]स्कन्दपुराणे—

मधुमासे तु सम्प्राप्ते शुक्लपक्षे चतुर्दशी ।
प्रोक्ता दमनभञ्जीति सिद्धिदा तु महोत्सवा ॥

[3]वायुपुराणे— [4]सर्वा चतुर्दशी पूज्या युक्ता पूर्णेन्दुना सह ।
अपूज्या पूर्णिमायुक्ता मधौ शुक्लचतुर्दशी ॥
मधुमासे सिते पक्षे [5]कामक्रीड़ातिथिश्च या ।
तत्र त्रयोदशी विद्धा भवेत् पूज्या चतुर्दशी ॥

[6]लिङ्गपुराणे— अकरणे च दोषोऽस्ति करणे तादृशं फलम् ।
कृत्वा दमनकं पूर्णं ब्रह्महाऽपूजने भवेत् ॥
अकृते च सदोद्वेगो जायते निश्चितं मुने ।
कृत्वा लक्षाश्वमेधस्य लभते फलमुत्तमम् ॥

विधिश्च सोमशम्भुपद्धतौ यथा—

हरकोपात् पुरा जातो भैरवो दमनाह्वयः ।
हतास्तेनासुराः सर्वे दानवाश्च महावलाः ॥

---

(1) वाजपेयस्य फलं स्वाराज्यम् । "वाजपेयेन स्वाराज्यकामो यजेत" इत्युक्तेः ।

(2) का. वि. पृ. 469, ए. च. अ. 11 पृ. 94

(3) रा. मा. पृ. 127, ए. च. अ. 11 पृ. 64

(4) चतुर्दश्या च पूर्णिमा इति सामान्यविषयकनिगमवचनस्य अनेन वायुपुराणीयविशेषवचनेन वाधः ।

(5) कामक्रीडातिथिः— त्रयोदशीतिथिः ।

(6) का. सा. पृ. 133

प्रातर्नाथ शिवेनोक्तो विष्टपो भव भूतले ।
तां तनुं त्वमनुप्राप्य मद्भोगाय भविष्यसि ॥
पूजयिष्यन्ति ये मर्त्याः देवं त्वत्पल्लवादिभिः ।
ते यास्यन्ति परं स्थानं दमनं त्वद् प्रभावतः ॥

ये पुनर्न करिष्यन्ति दामनं पर्व मानवाः ।
तेषां तु [1]चैत्रमासोत्थं हृतं पुण्यफलं मया ॥

स्वच्छन्दे भैरवे तन्त्रे यद्यपीदमुदाहृतम् ।
तथापीह समानत्वात् सिद्धान्तेऽप्युपपद्यते ॥
सप्तम्यां वा त्रयोदश्यां गत्वा दमनकान्तिकम् ।
शोधयित्वा तमस्त्रेण पूजयेत् संहिताणुभिः ॥

संहिताणुभिर्मूलमन्त्रहृदयशिरःशिखाकवचास्त्रमन्त्रैः ।

अथ सम्बोधयेद् व्यामं भववाक्येन मन्त्रवित् ।
हरप्रसादसम्भूत त्वमत्र सन्निधौ भव ॥
शिवकार्यं समुद्दिश्य नेतव्योऽसि शिवाज्ञया ।
एवं दमनमामन्त्र्य संरक्ष्य भवनं व्रजेत् ॥

यदि दूरं तमानीय समूलं मृत्तिकान्वितम् ।
पुनरारोप्य मृत्पूर्णे पात्रे [2]संस्तिम्य वारिणा ॥
गृहेऽप्यामन्त्रणं कुर्यात् पूर्वोक्तविधिना ततः ।
सायाह्नसमये प्राप्ते विदध्यादधि[3]वासनम् ।
आहृत्य यागवस्तुनि कृतस्नानादिसत्क्रियम् ॥
यथाविधि समभ्यर्च्य सूर्यशंकरपावकान् ॥

व्यामं—दमनम् । स्नानादिक्रिया नित्यैव न तु नैमित्तिकी ।

---

(1) चैत्रमासोत्थम्—चैत्रमासगतम् ।

(2) संस्तिम्य—आर्द्रीकृत्य ।

(3) अधिवासनं—यज्ञारम्भात् पूर्वं देवादीनामावाहनं पूजनं च ।

स्नात्वा नित्यक्रियां कृत्वा शुक्लाम्बरधरः शुचिः ।
एकचित्तो जितक्रोधो मौनी यागगृहं व्रजेत् ॥

इति स्कन्दविजयागमनवचनात् । यथाविधीति आदौ यागशालाग्रतः पृथक् स्थाने सूर्यं संपूज्य प्रणम्य । विधिना क्रमेण ।

शंकरं पावकं चापि वास्तुनाथं च पूजयेत् ।

तद्यथा— सप्तम्यां वा त्रयोदश्यां कृतनित्यक्रियः शुचिः ।
भूषयेत् पुष्पवस्त्राद्यैः सायाह्ने यागमन्दिरम् ॥
कृत्वा नैमित्तिकीं सन्ध्यां विशेषेणैव तर्पणम् ।
परिगृहीतभूभागे [1]सूत्रिते सूर्यमर्चयेत् ।
आचम्य [2]सकलीकृत्य प्रणवार्घकरो गुरुः ॥
द्वाराण्यस्त्रेण सम्प्रोक्ष्य पूर्वादिक्रमतोऽर्चयेत् ॥

ॐ शान्तिकलाद्वाराय नमः इति पूर्वम् । ॐ विद्याकलाद्वाराय नमः इति दक्षिणम् । ॐ प्रवृत्तिकलाद्वाराय नमः इति पश्चिमम् । ॐ प्रतिष्ठाकलाद्वाराय नमः इति उत्तरम् । तथैव तत्पार्श्वयोः-ॐ हां नन्दिने नमः । ॐ हों महाकालाय नमः । ॐ हां भृङ्गिणे नमः । ॐ हां विनायकाय नमः । ॐ हां वृषाय नमः । ॐ हां स्कन्दाय नमः । ॐ हां देव्यै नमः । ॐ हां चण्डाय नमः । इति प्रतिद्वारं द्वौ द्वौ पूजयेत् । सकलीकृत्य कराङ्गन्यासं कृत्वा नित्यवद् द्वारपालादीनभ्यर्च्य विधिनान्तः प्रविश्य पश्चिमद्वारं वास्तुनाथं च पूजयेत् । विधिनान्तः प्रविश्येति । विधिस्तु—

दिव्यदृष्टिनिपातेन दिव्यान् वै परिपन्थिनः ।
ज्वलन्नाराचशस्त्रेण पुण्यं क्षिप्त्वान्तरिक्षगान् ॥
[3]दक्षपार्श्वे त्रिभिर्घातैर्भूमिष्ठान् त्रिविधानपि ।

---

(1) सूत्रिते— कृतमण्डलविन्यासे इत्यर्थः ।

(2) सकलीकृत्य— तदाख्यमुद्रां प्रदर्श्य । मुद्रायाः लक्षणं मुद्राप्रकाशिकायां (पृ. 4) वर्त्तते ।

(3) दक्षपार्श्वे— दक्षिणभागे ।

विघ्नानु[1]द्वासयेन्मन्त्री[2] यागमण्डपमध्यतः ॥
[3]देहलीं लङ्घयेत् किञ्चित् वामशाखां समाश्रयन् ।
प्रविश्य दक्षपादेन विन्यस्यास्त्रमुदुम्बरम् ॥ इति ।

वास्तुनाथं च पूजयेत् । ॐ हां वास्त्वधिपतये ब्रह्मणे नम इति ब्रह्मस्थाने पुष्पं दद्यादिति ।

भूतशुद्धिं विशेषार्घ्यं स्वशिरःप्रोक्षणादिकम् ।
विधाय [क]यज्ञसम्भारं पूर्ववत् परिमन्त्रयेत् ॥

विशेषार्घ्यमित्यादि । तद्यथा—

एकं स्वर्णादिपात्राणां पात्रमस्त्राम्बुशोधितम् ।
बिन्दुप्रसृतमानीय रूपतोयाक्षतादिना ॥
हृदा पूर्य षडङ्गानि पूजयित्वाभिमन्त्रयेत् ।
संरक्ष्य [4]हेति मन्त्रेण कवचेनावगुण्ठयेत् ॥
रचयित्वाऽर्घ्यमष्टाङ्गं रोचयेद् धेनुमुद्रया ।
आपःक्षीरं कुशाग्राणि तण्डुलाः सुमनस्तिलाः ॥
अर्घ्योऽष्टाङ्ग इह प्रोक्तो यवैः सिद्धार्थकैः सह ।
अभिषिचेदथात्मनं मूर्ध्नि तत्तोयबिन्दुना ॥
तत्रस्थं यागसम्भारं प्रोक्षयेदस्त्रवारिणा ।
अभिमन्त्र्य हृदा पिण्डैस्तनु[5]त्राणेन वेष्टयेत् ॥
दधिदूर्वाक्षतैः पुष्पैः चन्दनेन हृदादिभिः ।
शिवहस्ते विधायेत्थं स्वशिरस्यधिरोपयेत् ॥

---

(1) उद्वासयेत्—निवारयेत् । (2) मन्त्री—याजकः ।

(3) देहलीं— द्वारस्य निम्नभागम्, "गृहावग्रहणी देहली" इत्यमर (2-2-13) स्मरणात् ।

(4) हेतिमन्त्रः—अस्त्रमन्त्रः, अस्त्राय फट् इति अंशः ।

(5) तनुत्राणेन— मन्त्रस्य कवचभागेन ।

पाठान्तरम्— (क) सर्व इति ख पुस्तकपाठः ।

शिवोऽहमादि सर्वज्ञो मम यज्ञे प्रधानता ।
तदर्थं भावयेद् देवं ज्ञानखड्गकरो गुरुः ॥

शिवहस्तलक्षणं यथा—

गन्धैर्मण्डलकैः स्वीये विदध्याद् दक्षिणे करे ।
विधिना चार्चयेदीशमिदं स्यात् शिवहस्तकम् ॥

ज्ञानखड्गलक्षणं यथा मोहचूडोत्तरे—

[1]ऋत्वक्षयदलैर्दर्भैर्ज्ञानांसि [2]तालसम्मितम् ।
सप्ताभिमन्त्रितं कृत्वा वामहस्ते निवेशितम् ॥
नैऋत्यादि समासाद्य प्रक्षिपेदुदगाननम् ।
अर्घ्याम्बु पञ्चगव्यं च समन्तान् मखमण्डपे ॥
चतुष्पथान्तसंस्कारैः वीक्षणाद्यैः सुसंस्कृते ।
निक्षिप्य विकिरांस्तत्र कुशेनैवोपसंहरेत् ॥

वीक्षणादयो यथा—

निरीक्षणादिकुण्डस्य प्रोक्षणं ताडनं कुशैः ।
विदध्यादस्त्रमन्त्रेण वर्मणाभ्युक्षणं मतम् ॥
खड्गेन खातमुद्धारं पूरणं समतामपि ।
कुर्वीत वर्मणा सेकं कुट्टनं तु शराणुना ॥
सम्मार्जनं समालेपं कालरूपप्रकल्पनम् ।
त्रिसूत्रीपरिधानं च वर्मणाभ्यर्चनं हृदा ॥
रेखात्रयमुदङ्कुर्यात् एकां पूर्वाननामथ ।
कुशेन शिवशस्त्रेण यद्वा तासां विपर्ययः ॥
वज्रीकरणमस्त्रेण हृदा दर्भैश्चतुष्पथम् ।

विकिरा यथा— लाजाश्चन्दनसिद्धार्थभस्मदूर्वाक्षतं कुशाः ।

---

(1) ऋत्वक्षयदलैर्दर्भैः—षड्भिरखण्डितैर्दर्भैः ।

(2) तालसम्मितं—प्रसारितयोरंगुष्ठमध्यमयोरन्तरालः तालः अमर । (2-6-83)

विकिरान् शुद्धलाजान् वेति ।

तानीशदिशिवर्धन्यामासनायोपकल्पयेत् ।
नैर्ऋते वास्तुगीर्वाणान् द्वारे लक्ष्मीं प्रपूजयेत् ॥
पश्चिमाभिमुखं कुम्भं शालिधान्योपरि स्थितम् ।
प्रणवेन वृषारूढां सिंहस्थां वर्धनीं ततः ॥

प्रणवेन सर्वधान्योपरि स्थितमिति सम्बन्धः ।

कुम्भं साङ्गं शिवं देवं वर्धन्यामस्त्रमर्चयेत् ।
दिक्षु शक्रादिदिक्पालान् विष्णुब्रह्मावसानिकाम् ॥
वर्धनीं सम्यगादाय घटपृष्ठानुगामिनीम् ।
शिवाज्ञां श्रावयेन्मन्त्री पूर्वादीशान्तगोचरम् ॥
अविच्छिन्नपयोधारा मूलमन्त्रमुदीरयेत् ।
समन्त्रां भ्रामयेदेनां रक्षार्थं शस्त्ररूपिणीम् ॥

घटपृष्ठानुगामिनीम् इति । घटपृष्ठमनुगामि यस्यास्तां शिवाज्ञामिति ।

यथा मोहचूडोत्तरे—

शिवयागः समारब्धस्तद्भक्तानां शिवाज्ञया ।
रक्षणीयोऽन्तरायेभ्यो लोकपालैः समाहितैः ॥
पूर्वं कलशमारोप्य शस्त्राणुं तस्य वामतः ॥

शस्त्राणुर्वर्धनीम् ।

समग्रासनके कुम्भे यजेद्देवं स्थिरासनम् ।

समग्रासनके आधारशक्त्युपपद्यते ।

वर्धन्यां प्रणवस्थायामायुधं तदनुद्वयोः ।
[1]भर्गलिंगसमारोपं विदध्याल्लिंगमुद्रया ॥

द्वयोः कुम्भवर्धन्योः । भर्गलिंगसमारोपमिति ।

अंगुष्ठेन स्पृशेत् कुम्भं हृदा स्पृष्ट्वा तु वर्धनीम् । इति मन्त्रेण ।

---

(1) भर्गलिंगसमारोपम्— भर्गलिंगमुद्राभ्यां समारोप्य ।

कुम्भे निवेद्य गन्धादि मूलमन्त्रजपं तथा ।
तद्दशांशेन वर्धन्यां रक्षां विज्ञापयेदपि ।
यथैव कृतयत्नेन भगवन्मखमन्दिरम् ॥
रक्षणीयं जगन्नाथ सर्वाभयवरप्रद ।
गणेशं वायुदिग्भागे पूजयित्वा चतुर्भुजम् ॥
पद्मिनीपत्रसंकाशं सायुधं विघ्नवारणम् ।
पञ्चामृतादिभिर्देवं स्नापयित्वा विधानतः ॥

विधानं यथा— पयोदधिघृतक्षौद्रशर्कराद्यैरनुक्रमात् ।
ईशादिमन्त्रितैर्मुक्त्यै भूत्येतेषां विपर्ययः ॥
तोयघूपान्तरैः सर्वैः मूलेन[1] स्नापयेच्छिवम् ॥ इति ।
यजेत् पञ्चोपचारेण पूर्वोक्तविधिना बुधः ।
कृत्वा कुण्डादिसंस्कारानभ्यर्च्य शिवपावकम् ॥

पूर्वोक्तविधिना कुण्डादिसंस्कारान् कृत्वेति सम्बन्धः । विधिस्तु होमविधानादनुमन्तव्यो, ग्रन्थगौरवभयान्न लिखितः ।

॥ संक्षेपविधिर्लिख्यते ॥

यत्तु संक्षेपतो दृष्टं लीलावत्यां शिवागमे ।
कुण्डे वा स्थण्डिले वाऽपि वह्निकार्यं तदुच्यते ॥
चक्षुषा न्यस्तमूलेन वीक्ष्य प्रोक्ष्य शराणुना ।
हूं फड़न्तेन संताड्य क्रव्यादंशं परित्यजेत् ॥

अभ्युक्ष्य—वर्मणा । ॐ हां हं हां वह्निमूर्त्तये नमः ।
संहारमुद्रयानेन विन्दौ वह्निं निवेशयेत् ।
पूरकेण ततो नाभौ विश्राम्य भवमुद्रया ॥
रेचकेण प्रयोगेण ॐ हां हूं वह्नये नमः ।
आग्नेयमनुना वीजं प्रदीपकलिकोपमम् ॥

---

(1) मूलेन—मूलमन्त्रेण ।

कुण्डस्थे पावके न्यस्य पंच ब्रह्माणि पूजयेत् ।

ब्रह्माणि—तत्पुरुषादीनि । अग्नये स्वाहा । सोमाय स्वाहा । अग्नीषोमाभ्यां च स्वाहा । अग्नये स्विष्टकृते स्वाहा । आहुतिचतुष्टयं हुत्वा ।

आहुतीः पञ्चमूलेन जुहुयात्तदनन्तरम् ।
[1]ध्रुवाद्येन नमोऽन्तेन शिवाग्निभ्यामिति न्यसेत् ॥
ब्रह्माणं शंकरं विष्णुमनन्तं च हृदार्चयेत् ॥
पूर्वाद्यनन्तपर्यन्तं दिक्षु कुण्डाद् वहिः क्रमात् ॥
ततश्चाधारशक्त्यादि शिवमभ्यर्च्य पूर्ववत् ।
जुहुयान्मूलमन्त्रेण शक्त्यांगैश्च दशांशतः ॥
शिवं विसृज्य भूरादित्रयस्य प्रणवान्विताम् ।
क्रमेण यौगपद्येन दत्त्वाहुतिचतुष्टयम् ॥
ॐ हां हुं हृदयायेति पठित्वा मनसा श्रुतम् ।
वह्निं च विसृजेदेवमिति लीलावतीमतमिति ॥ इति ।
विधिवच्च ऋचं कृत्वा सम्यगाहुतिशोधितम् ।
देवग्न्यात्मविभागेन द्रव्यं तद् विभजेत् त्रिधा ॥
दत्त्वा भागौ शिवाग्निभ्यां संरक्षेद् भागमात्मनः ।
पश्चिमे देवदेवस्य तस्य मूलं हृदायुतम् ॥
सद्यो जातेन मन्त्रेण ददाति [2]हृदयेन वा ।
[3]वामेन [4]शिरसा वापि नालं धात्रीं तथोत्तरे ॥
दक्षिणे भस्मपत्रं च शिखया रूपिणाथवा ॥

रूपिणोऽघोरमन्त्रेण ।

[5]पुंसा वा [6]वर्मणा प्राच्यां संपूज्य दन्तधावनम् ।

---

(1) ध्रुवः—ॐकारः । (2) हृदयेम—हृदयमन्त्रेण । मन्त्रो यथा शु. यजु. 2–13

(3) वामेन—वामदेवमन्त्रेण ।

(4) शिरसा—शिरःमन्त्रेण । मन्त्रो यथा शु. यजु. (33–8)

(5) पुंसा—तत्पुरुषमन्त्रेण ।

(6) वर्मणा—कवचमन्त्रेण । मन्त्रो यथा—शु. यजु. (17-49)

फलमूलेन गायत्र्या ऐशान्यां गन्धसंयुतम् ।
पश्चाङ्गमञ्जलौ कृत्वा [1]व्योमपुष्पाक्षतानिलम् ।।
विज्ञापयेज्जगन्नाथं दमनारोपणं प्रति ।
आमन्त्रितोऽसि देवेश प्रातःकाले मया प्रभो ।।
कर्त्तव्यं तु यथालाभं पूर्णमस्तु तवाज्ञया ।
इति विज्ञाप्य देवस्य मस्तके कुसुमाञ्जलिम् ।
संयोज्य मूलमन्त्रेण विदधीत जपादिकम् ।।

जपादिकमित्यादिशब्देन स्तोत्रप्रणामादीनां ग्रहणम् । यथा पवित्रकाधिवासनविधौ–

जपं स्तोत्रं प्रणामं च कृत्या शंभुं क्षमापयेत् ।
शेषं पात्रे विनिक्षिप्य द्वितीयेनापि घापितम् ।।
पवित्रकं विधानेन कवचेनावगुण्ठयेत् ।

पवित्रकविधानं यथा—

पूते वंशादिजे पात्रे विन्यस्यास्त्रं संसंकटम् ।
हृदयञ्च ततस्तत्र पवित्राण्यधिरोपयेत् ।।
कलाभिर्वा षडंगेन मन्त्रैर्वा ब्रह्मवाचकैः ।
अथवा मूलमन्त्रेण पवित्राण्यभिमन्त्रयेत् ।।
हृदयं कवचं शस्त्रं तेषामुपरि योजयेत् ।

संवेष्ट्य वर्ममन्त्रैरिति । सङ्कटम्—सकवचम् ।

एवं संरक्षितं कृत्वा शिवाय विनिवेदयेत् ।

शिवाय—कुम्भस्थाय । तथा च स्कन्दविजये—

संपूज्य दमनं पश्चात् कुम्भस्थाय निवेदयेत् ।
रक्षणीयमिदं शम्भो दमनं चाधिवासितम् ।
हविस्तदनुभुंजीत पवित्रं पापनाशनम् ।।
शिवाग्रे जागरं कुर्याद् ध्यानगानजपादिभिः ।

---

(1) व्योमपुष्पाक्षतान्वितम्— अत्र व्योम नाम जलम्, "व्योमवारिणि चाकाशे भास्करस्यार्चनाश्रये" इति मेदिनी (92-36) स्मरणात् ।

॥ अधिवासविधिः ॥

प्रातः स्नात्वा जपन्नथ अष्टपुष्पां विसर्जयेत् ।

अष्टपुष्पिका यथा—

पीठमूर्त्तिशिवाङ्गानां पूजा स्यादष्टपुष्पिका ॥ इति ।
नित्यां नैमित्तिकीं चैव कृत्वा पूजां विशेषतः ।
दमनं पूजयेद्देवं पञ्चाङ्गैरविखण्डितैः ॥
शेषमञ्जलिमादाय दूर्वागन्धाक्षतान्वितम् ॥
ध्यायन्नभिमुखं देवं पञ्चवक्त्रं सदाशिवम् ॥
आत्मविद्या शिवैस्तत्त्वैर्मूलाद्यैरीश्वरान्तगैः ।
पवित्रकं विधानेन क्रमेण शिवमर्चयेत् ॥

ॐ हों आत्मतत्त्वेश्वराय शिवाय नमः । ॐ हों विद्यातत्त्वेश्वराय शिवाय नमः । ॐ हों शिवतत्त्वेश्वराय शिवाय नमः ।

पवित्रकस्य विशेषो यथा—

आत्मतत्त्वे प्रकृत्यान्ते पालिते पद्मयोनिना ।
मूलमन्त्रान्तमुच्चार्य पवित्रेणार्चयेच्छिवम् ॥
विद्यातत्त्वे च विद्यान्ते विष्णुकारणपालिते ।
ईश्वरान्तं तमुच्चार्य पवित्रमधिरोपयेत् ॥
शिवान्ते शिवतत्त्वेऽथ रुद्रकारणपालिते ।
शिवान्तमन्त्रमुच्चार्य तस्मै देयं पवित्रकम् ॥ इति ।

यथा— आत्मविद्याशिवैः प्रोक्तं मुमुक्षूणां पवित्रकम् ।
विनिर्दिष्टं मुमुक्षूणां शिवविद्यात्मभिः क्रमात् ॥ इति ॥

यथा— सर्वकारणपाल्येषु सर्वतत्त्वेषु सुव्रत ।
मूलं जपान्तमुच्चार्य दद्याद् गङ्गावतारकम् ॥ इति ।

गङ्गावतारकस्थाने चतुर्थपुष्पाञ्जलिः । अथ चतुर्थपुष्पाञ्जलिमन्त्रः —

ॐ हों मखेश्वराय मखं पूरय पूरय शूलपाणये नमः ।
प्रणम्य शिवमभ्यर्च्य पावकं च विधानवत् ॥

विज्ञापयेच्छिवं भक्त्या वांछितार्थफलप्रदम् ।
भगवन्नतिरिक्तं वा हीनं वा यन्मया कृतम् ।।
सर्वं तदस्तु संपूर्णं पर्व दामनकं मम ।।

अभ्यर्च्य पावकं च विधानवदिति । पूर्वोक्तमन्त्रचतुष्टयेन पुष्पाञ्जलिचतुष्टयं पावकाय च दत्त्वेत्यर्थः । तथा पवित्रकविधौ—

प्रणम्य क्षपयित्वेशं गत्वा कुण्डान्तिकं व्रती ।
पावकस्थे शिवेऽप्येवं पवित्राणां चतुष्टयम् ।।
समारोप्य समभ्यर्च्य पुष्पधूपाक्षतादिभिः ।
एवं यागविधिं कृत्वा कुर्वीत गुरुपूजनम् ।।
परितोषकरं पश्चाद् द्विजादीनपि [क]तर्पयेत् ।।
ब्रह्मचारी गृहस्थो वा य इमं कुरुते विधिम् ।
जपपूजादिकं तस्य सफलं चैत्रमासकम् ।।

इति दमनकचतुर्दशी ।

मेषसंक्रान्तिकृत्यम्

तत्र [1]विष्णुधर्मोत्तरे—

मेषसंक्रमणे भानोर्मेषदानं महाफलम् ।

देवता अस्य वरुणः ।

सुमन्तुः— विप्रेभ्यः पादुके च्छत्रं पितृभ्यो [2]विषुवे शुभान् ।
सक्तूंश्च शर्करामिश्रान् दद्यात् सजलशर्कराः ।।
सभासु यच्च पानीयं सान्नं दद्यात् [3]प्रपासु च ।
मत्प्रीणनाय मासांस्त्रीन् मम लोके महीयते ।।
ग्रामे वा नगरे वापि मार्गे वा तोयवर्जिते ।

---

(1) विष्णुधर्मोत्त. (3–319–38)

(2) विषुवे—मेषतुलसंक्रान्त्योः । (3) प्रपासु—जलछत्रेषु ।

पाठान्तरम्— (क) पूजयेत् इति ख पुस्तकपाठः ।

यः प्रपां कारयेद् रम्यां स पुण्यां गतिमाप्नुयात् ॥
कपिलाकोटिदानस्य यत् पुण्यं हि विधीयते ।
तत्पुण्यफलमाप्नोति पानीयं यः प्रयच्छति ॥

पादुके—उपानहो, दैवतमनयोः ऋतानांगिरसौ, छत्रस्य– प्रजापतिर्देवता । सक्तूनां प्रजापतिः । शर्कराणां वरुणः ।

प्रपादाने वाक्यमिदम्—

प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता ।
अस्याः प्रदानात् तृप्यन्तु पितरश्च पितामहाः ॥

इति पठित्वा— ॐ अद्यादि मासत्रयं यावत् तृषितोपस्थितपथिकादिनानामनुष्येभ्यः प्रतिदिनमवारितपानीयानि विशेषतः निदाघकाले वारिदानार्थमिमां तोयवर्जितमार्गकारितां पानीयशालिकां वरुणदेवतामिन्द्रलोकप्राप्तिकामोऽहमुत्सृजे । मासत्रयं प्रपादानाशक्तेन मासद्वयमपि देया । यथा [1]महाभारते—

प्रपाश्च कार्याः पानार्थं नित्यन्तु द्विजसत्तम ।
भूतेष्वथ प्रदीयेत पानीयं निर्विशेषतः ॥
निदाघकाले पानीयं यस्य तिष्ठत्यवारितम् ।
सदुर्गविषमं कृच्छ्रं न कदाचिदवाप्नुयात् ॥

अत्र निदाघ इत्यभिधानाज्ज्येष्ठाषाढमासद्वये प्रपाकार्येत्यवगम्यते । प्रपायामवान्तरोपकरणदानेऽपि फलमुक्तं [2]विष्णुधर्मोत्तरे—

प्रपां पथि तथा कृत्वा नाकलोके महीपते ।
प्रपास्थानं शुभं कृत्वा स्थानमाप्नोति शाश्वतम् ।
तस्य स्थानात्तथा न्यासात् फलवृद्धिः प्रकीर्त्तिता ।
तस्योपलेपनं कृत्वा सर्वपापैः प्रमुच्यते ॥
रज्जुं दत्त्वा प्रपास्थाने मोक्षो भवति मानवः ।
[3]वारिधानीं तथा दत्त्वा तदेव फलमाप्नुयात् ॥

---

(1) महा. अनु. (67-2, 64-6) (2) विष्णुधर्मोत्तर (3-298-4-9)
(3) वारिधानीम्—जलभाण्डम् ।

कुम्भप्रदानात् भवति सदा पूर्णमनोरथः।
प्रपायां च तथा दत्त्वा पुरुषं परिचारकम् ॥
सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते ।
वर्धमानानि यो दद्यात् प्रपायां द्विजसत्तमान् ॥
त्रिविधां वृद्धिमाप्नोति तेजसा यशसा श्रिया ॥

वर्धमानानि—शरावानि । भविष्योत्तरे—

प्रपां दातुमशक्तैस्तु विशेषाद् धर्ममिप्सुभिः ।
प्रत्यहं धर्मघटकः [1]कर्पट्या वेष्टिताननः ॥
ब्राह्मणस्य गृहे देयः शीतामलजलशुचिः ।
तस्यैवोद्यापनं कार्यं मासि मासि नरोत्तम ॥
मण्डकावेणिकाभिश्च पक्वान्नैः सर्वकामिकैः ।
ऊर्ध्वं च शंकरं विष्णुं ब्रह्माणं वासवं तथा ॥
संतिलं प्रोक्षयित्वा तु मन्त्रेणानेन मानवः ।
एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ॥
अस्य प्रदानात् सफला मम सन्तु मनोरथाः ॥

धर्मघटप्रदानमन्त्रोऽयम्—

अनेन विधिना यस्तु धर्मकुम्भं प्रयच्छति ।
प्रपादानफलं सोऽपि प्राप्नोतीह न संशयः ॥
धर्मकुम्भप्रदानेऽपि ह्यशक्तो यः पुमान् भवेत् ।
तेनाश्वत्थतरोर्मूले सेव्यं नित्यं यतात्मना ॥
अश्वत्थरूपी भगवान् प्रीयतां मे जनार्दनः ।
इत्युच्चार्य नमस्कृत्य प्रत्यहं पापनाशनम् ॥
यः करोति तरोर्मूले सेकं मासचतुष्टयम् ।
सोऽपि तत्फलमाप्नोति श्रुतिरेषा सनातनी ॥
येन केन प्रकारेण जलं दद्यात् द्विजातिषु ।

---

(1) कर्पटया—वस्त्रखण्डेनेत्यर्थः ।

तदुक्तं नन्दिपुराणे—

योऽपि कश्चित् तृषार्त्ताय जलपानं प्रयच्छति ।
स नित्यतृप्तो वसति स्वर्गे युगशतं नरः ॥

अत्र फलवाहुल्यात् तृषार्त्ताय [1]इत्येकवचनं न विवक्षितम् । संकल्पाद् यथाकालमुपस्थितेभ्यस्तृषितेभ्यो जलं प्रदातव्यमित्यर्थः ।

विष्णुधर्मोत्तरे—यानि यानि सुगन्धीनि ।
सुगन्धद्रव्ययुतानि सुगन्धीनि दैवतोऽस्य विष्णुः ।

मत्स्यपुराणे—

[2]अयनद्वितये श्राद्धं विषुवद्वितये तथा ।
संक्रान्तिषु च कर्त्तव्यं पिण्डनिर्वपणादृते ॥

एतद्वाक्यदर्शनाद् पिण्डदानमत्र नास्तीति केचित् । तदयुक्तम् । पिण्ड़दानस्य समाचारसिद्धत्वात् । तथा च [3]ब्रह्मपुराणे—

ग्रहणे च व्यतीपाते नवशस्यसमागमे ।
जन्मादिग्रहपीड़ायां श्राद्धं पार्वणमुच्यते ॥

अयनद्वितये विषुवद्वित्तये गयाश्राद्धे यथा [4]पार्वणमित्यर्थः । पिण्डनिर्वपणाभावस्त्वन्यसंक्रान्तिष्वेव । अन्यथा पूर्वार्द्धं पुनरुक्तं स्यात् ।

इति मेषसंक्रान्तिकृत्यम् ।

---

(1) लिंग च वचनं देशः कालोऽयं कर्मणः फलम् ।
मीमांसाकुशलाः प्राहुरविवक्षितपञ्चकम् ॥

इत्यभियुक्तोक्त्या वचनस्यात्राविवक्षितत्वात् ।

(2) अयनद्वितये—मकरकर्कटसंक्रान्त्योः । (3) ब्रह्मपु. (220-51-53).

(4) गयाश्राद्धे यथा श्राद्धं पार्वणविधिना क्रियते, तथैवाऽयनद्वितये विषुवद्वितयेऽपि पार्वणविधिना श्राद्धं कर्त्तव्यमित्यर्थः ।

अक्षयतृतीया

तत्र भविष्यपुराणे—

वैशाखे मासि राजेन्द्र तृतीया चन्दनस्य च ।
[1]कलधौतं तथा धान्यं घृतं वापि विशेषतः ॥
तस्यां दत्तं ह्यक्षयं स्यात् तेनेयमक्षया स्मृता ।

तृतीया चन्दनस्येति वचनादत्र चन्दनदानं प्रशस्तमित्युक्तम् ।

तदुक्तम्— दानात्तु चन्दनस्येह कंजजो नात्र संशयः ।

इह चन्दनदानात् कंजजो ब्रह्मा भवतीत्यर्थः ।

विष्णुधर्मोत्तरे— अक्षया सा तिथिर्ज्ञेया कृत्तिकाभियुता यदि ।
भविष्यति महाभागे विशेषेण फलप्रदा ॥
वैशाखे मासि राजेन्द्र शुक्लपक्षे तु या तिथिः ।
तृतीया रोहिणीयुक्ता अक्षया सा प्रकीर्त्तिता ॥

ब्रह्मपुराणे— यः पश्यति तृतीयायां कृष्णं चन्दनभूषितम् ।
वैशाखस्य सिते पक्षे स यात्यच्युतमन्दिरम् ॥

तथा— यात्वेषा कुरुशार्दूल वैशाखे मासि वै तिथिः ।
तृतीया साऽक्षया लोके गीर्वाणैरभिवन्दिता ॥
योऽस्यां ददाति कलशान् वारिवस्त्रसमन्वितान् ।
स याति पुरुषो वीर लोकं वै हेममालिनः ॥

हेममालिनः—सूर्यस्य ।

आग्नेयपुराणे— यो दादाति द्विजेभ्यस्तु तृतीयायामुपानहौ ।
वैशाखे शुक्लपक्षे तु सच्छत्रकरकान्विते ॥
न तस्य मनसो दाहो श्रियं पुत्रांश्च विन्दति ।
सर्वव्याधिविनिर्मुक्तो मर्त्यलोके महीयते ॥

---

(1) कलधौतं—सुवर्णम् ।

कालादिह यदा याति यमलोकं द्विजोत्तम ।
यानं चाश्वतरीयुक्तं सर्वं हेममयं शुभम् ॥
दिव्यांगनाभिराकीर्णं सर्वरत्नविभूषितम् ।
उपतिष्ठति विप्रेन्द्र सर्वकामफलप्रदम् ।

विष्णुधर्मोत्तरे— वैशाखशुक्लपक्षे तु तृतीयायां द्विजोत्तम ।
यद्ददाति नरश्रेष्ठस्तत्तदक्षयमुच्यते ॥
विशेषेण तथा दानमक्षतानां महाफलम् ।

[1]वृहद्धर्मपुराणे—

वैशाखे मासि शुक्लायां तृतीयायां जनार्दनः ।
यवानुत्पादयामास युगं चारब्धयान् कृतम् ॥
ब्रह्मलोकात् [2]त्रिपथगां पृथिव्यामवतारयत् ।
तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्च्चयेत् ॥
यवान् दद्याद् द्विजातिभ्यः प्रयतः प्राशयेत् यवान् ।
पूजयेच्छंकरं गङ्गां कैलासं तु हिमाचलम् ॥
भगीरथं च नृपतिं सागराणां सुखावहम् ।
स्नानं दानं तपः श्राद्धं जपहोमादि किंचन ॥
श्रद्धया क्रियते यच्च तदानन्त्याय कल्प्यते ।
सिन्धोस्तीरे विशेषेण सर्वमक्षयमश्नुते ॥

श्राद्धं च पिण्ड़रहितमेव । तथा च मार्कण्ड़ेयः—

युगादौ षडशीत्यां च गृहाच्छादन एव च ।
नित्यश्राद्धे च संक्रान्त्यामपिण्डं श्राद्धमिष्यते ॥

इत्यक्षयतृतीया ॥

---

[1] वृहद्धर्मपु. (16-15. 18)

[2] त्रिपथगां–गङ्गाम् ।

अथ नृसिंहचतुर्दशी

शुक्लपक्षे चतुर्दश्यां मासि माधवसंज्ञके ।
प्रादुर्भूतो नृपं चास्यस्तस्मात् तां समुपोषयेत् ॥

अत्र सायं मुख्यकालः । "चतुर्दशी न वर्त्तेत सायंकाले दिनद्वये" इति वक्ष्यमाणवचनेन तस्य मुख्यत्वेन श्रवणात् । सायं नाम दिनमानस्य रात्रेश्चान्तिमादिघटिकाद्वयम् । चतुर्दश्याः मुख्यकालव्याप्तिः पूर्वेद्युरेव परेद्युरेव इत्यनयोः निःसन्देहः । उभयव्याप्तिपक्षे परेद्युरेवोपवासः ।

अनङ्गेन समायुक्ता न सोपोष्या चतुर्दशी ।
पूर्णायुक्तां तु तां कुर्यान्नरसिंहस्य तुष्टये ॥
इति वचनात् ।

अनङ्गः—त्रयोदशी । नोभयव्याप्तौ परेद्युरेव ।

चतुर्दशी न वर्त्तेते सायंकाले दिनद्वयें ।
परैव वर्त्तेते वाऽपि कर्त्तव्या सा तदैव तु ॥

इति वचनात् । परदिने त्रयोदशीसम्बन्धस्य निषिद्धत्वात् ।

इति नृसिंहचतुर्दशी ॥

अथारण्यकषष्ठी

तत्र सत्यः— ज्येष्ठे मासि सिते पक्षे षष्ठ्यामारण्यकव्रते ।
या [क]बिन्ध्यवासिनीं देवीं पूजयेयुर्वने गताः ॥
कन्दमूलफलाहारा लभन्ते सत्पतिं हि ताः ॥ इति ॥

ज्येष्ठशुक्लपंचमीप्रदोषे पार्वतीविवाहानन्तरं तदुत्तरदिने या षष्ठी सोपोष्या । तिथिद्वैधे पूर्वापरवेधलब्धे पूर्वा ग्राह्या ।

कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिश्चतुर्दशी ।
एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणा भवेत् ॥

पा. (क) विल्ववासिनीम् इति ग, ङ पुस्तकपाठः ।

इति वचनात् । तदलाभे सामान्यव्रतव्यवस्था । ननु पंचमी पूर्वेद्युः त्रिमुहूर्त्तानन्तरं प्रवृत्ता, परेद्युः त्रिमुहूर्त्ता क्षीयते, ततः प्रवृत्ता षष्ठी परेद्युस्त्रिमुहूर्त्तं व्याप्नोति तदा पंचमीप्रदोषे देवीविवाहे कार्ये परेद्युः षष्ठीव्रते कार्ये च मध्ये दिनमेकं तटस्थं स्यादिति चेष्टापत्तिः । पंचमीरात्रौ देवीविवाहस्य लोकसिद्धत्वात् । अलाभे पूर्वसिद्धायाः परविद्धाऽपि गृह्यतामिति न्यायेन व्रतं च परेद्युः, अन्यथा कर्त्तुमशक्यत्वात् ।

इत्यारण्यकषष्ठी ।

अथ दशहरा

तत्र स्कन्दपुराणे—

ज्येष्ठस्य शुक्लदशमी सम्वत्सरमुखी स्मृता ।
तस्यां स्नानं प्रकुर्वीत दानं चैव विशेषतः ॥
यां कांचित् सरितं प्राप्य दद्याद् दर्भतिलोदकम् ।
मुच्यते दशभिः पापैः स महापातकोपमैः ॥
दशमी ज्येष्ठशुक्लस्य सम्वत्सरमुखी स्मृता ।
हरते दशपापानि तस्माद्दशहरा स्मृता ॥

भविष्यपुराणे— ज्येष्ठशुक्लदशम्यां तु भवेद् भौमदिनं यदि ।
ज्ञेया हस्तर्क्षसंयुक्ता सर्वपापहरा तिथिः ॥

[1]ब्रह्मपुराणे— ज्येष्ठे मासि सिते पक्षे दशमीहस्तसंयुता ।
हरते दशपापानि तस्माद्दशहरा स्मृता ॥

तत्र केवलदशमी पुण्या, हस्तर्क्षसंयुक्ता पुण्यतरा, भौमवारहस्तर्क्षसंयुता पुण्यतमेति विवेकः । दशपापानि [2]मनूक्तानि—

परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् ।
वितथाऽभिनिवेशश्च त्रिविधं कर्म मानसम् ॥
पारुष्यमनृतं चैव पैशुन्यं चैव सर्वशः ।
अनिबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥

---

(1) ब्रह्मपु. (63–15) (2) मनुस्मृ. (12–5. 7)

अदत्तानामुपादानं हिंसा चैवाभिधानतः ।
परदारोपसेवा च शारीरं त्रिविधं स्मृतम् ॥

गङ्गास्नानमन्त्रश्च विश्वामित्रेणोक्तः । यथा—

पारुष्यमनृतं चैव पैशुन्यं वाऽपि सर्वशः ।
असम्बद्धप्रलापं च वाङ्मयं स्याच्चतुर्विधम् ॥
परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशं च मानसं त्रिविधं स्मृतम् ॥
अदत्तानामुपादानं हिंसा चैव विधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥
दशपापहरेत्येवं स्तूयसे त्वं सुरासुरैः ।
हर तानि सदा गङ्गे पापान्निमज्जतो भव ॥

दशहराधिकारे [1]ब्रह्मपुराणे—

यस्तस्यां हलिनं कृष्णं पश्येद् [2]भद्रां सुसंयतः ।
सर्वपापविनिर्मुक्तो विष्णुलोकं व्रजेन्नरः ॥

इति दशहरा ।

अथ चम्पकद्वादशी

तत्र ज्योतिः शास्त्रे—

द्वादश्यां शुक्लपक्षस्य चम्पकैरर्चयेद् हरिम् ।
सर्वपापविनिर्मुक्तः स यात्यच्युतमन्दिरम् ॥

इति चम्पकद्वादशी ।

---

(1) ब्रह्मपु. (63–16).

(2) भद्रां—सुभद्राम् ।

अथ ज्येष्ठपौर्णमासी

तत्र [1]ब्रह्मपुराणे—

शृणुध्वं मुनयः स्नानं [2]कृष्णस्य गदतो मम ।
[3]रामस्य च सुभद्रायाः पुण्यं सर्वाघनाशनम् ॥
मासि ज्येष्ठे च सम्प्राप्ते नक्षत्रे चन्द्रदैवते ।
पौर्णमास्यां तदा स्नानं सर्वकालं हरेर्द्विजाः ॥
सर्वतीर्थमयः कूपस्तत्राऽऽस्ते निर्मलः शुचिः ।
तदा भोगवती तत्र प्रत्यक्षं भवति द्विजाः ॥
तस्माज्ज्येष्ठ्यां समुद्धृत्य हेमाढ्यैः कलशैर्जलम् ।
कृष्णरामाभिषेकार्थं सुभद्रायाश्च भो द्विजाः ॥
कृत्वा सुशोभनं मञ्चं पताकाभिरलंकृतम् ।
सुदृढं सुखसञ्चारं वस्त्रैः पुष्पैः सुशोभितम् ॥
विस्तीर्णं धूपितं धूपैः स्नानार्थं रामकृष्णयोः ।
सितवस्त्रपरिच्छन्नं मुक्ताहारावलम्बितम् ॥
तत्र नानाविधैर्वाद्यैः कृष्णं [4]नीलाम्बरं द्विजाः ।
स्थाप्य मध्ये सुभद्राञ्च जयमङ्गलनिःस्वनैः ॥
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च जातिभिः ।
अनेकशतसाहस्रैर्वृतं[5] स्त्रीपुरुषैर्द्विजाः ॥
गृहस्थाः स्नातकाश्चैव यतयो ब्रह्मचारिणः ।
स्नापयन्ति तदा कृष्णं [6]मञ्चस्थं सहलायुधम् ॥
तथा समस्ततीर्थानि पूर्वोक्तानि द्विजोत्तमाः ।
सोदकैः पुष्पमिश्रैश्च स्नापयन्ति पृथक् पृथक् ॥

---

(1) ब्रह्मपु. (65/2–11, 21-22, 57–61) (2) कृष्णस्य-जगन्नाथस्य ।
(3) रामस्य-बलभद्रस्य । (4) नीलाम्बरं–बलभद्रम् ।
(5) वृत्तं -सेवितम् (6) मञ्चस्थं–स्नानमण्डपस्थम् ।
(7) सहलायुधम्–बलभद्रसहितम् ।

नमस्ते देवदेवेश पुराण पुरुषोत्तम ।
सर्गस्थित्यन्तकृद्देव लोकनाथ जगत्पते ॥
त्रैलोक्यशरणं देवं ब्रह्माणं मोक्षकारणम् ।
तं नमस्यामहे भक्त्या सर्वकामफलप्रदम् ॥
तस्मिन् काले तु ये मर्त्याः पश्यन्ति पुरुषोत्तमम् ।
बलभद्रं सुभद्राञ्च ते यान्ति पदमव्ययम् ॥
सुभद्रारामसहितं मञ्चस्थं पुरुषोत्तमम् ।
दृष्ट्वा [1]नरा ध्रुवं स्थानं यान्ति नास्त्यत्र संशयः ॥
कपिलाशतदानेन यत्फलं पुष्करे स्मृतम् ।
तत्फलं कृष्णमालोक्य मञ्चस्थं [2]लभते नरः ॥
कन्याशतप्रदानेन यत्फलं समुदाहृतम् ।
तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥
सुवर्णशतनिष्काणां दानेन यत्फलं स्मृतम् ।
तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥

अपराण्यपि फलश्रुतिवाक्यानि सन्ति, सुविस्तरत्वादिह न लिखितानि ।

पुरुषोत्तमपुराणे—

जयश्रीरामकृष्णेति सौभद्रेति सकृन्नरः ।
वदेच्चेन्मार्जने काले याति ब्रह्मपदं मन ॥

[3]तथा— स्नातं पश्यन्ति ये कृष्णं व्रजन्तं [4]दक्षिणामुखम् ।
ब्रह्महत्यादिभिः पापैर्मुच्यन्ते ते न संशयः ॥

---

(1) "निरामयं" इति ब्रह्मपु. । (2) "सहलायुधं" इति ब्रह्मपु. ।

(3) ब्रह्मपु. (65-83) ।

(4) स्नानं कृष्णं नाम सम्पादितस्नानकर्म—कृष्णमित्यर्थः । दक्षिणामुखं व्रजन्तं नाम, निखिलं मञ्चास्नानगतं कर्म समाप्य यदा प्रतिनिवर्त्तते, तदा दक्षिणा-

वायुपुराणे— ततः [1]पञ्चदशाहानि मम स्नानादनन्तरम् ।
सुरूपां वा विरूपां वा न पश्येत् प्रतिमां मम[2] ॥

इति ज्येष्ठपौर्णमासी ॥

अथ भूमिरजस्वला

मृगर्क्षेऽर्के [3]निदाघः स्यात्तन्मध्येऽपि दिनत्रयम् ।
रजस्वला स्यात्पृथिवी कृषिकर्मविगर्हिता ॥

इति भूमिरजस्वला ॥

अथ श्रीगुण्डिचा

[4]ब्रह्मपुराणे— [5]गुण्डिचामण्डपं यान्तं ये पश्यन्ति रथे स्थितम् ।
कृष्णं वलं सुभद्राञ्च ते यान्ति भवनं हरेः ॥

मुखशब्देन प्रतिनिवर्त्तनस्य प्रतीतौ तच्च पद्धति (पहण्डि) मण्डनसंसक्तं स्नानानन्तरकाले संपादयितव्यत्वे नाम मुख्यस्य स्नानकार्यस्य संपादनात्परं तस्य प्रतिपत्तिकर्मत्वेन अनुष्ठीयते । तत्कालपर्यन्तं समेत्य द्रष्टव्यमित्याशयेन अवयुत्यानुवादस्वरूपतया निखिलस्य स्नानोत्सवस्य प्रतीतिरिति भावः ।

(1) पञ्चदशाहानि— ज्येष्ठपूर्णिमामारभ्य पञ्चदशदिनानि, सावनानि ।

(2) अनवसरकालत्वेन विवक्षितत्वे दर्शनादेरभावः । आषाढस्य मलितत्वे तु सार्द्धमासावधिः दर्शनाभावः ।

(3) "निदाघस्य" इति कालसा. (पृ-451) पाठः ।
"वृषान्ते मिथुनस्यादौ" इति कालदीपपाठः ।
निदाघस्य-ग्रीष्मर्त्तौ सौरस्यैवेति ज्ञेयम् । सूर्ये मृगशिरानक्षत्रगते वृषान्ते मिथुनादौ चेत्यर्थः । मृगशिरोनक्षत्रस्य वृषमिथुनोभयराशिभोग्यत्वात् । अतः वृषान्तं दिनं मिथुनसंक्रान्तिदिनं चेति दिनत्रयमित्यर्थः । उत्कलेषु रजःपर्व सर्वजनप्रसिद्धम् ।

(4) ब्रह्मपु. (66-1-2, 18-19) ।

(5) यद्यपि पुराणे मण्डपमित्युक्तं सम्प्रति तत्मन्दिराकारमुपलभ्यते, जनाश्चाद्यापि "गुण्ड़िचामण्डप" इति नाम्नाऽपि व्यवहरन्ति ।

ये पश्यन्ति तदा कृष्णं [1]सप्ताहं मण्डपे स्थितन् ।
हरिं रामं सुभद्राञ्च विष्णुलोकं व्रजन्ति ते ॥
यात्रां कृत्वा गुण्डिचाख्यां विधिवत्सुसमाहितः ।
[2]आषाढ़स्य सिते पक्षे नरो योषिदथापि वा ॥
दृष्ट्वा कृष्णञ्च रामञ्च सुभद्राञ्च द्विजोत्तमाः ।
दशपञ्चाश्वमेधानां फलं प्राप्नोति चाधिकम् ॥

इति श्रीगुण्ड़िचा ॥

अथ देवशयनपक्षः

[3]राजमार्त्तण्डे— वह्निः स्कन्दपुरन्दरौ गणपतिः श्रीधर्मराड् भास्करौ ।
वायुः पर्वतपुत्रिका वसुमती तोयाधिपः केशवः ॥
ब्रह्माशम्भुशिवादयः प्रतिपदारम्भे तिथौ शेरते ।
उत्तिष्ठन्त्यमुना क्रमेण वरदाः स्वे स्वे दिने पूजिताः ॥

इति देवशयनपक्षः ॥

---

(1) अत्र सप्ताहमिति नात्यन्तसंयोगे द्वितीया अपि तु सप्ताहं यावदिति वोध्यम् । तेन देवस्य गुण्ड़िचामन्दिरे सप्ताहस्थितिर्न नियता, गमनागमनवासरौ तु नियताविति निष्कर्षः । श्रीमन्दिरनिष्क्रमणात् दिनानीमानि गण्यन्ते इति भावः ।

(2) वीरसर्वस्वकारः (पृ-93)—

गुण्डिचाख्या द्वितीया तु पूर्वाह्णव्यापिनी मता ।
सदा परयुता ग्राह्या पुण्ययुक्ता शुचौ सिता ॥

इति यद्यप्युक्तवान् तथापि गुण्डिचायात्राया नित्यत्वात् ऋक्षाभावेऽपि केवल द्वितीयायां क्रियते । "ऋक्षाभावे तिथौ कार्या सदा सा प्रीतये मम" इति कालदीपोद्धृतजगन्नाथवचनात् । अस्या यात्रायां ग्राह्यकालश्च सूर्योदयः । अत एवात्र सूर्योदयवेधो गृह्यते । "दैवे ह्यौदयिकी ग्राह्या" इति नारदवचनादपि, किन्तु दिनद्वये उदयव्याप्तौ तु पूर्वा ग्राह्या, द्वितीयाया मलत्वात् ।

(3) रा. मा. (पृ–109)

अथ गणेश्वरचतुर्थी

[1]देवीपुराणे— [2]गणेशं कारयेत्पूजां लड्डुकादि विभावनात् ।
चतुर्थ्यां विघ्ननाशाय सर्वकामप्रसिद्धये ॥

स्कन्दपुराणे— तृतीयया समायुक्ता सा चतुर्थी फलप्रदा ।
[क]कार्त्तिके प्रथमैषा च गणनाथ फणायुता ॥

गणनाथ—चतुर्थी, फणा—पञ्चमी ।

इति गणेश्वरचतुर्थी ।

आषाढशुक्लैकादशी

तत्र काश्यपपञ्चरात्रे[3]-श्रीकृष्णवाक्यम्—

मदुत्थानेऽथ शयने मत्पार्श्वं परिवर्त्तने ।
अत्र यो वैष्णवः कश्चित् दीक्षितो भक्तितत्परः ॥
निर्निमित्तश्च दीक्षायां न च क्षुद्व्याधिपीडितः ।
अन्नं वा यदि भुञ्जीत फलमूलमथापि वा ॥
अपराधमहं तस्य न क्षमामि तु काश्यप ।
क्षिपामि नरके घोरे हृच्छल्यं जायते नरः ॥

भविष्योत्तरे— आषाढस्य सिते पक्षे एकादश्यामुपोषितः ।
स्नापयेत् प्रतिमां विष्णोः शंखचक्रगदाधराम् ॥
पीताम्वरधरां सौम्यां पर्यङ्के वा सिते शुभे ।
शुक्लवस्त्रे समाच्छन्ने सोपधाने युधिष्ठिर ॥
इतिहासपुराणज्ञो विष्णुभक्तोऽथवा पुमान् ।
स्नापयित्वा दधिक्षीरघृत[4]क्षौद्रजलैस्तथा ॥

---

(1) दे. पु. (61–8)

(2) गणेशं–गणेशमुद्दिश्य ।

(3) का. वि. (पृ–265)

(4) क्षौद्रं-मधु ।

(क) कार्त्तिके प्रथमाषाढे पञ्चमी च" इति (ख) (ङ) पाठः ।

समालभ्य शुभैर्गन्धैर्धूपैर्वस्त्रैरलंकृताम् ।
पूजितां कुसुमैः शुक्लैर्मन्त्रेणानेन पाण्डव ॥
त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदम् ।
विबुद्धे त्वयि बुध्येत जगत्सर्वं चराचरम् ॥
एवं तां प्रतिमां विष्णोः स्नापयित्वा युधिष्ठिर ।
तस्मिन्नग्रे स्वयं वाचा गृह्णीयान्नियमं नरः ॥
चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
स्त्री वा नरो वा मद्भक्तो धर्मार्थं सुदृढं व्रतम् ॥
[1]गृह्णीयान्नियमान्नेतान् दन्तधावनपूर्वकम् ॥

पुराणे— [2]चातुर्मास्यव्रतं कुर्यात् किञ्चिदप्यवनीपते ।
नान्यथा त्वाब्दिकं पापं विनिहन्त्यप्रयत्नतः ॥
वार्षिकान् चतुरो मासान् व्रतेन न नयेद् यदि ।
तुलायामपि कर्त्तव्यं चातुर्मास्याघशान्तये ॥

भविष्योत्तरे— तस्मिन् काले तु मद्भक्तो यो मासांश्चतुरः क्षिपेत् ।
व्रतैरनेकैः नियमैः पाण्डवश्रेष्ठ मानवः ।
कल्पस्थायी विष्णुलोके स भवेन्नात्र संशयः ॥

विष्णुधर्मे— तदा स्वपिति गोविन्दे यस्तु मासचतुष्टयम् ।
अधः शायी ब्रह्मचारी केशवार्पितमानसः ॥
ॐ नमो वासुदेवाय केशवाय नमोनमः ।
नमोऽस्तु नरसिंहाय विष्णवे च नमोनमः ॥
इति प्रातस्तथा सायं जपन्वेदक्रियापरः ।
शमयत्यतिदुष्पारं दुरितं जन्मसञ्चितम् ॥

---

(1) नियमा यथा—श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा ।
दुग्धमाश्वयुजे मासि कार्त्तिके द्विदलं त्यजेत् ॥
श्रीधर्म. (8–2470)

(2) का. सा. (पृ–26)

मधुमांसञ्च यो मासांश्चतुरस्तान्न खादति।
देवक्रियारतो विष्णोरनुस्मरणतत्परः ॥
सोऽपि स्वर्गं समभ्येति च्युतः तस्माच्च जायते।
अरोगे धनधान्याढ्ये कुले सन्ततिवान्नरः ॥
समस्तानाञ्च मासानां यः सुप्ते मधुसूदने।
निवृत्तिं कुरुते सोऽपि दैवो वैमानिको[1] भवेत्।
अनेनैव विधानेन नरो विष्णुक्रियापरः।
एकाहारो भवेद् यस्तु सर्वपापैः प्रमुच्यते ॥
सुप्ते च सर्वलोकेशे नक्तभोजी भवेन्नरः।
सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते ॥
शस्तस्तु चतुरः पुंसां ततश्चैवैकभोजनम्।
नक्तभोजनतुल्यन्तु नोपवासफलं क्वचित् ॥
तैलाभ्यङ्गं च यो मासांश्चतुरश्च विवर्जयेत्।
सोऽप्यङ्गलावण्ययुतो ह्यारोग्यञ्च नरो लभेत् ॥
यस्त्वेतानि समस्तानि मासानेतान्नरश्चरेत्।
स विष्णुलोकमासाद्य विष्णोरनुचरो भवेत् ॥
चतुर्भिः पारणं मासैः निष्पाद्य हरितत्परः।
[2]ब्राह्मणान् भोजनं दद्यात्ततस्तेभ्यस्तु दक्षिणाम् ॥
पूजयेच्च जगन्नाथं सर्वपापहरं हरिम्।
प्रीयस्व चैव गोविन्देत्येवं चैव प्रसादयेत् ॥

व्रतग्रहणकाले विशेषश्च विष्णुरहस्ये—

इदं व्रतं मया देव गृहीतं पुरतस्तव।
निर्विघ्नां सिद्धिमायातु प्रसन्ने त्वयि केशव ॥
गृहीतेऽस्मिन् व्रते देव [3]यद्यपूर्णे म्रियाम्यहम्।

---

(1) वैमानिको— व्योमयानगामी। देवता इत्यर्थः।
(2) चतुर्थ्यर्थे द्वितीया। अन्यथा तेभ्य इति पदेन सहान्वयासम्भवात्।
(3) "पंचत्वं यदि मे भवेत्" इति समयमयूखपाठः।

तन्मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्दन ।।
एवमभ्यर्च्च्य गोविन्दं व्रताजिनक्रियादिकम् ।
सर्वत्र प्रतिगृह्णीयात् परिपूर्णं तथा भवेद् ।।
[1]एकादश्यान्तु गृह्णीयात् संक्रान्त्यां कर्कटस्य वा ।
आषाढ्यां वा नरो भक्त्या [2]चातुर्मासव्रतक्रियाम् ।।
मत्स्यपुराणे— [3]चतुर्दश्यान्तु नक्ताशी समान्ते गोयुगप्रदः ।
शैवपदमवाप्नोति ज्ञेयं त्रैयम्बकं व्रतम् ।।

इति आषाढशुक्लैकादशी ।

अथ आषाढपौर्णमासी

तत्र भारते[4]— आकामावैषु यच्छ्राद्धं यच्च दानं यथाविधि ।
उपवासादिकं यच्च तदनन्तफलं स्मृतम् ।।

---

(1) श्लोकोऽयं विष्णुरहस्ये इति का. वि. (पृ–332), नारदीये इति कृत्यतत्वा. (पृ–168), ब्रह्मवैवर्त्ते इति समयम. (पृ–79) ।

(2) चातुर्मासिकव्रतग्रहणे कालचतुष्टयं विशिनष्टि जीमूतवाहनः —
आषाढीपौर्णमासी, शुक्ला एकादशी, द्वादशी, कर्कटसंक्रान्तिश्च ।
का.वि (पृ-332)

हेमाद्रौ महाभारतेऽपि—
चतुर्धा गृह्य वै चीर्णं चातुर्मास्यव्रतं नरः ।
कार्त्तिके शुक्लपक्षे तु द्वादश्यां तत्समापयेत् ।।
निर्णयसिन्धुः (पृ-60)

(3) शिवशयनकालो यथा— कालसारेऽपि एकाम्रपुराणवचनम्—
अथ वक्ष्यामि देवेशि यात्रां मे शयनोत्तमाम् ।
आषाढस्य च शुक्लायां चतुर्दश्यां समाचरेत् ।।
कालसारे (पृ-165)

(1) का. सा. (पृ–144) ।

पुराणे[1]— आषाढी कार्त्तिकी माघी वैशाखीषु कृतं तु यत् ।
तदनन्तफलं प्रोक्तं स्नानदानजपादिकम् ॥

इति आषाढपौर्णमासी ।

अथ [2]व्यालपंचमी

पद्मनाभे गते शय्यां [3]सर्वैर्देवैरनन्तरम् ।
पञ्चम्यामसिते[4] पक्षे समुत्तिष्ठन्ति पन्नगाः ।
सुप्ते तु देवदेवेशे पंचम्यां व्यालपञ्चमी ।
कुर्युस्तत्र यथाशक्त्या जाग्रद्गौरीमहोत्सवम्[5] ॥

भविष्यपुराणे[6]—श्रावणे मासि पञ्चम्यां शुक्लपक्षे नराधिप ।
द्वारस्योभयतो लेख्या गोमयेन विषोल्वणाः ॥

विषोल्वणाः सर्पा इत्यर्थः ।

[7]अनन्तो वासुकिश्चैव कालीयो मणिभद्रकः ।
ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ ॥
पूजयेद् विधिवद् [8]द्वारं दधिदूर्वाकुशाक्षतैः ।
गन्धपुष्पोपहारैश्च ब्राह्मणानाञ्च तर्पणैः ॥

---

(1) का. सा. (पृ–144), का. वि. (पृ–346)

(2) कृत्यकल्पतरौ व्रतखण्डे सर्पाभयपञ्चमीति अस्य नामान्तरम् ।

(3) सर्वै देवैरिति सहार्थे तृतीया । सर्वेषां देवानां शयनानन्तरं तैः सह पद्मनाभे शय्यां गते इत्यर्थः । (4) असिते पक्षे—कृष्णपक्षे ।

(5) जाग्रद्गौरीमहोत्सवस्य कालं निरूपयति पण्डितसर्वस्वकारः—अत्र जाग्रच्छब्द-श्रुत्या रात्रिकृत्यं प्रतिभाति इति प्रदोषः कर्मकालः । उभयत्रव्याप्तौ अव्याप्तौ च परेद्युरेवानुष्ठानम् । प. स. (पृ–108)

(6) भविष्य. ब्राह्म पु. (32/62), का. सा. (पृ–67-68), कृत्यतत्वा (पृ–175) स. म. (पृ-41) ।

(7) भविष्य. ब्राह्म. (32/63-64), का. सा. (पृ–67–68), स.म. (पृ–41) ।

(8) 'वीर' इति कालसारपाठः । 'क्षीर' इति समयमयूख पाठः ।

ये [1]त्वस्यां पूजयन्तीह नागान् भक्तिपुरस्सरम् ।
न तेषां सर्पतो वीर भयं भवति कुत्रचित् ।।

इति व्यालपञ्चमी ।।

अथ श्रावणपौर्णमासी (बलोत्थापननिर्णयः)

तत्र स्मृतिः[2]— अमावास्यां तुलादित्ये[3] लक्ष्मीर्निद्रां विमुञ्चति ।
सुखरात्रेरुषः [4]काले प्रदीपोज्ज्वलितालये ।।
गावो महिष्यश्छागाद्याः पूज्याः शोभ्यास्तदा दिने ।
पूजनं केचिदिच्छन्ति श्रावण्यां तु गवामपि ।।

पक्षद्वयस्य देशाद्यपेक्षया विकल्पः ।

तथाहि भविष्योत्तरे[5]—कृष्ण उवाच—

घनावृतेऽम्बरे पार्थ [6]शाद्वले धरणीतले ।
सम्प्राप्ते श्रावणस्यान्ते पौर्णमास्यां दिनद्वये[क] ।।
स्नानं कुर्वीत मतिमान्[ख] श्रुतिस्मृतिनिधानतः ।
श्रावणी दुर्गनवमी तथा दुर्गाष्टमी च या ।।

---

(1) अस्यां—पञ्चम्यां तिथौ ।

(2) का. वि. (पृ–196), रा. मा. (पृ–124), का. सा. (पृ–145) ।

(3) अमावास्यां तुलादित्ये–तुलसंक्रान्त्यनन्तरं याऽमावास्या, नाम कार्त्तिकामावास्या तस्याम् ।

(4) सुखरात्रेरुषः काले–कार्त्तिकामावास्यानन्तरं या प्रतिपत् तिथिः सैव सुखरात्रिः । तस्य दिवसस्य प्रभातकाले ।

(5) का. सा. (पृ– 145, 149) ।

(6) शाद्वले—नवतृणबहुलप्रदेशे ।

पा.— (क) 'दिनोदये' इति 'खघङ'च पाठः ।
(ख) "महिमान्" इति खघ पाठः ।

पूर्वविद्धा तु कर्त्तव्या शिवरात्रिर्बलेर्दिनम् ।
श्रावणी पौर्णमासी च[क] मध्याह्नव्यापिनी यदि ॥
उत्थाने वलदेवस्य नन्दाविद्धान्तु वर्जयेत् ।
खर्वा दर्पास्तथा हिंस्रा नन्दायां पौर्णमीयुता ॥
उत्थापनं सीरपाणेः कारयेत्पूर्ववासरे ।
यामद्वयं चतुर्दश्यां पौर्णमास्यां द्वियामकम् ॥
पूर्वेऽहनि वलेः पूजा पशुवन्दापना तथा ।
नन्दायुक्तपौर्णमास्यां कृते चोत्थापनं वलेः[ख] ॥

इति वलोत्थापननिर्णयः ।

अथ श्रावणपौर्णमास्यां रक्षाबन्धनम्

भविष्योत्तरे[1]— तत्र देवान् पितॄंश्चैव तर्पयेत् परमाम्भसा ।
उपाकर्मदिने चोक्तमृषीणां चैव तर्पणम् ॥
कुर्वीत ब्राह्मणः सार्धं देवानुद्दिश्य शक्तितः ।
शूद्राणां मन्त्ररहितं स्नानं दानं प्रशस्यते ॥
ततोऽपराह्णसमये रक्षापट्टोलिकां शुभाम् ।
कारयेचाक्षतैः [2]शस्त्रैः सिद्धार्थैर्हेमभूषिताम् ॥
वस्त्रैर्विचित्रैः कार्पासैः क्षौमैर्वा मलवर्जिताम् ।
विचित्रतन्तुग्रथितां स्थापयेद् भाजनोपरि ॥
कार्या गृहस्य रक्षा गोमयाराधितसुवृत्तमण्डलकैः ।
दूर्वावर्णकसहितैर्भित्तौ दुरितोपशमनाय ॥
उपलिप्ते गृहमध्ये दत्तचतुष्कन्यासे शुभं पीठम् ।
तत्रोपविशेत् राजा सामात्यः सपुरोहितः ॥

---

(1) का. सा. (पृ-149)   (2) शस्त्रैः इति का. सा. ।

(क) 'यत्र' इति खघ पाठः ।

(ख) 'तत्र रोगी भवेद्विप्रः वलोत्थापननिर्णयः' इति खघ पुस्तकयोरधिकपाठः ।

ससुहृद् वेश्याजनसहितो मङ्गलशब्दैः समुत्थितैः चित्रैः ।
रक्षाबन्धः कार्यः सद्भिर्वनिना नरेन्द्रस्य ॥
देवद्विजातींस्तु वस्त्रै रक्षाभिरर्च्चयेत् प्रथमम् ।
तदनु पुरोधानृपते रक्षां वध्नीत मन्त्रेण ॥
येन वद्धो वली राजा दानवेन्द्रो महासुरः ।
तेन त्वामपि वध्नामि रक्षामाचर मा चल ॥
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च मानवैः ।
कर्त्तव्यो [1]रक्षिकाचारो द्विजान् सम्पूज्य शक्तितः ॥
अनेन विधिना यस्तु रक्षिकाबन्धमाचरेत् ।
स सर्वदोषरहितः सुखी सम्वत्सरं [2]भवेत् ॥
यः श्रावणे स्रवति शीतजले सुरेन्द्र, रक्षाविधानमिदमाचरते मनुष्यः ।
आस्ते सुखेन परमेण सवर्षमेकं पुत्रप्रियादिसहितः ससुहृज्जनश्च ॥

द्रव्यविशेषश्च पारम्पर्यद्रव्यव्यवहाराद् वेदितव्यः । स्मृतिसमुच्चये—

विष्णोश्च शयनादूर्ध्वं मासेनान्तरितं द्विजाः ।
रक्षार्थकर्म कर्त्तव्यं वत्सराघविनाशनम् ॥

इति रक्षिकावन्धनम् ।

अथोपाकर्मनिर्णयः

याज्ञवल्क्यः[3]— [4]अध्यायानामुपाकर्म श्रावण्यां श्रवणेन तु ।
हस्तेनौषधिभावेन पञ्चम्यां श्रावणस्य वा ॥
पौषमासस्य रोहिण्यामष्टकायामथापि वा ।
जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद् बहिः ॥

---

(1) 'रक्षिकावाचो' इति का. सा. । (2) 'वसेत्' इति का. सा. ।

(3) या स्मृ. (1/142–143) ।

(4) "स्वाध्यायोऽध्येतव्य" इति श्रुत्या अध्ययनविधिना अधीतानां वेदानामुपाकर्म । अत्र अध्यायशब्दो वेदपरः ।

हस्तेनेत्यस्य औषध्यभावे पञ्चम्यामित्युभयत्र सम्बन्धः । यद्वा श्रावण्यां श्रवणायोगो न भवति तदा हस्तेन श्रावणपञ्चम्यामित्ययं पक्षो बोद्धव्यः ।

उपाकर्म च कर्त्तव्यं कर्कटस्थे दिवाकरे ।
हस्तेन शुक्लपञ्चम्यां श्रावण्यां श्रवणा न चेद् ॥

[1]इति स्मृतिसमुच्चयवचनात् । [2]गार्ग्यः—

पर्वण्यौदयिके कुर्युः श्रावण्यां तैत्तिरीयकाः[3] ।
वह्वर्चाः श्रवणे कुर्युर्ग्रहसंक्रन्तिवर्जिते ॥

इति स्मृत्यन्तरे श्रावण्या एव मुख्यत्वात् ।

श्रावण्यां श्रवणा यत्र तत्रोपाकर्म कारयेत् ।
योगो नास्ति यदा काले हस्तेनैव तु पञ्चमी ॥

[4]इति मार्कण्डेयवचनात् । यदा तु श्रावण्यां न श्रवणा शुक्लपञ्चम्यामपि न हस्ता, केवलायामपि श्रावण्यां कुतश्चित् कारणात् तत्राप्यकरणसम्भावनायां शुक्लपञ्चम्यां न त्वन्यदिनगतायां श्रावण्यां हस्तायां वा, तिथेर्मुख्यत्वात् श्रवणेन हस्तेनेति सहार्थतृतीयाया गौणत्वात् । अत्रोपाकर्माख्यं कर्म कृत्वा पौषस्य रोहिण्यामष्टकायां वा छन्दसामुत्सर्गं जलान्ते कुर्यादित्यर्थः । यस्त्वनध्ययनभयात् पौषमासे चोत्सर्गं न करोति स कालातीतकर्मप्रायश्चित्तं महाव्याहृतिभिर्हुत्वा श्रावण्यामुत्सर्गपूर्वकमुपाकर्म करोतीति शतानन्दः । ऋग्यजुरथर्ववेदिनामयं कालः । औषध्यभाव इति । भाद्रपदे मासि सिंहार्के इत्यर्थः । तत्रैव सर्वौषधीनामाविर्भावात । छन्दोगानामेष कालः । तथा च गोभिलः -अथ प्रौष्ठपदहस्तेनोपाकरणम् । पुष्येण उत्सर्ग इति । प्रौष्ठपदीं प्रौष्ठमासस्य काञ्चित्तिथिं हस्तायुक्तामभिव्याप्य । [5]गार्ग्यः—

---

(1) का. सा. (पृ–146), रा. मा. (पृ–111) ।

(2) का. सा. (पृ-1 7), चतुर्वि. (पृ-56) ।

(3) अत्र तैत्तिरीयकपदमन्येषामपि यजुःशाखिनामुपलक्षणमिति चतुर्विशतिमते ।

(4) रा मा. (पृ–111) ।

(5) का. वि. (पृ–277), चतुर्वि. (पृ–५८) ।

सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विधिवद् वहिः ।
छन्दोगा मिलिताः कुर्युरुत्सर्गं सर्वच्छन्दसाम् ।
शुक्लपक्षे तु हस्तेन उपाकर्मापराह्णिकम् ॥

एषान्तु कालवृद्धावपि मलिम्लुचे कर्त्तव्यम् । सिंहे रवाविति वचनात् । अन्यत्राप्युक्तम् ।

[1]उपाकर्म तथोत्सर्गं [2]प्रसवाहोऽष्टकादयः ।
मलिम्लुचेऽपि कर्त्तव्याः शेषमन्यद् विवर्जयेत् ॥

छन्दोगपरिशिष्टे कात्यायनः—

[3]मासि प्रौष्ठपदे हस्तात् पुष्यः पूर्वो भवेन्न चेत् ।
तदा च श्रावणे कुर्यादुत्सर्गं विधिवद् द्विजः ॥

छन्दोगव्यतिरिक्तानां शुद्ध एव मासः । [4]तदुक्तम्—

दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ।
उपाकर्मणि चोत्सर्गे माध्यां चैव विशेषतः ॥

उत्कषः शुद्धभूतकृष्णपक्षादुत्तरमलिम्लुचे करणम् । स एतेषु नास्तीत्यर्थः । मलमासादूर्ध्वं करणमुत्कर्षः इति केचिद् व्याचक्षन्ते तदयुक्तम् । चतुर्ष्विति विशेषपाठसंगतौ यत्र मलमासादुत्तरत कृष्णयुगाद्योरसम्भवात् तत्राप्यशक्तयुगादिकर्म कथं निषिध्यते ।

कर्कटेऽर्के हरौ सुप्ते सिंहे गोपतिरुत्थितः ।
तत्रैव श्रवणाकर्म शक्रध्वजमतः परम् ।

गोपतिः—वलभद्रः । ततो वचनादुपाकर्मदिने वलभद्रोत्थापनं कर्त्तव्यमिति गम्यते ।

[5]परिशिष्टे— उत्कर्षः कालवृद्धौ स्यादुपाकर्मादिकर्मणाम् ।
अभिषेकाब्दवृद्धीनां न तूत्कर्षो युगादिषु ॥

अयमुत्कर्षविधिश्छन्दोगानाम् ।

---

(1) का. सा. (पृ–148) । (2) प्रसवाहो–जातेष्टिः ।

(3) का. वि. (पृ-280), चतुर्वि. (पृ–63) ।

(4) का. वि. (पृ–144), रा. मा. (पृ–103), ऋष्यशृङ्ग इति चतुर्वि. (पृ–58)

(5) रा. मा. (पृ–103), कात्यायन इति चतुर्वि. (पृ–58) ।

तत्रायमनुष्ठानक्रमः

[1]उपाकर्मणि चोत्सर्गे यथाकालं समेत्य चं ।
ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्ततः ॥

श्रवणाकर्मविधौ याज्ञवल्क्यः—

मृदा पीठन्तु कुर्वीत गोमयेनोपलिप्य च ।
सप्तभिः सप्तभिर्दर्भैर्ऋषीन्सप्त सृजेत्ततः ॥
गौतमञ्च भरद्वाजं विश्वामित्रं तथा मुनिम् ।
जमदग्नि वसिष्ठञ्च कश्यपं चात्रिमेव च ॥
प्राङ्मुखः स्थापयेत्तत्र रोपयित्वैकपंक्तितः ।
उदगास्योऽथवा ग्रन्थीन् विसृजेत् स्थापयेदृषीन् ॥
ग्रन्थीन् ब्रह्ममयान् कृत्वा प्राक्संस्थैरुत्तराननैः ।
षडङ्गुलान्तरा कार्या उदक्संस्थैश्चैवापि वा ।
ऋषीन् सप्तकरे कृत्वा ऋषय इति मन्त्रितान् ॥
[2]इदं विष्णुरिति स्नानं [3]सप्त तेऽग्नेति स्थापयेत् ।
गन्धपुष्पादिनाभ्यर्च्य स्नानं पूर्वं समाहितः ॥

ग्रन्थिवन्धनन्तु [4]हिरण्यगर्भ इत्यनेन समाचारात् ।

पद्मपुराणे— आवाहनं घृतेनाक्तं सप्त तेऽग्नेति स्थापयेत् ।
द्वितानस्वेति वस्त्रञ्च पवित्रं तु प्रदापयेत् ॥
[5]तद्विष्णोरिति मन्त्रेणानेनैवोत्तरीयकम् ।
[6]गन्धद्वारेति गन्धञ्च [7]सप्ता स्यासन्तु पुष्पकम् ॥

---

(1) चतुर्वि. (पृ–61) (2) शु.यजु. (5/15) (3) शु.यजुः (17/79)

(4) शु.यजुः (13/4) (5) शु.यजु. (6/5)

(6) ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

(7) शु.यजु. (31/15)

[1]धूपं धूरसीति दातव्यं [2]ज्योतिरसीति दीपकम् ।
[3]यज्ञेन यज्ञनैवेद्यमनेनैव फलं पुनः ॥
प्रार्थयेदञ्जलिं कृत्वा इमावेव पठन् द्विजः ।

ॐ इमावेव गौतमभरद्वाजावयमेव गौतमोऽयं भरद्वाज इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयं जमदग्निरिमावेव वसिष्ठकश्यपावयमेव वसिष्ठोऽयं कश्यपो वागेवात्रिर्वाचा ह्यन्नमद्यते त्रिर्ह वै नामैतद् यदत्रिरिति सर्वस्यात्ता भवति सर्वस्याऽन्नं भवति य एवं वेद ।

श्रवणादिविधौ याज्ञवल्क्यः—

ऋषिस्थानात्ततः पूर्वे उदग्भागगतेऽपि वा ।
सप्तहस्तान्तरे शुभैरुत्सर्गंविधिमाचरेत् ॥
प्रणवं व्याहृतीः तिस्रो गायत्रीं प्रणवां तथा ।
त्रिः कृत्वो ब्राह्मणो ब्रूयात्स्नानं पूर्वं सुसंयतम् ॥
अपामार्गं त्यजेद् वृक्षं ममाब्दमिति मन्त्रितः ।
आददीत करे दूर्वां [4]काण्डादित्यभिमन्त्रितम् ।
द्विरपामार्गदूर्वाश्च पूर्वमन्त्राभिमन्त्रिताः ।
त्यक्त्वा पठित्वा गायत्रीं त्रिर्वदेद्विरताः स्म ह ॥
कृत्वा स्नानं ततः सन्ध्यामर्कोपस्थानमेव च ।
गायत्रीञ्च जपेत् पश्चात् तर्पणादीन् समाचरेत् ॥

तथा— देवांश्चैव वसून् रुद्रानादित्यानिन्द्रपद्मजैः ।
विश्वेदेवांश्च छन्दांसि देवर्षींश्च यथाक्रमम् ॥
सम्वत्सरं मनुष्यांश्च दिव्यानाचार्यसंज्ञितान् ।
यमान् पितॄंश्च विज्ञाय तर्पयेत्तु यथाक्रमम् ॥

विज्ञायेति—उद्दिष्टानां देवादीनां विशेषं ज्ञात्वेत्यर्थः ।

---

(1) शु. यजुः (1/8) (2) शु. यजुः (5/35)
(3) शु. यजुः (31/16) (4) शु. यजुः (13/20)

यथा योगियाज्ञवल्क्यः[1]—

[2]ब्रह्माणं तर्पयेत्पूर्वं विष्णुं रुद्रं प्रजापतिम् ।
वेदांश्छन्दांसि देवांश्च ऋषींश्चैव सनातनान् ॥
आचार्यांश्चैव गन्धर्वानाचार्यानितरानपि ।
[3]सम्वत्सरं सावयवं देवींश्चाप्सरसस्तथा ॥
तथा देवानुगान्नागान् सागरान् पर्वतानपि ।
सरितोऽथ मनुष्यांश्च यक्षान् रक्षांसि चैव हि ॥
पिशाचांश्च सुपर्णांश्च भूतान्यथ पशूंस्तथा ।
[4]वनस्पतीनौषधींश्च[5] भूतग्रामं चतुर्विधम् ॥
अमारब्धेन सव्येन पाणिना दक्षिणेन तु ।
तृप्यतामिति सेक्तव्यं नाम्ना तु प्रणवादिना ॥
आवाह्य पूर्ववन्मन्त्रैरास्तीर्य च कुशान् शुभान् ।
प्रागग्रेषु सुरान् सम्यग् दक्षिणाग्रेषु वै पितॄन् ॥

सनातनानिति—ऋषिविशेषणमिति [6]कल्पतरुकारः । गन्धर्वानिति । इतरानित्याचार्यविशेषणम् । पद्धतिषु च पुराणाचार्यास्तृप्यन्तामित्यप्याचारोऽपि तदभिप्रायेण । सनातनानित्येतदप्याचार्यविशेषणमिति मन्यन्ते । सावयवमिति सम्वत्सरविशेषणम् । चतुर्विधमिति भूतग्रामविशेषणम् । अक्षतमिश्रितं जलमादाय । ॐ ब्रह्मा तृप्यताम् । ॐ विष्णुस्तृप्यताम् । इति प्रकारेण देवतर्पणं देवतीर्थेन कर्त्तव्यम् । श्रवणाकर्मविधौ याज्ञवल्क्यः — [7]ध्रुवोऽध्वरश्च सोमश्च आपश्चैवाऽनिलोऽनलः ।
प्रत्यूषश्च प्रदोषश्च अष्टौ ते वसवः स्मृताः ॥

---

(1) कृत्यकल्प नियत. (पृ–112-113) (2) यो. याज्ञ. (7/62)

(3) यो. याज्ञ, (7/61–64, 68–69)

(4) वनस्पतयः यथा मनुना (1/47), अपुष्पा फलवन्तो ये ते वनस्पतयः स्मृताः ।

(5) ओषध्यः फलपाकान्ताः बहुपुष्पफलोपगाः – मनु. (पृ– 1/46)

(6) कृत्यकल्प नियत. (पृ–113) (7) यो. याज्ञ. परि. (श्लो– 5, 24, 63)

अजैकपादहिर्बुध्न्यो विरूपाक्षश्च रैवतः ।
हरश्च वहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः[1] ।
इन्द्राषाढा भगः पूषा मित्रश्च वरुणोऽर्यमा ॥
अंशुर्विवस्वान् सविता त्वष्टा विष्णुस्ततः परम् ।
ततः परं पद्मजश्च तर्पणीयं प्रयत्नतः ॥
क्रतुर्दक्षो वसुः सत्यः कालः कामो धुरिरोचनौ ।
पुरुरवार्द्रवसश्च विश्वेदेवा दशः स्मृताः ।
ॐकारोऽथ गायत्र्युष्णिगनुष्टुब्बृहती तथा ।
पंक्तिस्त्रिष्टुब्जगत्यश्च इति च्छन्दांसि तर्पयेत् ॥
ऋग्वेदोऽथ यजुर्वेदः सामवेदस्तथैव च ।
चतुर्थोऽथर्ववेदश्च सर्वा [2]विद्यास्ततः परम् ॥
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः ततः ।
प्रचेताश्च वसिष्ठश्च भृगुर्नारद एव च ॥
गौतमोऽथ भरद्वाजो विश्वामित्रऋषिस्तथा ।
जमदग्निर्वसिष्ठश्च कश्यपश्चात्रिरेव च ॥
कलाकाष्ठानिमेषाश्च मुहूर्त्ता अहोरात्रकाः ।
पक्षमासर्तवः सम्वत्सरः सावयवः स्मृतः ॥

पक्षतर्पणे अर्धमासास्तृप्यन्तामिति प्रयोगः । अहोरात्रास्ते कल्प्यन्तां मासास्ते

---

(1) "एते रुद्राः समाख्याता एकादश सुरोत्तमाः" इति यो.याज्ञ.स्मृतावधिकपाठः ।

(2) विद्या–शास्त्रस्यापरपर्यायः । सा तु अष्टादशविधा यथा विष्णुपुराणे—

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः ॥
अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव ताः ॥

इति वि. पु. (3/6/28–29)

कल्प्यन्तामिति । श्रुतौ तथा दर्शनाद् । अत्र देवतावद् बहुवचनान्तत्वे तृप्यन्तामिति प्रयोगाद् बहिः ।

उदङ्मुखो [1]निवीती च प्राजापत्येन वै नरान् ।
युग्मायुग्मं तर्पयेच्च प्रागग्रास्तरणे कुशे ॥
सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ॥

युग्मायुग्ममिति । व्यासः—एकैकमञ्जलिं देवा द्वौ द्वौ तु सनकादयः । इति नियमो न भवतीति दर्शितः ।

[2]सव्यं जानु ततोऽन्वाच्य पाणिभ्यां दक्षिणामुखः ।
प्राचीनावित्युदकञ्च प्रसिचेत् वै तिलान्वितम् ॥
कव्यवाडनलं सोमं यममर्यमणं तथा ।
अग्निष्वात्तान् सोमपांश्च तथा बर्हिषदः पितॄन् ॥
यदि स्याज्जीवपितृक एतान् दिव्यान् पितॄन् तथा ।
येभ्यो वाऽपि पिता दद्यात् तेभ्यो वाऽपि प्रदापयेत् ॥
एतांश्च वक्ष्यमाणांश्च प्रमीतपितृको द्विजः ।
नाराशर्यः पाराशर्यः शुकः शाकल्य एव च ॥
याज्ञवल्क्यो जातूकर्णः कात्यायनस्तथैव च ।
आपस्तम्बो बौधायनो वाचक्कवीति वै ततः ॥
वैजवापी ककुश्चैव लौगाक्षी च तथैव च ।
ऐन्द्रायणी मैत्रावरुणी दाक्षायणी च तर्पयेत् ॥
यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्वभूतक्षयाय च ॥
औदुम्बराय दण्डाय नीलाय परमेष्ठिने ।
दध्नोदराय रौद्राय चित्राय चित्रगुप्ताय वै ॥

---

(1) निवीती कण्ठसज्जने इति मनुः (2-63) ।

(2) 'सव्यं जानु... पितृकोद्विजः' इत्यन्तोभागः यो. याज्ञ. (7/71, 78-80) ।

यमस्य भगिन्यै नमो यमुनायै च तर्पयेत् ।

चित्रगुप्तायेत्यत्र चित्राय तर्पणं क्रियते पारम्पर्यात् । यमतर्पणं चतुर्थ्यन्तेन कर्त्तव्यं तुर्ये च कीर्तनात् । ततः पित्रादितर्पणप्रभृति नित्यकृत्यकदम्बं समाप्य ऋषीन् अर्च्चयेच्च प्रणमेच्च । ततः सप्रणवां सव्याहृतिकां गायत्रीं त्रिः पठित्वा वंशोद्धरणं कुर्यात् । तदुक्तम्—

[1]गौतमादीन् ऋषीन् सप्त कृत्वा दर्भमयान्पुनः ।
पूजयित्वा यथाशक्ति तर्पयेद् वंशमुद्धरेत् ।।

[2]अथ वंशः — पौतिमाष्यो गौपवनाद् गौपवनः पौतिमाष्यो पौतिमाष्यः, कौशिकात् कौशिकः, कौण्डिन्याच्च कौण्डिन्यः, शाण्ड़िल्यात् शाण्ड़िल्यः, कौशिकाच्च गौतमाच्च कौशिकगौतमः, अग्निवेश्यादाग्निवेश्यः शाण्डिल्याच्चानभिम्लाताच्च शाण्डिल्यानभिम्लातः, सैतवात्सैतवः, पराशर्यायणात् पराशर्यायणः, भरद्वाजाद् भारद्वाजो, भारद्वाजाच्च गौतमात् गौतमभारद्वाजः, वैजवापायनात् वैजवापायनः घृतकौशिकाद् घृतकौशिकः, पाराशर्यायणात् पाराशर्यायणः । यास्काद् आसुरायणाद् यास्कासुरायणः, स्त्रैवणेः स्त्रैवणिः, भोगचन्धनेः भोगचन्धनि आसुरेः आसुरिः, आत्रेयाद् आत्रेयो, माण्टेः माण्टिः, वात्स्यात् वात्स्यः, कुमारहारीतात् कुमारहारीतो, गालवाद् गालवो, विदर्भिकौण्ड़िन्यात् वैदर्भिकौण्डिन्यो, वत्सनपादोवाभ्रवाद वत्सनपादवाभ्रवः । अथ सौभरात्पन्था ॐ सौभरोऽयास्यादाङ्गिरसादयास्यं आङ्गिरस, आभूतेस्त्वाष्ट्राद् आभूतिस्त्वाष्ट्रो, विश्वरूपात् त्वाष्ट्राद् विश्वरूपस्त्वाष्ट्रो, अश्विभ्यामश्विनौ, दधीचे आथर्वणाद् दधीच्याथर्वणो, अथर्वणः दैवाद् आथर्वणदैवः, मृत्योः प्राध्वंसनान् मृत्युः प्राध्वंसनम्, विप्रचित्तेः विप्रचित्तिः, व्यष्टेः व्यष्टिः, सनारोः सनारुः, सनातनात् सनातनः, सनकात् सनकः, परमेष्ठिनः परमेष्ठी, ब्रह्मणो ब्रह्मस्वयम्भूः ब्रह्मणे नमः । गार्ग्याद् गार्ग्यो, गार्ग्यायणाद् गार्ग्यायणः, उद्दालकायणाद् उद्दालकायणो, जाबालयनाद् जाबालयनः, माध्यन्दिनायणात् माध्यन्दिनायणः, सौकरायणात् सौकरायणः, कषायणात् काषायणः, सायकायणात् सायकायणः, कौशिकायनेः कौशिकायनिः ।

---

(1) का. वि. (पृ–280) ।

(2. मूलग्रन्थे संश्लिष्टानां पदानां पृथक्करणं पठनसौविध्यार्थं कृतमिति ध्येयम् ।

जतूकर्णाद् जातूकर्णः, कात्यायनीपुत्रात् कात्यायनीपुत्रो भारद्वाजीपुत्राद् भारद्वाजीपुत्रः, पाराशरीपुत्रात् पाराशरीपुत्रः, आपस्तम्बीपुत्रात् आपस्तम्बीपुत्रः, कौशिकायनेः कौशिकायनिः, कौशिकीपुत्रात् कौशिकीपुत्रः, आनन्दीपुत्राद् आनन्दीपुत्रः वैयाघ्रीपदीपुत्राद् वैयाघ्रीपदीपुत्रः, काण्ठीपुत्रात् काण्ठीपुत्रः, कपिपुत्राद् कापिपुत्रः, आत्रेयीपुत्राद् आत्रेयीपुत्रः, गौतमपुत्राद् गौतमीपुत्रः, वात्सपुत्राद् वात्सीपुत्रः, वार्कारिणीपुत्रात् वार्कारिणींपुत्रः, आर्तभागीपुत्राद् आर्तभागीपुत्रः, श्रौङ्गीपुत्रात् श्रौङ्गीपुत्रः, शाङ्कतीपुत्रात् शाङ्कतीपुत्रः. आलम्बायनीपुत्राद् आलम्बायनीपुत्रः, जायतीपुत्राद् जायतीपुत्रः, माण्डुकायनीपुत्रान् माण्डुकायनीपुत्रः, आतिथरीपुत्राद् आतिथरीपुत्रः, उल्लुकपुत्राद् उल्लुकपुत्रः, क्रौञ्चकीपुत्रात् क्रौञ्चकीपुत्रः वैधृतिपुत्राद् वैधृतिपुत्रः। कार्पकेयीपुत्रात् कार्पकेयीपुत्रः, प्राचीनयोगीपुत्रात् प्राचीनयोगीपुत्रः। शाञ्जीवीपुत्रात् शाञ्जीवीपुत्रः, प्राश्नीपुत्रात् प्राश्नीपुत्रः, याज्ञवल्क्यपुत्रात् याज्ञवल्क्यपुत्रः, अरुणाद् आरुणः, उपवेशेः औपवेशिः, कुश्रेः कुश्रिः, वाजश्रवसोः वाजश्रवा, जिह्वावतो जिह्वावान्, वार्षगणादसितो वार्षगणासितः. हरितात् कश्यपात् हरितकश्यपः, शिल्पात् कश्यपात् शिल्पकश्यपः, कश्यपान्नैध्रुवेः कश्यपनैध्रुविः, वाचो वागम्भिण्या अम्भिण्यादित्यादि इमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायते ।

श्रवणाकर्मविधिः

याज्ञवल्क्यः— गायत्रीञ्च त्रिरावर्त्य प्रणवेन सह द्विजाः ।
उद्धृत्य वंशमन्त्राणां मध्यादीन् प्रपठेत्ततः ॥

ततो मन्त्रान्तिमाध्यायं पठित्वा ब्राह्मणाध्यायादीन् पठेत् ।

तद्यथा—ईषे त्वोर्जेत्वा । कृष्णोस्या खरेष्ठो इत्यादि । ईशावास्यमिदं सर्वमित्यादि । ते नम उक्तिं विधेम इत्येतदन्तोऽध्यायोऽध्येतव्यः ।

स वै व्रतमुपैष्यन् । स वै पवित्रवत्येव संवपति । पुरिषो ह यज्ञ । एतद्वै देवा गरिष्ठेऽग्निं मञ्जयन् । ऋतवो ह वै प्रयाजाः । त्वष्टा ह वै पुत्र आस । यज्ञेन वै देवादिमुपोदक्रामन् । सर्वैश्चावेव व्यूहति । सर्वे सम्भारान् सम्भरन्ति । उद्धृत्याहवनीयं पूर्णाहुतिं जुहोति । सूर्यो ह वाऽग्निहोत्रम् । अग्नौ ह वै देवाः । वैश्वदेवेन ह वै प्रजापतिः । महाहविषा ह वै देवावृतं जघ्नुः । स यत्र हवा एप

प्रथमं प्रधुष्य प्रज्ज्वलति । घ्नन्ति ह वा एतद् यज्ञम् । तद् वै यजनमीक्षते । ते वा एते कृष्णाजिने प्राग्रावोपस्तृणाति । सप्तपदान्येवानुक्रमति । शिरो वा एतद् यज्ञं स यदातिथ्यम् । स वै शालायाः पूर्वार्धा प्राङुपक्रामति । उदरञ्च ह वा असमसदः । स वासभिमेवादत्ते । स वै यदेत प्रवृत्तो होता होतृसदने सीदति । प्रजापतिर्ह वै प्रजा ससृजानः । प्राणो ह वा तां सोपांशुः । चक्षुषा ह वै तां सोपांशुः । चक्षुषी ह वा अस्येतौ यच्छुक्रामन्थिनौ । सर्वे यदेतान् ग्रहान् गृह्णाति । घ्नन्ति ह वा एतद् यज्ञम् । स वै हारियोजनं गृह्णाति । इन्द्रो ह वाव षोडशी । प्राणो ह वाव ग्रहः । प्रजापतिर्वा अंशुः । देवाश्च ह वा असुराश्च । यदा धावन्ति । ॐ स वै पूर्णाहुतिं जुहोति । सवाङ्परिशिष्टात् रत्नानां सौमारौद्रेण यजते । स वै केशव पुरुषस्य । वरुणाद् वाभिषिश्चाना भर्गोपक्रामन् । स वै श्वेतमाश्विनमालभते । असद् वा इदमग्र आसीत् प्रजापतिरग्निपाण्यभ्यंधायत् । तद्ध देवा अब्रूवन् । अथैनमतः खनति । पर्णकषाय निष्पक्वा एता आपो भवन्ति । भूयांसि हवींषि भवन्ति । रुक्मं प्रतिमुच्य बिभ्रति । वनिवाहे अग्निर्विभ्रदित्याहुः । सम्वत्सरो वै यो प्रजापतिः । आथातो नैर्ऋतिं हरन्ति चितो गार्हपत्यो भवति । आत्मन्यग्निं गृह्णीते चेष्यन् । स्वयमात्रप्राणानुपदधाति । अशुशीर्णाण्युपदधाति । प्राणभृद् उपदधाति । द्वितीयां चितिमुपदधाति । तृतीयां चितिमुपदधाति । चतुर्थीं चितिमुपदधाति । पञ्चमीं चितिमुपदधाति । नाकसद् उपदधाति । ऋतव्या उपदधाति । अथातः शतरुद्रियं जुहोति । उपवसथ्येऽहनि प्रात ऋदित आदित्ये । अथातो वैश्वानरं जुहोति । अथातो राष्ट्रभृतो जुहोति । अथातः पयोव्रततायै । सम्वत्सरो यज्ञम् । यो ह वा अग्निहोत्रे षण् इमममूनि वेद । उद्दालको हारुणिः । उर्वशी हाप्सराः पुरुरवसम् । भृगुर्ह वै वारुणिः । पशुबन्धेन यजते । तद्यथा ह वा इदम् । अयं वै यज्ञो योऽयं पवते । समुद्रं वा एते प्रचरन्ति । यद् वालोकेदं त्रिवृतेति । विश्वरूपं वै त्वाष्ट्रमिन्द्रोहन् । इन्द्रस्य वै यत्रेन्द्रियाणि । वीर्याणि व्युदक्रामन् । एतस्मात् यो यज्ञात् पुरुषो जायते । दीर्घसत्रं ह वा एत उपयन्ति । भूमौ मार्जनप्रक्षेपः । तदाहुः– सोमो वै राजा यज्ञः प्रजापतिः । ब्रह्मोदनं पचति । प्रजापतिर्देवेभ्यो यज्ञान् व्यादिशत् । प्रजापते रक्ष स्वयम् । प्रजापतिरकामयत । अथ प्रातर्गौतमस्य । पुरुषो ह नारायणोऽकामयत । ब्रह्म वै स्वयम्भूस्तपो–

ऽतप्यत । अथास्मै श्मशानं कुर्वन्ति । भूमौ मार्जनप्रक्षेपः । अग्निरेष पुरस्तात् चीयते । प्रजापतिः स्वर्गलोकमतिपांसत् । प्राणो गायत्री । प्रजापतिविस्रस्तम् । तस्य गा एतस्याग्नेः । अथ हैं केरुणे । देवाह वै सत्रं निषेदुः । अथातो रौहिणौ जुहोति । उषा वा अश्वस्य मेध्यस्य शिरः । दृप्तवालाकि र्हानूचानो गार्ग्य आस । जनको हि वैदेहः आसां चक्रे । पूर्णमदः पूर्णमिदम् । यो ह वै ज्येष्ठञ्च श्रेष्ठञ्च वेद । अथातो ब्राह्मणान्तिमाध्यायं पठेत् ।

ब्राह्मणान्तिमाध्यायः यथा— समानमासाञ्जीवीपुत्रात् साञ्जीवीपुत्रो, माण्डूकायनेः माण्डूकायनिः, माण्डव्यान्माण्डव्यः, कौत्सात् कौत्सः, आहित्थेः आहित्थिः, वामकक्षायणाद् वामकक्षायणः, वात्स्याद् वात्स्यः, शाण्डिल्याच्छाण्डिल्यः, कुश्रेः कुश्रिः यज्ञवचसो राजस्तम्वायनाद् यज्ञवचाराजस्तम्वायनस्तुरात् कावषेयात् तुरकावषेयं प्रजापतेः प्रजापतिः ब्रह्मणो ब्रह्मस्वयम्भूर्ब्रह्मणे नमः ।

याज्ञवल्क्यः— पर्जन्यो वृष्टिमान् भूयात् भूयाच्छस्यवती मही ।
महीपालाः पालयन्तु सप्रजामवनीं ततः ॥
इष्टान्याशिषयन्त्येवं वहूनि द्विजसत्तमाः ।
विसर्जनमृषीणान्तु उत्तिष्ठ ब्रह्मणस्पते ॥
ततो विमोचयेत्तोये कुर्याद् दर्भान् पृथक् पृथक् ।

अस्मिन् कर्मणि कर्त्तव्ये नदीरजोदोषो नास्ति ।

तथा च छन्दोगपरिशिष्टे कात्यायनः—

[1]उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च ।
चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते ॥
वेदाश्छन्दांसि सर्वाणि ब्रह्माद्याश्च दिवौकसः ।
जलार्थिनोऽथ पितरो मरिच्याद्यास्तथर्षयः ॥
उपाकर्मण्युत्सर्गे च स्नानार्थं ब्रह्मवादिनः ।
पिपासूनपिपासूंश्च संवृष्टाह शरीरिणः ॥

---

(1) का. वि. (पृ–280, 281) ।

समागमश्च यत्रैषां तत्रान्ये वहवो मलाः ।
नूनं सर्वे क्षयं यान्ति किमुतैकं नदीरजः ।।

प्रेतस्नानादौ रजोदोषाभावे कारणं नैवोक्तम् । किन्त्वप्रस्तुतत्वादिह न लिखितम् । तथा शुक्रवारादिगाते निषिद्धमपि तिलतर्पणमत्र करणीयमेव । तदुक्तम्—

अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः ।
उपाकर्मणि चोत्सर्गे युगादौ पितृवासरे ।।
धनपुत्रकलत्रार्थी न तुष्येत्तिलतर्पणम् ।

पितृवासरे—अमावास्यायाम् । ग्रहणे संक्रान्तिपाते नेदं कर्म कर्त्तव्यम् ।

वह्वृचपरिशिष्टे—

[1]पर्वण्यौदयिके कुर्युः श्रावण्यां तैत्तिरीयकाः ।
वह्वृचाः श्रवणे कुर्युः ग्रहसंक्रान्तिवर्जिते ।।

हस्तेन सामगाः कुर्युः ।

इति [2]श्रावणपौर्णमासी ।।

अथ रक्षापंचमी

तत्र भविष्योत्तरे[3]—

तत्र भाद्रपदे मासि पंचम्यां श्रद्धयान्वितः ।
यस्त्वालेख्य नरो नागान् कृष्णवर्णादिवर्णकैः[क] ।।
पूजयेद् गन्धपुष्पैश्च सर्पिपायसगुग्गुलैः ।
तस्य तुष्टि समायान्ति पन्नगास्तक्षकादयः ।।

---

(1) का. सा. (पृ– 147)

(2) श्रावणपूर्णिमायां उपाकर्म क्रियते । वङ्गे उपाकर्म न क्रियते । नेपालपञ्जाव-कश्मीरमिथिलासु उपाकर्म ऋषितर्पणीति उच्यते । दाक्षिणात्ये दिवसेऽस्मिन् हयग्रीवजयन्ती पाल्यते । उत्कले वलभद्रपूजा क्रियते । श्रीधर्म. (8-2465)

(3) भविष्य. ब्राह्म. (37/1–3)

(क) "वर्णविवर्जितः" इति खग पुस्तकपाठः ।

आसप्तमात्कुलात्तस्य निर्भयं नागतो भवेत् ।
तस्मात्सर्वप्रयत्नेन नागान् सम्पूजयेद् बुधः ॥

रात्रौ रक्षाविधानार्थं कर्म कर्त्तव्यम् । [1]यदाह—

यः श्रावणे स्रवति शीतजले सुरेन्द्र,
क
रक्षाविधानमिदमाचरते मनुष्यः ।
आस्ते सुखेन परमेण सवर्षमेकम्,
पुत्रप्रियादिसहितः ससुहृज्जनश्च ॥

रक्षामन्त्रो यथा—

[2]येन बद्धो बलीराजा दानवेन्द्रो महासुरः ।
तेन त्वामपि बध्नामि रक्षामाचर मा चल[3] ॥
कण्ठे यस्य महानीलं भूषणं यस्य पन्नगाः ।
तेजांसि तस्य देवस्य रक्षन्तु मम मन्दिरम् ॥ इति ॥

[4]जपः— घण्टाकर्णमहावीर सर्वव्याधिनिवारण ।
सर्वोपद्रवसंहार विद्रावण हरप्रिय ॥
यत्र त्वं तिष्ठसे वीर लिखिताक्षरपंक्तिषु ।
न भयं तत्र कुर्वीत पापरोगादि किञ्चन ॥

इति श्लोकद्वयं द्वारभित्तौ लिखेत्[5] ॥

॥ इति रक्षापञ्चमी ॥

---

(1) भविष्ये इति का. सा. (पृ– 66) (2) का. सा. (पृ–66) ।

(3) येन बद्ध इति श्लोकानन्तरम् अपरोऽपि श्लोकः पठ्यते यथा—

द्वारदेव नमस्तुभ्यं नमस्ते नन्दिकेश्वर ।
पञ्चम्यां निशि देवेश रक्ष त्वं मम मन्दिरम् । इति

(4) का. सा. (पृ–66) ।

(5) दिवसेऽस्मिन् प्रदोषे द्वारफलके गणेशमहादेवभैरवाणां पूजा क्रियते । अनु.

(क) "मारभते" इति खग पुस्तकपाठः ।

अथ कृष्णजन्माष्टमी[क]

तत्र ब्रह्मपुराणे—[1]तथा भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे ।
अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः ॥
भारावतारणार्थाय क्षत्रियाणां जयाय च ।
तस्मात्स तत्र सम्पूज्यो यशोदा देवकी तथा ॥
गन्धैर्माल्यैस्तथा पुष्पैर्यवगोधूमसम्भवैः ।
सगोरसैः भक्ष्यभोज्यैः फलैश्च विविधैरपि ॥
रात्रौ प्रजागरः कार्यो नृत्यगीतसमाकुलः ॥

तथा [2]ब्रह्माण्डपुराणे—
अभिजिन्नाम नक्षत्रं जयन्ती नाम शर्वरी ॥
मुहूर्त्तो विजयो नाम यत्र जातो जनार्दनः ।
सोपवासः हरेः पूजां तत्र कृत्वा न सीदति ॥
देवकीं वसुदेवञ्च पूजयेत् स्थण्डिले शुभे ।
पूजयेद् बलिनं देवं सचन्द्रां रोहिणीं तथा ॥

भविष्यपुराणे— रोहिण्यामर्धरात्रे च यदा कृष्णाष्टमी भवेत् ।
तस्यामभ्यर्च्चनं शौरेर्हन्ति पापं त्रिजन्मजम् ॥
प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी ।
मुहूर्त्तमपि लभ्येत जपहोमामहाफलाः ॥
अर्धरात्रे तु योगोऽयं तारापत्युदये तथा ।
रोहिणीसहिता कृष्णा मासि भाद्रपदेऽष्टमी ॥

रक्षापञ्चम्यथ स्याद् तिथिरसितगता मासि भाद्रे प्रदोषे,
पूर्वेद्युः श्रीशिवादीन् सुरुचिरवपुषः पूजयेत् पायसाद्यैः ।
वार्षिक प. सं. (पृ–17)

(1) कृत्यतत्त्वा. (पृ–176) । (2) ब्रह्माण्ड. (2–3–71/205–207) ।

(क) "जयन्त्यष्टमी" इति खग पुस्तक पाठः ।

अर्धरात्रादधश्चोर्ध्वं कलयाऽपि यदा भवेत् ॥
महापुण्यतमः कालो जयन्त्याख्या प्रकीर्त्तिता ॥
तत्र जातो जगन्नाथः कौस्तुभो हरिरीश्वरः ।
पूर्वविद्धाऽष्टमी या तु उदये नवमी दिने ॥
मुहूर्त्तमपि संयुक्ता सम्पूर्णा साष्टमी भवेत् ।
कलाकाष्ठामुहूर्त्तापि यदा कृष्णाष्टमी तिथिः ॥
नवम्यां सैव ग्राह्या स्यात् सप्तमीसंयुता नहि ।
कार्या विद्धाऽपि सप्तम्या रोहिणीसहिताऽष्टमी ॥
तत्रोपवासं कुर्वीत तिथिभान्ते च पारणम् ।
मुहूर्त्तमप्यहोरात्रे अस्मिन् योगोपलक्षिते ॥
अष्टमी रोहिणी ऋक्षे तां पुण्यां समुपाचरेत् ।
जयन्त्यामुपवासश्च महापातकनाशनम् ॥
स कार्यः सुमहद् भक्त्या पूजनीयश्च केशवः ।

[1]भविष्योत्तरे— सिंहराशिगते सूर्ये गगने जलदाकुले ।
मासि भाद्रपदेऽष्टम्यां कृष्णपक्षेऽर्धरात्रके ॥
शशांके वृषराशिस्थे नक्षत्रे रोहिणीयुते ।
वसुदेवेन देवक्यामहं जातो जनाः स्वयम् ॥
एवमेतत्समाख्यातं लोके जन्माष्टमीदिनम् ।
भगवत्याश्च तत्रैव कुरुध्वं सुमहोत्सवम् ॥
मथुरायां ततः पश्चाल्लोके ख्यातिं गमिष्यति ।
प्रातस्तद्दिवसे प्राप्ते दन्तधावनपूर्वकम् ॥
उपवासस्य नियमं गृह्णीयाद् भक्तिभावितः ।

नियमसंकल्पवाक्यम्—

---

(1) भविष्य. ब्राह्म. (4–55/15, 16, 21), कृत्यतत्वा. (पृ–176) ।
सिंहराशिगते...... स्वयम्' इत्यन्तोभागः का. वि. (पृ–492)

[1]वासुदेवं समुद्दिश्य सर्वपापप्रशान्तये ।
उपवासं करिष्यामि कृष्णाष्टम्यां [2]नभस्यहम् ॥
अद्य कृष्णाष्टमी देव नभश्चन्द्रसरोहिणि ।
अर्च्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ॥
एको विमोक्षकामोऽस्मि यद् गोविन्द त्रिजन्मजम् ।
तन्मे मोचय मां त्राहि पतितं शोकसागरे ॥

प्रार्थनावाक्यं यथा[3]—

आजन्म मरणं यावद् यन्मया दुष्कृतं कृतम् ।
तत्प्रणाशय गोविन्द प्रसीद चाप्युपोषणात् ॥

भविष्योत्तरे— एकेनैवोपवासेन कृतेन कुरुनन्दन ।
सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥
ततः स्नात्वा तु पूर्वाह्णे नद्यादौ विमले जले ।
देव्याः सुशोभनं कुर्याद् देवक्याः सूतिकागृहम् ॥
पद्मनालैः पट्टनेत्रैः सह तत्रार्चितं शुभम् ।
रम्यं चन्दनमालाभिः रक्षामणिविभूषितम् ॥
सर्वं गोकुलवत्कार्यं गोपीजनसमाकुलम् ।
पट्टमर्दलसंगीतं मङ्गलं कलशान्वितम् ॥
वहुवारिलोहखड्गैर्यूपच्छागसमन्वितम् ।
द्वारविन्यस्त[4]मुसलं रक्षितं रक्षपालकैः ॥
[5]षष्ठीदेवीञ्च सम्पूज्य नैवेद्यैः विविधैः कृतम् ।
एवमादि यथाशक्त्या कर्त्तव्यं सूतिकागृहम् ॥
तन्मध्ये प्रतिमां स्थाप्य सा चाप्यष्टविधा स्मृता ।
काञ्चनी राजती ताम्री[6]पैत्तली मृन्मयी तथा ॥

---

(1) स. म. (पृ–52) । (2) नभसि—अमान्तश्रावणमासि ।

(3) स. म. (पृ–52) । (4) मुसलं—लौहाग्रयष्टिः इति शब्द. कल्प (3/753)

(5) विधा. पारि. (पृ–563, 564) ।

(6) पैत्तली— ताम्ररङ्गघटितसंकरधातुविशेषः ।

दार्वी मणिमयी चैव कर्णिका लिखिताऽथवा ।
सर्वलक्षणसम्पूर्णा पर्यङ्के चार्धसुप्तकी ।।
प्रतप्तकाञ्चनाभासा मया सह तपस्विनी ।
प्रसुप्ता च प्रसूता च तत्क्षणात्तु प्रहर्षिता ।।
मां चापि वालकं सुप्तं पर्यङ्के स्तनपायिनम् ।
श्रीवत्सवक्षपूर्णाङ्गं नीलोत्पलदलच्छविम् ।।
यशोदां चाऽपि तत्रैव प्रसूतवरकन्यकाम् ।
वसुदेवोऽपि तत्रैव खड्गचर्मधरस्थितः ।।
कश्यपो वसुदेवोऽयमदितिश्चापि देवकी ।
शेषनागो हली चात्र यशोदादित्यजायत ।।
नन्दः प्रजापतिर्दक्षोगर्गश्चापि चतुर्मुखः ।
रक्षामेवंविधां कृत्वा देवकीं नवसूतिकाम् ।।
तां प्रार्थ्य पूजयेद् भक्त्या गन्धपुष्पाक्षतैः फलैः ।
कुष्माण्डैः नारिकेलैश्च खर्जूरैर्दाड़िमीफलैः ।।
[1]वीजपूरैः [2]पूगफलैः [3]लकुचैः [4]पूपकैस्तथा ।
कालदेशोद्भवैः [5]मृष्टैः पुष्पैश्चापि युधिष्ठिर ।।
ध्यात्वावतारं प्रागुक्तं मन्त्रेणानेन पूजयेत् ।
गायद्भिः किन्नराद्यैः सततपरिवृता वेणुवीणानिनादैः,

---

(1) वीजपूरैः—फलपूरैः, वीजपूरः मातुलङ्ग इति हेमाद्रिः ।

(2) पूगफलैः—गुवाकफलैः इति शब्द. क. (3/211)

(3) लकुचैः–तिक्तरसगुणयुक्तफलविशेषः, 'लकुचो लिकुचो ड़हुः' इत्यम. (2-4-60) स्मरणात् । जेउठ इति उत्कलभाषायाम् "लेम्बुफलम्" इति सुदर्शनयज्ञ-पद्धतौ ।

(4) पूपकं—पिष्टकम् इत्यमरः (2-9-48) ।

(5) मृष्टैः—मरिचफलैः इति शब्द. कल्प (3/775)

[1]भृङ्गारा[2]दर्श[3]कुन्त[4]प्रवरछत्रकरैः सेव्यमाना सुरोघैः ।
पर्यङ्के स्वास्तृते या मुदिततरमनाः पुत्रिणी सम्यगास्ते,
सा देवी देवमाता जयति सुवदना देवकी कान्तरूपा ॥
पादावभ्यञ्जयन्ती श्रीर्देवक्याश्चरणान्तिके ।
निषण्णा पङ्कजे पूज्या नमो देव्यै श्रियै च वै ॥
देवक्यै च नमस्तुभ्यं कृष्णोपादानतत्परा ।
पापक्षयकरी देवी तुष्टिं यातु मयार्चिता ॥

विष्णुपुराणे— ॐ वसुदेवाय नमः । ॐ नन्दाय नमः । ॐ देवक्यै नमः । ॐ यशोदायै नमः ।

इत्येवमादीनि नामान्युच्चार्य च पृथक् पृथक् ।
पूजयेयुः द्विजाः सर्वे स्त्रीशूद्राणाममन्त्रकम् ॥

गायद्भिरित्यादि ध्यानम् । "ॐ देवक्यै नमः" इति पूजामन्त्रः ।

कृष्णमूर्त्तेः स्वरूपम्—

फुल्लेन्दीवरपत्राभं[5] चतुर्बाहुमुदेक्षितम् ।
श्रीवत्सवक्षसंजातं तुष्टावानकदुन्दुभिः ॥
स्तुतोऽसि देवदेवेश शंखचक्रगदाधर ।
दिव्यरूपमिदं देव प्रसादेनोपसंहर ॥

मात्स्ये— कृष्णावतारे च गदा वामहस्ते प्रशस्यते ।
तच्चेच्छया शंखचक्रमुपरिष्टाद् प्रकल्पयेत् ॥

वलदेवस्य स्वरूपं यथा—

---

(1) भृङ्गार—स्वर्णघटितवारिपात्रम् इति शब्द. कल्प. (3-5 9)
(2) आदर्शः—दर्पणः इति शब्द. कल्प. (1-173)
(3) कुन्तः—प्रासास्त्रम् इति शब्द. कल्प (2-142)
(4) प्रवरः अगुरु इति भावप्रकाशे इति शब्द कल्प. (3-293)
(5) फुल्लेन्दीवरपत्राभं-प्रस्फुटितनीलपद्मपत्रतुल्यम् ।

बलदेवं द्विजो दण्डं मदविभ्रान्तलोचनम् ।
लाङ्गलासक्तपाणिं तु मुसलद्योतदक्षिणम् ॥
भोगान् पञ्चाथवा सप्त कुर्यादसावनन्तवत् ॥

प्रतिमादि सामग्री सम्पादनासक्तं प्रति भविष्योत्तरे च विध्यन्तरमुक्तं यथा—

विध्यन्तरमपीच्छन्ति केचिदत्र द्विजोत्तमाः ।
चन्द्रोदये शशाङ्काय अर्घ्यं दद्याद् हरिं स्मरन् ॥
[1]अनघं वामनं सौरिं वैकुण्ठं पुरुषोत्तमम् ।
वासुदेवं हृषीकेशं माधवं मधुसूदनम् ॥
वाराहं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम् ।
दामोदरं पद्मनाभं केशवं गरुडध्वजम् ॥
गोविन्दमच्युतं कृष्णमनन्तमपराजितम् ।
अधोक्षजं जगद्वीजं सर्गस्थित्यन्तकारिणम् ॥
अनादिनिधनं विष्णुं त्रैलोकेशं त्रिविक्रमम् ।
नारायणं चतुर्बाहुं शङ्खचक्रगदाधरम ॥
पीताम्बरधरं नित्यं वनमालाविभूषितम् ।
श्रीवत्साङ्कं जगत्सेतुं श्रीधरं श्रीपतिं हरिम् ॥
नामान्येतानि संकीर्त्य प्रीत्यर्थं पाठयेत्पुनः ।
पाहि मां सर्वलोकेश हरे संसारसागरात् ॥

योगाय योगेश्वराय योगसम्भवाय योगपतये गोविन्दाय नमोनमः । इति शयनमन्त्रः ।

क्षीरोदार्णव सम्भूत अत्रिनेत्रसमुद्भव ।
गृहाणार्घ्यं शशांकेश रोहिण्या सहितो मम ॥
स्थण्डिले स्थापयेद्देवं सचन्द्रां रोहिणीं तथा ।
देवकीं वसुदेवञ्च यशोदां नन्दमेव च ॥
बलदेवमथ पूज्य सर्वपापैः प्रमुच्यते ।

---

(1) "अनघं...संसारसागरात्" इत्यन्तोभागः गरुड. (1-131-10 /16), सम. (पृ–54), रा. मा. (पृ–114) ।

अर्धरात्रे वसोर्धारां पातयेद् गुडसर्पिषा ।।
ततो वन्दापनां षष्ठीं नामादिकरणं मम ।
कर्त्तव्यं तत्क्षणाद्रात्रे प्रभाते नवमी दिने ।।
यथा मम तथा कार्यो भगवत्या महोत्सवः ।

वह्निपुराणे— रोहिण्या सहितं चेन्दुं कृत्वा रौप्यमयं बुधः ।
द्वादशांगुलविस्तारं तत्र चार्घ्यं निवेदयेत् ।।

देवक्यै अपि अर्घ्य ददते । मन्त्रो यथा—

प्रणमेद् देवजननी त्वया जातस्तु वामनः ।
वासुदेवस्तथा कृष्णो नमस्तुभ्यं नमोनमः ।।
सपुत्रायै प्रदत्तं मे गृहाणार्घ्यं नमोऽस्तु ते ।

ब्रह्माण्डपुराणे— अरुणोदयवेलायां नवम्याञ्च ततस्त्रियः ।
रक्तवस्त्रावृताः सर्वाः पुष्पमाल्यैरलंकृताः ।।
नयन्ति प्रतिमा ह्येषामेता विभवसम्भवाः ।
नदीतीरं शुभं रम्यं विविक्तं वा महत्सरः ।।
तत्र स्नानं प्रकुर्वन्ति स्नापयन्ति च ताः स्त्रियः ।
पुनः प्रविश्य च गृहे यवान्नं भक्तिदेवताः ।।
युक्तमिक्षुविकारैश्च [1]यवानीमरिचैः सह ।।

भविष्योत्तरे— ब्राह्मणान् भोजयेद् भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ।
सुवर्णं रजतं गावो वासांसि कुसुमानि च ।।
यद् यदिष्टतमं लोके कृष्णो मे प्रीयतामिति ।
यं देवं देवकी देवी वसुदेवादजीजनत् ।।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ।
सुजन्म वासुदेवाय गोब्राह्मणहिताय च ।।
शान्तिरस्तु शिवं चास्तु इत्युक्त्वा तान् विसर्जयेत् ।

---

(1) यवानी— औषधिभेदः, "जुआणि" इति उत्कलभाषायाम् ।

तथा— [1]अष्टम्यामथ रोहिण्यां न कुर्यात्पारणं क्वचित् ।
हन्यात्पुराकृतं पुण्यमुपवासार्जितं फलम् ॥
तिथिस्त्रयोदशं हन्ति नक्षत्रञ्च चतुर्दशम् ।
तस्मात्प्रयत्नतः कुर्यात् तिथिभान्ते च पारणम् ॥

अष्टम्याम्—अष्टमीसमाप्तितः प्राक् । एवं रोहिण्यामित्यत्र व्याख्या । अत एवोक्तं "तिथिभान्ते च पारणम्" इति तिथ्यन्ते भान्ते चेत्यर्थः । एतेन तिथिभान्तयोरेकस्याप्यन्ते पारणं कर्त्तव्यम् । न तु द्वयोरेवान्तमित्युक्तम् । तथा च वह्निपुराणे[2]—

त्रेतायां द्वापरे चैव राजन् कृतयुगे पुरा ।
रोहिणीसंयुता चैव विद्वद्भिः समुपोषिता ॥
समुपोष्यार्चयित्वाऽथ सर्वपापहरं हरिम् ।
वियोगे पारणे चैव मुनयो ब्राह्मणादयः ॥
[3]सांयोगिके तु ते प्राप्ते यत्रैकोऽपि वियुज्यते ।
तत्र हि पारणं कुर्यादेवं वेदविदो विदुः ॥

तथा— भान्ते कुर्यात्तिथेर्वाऽपि शस्तं भारत ! पारणम् ।

ननूभयत्रापि रात्रिगामिन्यौ, तदा कथं पारणं स्यात् ।

सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते ।
अन्यथा पुण्यहानिः स्याद्दते पारणधारणात् ॥ इति ॥

ब्रह्मवैवर्तवचनमाशङ्क्योक्तम् ।

सा त्वस्तमयपर्यन्तव्यापिनी चेत्परेऽहनि ।
दिवैव पारणं कुर्वन् पारणं नैव दोषभाक् ॥

भविष्योत्तरे—सर्वाय सर्वेश्वराय सर्वसम्भवाय सर्वपतये गोविन्दाय नमोनमः ।
इति पारणमन्त्रः ।

---

(1) का. वि. (पृ–493) ।

(2) अग्नि. पु. (अ–65) इति कृत्यतत्वा. (पृ–186) ।

(3) तिथिनक्षत्रयोरेकत्र योगे यदा तिथेः नक्षत्रस्य वा समाप्तिः भवति, तदा पारणं कर्त्तव्यमित्यर्थः ।

तथा[1]— [2]जयन्त्यामुपवासन्तु कृत्वा यश्चार्चयेद् हरिम् ।
जयन्त्यां पूर्वविद्धायामुपवासव्रतं चरेत् ।।
तिथ्यन्ते वोत्सवान्ते वा व्रती कुर्वीत पारणम् ।
तस्य जन्मशतोद्भूतं पापं नाशय मेऽच्युत ।।
कौमारे यौवने बाल्ये वार्धक्ये यदुपार्जितम् ।
तत्पापं शमयेत्कृष्णः तिथावस्यां सुपूजितः ।।

तथा— एवं य कुरुते देव्या देवक्याश्च महोत्सवम् ।
वर्षे वर्षे भागवतो मद्भक्तो धर्मनन्दन ।।
नरो वा यदि वा नारी यथोक्तं फलमश्नुते ।
पुत्रसन्तानमारोग्यं धनधान्यादिमद्गृहम् ।।
[3]परचक्रभयं नास्ति तस्मिन् राष्ट्रेऽपि पाण्डव ।
पर्जन्यः कामवर्षी [4]स्यादीतिभ्यो न भयं भवेत् ।।
यस्मिन् गृहे पाण्डुपुत्र लिख्यते देवकीव्रतम् ।
न तत्र मृतनिष्क्रान्तिर्न गर्भपतनं भवेत् ।।
न च व्याधिभयं तत्र भवेदिति मतिर्मम ।
न वैधव्यं न दौर्भाग्यं न वास्ति कलहो गृहे ।।
संपर्केणाऽपि यः कश्चित् कुर्याज्जन्माष्टमी व्रतम् ।
विष्णुलोकमवाप्नोति सोऽपि पार्थ न संशयः ।।

आवाहनादौ विशेषस्तु विध्यन्तरादनुसर्त्तव्यः ।

यथाग्नेयपुराणे[5]—

---

(1) का. वि. (पृ–494) ।

(2) जयन्त्या—रोहिणीनक्षत्रयुक्तभाद्रकृष्णाष्टम्याम् ।

(3) परचक्रभयं — शत्रोराक्रमणजनितभयम् ।

(4) ईतयो यथा— अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः ।
प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः ।। इति

(5) अग्नि. पु. (183/3-18)

कृष्णपक्षे भाद्रपदे अष्टम्यां रोहिणीयुते ।
उपोषितोऽर्चयेत्कृष्णं भक्तिमुक्तिप्रदायकम् ॥
आवाहयाम्यहं कृष्णं बलभद्रञ्च देवकीम् ।
वसुदेवं यशोदाञ्च पूजयामि नमोऽस्तु ते ॥
योगाय योगपतये योगेशाय नमोनमः ।
योगादिसम्भवायैव गोविन्दाय नमोनमः ॥
स्नानं कृष्णाय दद्यात्तु अर्घ्यं चानेन दापयेत् ।
यज्ञाय यज्ञेश्वरायं यज्ञानां पतये नमः ॥
यज्ञादि सम्भवायैव गोविन्दाय नमोनमः ।
गृहाण देव पुष्पाणि सुगन्धीनि प्रियाणि ते ॥
सर्वकामप्रदो देव भव मे देववन्दितः ।
धूपधूपितधूपत्वं धूपितैस्त्वं गृहाण मे ॥
सुगन्धधूपगन्धाढ्यं कुरु मां सर्वदा हरे ।
दीपदीप्तं महादीप्तं दीपदीप्तिश्च सर्वदा ॥
मया दत्तं गृहाण त्वं [1]कुरु चोर्ध्वंगतिं च माम् ।
विश्वाय विश्वपतये विश्वेशाय नमोनमः ॥
विश्वादिसम्भवायैव गोविन्दाय निवेदितः ।
धर्माय धर्मपतये धर्मेशाय नमोनमः ॥
धर्मादि सम्भवायैव गोविन्द शयनं कुरु ।
सर्वाय सर्वपतये सर्वेशाय नमोनमः ॥
सर्वादिसम्भवायैव गोविन्दाय च पारणम् ।
क्षीरोदार्णवसम्भूत अत्रिनेत्रसमुद्भव ॥
गृहाणार्घ्यं शशांकेदं रोहिण्या सहितो मम ।
[2]स्थण्डिले स्थापयेद्देवं सचन्द्रां रोहिणीं यजेत् ॥

---

(1) ऊर्ध्वंगति–स्वर्गफलम् । (2) स्थण्डिले–चत्वरे, अमरः (2-7-18) ।

देवकीं वसुदेवञ्च यशोदानन्दनं बलम् ।
अर्धरात्रे वसोर्धाराः पातयेद् गुडसर्पिषा ॥
वस्त्रहेमादिकं दद्यात् ब्राह्मणान् भोजयेद् व्रती ।
जन्माष्टमीव्रतपरः पुत्रवान् विष्णुलोकभाक् ॥
वर्षे वर्षे तु यः कुर्याद् पुत्रार्थी वेत्ति नो भयम् ।
पुत्रं देहि धनं देहि आयुरारोग्यसम्पदम् ॥
धर्मकामञ्च सौभाग्यं स्वर्गं मोक्षञ्च देहि मे ॥

इति कृष्णजन्माष्टमीव्रतम् ।

अथ वर्षवृद्धिः

श्रीकृष्णजन्मदिनत्वादत्र [1]वर्षवृद्धिविधिरभिधीयते । शुद्धिदीपिकायां[2]—

जन्मर्क्षयुक्ता यदि जन्ममासे, यस्य ध्रुवं जन्मतिथिर्भवेच्च ।
भवन्ति तद् वत्सरमेव यावन्, नैरुज्यसम्मानसुखानि तस्य ॥

तिथिनक्षत्रयोगस्याप्राप्ते नक्षत्रमात्रे । तदुक्तम्—

अभिषेकदिने राज्ञो वर्षवृद्धिः प्रशस्यते ।
अन्येषां जन्मनक्षत्रे क्षीणायुस्त्वन्यथा भवेत् ॥

अन्यच्च— जन्ममासस्य जन्माहे जन्मतारेन्दुसंयुते ।
तदलाभादृक्षमात्रे कुर्याद् वर्षविवर्द्धनम् ॥

जन्मदिनाज्जन्मदिननक्षत्रस्य वृद्धावेवेदं वोद्धव्यम् । नक्षत्राज्जन्मदिनस्योत्तरगामित्वे तु जन्मदिन एव । अनृक्षे तु काञ्चनमिति तत्र प्रायश्चित्तस्य वक्ष्यमाणत्वात् । दृश्यते दिवसमात्रके वर्षवृद्धिविधायकम् । तथा—

प्रत्यब्दं जन्मदिवसे वर्षवृद्धयभिषेचनन् ।
वर्द्धयित्वाऽथवा कुर्याज्जन्ममासे शुभे दिने ॥

वर्द्धयित्वेत्येतत्सूतिकाद्यशौचपाते विस्मृतौ च मंन्तव्यम् ।

---

(1) वर्षवृद्धिविधिः—जन्मदिनकृत्यम् ।

(2) शुद्धिदी. (3-28) ।

तिथिद्वैधं यदैकस्मिन् भवेन्मासि कथञ्चन ।
श्राद्धे पूर्वा तिथिः ग्राह्या वृद्धावुत्तरगामिनी ॥

अत्र तिथिग्रहणं नक्षत्रस्याप्युप[1]लक्षणम् । अधिवासविषय उक्तः [2]राजमार्तण्डे—

मासि सम्वत्सरे चैव तिथिद्वैधं यदा भवेत् ।
तत्र पूर्वातिथिर्ग्राह्या दैवे कर्मणि चोत्तरा ॥

उत्तरा शुद्धाशुद्धमासे एव भवतीत्यर्थः ।

उपाकर्म तथोत्सर्गः प्रसवाहोऽष्टकादयः ।
मलिम्लुचेऽपि कर्त्तव्याः शेषमन्यद्विवर्जयेत् ॥

इति वचनं [3]शाखान्तरादौ च व्यवस्थापनीयम् ।

अधिको न च कर्त्तव्यः श्राद्धसम्वत्सराधिके ।
वर्षवृद्ध्यभिषेकादि कर्त्तव्यमधिकेन तु ॥

अधिके मलिम्लुचे न कर्त्तव्यमित्यर्थः । [4]राजमार्तण्डे—

युगादिकन्यागतमार्गशीर्षपुष्याभिषेकाब्दविवर्द्धनानि ।
मासाद्यसप्तमसितेतराणि, न विक्रियां यान्त्यधिमासपाते ॥

विक्रियां न यान्ति— विकृते मासि न भवन्ति, किन्तु प्रकृते शुद्ध एव मासि भवन्तीत्यर्थः । जन्मदिने भौमशनैश्चरवारपाते जन्मनक्षत्राज्जन्मदिवसस्योत्तरगामित्वे च दोषः । शान्तिश्च [5]शुद्धिदीपिकायां—

[6]कृतान्तकुब्जयोर्वारे यस्य जन्मदिनं भवेत् ।
अनृक्षयोगसम्प्राप्तौ विघ्नस्तस्य दिने दिने ॥

---

(1) स्वग्राहकत्वे सति स्वेतरग्राहकम् उपलक्षणम् । तेन तिथिग्रहणेन नक्षत्रस्यापि ग्रहणम् । (2) रा. मा. (पृ–121)

(3) शाखान्तरादौ नाम यस्यां यस्यां वेदशाखायां या या व्यवस्था समुपक्लृप्ताऽस्ति तस्यां तस्यां सा सा व्यवस्था तत्तच्छाखिभिरनुष्ठातव्या, अन्यथा शाखाविविभ्रष्टतया प्रायश्चित्तपत्तेः । यस्यां शाखायां या व्यवस्थाऽक्लृप्ता, साऽपि इतरशाखायां नापकृष्येत शाखारण्डदोषपातात् ।

(4) रा. मा. (पृ–103) । (5) शुद्धिदी. (3–29) ।

(6) कृतान्तकुब्जयोः—शनिमङ्गलयोः ।

[1]तथा — सौरारयो दिने मुक्ता देयाऽनृक्षे तु काञ्चनम् ।
जन्मन्यृक्षे यदि स्यातां वारौ भौमशनैश्चरौ ॥
मासः स कल्मषो नाम मनोदुःखप्रदायकः ।
तस्य सर्वौषधिस्नानं ग्रहविप्रसुरार्च्चनम् ॥
सुरामांसी वचाकुष्ठं शैलेयं रजनीद्वयम् ।
[2]शटी चम्पकमुस्तश्च सर्वौषधिगणः स्मृतः ॥

[3]तथा— यस्य जन्मर्क्षमासाद्य रविसंक्रमणं भवेत् ।
तन्मासाभ्यन्तरे तस्य रोगक्लेशधनक्षयः ॥
तगरसरोरुहपत्रै [4]रजनीसिद्धा[5]र्थलोध्रसंयुक्तैः ।
स्नानं नक्षत्रदिने रविसंक्रान्तौ नृणां शुभदम् ॥

व्यासः— श्राद्धे जन्मदिने चैव विवाहे मुखदूषिते ।
व्रते चैवोपवासे च वर्जयेद् दन्तधावनम् ॥

राजमार्तण्डे —

[6]यो जन्ममासे क्षुरकर्मयात्रां, कर्णस्य वेधं कुरुते तु मोहात् ।
नूनं स रोगी धनपुत्रनाशं, प्राप्नोति मूढः वधबन्धनानि ॥

जन्ममासश्चात्र पौर्णमास्यादिः पौर्णमास्यन्तः वेति केचित् ।

शतानन्देन त्वन्यदुक्तं, तथा—

जातं दिनं दूषयते वसिष्ठस्त्वष्टौ च गार्ग्यो यवनो दशाहम् ।
जन्मर्क्षमासं किल भागुरिश्च, व्रते विवाहे क्षुरकर्मवेधे ॥

वराहः— जन्मदिनात् समारभ्य यावत् त्रिंशद्दिनानि तु ।
जन्ममासः स विज्ञेयः क्षौराध्वानञ्च वर्जयेत् ॥

---

(1) शुद्धिदी. (3/30–32) ।

(2) शटी–स्वनामख्यातौषधी । वन अदा इति भाषा । कचूर इति हिन्दीभाषायाम् । इति शब्दक. (5-13) ।

(3) शुद्धिदी. (3/26–27) ।

(4) रजनी—हरिद्रा ।

(5) सिद्धार्थः—श्वेतसर्षपः ।

(6) का. वि. (पृ–376) ।

अस्यानुष्ठानक्रम: —

विधानमधुना तस्य वद आगमदर्शनात् ।
कृत्यनित्यक्रियो विद्वान्नवशुक्लाम्वरावृत: ॥
सन्निधाविष्टदेवस्य लिप्ते गोमयवारिणा ।
पुण्याहं वाचयित्वा तु गुरुमित्रद्विजोत्तमान् ॥
माङ्गल्यद्रव्यसम्भारसम्भृतोऽभिनवं घटम् ।
पक्वविम्वसमाकारं सम्भृतै: परिवेष्टितम् ॥
सरत्नमालिकाम्भोभि: पूरितं सितचन्दनै: ।
सतण्डुलै: सितीभूतं चूतपल्लव[1]वज्रकम् ॥
रजसालंकृते देशे सिततण्डुलपीठके ।
[2]वरुणस्येति मन्त्रेण स्थापयेत्तस्य चाग्रत: ॥
मार्त्तिकीं प्रतिमां षष्ठीं हारिद्रीं वाऽथ पैष्टिकीम् ।
वैनायकीञ्च संस्थाप्य पीठे रजतसम्भवे ॥
राजतीं प्रतिमां तत्र मार्कण्डेयं महामुनिम् ।
अथवा पिष्टपीठे च पैष्टिकीं प्रतिमां मुने: ॥
स्थापयेत् प्रणवेनैव यजेत्कुम्भे जलाधिपम् ।
वरुणं हंसपृष्ठस्थं दक्षिणेनाभयप्रदम् ॥
वामेन नागपाशन्तु धारयन्तं सुरूपिणम् ।
मौनिनञ्च महाकायं चिन्तयेद् यादसांपतिम् ॥
एवं सञ्चिन्त्य वरुणं सूक्तैर्वरुणवाचकै: ।
सितचन्दनपुष्पैश्च धूपदीपनिवेदनै: ॥
रजस्यष्टदले पद्मे कर्णिकामध्यसंस्थितम् ।
सोमं ग्रहं समासीनं कुण्ठिकाजाप्यमालिनम् ॥
शुक्लं सञ्चिन्त्य तत्सूक्तै: सोमं सम्पूजयेच्छुभम् ।

---

(1) वज्रकं—वज्रक्षारम् इति राजनिर्घण्ट: इति शब्दक. (4-250)

(2) शु. यजु. (4–36)

पद्मिनीपत्रसंकाशं वायव्ये गणनायकम् ॥
ग्रहानीशानदलगान् क्षेत्रपालान् स्वगोचरे ।

आग्नेये–क्षेत्रपालकम् इति । आग्नेयपुराणे—

मृत्युञ्जयं स्वमन्त्रेण नैऋत्यदलमध्यके ।
पूर्वतः सप्तविंशत्यां बहुविधाश्च तारकाः ॥
[1]केसरस्थाः [2]उदीच्यन्ताः पूजयेच्च स्वनामभिः ।
त्रींस्तु त्रींस्तु तथा राशीन् स्वनाम्ना तु समर्च्चयेत् ॥
मेषं धनुर्धरं सिंहं पूर्वतो याम्यगोचरे ।
मकरं वृषभं कन्यां पश्चिमे मिथुनं तथा ॥
तुलाघटमुत्तरस्यामलिं मीनञ्च कर्कटम् ।
इन्द्रादीनर्च्चयेद् बाह्ये स्वासु दिक्षु व्यवस्थितान् ॥
अश्वत्थामा बलिर्व्यासो हनुमांश्च विभीषणः ।
कृपः परशुरामश्च सप्तैते चिरजीविनः ॥
सप्तैतान्यः स्मरेन्नित्यं मार्कण्डेयमथाष्टमम् ।
जीवेद् वर्षशतं [3]साग्रं सर्वव्याधिविवर्जितः ॥
द्रोणायन महाभाग रुद्रतेजसमुद्भव ।
भवायुर्वरदो मे त्वमश्वत्थामन्नमोऽस्तु ते ॥

---

(1) केसरस्थाः—सिंहराशितः । (2) उदीच्यन्ताः—कर्कटराश्यन्ताः ।

(3) अग्रशब्दस्य अनेकार्थाः यथा—

अग्रं पुरस्तादुपरि परिमाणे पलस्य च ।
आलम्बने समूहे च प्रान्ते च स्यान्नपुंसकम् ।
अधिके च प्रधाने च प्रथमे चाभिधेयवत् ॥

मेदिनी (123/34)

(१) अग्रं—समूहः अर्थात् सम्पूर्णो । तेन साग्रं सम्पूर्णं सम्वत्सरशतमित्यर्थः ।

(२) अधिकं—साग्रं वर्षशतं जीवेत्यस्याः श्रुतेर्व्याख्याने साग्रं सपादशतमिति लक्षणप्रकाशे इति धर्मशास्त्रशब्दकोषे ।

दैत्येन्द्रकुलसम्भूत दानयज्ञक्रियारतः ।
प्रपन्नः शरणं त्वाहं दीर्घमायुः प्रयच्छ मे ।।
साम्प्रतानागतातीत-ज्ञानाधार तपोनिधे ।
नारायणांशसम्भूत ममाद्य वरदो भव ।।
अञ्जनागर्भसम्भूत कपीन्द्र सचिवोत्तम ।
रामप्रिय नमस्तुभ्यं हनुमन् रक्ष मां सदा ।।
विभीषण नमस्तुभ्यं रामपादाब्जपूजक ।
आयुरारोग्यमैश्वर्यं देहि पौलस्त्यनन्दन ।।
द्विजेन्द्र भारताचार्य सर्वशास्त्रविशारद ।
शरणञ्च प्रपन्नोऽस्मि कृप मां रक्ष सर्वदा ।।
रैणुकेय महावीर्य कार्तवीर्यकुलान्तक ।
आयुः प्रयच्छ मे राम जामदग्न्य नमोऽस्तु ते ।।
एवं सम्प्रार्थ्य भक्त्या तु प्रणम्य दण्डवत्क्षितौ ।
भूमिं दीपं फलं दूर्वां पुष्पं गोरोचनां तथा ।।
दर्पणं दधिसिद्धार्थं घृतं चासादयेत्क्रमात् ।

चकारेण सुवर्णमन्त्रश्च सूचितम् । क्रमादिति वक्ष्यमाणमन्त्रक्रमादित्यर्थः ।

ततो रक्षाञ्च [1]रक्षोघ्नैर्दर्भैर्मङ्गलसाधनैः ।
द्विजाः कुर्वन्तु वेदज्ञाः वेदमन्त्रैः शुभार्थिनः ।।
षष्ठीं सम्पूजयेद् यत्नात् साङ्गां सपरिचारकाम् ।
वस्त्रैराभरणैर्दिव्यैः पुष्पाद्यैः सुमनोहरैः ।।
आयुर्विवृद्धये पश्चान्मार्कण्डेयं महामुनिम् ।
आयुर्दात्र्यश्चतस्रस्तु मातॄः सम्पूजयेत्ततः ।।
महाभूतानि पंचैव ब्रह्मविष्णुमहेश्वरान् ।
मनोबुद्धिमहङ्कारं चन्द्रादित्यौ च देवताः ।।

---

(1) रक्षोघ्नैः—रक्षोघ्नसूक्तैः, "कृणुष्वपाजः प्रसितिं न पृथ्वीम्" इत्यादिभिः ।

देवता:— देवतामूर्त्ती: ।

अश्वत्थामादि सप्तैतान् सम्पूज्य प्रार्थयेद्वरम् ।
आयुर्देहि यशो देहि श्रियं देहि त्वमेव च ।
पुत्रं पौत्रं प्रपौत्रञ्च देहि मे गणनायक ॥
षष्ठीदेवि नमस्तेऽस्तु सूतिकागृहशायिनि ।
पूजिता परया भक्त्या दीर्घमायु: प्रयच्छ मे ॥
आयु:प्रद ,महाभाग सोमवंशविवर्द्धन ।
महातपा मुनिश्रेष्ठ मार्कण्ड़ेय नमोऽस्तु ते ॥
मार्कण्ड़ेय महाभाग सप्तकल्पान्तजीवन ।
आयुरारोग्यमैश्वर्यमस्माकं वरदो भव ॥
नववर्षायुषं प्राप्य महता तपसा पुरा ।
सप्तकल्पकृतं येन आयु: स मे प्रयच्छतु ।
धिषणा बुद्धिमाता च गौरीकटकपूतना ।
आयुर्दात्र्यो भवन्त्वेता अद्य जन्मदिने मम ॥
क्षितिर्जलं वियत्तेजो व्रह्मविष्णुमहेश्वरा: ।
मामेव हि सदा पान्तु चिरजीवी भवाम्यहम् ॥
मनोबुद्धिरहङ्कारश्चन्द्रादित्यौ च देवता: ।
मामेव हि सदा पान्तु चिरजीवी भवाम्यहम् ॥

[1]युञ्जन्तीति च मन्त्रेण मूर्ध्नि [2]रोचनामाचरेत्[क] ।
[3]तेजोऽसीति घृतेनैव तस्मिन् तेनास्यलोकनम् ॥
[4]दधिक्राव्ण ऋचा दध्ना ललाटे तिलकं लिखेत् ।

---

(1) शु. यजु. (23-5) ।
(2) रोचनां—गोरोचनाम् ।
(3) शु. यजु. (22-1) ।
(4) शु. यजु. (23-32) ।

(क) "मालिखेत्" इति खग पाठः ।

दद्याच्छिरसि दूर्वां च [1]काण्डान्मन्त्रेण मन्त्रितान् ।।
[2]एतेन रुद्रावसेन सिद्धार्थं शिरसि क्षिपेत् ।
[3]या फलिनी ऋचा सम्यङ् नमः कुर्यात् फलोत्तमम् ।।
शिरसि निक्षिपेत् पुष्पं [4]श्रीश्चते मन्त्रमन्त्रितम् ।
[5]आकृष्णेनेति मन्त्रेण दर्पणे मुखदर्शनम् ।।
[6]अग्न आयाहि मन्त्रेण नानाद्रव्यं समीक्ष्यते ।
[7]ज्योतिरसीत्यृचा दीपं [8]भूरसीति भुवं स्पृशेत् ।।
[9]यदा वध्नन्निति स्वर्णं नमस्कुर्यात् कृताञ्जलिः ।
[10]अन्नमन्नपते मन्त्रमन्त्रितं तु नमस्य त्रिः ।।
गन्धवस्त्रमलंकारं गृह्णीयात्तदनन्तरम् ।
दूर्वा सिताऽसितानिम्बरोचनावेणुरोचनाः ।।
न्यग्रोधशृङ्गसिद्धार्थः पञ्चरत्नयवैः सह ।
एभिः सम्वत्सरग्रन्थिवन्धनं समुदाहृतम् ।।
ग्रन्थिवन्धनकर्त्तव्यं [11]दीर्घायुस्तेति मन्त्रितम् ।
[12]वर्षवृद्धामृचा पूर्वमाशीर्वादं ततः परम् ।।
[13]देवस्य त्वा सरस्वत्यै [14]अश्विनोरिति चापरम् ।
[15]आयुष्यमिति मन्त्रेण तद्रक्षणादनन्तरम् ।।
एभिः मन्त्रैस्तु संमन्त्र्य शालिसारमखण्डितम् ।

---

(1) शु. यजु. (13–20) ।
(2) शु. यजु. (3–61) ।
(3) शु. यजु. (12–89) ।
(4) शु. यजु. (31–22) ।
(5) शु. यजु. (33–43) ।
(6) ऋग् (6-16-10)
(7) शु. यजु. (5–35) ।
(8) शु. यजु. (13–18) ।
(9) शु. यजु. (34–52) ।
(10) शु. यजु. (11–83) ।
(11) शु. यजु. (12-100) ।
(12) शु. यजु. (1–16) ।
(13) शु. यजु. (9-30) ।
(14) शु. यजु. (20–64) ।
(15) शु. यजु. (34–50) ।

रक्षेत् भूतपिशाचेभ्यो भयं तस्य न जायते ॥
सुवर्णं शतमानञ्च गुरवे देयमादरात् । शतमानं प्रति प्रार्थना ।
शतमानं शतायुस्त्वं शतवीर्यं शतेन्द्रियः ।
अतस्त्वां सम्प्रयच्छामि शतमायुः प्रयच्छ मे ॥
मृष्टान्नैर्भोजयेद् विप्रान् सुहृत् स्वजनबान्धवान् ।
स्नात्वा जन्मदिने स्त्रियं परिहरन् प्राप्नोत्यभीष्टं श्रियम्,
मत्स्यान् मोचयतस्तिलांश्च ददतो दीर्घं भवेज्जीवितम् ।
सक्तून् खादयतस्तु तस्य विपदो यान्ति प्रणाशं चिराद्,
भुङ्क्ते यस्तु निरामिषं स तु भवेज्जन्मान्तरे पण्डितः ॥
[2]एवं सम्पूजयेद् यस्तु जन्मर्क्षे जन्मनायकम् ।
यावद्द्रव्यं तु सर्वं तदायुःस्थानफलप्रदम् ॥
सम्यग् रूपाणि तस्य स्युः सुनक्षत्राणि सर्वदा ।
आयुःस्थानस्य फलदा ग्रहाः वै राशयः शुभाः ॥
दिक्पालाः क्षेत्रपालाश्च सर्वे दैवफलप्रदाः ।
अविघ्नाः सिद्धयः श्रेष्ठाः स्वयं सिध्यन्त्ययत्नतः ॥
भक्त्यैवं पूजयेद् यस्तु मार्कण्डेयं महामुनिम् ।
विजित्य नियतं कालमपमृत्युं च दारुणम् ॥
जरासमुद्भवं घोरं पित्तवातादिसम्भवम् ।
परमायुरवाप्नोति सर्वबाधाविवर्जितः ॥ इति ।

अथ पारम्पर्यसिद्धमार्कण्डेयपूजापद्धतिः —

कृतस्नानादिनित्यक्रियो नूतनाम्बराऽसम्भवे धौतवासमङ्गलसम्भारसहितो देवगृहादावुपलिप्तभूमौ गुरुमित्रब्राह्मणानाहूय गृहीताज्ञः सचूतपल्लवं जलपूर्णकुम्भं [3]वरुणस्योत्तम्भनमसीति स्थापयित्वा तस्याग्रतोऽङ्कनिहितपुत्रीं रजतमयीं षष्ठीप्रतिमां पिष्टकमयीं वा स्थापयित्वा गणपतिं च रजताद्यासने पिष्टकपीठे वा मार्कण्डेयप्रतिमां

---

(1) वर्षक्रि (पृ–561), सम. (पृ–176) । (2) वर्षक्रि (पृ–558) ।
(3) शु. यजु. (4-36) ।

रजतमयीं पिष्टकमयीं वा अश्वत्थामादींश्च स्थापयेत् । ततो गणपतिं पूजयित्वा घटे वरुणमादित्यादि नवग्रहान्, अश्विन्यादिसप्तविंशति नक्षत्राणि मेशादिद्वादशराशीन् पूजयेत् । ततः षष्ठीं साङ्गोपांगेन पूजयित्वा मार्कण्डेयं पूजयेत् ।

ततः कुम्भे— ॐ जं मृत्युञ्जयायै नमः । ॐ खं ब्रह्मणे नमः । ॐ वं विष्णवे सर्वव्यापिने नमः । ॐ हं ईशानाय सर्वविद्याधिपतये नमः । स्वनक्षत्राय नमः । स्वराशये नमः । मूर्त्तिदेवताभ्यो नमः । क्षेत्रपालाय नमः । ततः पीठे अश्वत्थाम्ने नमः । बलये नमः । वेदव्यासाय नमः । हनुमते नमः । विभीषणाय नमः । कृपाचार्याय नमः । परशुरामाय नमः । अर्घ्यादिनैवेद्यान्तं पूजा । ततः शुक्लकुसुमाञ्जलिं गृहीत्वा इमं मन्त्रं पठेत् । गणपतिं प्रति—

आयुर्देहि यशो देहि श्रियं देहि त्वमेव च ।
पुत्रं पौत्रं प्रपौत्रञ्च देहि मे गणनायक ॥

इति गणपतिचरणयोः पुष्पाञ्जलिं दत्त्वा नमस्कुर्यात् । एवं सर्वत्र । आयु प्रदेयादि जीवेद् वर्षशतं साग्रं सर्वव्याधिविवर्जितः इत्यन्तं पठित्वा पुष्पाञ्जलिं मार्कण्डेयचरणयोर्दत्त्वा प्रणमेत् । ततः पूर्ववद् [1]वर्षवृद्धमसीत्यादिमन्त्रैराशीर्वादः । ततो मङ्गलाचारविधानम् । भूमिं दीपं फलमित्यादि पूर्वोक्तम् । मन्त्राश्च [2]भूरसीत्यादि पूर्वोक्ताः । ततो यथाशक्तिब्राह्मणेभ्यो दानम् । मत्स्यादि नानाजीवजन्तुविमोचनम् ।

इति वर्षवृद्धिः ।

अथ भूपालत्रयोदशी

पुराणे— [3]नभस्यस्यापरे पक्षे या भूपालत्रयोदशी ।
युगादिरिति विख्याता दाने श्राद्धे महाफला ॥

इति भूपालत्रयोदशी ।

---

(1) शु. यजु. (1–16)

(2) शु. यजु. (16–18)

(3) नभस्यस्यापरेपक्षे—भाद्रपदकृष्ण पक्षे ।

रक्षेत् भूतपिशाचेभ्यो भयं तस्य न जायते ।।
सुवर्णं शतमानञ्च गुरवे देयमादरात् । शतमानं प्रति प्रार्थना ।
शतमानं शतायुस्त्वं शतवीर्यं शतेन्द्रियः ।
अतस्त्वां सम्प्रयच्छामि शतमायुः प्रयच्छ मे ।।
मृष्टान्नै र्भोजयेद् विप्रान् सुहृत् स्वजनवान्धवान् ।
स्नात्वा जन्मदिने स्त्रियं परिहरन् प्राप्नोत्यभीष्टं श्रियम्,
मत्स्यान् मोचयतस्तिलांश्च ददतो दीर्घं भवेज्जीवितम् ।
सक्तून् खादयतस्तु तस्य विपदो यान्ति प्रणाशं चिराद्,
भुङ्क्ते यस्तु निरामिषं स तु भवेज्जन्मान्तरे पण्डितः ।।
[2]एवं सम्पूजयेद् यस्तु जन्मर्क्षे जन्मनायकम् ।
यावद्द्रव्यं तु सर्वं तदायुःस्थानफलप्रदम् ।।
सम्यग् रूपाणि तस्य स्युः सुनक्षत्राणि सर्वदा ।
आयुःस्थानस्य फलदा ग्रहाः वै राशयः शुभाः ।।
दिक्पालाः क्षेत्रपालाश्च सर्वे दैवफलप्रदाः ।
अविघ्नाः सिद्धयः श्रेष्ठाः स्वयं सिध्यन्त्ययत्नतः ।।
भक्त्यैवं पूजयेद् यस्तु मार्कण्डेयं महामुनिम् ।
विजित्य नियतं कालमपमृत्युं च दारुणम् ।।
जरासमुद्भवं घोरं पित्तवातादिसम्भवम् ।
परमायुरवाप्नोति सर्वबाधाविवर्जितः ।। इति ।

अथ पारम्पर्यसिद्धमार्कण्डेयपूजापद्धतिः —

कृतस्नानादिनित्यक्रियो नूतनाम्बराऽसम्भवे धौतवासमङ्गलसम्भारसहितो देवगृहादावुपलिप्तभूमौ गुरुमित्रब्राह्मणानाहूय गृहीताज्ञः सचूतपल्लवं जलपूर्णकुम्भं [3]वरुणस्योत्तम्भनमसीति स्थापयित्वा तस्याग्रतोऽङ्कनिहितपुत्रीं रजतमयीं षष्ठीप्रतिमां पिष्टकमयीं वा स्थापयित्वा गणपतिं च रजताद्यासने पिष्टकपीठे वा मार्कण्डेयप्रतिमां

---

(1) वर्षक्रि (पृ–561), सम. (पृ–176) ।
(2) वर्षक्रि (पृ–558) ।
(3) शु. यजु. (4-36) ।

रजतमयीं पिष्टकमयीं वा अश्वत्थामादींश्च स्थापयेत् । ततो गणपतिं पूजयित्वा घटे वरुणमादित्यादि नवग्रहान्, अश्विन्यादिसप्तविंशति नक्षत्राणि मेशादिद्वादशराशीन् पूजयेत् । ततः षष्ठीं साङ्गोपांगेन पूजयित्वा मार्कण्डेयं पूजयेत् ।

ततः कुम्भे— ॐ जं मृत्युञ्जयायै नमः । ॐ खं ब्रह्मणे नमः । ॐ वं विष्णवे सर्वव्यापिने नमः । ॐ हं ईशानाय सर्वविद्याधिपतये नमः । स्वनक्षत्राय नमः । स्वराशये नमः । मूर्त्तिदेवताभ्यो नमः । क्षेत्रपालाय नमः । ततः पीठे अश्वत्थाम्ने नमः । वलये नमः । वेदव्यासाय नमः । हनुमते नमः । विभीषणाय नमः । कृपाचार्याय नमः । परशुरामाय नमः । अर्घ्यादिनैवेद्यान्तं पूजा । ततः शुक्लकुसुमाञ्जलि गृहीत्वा इमं मन्त्रं पठेत् । गणपतिं प्रति—

आयुर्देहि यशो देहि श्रियं देहि त्वमेव च ।
पुत्रं पौत्रं प्रपौत्रञ्च देहि मे गणनायक ॥

इति गणपतिचरणयोः पुष्पाञ्जलि दत्त्वा नमस्कुर्यात् । एवं सर्वत्र । आयु प्रदेयादि जीवेद् वर्षशतं साग्रं सर्वव्याधिविवर्जितः इत्यन्तं पठित्वा पुष्पाञ्जलि मार्कण्डेयचरणयोर्दत्त्वा प्रणमेत् । ततः पूर्ववद् [1]वर्षवृद्धमसीत्यादिमन्त्रैराशीर्वादः । ततो मङ्गलाचारविधानम् । भूमिं दीपं फलमित्यादि पूर्वोक्तम् । मन्त्राश्च [2]भूरसीत्यादि पूर्वोक्ताः । ततो यथाशक्तिब्राह्मणेभ्यो दानम् । मत्स्यादि नानाजीवजन्तुविमोचनम् ।

इति वर्षवृद्धिः ।

अथ भूपालत्रयोदशी

पुराणे— [3]नभस्यस्यापरे पक्षे या भूपालत्रयोदशी ।
युगादिरिति विख्याता दाने श्राद्धे महाफला ॥

इति भूपालत्रयोदशी ।

---

(1) शु. यजु. (1–16)

(2) शु. यजु. (16–18)

(3) नभस्यस्यापरेपक्षे—भाद्रपदकृष्ण पक्षे ।

अथ सप्तपूरिका

[1]दर्शे सुवर्णवटकैः[2] पतिमाराधयन्ति याः ।
ताः सर्वाः सुभगा नार्यः पुत्रवत्यो वराङ्गनाः ॥
न वैधव्यं भवेत्तासां पुनर्जन्मसु सप्तसु ॥

इति सप्तपूरिका ।

अथ [3]हरितालिकाचतुर्थी

तत्र ब्रह्मपुराणे—

[4]शुक्लपक्षे चतुर्थ्यान्तु सिंहे चन्द्रस्य दर्शनम् ।
मिथ्याभिशंसनं कुर्यात्तस्मात् पश्येन्न तं सदा ॥

कदाचिद्दर्शने शान्तिरुक्ता ब्रह्मपुराणे—

[5]वासुदेवोऽभिशस्तस्तु निशाकरमरीचिषु ।
स्थितश्चतुर्थ्यां विद्धायां मनुष्याणां पतिश्च सः ॥
अतश्चतुर्थ्यां चन्द्रं तु प्रमादाद् वीक्ष्य मानवः ।
[6]यद् वा आत्रेयिकावाक्यं प्राङ्मुखो वाऽप्युदङ्मुखः ॥
सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ।
सुकुमारकमारोदीस्तदद्धेषः समन्तकः ॥

चन्द्रं वीक्ष्य, सिंहः प्रसेनमित्यादि वाक्यं प्रयत्नाद् पठेद् इति सम्बन्धः ।

इति हरितालिकाचतुर्थी ।

---

(1) का. सा. (पृ–154) । (2) वटकैः—गोलकैः ।

(3) हरितालिका नाम व्याख्यातं धर्मसिन्धौ—

आलिभिः हरिता यस्मात् तस्मात् सा हरितालिका ।
भाद्रस्य कज्जली कृष्णा शुक्ला च हरितालिका ॥

इति दिवोदासवचनात् । ध. सि. (पृ–147)

(4) का. वि. (पृ–511), का. सा. (पृ–62) ।

(5) वर्षक्रि. (पृ– 16), का. सा. (पृ–63), स. म. (पृ- 39) ।

(6) ब्रह्मपु. (16-36) ।

अथ ऋषिपंचमी

तत्र स्मृतिसमुच्चये:—

[1]भाद्रे सितेऽपराह्णे तु पञ्चमी यत्र तिष्ठति ।
विश्वामित्रऋषि: स्त्रीभि: पूज्य: सन्तानवृद्धये ॥

शतानन्दसंग्रहे— [2]षष्ठीविद्धा पञ्चमी या महर्षेस्तत्र पूजने ।
पतिपुत्रहतानारी सा नारी नरकं व्रजेत् ॥

इति ऋषिपञ्चमी ॥

अथ षष्ठीपूजा

[3]यया भाद्रस्य शुक्लायां षष्ठी षष्ठ्यां प्रपूज्यते ।
जीवपुत्रा च सौभाग्यं धनधान्ययुता भवेत् ।
तस्माद् यत्नेन नार्यश्च पूजयन्ति सदैव तु ॥

सदैव सम्वत्सरे सर्वदिने वा, अत्र षष्ठीद्वैधे परविद्धैव ग्राह्या । एकादश्यष्टमीत्यादि पूर्वोक्तवचनात् । परवेधालाभे पूर्वैव ।

[4]एकादशी तृतीया च षष्ठी चैव त्रयोदशी ।
पूर्वविद्धा तु कर्त्तव्या यदि न स्यात्परेऽहनि ॥

इति वसिष्ठवचनात् । यदि न स्यात् परेऽहनीत्यत्र परदिनसत्त्वं वेधयोग्यकालप्रतिपादकत्वेन विवक्षणीयम् । उपवासव्रतेनैव निर्णयात् । द्वयोरलाभे सामान्यवन्निर्णय: ।

इति षष्ठीपूजा ।

अथ कुक्कुटीव्रतम्

भाद्रे मासि सिते पक्षे सप्तम्यां ललितालये ।
स्नात्वा शिवं लेखयित्वा मण्ड़ले च सहाम्बिकम् ॥

---

(1) का. सा. (पृ–67) । (2) का. सा. (पृ–67) ।

(3) का. सा. (पृ–70) ।

(4) का. सा. (पृ–69), ए. च. (अ-10, पृ-75) ।

(5) का. सा (पृ-72), रा. मा. (पृ–116) ।

भक्त्या सम्पूज्य विधिवत् करे बध्वा सुडोरकम् ।
पूजयेच्च तदा तस्यां दुष्पापं नैव विद्यते ॥

इति भाद्रशुक्लसप्तम्यामुमामहेश्वरपूजा । अत्र तिथिद्वैधे पूर्वोक्तपूर्वापरवेधे दृष्टे पूर्वविद्धा ग्राह्या ।

[1]षष्ठी च सप्तमी यत्र अन्योऽन्येन समाश्रिते ।
पूर्वविद्धा द्विजश्रेष्ठ कर्त्तव्या सप्तमी तिथिः ॥

इति विष्णुपुराणवचनात् । वेधयोरलाभे सामान्यव्रतव्यवस्था ।

इति कुक्कुटीव्रतम् ।

अथ शक्रोत्थापनम्

तत्र ब्रह्माण्डपुराणे—

[2]द्वादश्यान्तु सिते पक्षे मासि भाद्रपदे तथा ।
शक्रमुत्थापयेद्राजा विश्वश्रवणवासरे ॥

विश्वसंकुलो यः श्रवणवारस्तु तत्र 'विश्वेति विशेषणाच्छ्रवणद्वादशी योगाप्राप्तौ तिथ्यन्तरेऽपि श्रवणाऽऽद्यपाद एव शक्रमुत्थापयेदित्यवगम्यते । अथ विश्वश्रवणावासरव्यतीपाते उत्तराषाढ़ाश्रवणधनिष्ठानामन्यतमे नक्षत्रे इत्यर्थः । यदा तु श्रवणाऽऽद्यपादो रात्रावेव न च क्वचिद्दिवाभागे तदा उत्तराषाढाधनिष्ठयोरन्यतमे नक्षत्रे । द्वादश्यामन्यतिथावपि रात्रेः दिवाभागे श्रवणाऽऽद्यपादलाभः तदा तिथ्यन्तरेऽपि श्रवणाऽऽद्यपाद एव शक्रोत्थापनम् । श्रवणे तस्य बहुसम्मतत्वात् । तदुक्तं राजमार्तण्डे[3]—

सर्वे देवाश्च तिथ्यादौ तिथ्यन्ते च महेश्वरः ।
शक्रो विष्णुस्तथा ऋक्षे आद्यन्ते च विबुध्यते ॥

ब्रह्माण्डे— [4]भाद्रे मासि सिते पक्षे श्रवणा द्वादशी यदि ।
शक्रमुत्थापयेत्तत्र श्रवणे तद्वियोगतः ॥

---

(1) का. सा. (पृ–71) । (2) का. वि. (पृ-294) ।
(3) रा. मा. (पृ-109) । (4) का. सा. (पृ-129) ।

भविष्योत्तरेऽपि—[1]श्रवणा भरणीं यावत्पूजां कृत्वा विधानतः।
रात्रौ विसर्जयेद्देवं मन्त्रेणानेन पाण्डव ॥

अन्यत्राप्युक्तम्—

[2]सिंहगते दिनकरे सितचारुपक्षे, हर्याद्यपादमुपगच्छति वै शशांके।
उत्तिष्ठते त्रिदिवमन्दिरवृन्दवन्द्यो, याम्यान्ततो निशि निषीदति वज्रपाणिः ॥

हर्याद्यपादम्—श्रवणप्रथमपादम्। याम्यान्ततो भरण्यामन्तपादे।

ज्योतिःशास्त्रे[3] वैष्णवादिगते चन्द्रे शक्रमुत्थापयेद्दिवा।
भरण्यामन्तपादे च निशिसुप्ते विवर्जयेत् ॥

शक्रध्वजो यत्र निवेशनीयः, स्यात्यन्तपादेऽपि च भाद्रशुक्ले।
उत्थापनीयः श्रवणस्य चादावश्विन्युडौ सप्तदिने विसर्गः ॥

अश्विनी उडुर्यस्मिन्, सप्तदिने निवृत्ते सति भरण्यामष्टमदिनसम्बन्धिन्यां निशि विसर्ग इत्यर्थः। तथा च पारिजातहरिवंशे—

[4]सप्तरात्रे निवृत्ते तु भरण्यां विश्वतोत्सवे।
जगाम संवृतो मेघैर्वृत्रहा स्वर्गमुत्तमम् ॥

सप्तदिने विसर्जनप्रतिषेधोऽप्यस्ति। तथा च भविष्योत्तरे—

प्रमादज्ञानतो वाऽपि भरण्यां चेद् विसर्जनम्।
[5]परचक्रेण देशोऽसौ प्रजा रोगेण पीड्यते ॥

इति भरण्यां विसर्जने दोषश्रवणम्, तन्नवमदिनभरण्यन्तपादमाहृत्य विसर्जने वेदितव्यम्। तथा च राजमार्तण्डे[6]—

अष्टमात्परतः शक्र याम्यान्तस्यानुरोधतः।
ये पश्यन्ति महीपालास्तेषां राष्ट्रं विनश्यति ॥

एतेनाष्टमरात्रिभरण्यन्तपादयोगः प्रशस्तः, तदप्राप्तौ तु भरणीनक्षत्रमात्रे। तथा च

---

(1) का. वि. (पृ–296), रा. मा. (पृ–117)।

(2) का. वि. (पृ-295), रा. मा. पृ-116)।

(3) का. वि. (पृ-294)।

(4) का. सा. (पृ–129)।

(5) परचक्रेण—शत्रोराक्रमणेन।

(6) रा. मा. (पृ–118)।

[1]स एव— अन्तकस्यादिमध्यान्तं यदि स्यादष्टमी दिने ।
शक्रं विसर्जयेत्तत्र नो विधिश्चाष्टमोपरि ।।
अष्टमी शर्वरीयोगे यामस्य यदि दृश्यते ।
तत्रैव पातयेच्छक्रं नवम्यां न कदाचन ।।

अष्टमीनिशिभरणीसम्बन्धाभावे कुत्र विसर्जयेद् इत्याशङ्क्याह [2]स एव—

नवमे तु दिने दृष्टो राज्ञां शक्रो भयप्रदः ।
ततोऽनादृत्य याम्यन्तु अष्टम्यां निशि पातयेत् ।।

याम्यमनादृत्याश्विन्यन्तपादे पातयेत् ।

अन्यत्राप्युक्तम्—[3]वैष्णवादिगते चन्द्रे शक्रमुत्थापयेद्दिवा ।
अश्विन्यामन्तपादे च निशि सुप्ते विवर्जयेत् ।।

भरण्यामन्तपादे चेति [4]जीमूतवाहनलिखितपाठस्तु शोभन एव । अश्विन्युडौ सप्तदिने विसर्ग इत्यत्र केवल नक्षत्रकल्पनमित्याहुः । पञ्चदिनात्मकः केवल तिथिकल्पोऽप्यस्ति।

तथा विष्णुधर्मोत्तरे[5]—

द्वादश्यां तु शिरः स्नातो नृपतिः प्रयतस्ततः ।
यत्नेनोत्पादनं कुर्याच्छक्रकेतोः समाहितः ।।

तथा[6]— पञ्चमे दिवसे प्राप्ते शक्रकेतुं विसर्जयेत् ।

शक्रध्वजप्रतिपत्तिमुक्त्वा यात्रायाः फलमुक्तं विष्णुधर्मोत्तरे—

[7]एवं यः कुरुते यात्रामिन्द्रकेतोर्युधिष्ठिर ।
पर्जन्यः कालवर्षी स्यात्तस्मिन् देशे न संशयः ।।

हरिवंशे गोवर्धनधारणानन्तरं शक्रकेशवसम्वादे—

[8]नरास्त्वां चैव मां चैव ध्वजाकारासु यष्टिषु ।
महेन्द्रं वाप्युपेन्द्रं वा पूजयन्तु महीतले ।।

---

(1) रा. मा. (पृ-117) । (2) रा. मा. (पृ-118) ।
(3) का. वि. (पृ-294) । (4) का. वि. (पृ-294) ।
(5) का. सा. (पृ-129) । (6) का. सा. (पृ-129) ।
(7) का सा. (पृ-129) । (8) का. सा. (पृ-129) ।

भेदावयोः स्थिरे वृत्ते महेन्द्रोपेन्द्रसंज्ञिते ।
मानवाः प्रणमिष्यन्ति तेषां नास्ति च पातकम् ॥

इति शक्रोत्थापनम् ।[1]

अथ श्रवणद्वादशी

विष्णुधर्मोत्तरे— प्रथमकाण्डे वज्र उवाच—

[1]उपवासासमर्थानां शुक्लपक्षे द्विजोत्तम ।
एका या द्वादशी पुण्या तां वदस्व ममानघ ॥

मार्कण्डेय उवाच—

[2]मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता ।
महती द्वादशी ज्ञेया उपवासे महाफला ॥
सङ्गमे सरितां पुण्ये सुस्नातस्तामुपोषितः ।
अयत्नादेव चाप्नोति द्वादशद्वादशीफलम् ॥
बुधश्रवणसंयुक्ता सैव चेद् द्वादशी भवेत् ।
अत्यन्तमहति यस्यां सर्वं कृतमथाक्षयम् ॥
स्वर्गं समासाद्य चिरञ्च भोगान्, भुक्त्वा महेन्द्रोपमदेवतुल्यः ।
भानुष्यमासाद्य भवत्यरोगी, धनान्वितो धर्मपरो मनस्वी ॥
श्रवणर्क्षसमायुक्ता द्वादशी यदि लभ्यते ।
उपोष्य द्वादशीं तत्र त्रयोदश्यान्तु पारणम् ॥
एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।
न चात्र विधिलोपः स्यादुभयोर्दैवतं हरिः ॥

उपोष्य द्वादशीं तत्रेति अविद्यमानैकादशीव्रतपुरुषविषयम् । एकादशीमुपोष्यैव इति गृहीतैकादशीव्रतविषयमिति । न चात्रेति । "असमाप्ते व्रते पूर्वे नैव कुर्याद् व्रतान्तर" मिति वचनमत्र न विशतीत्यर्थः । तथा—"पारणाऽनन्तरं व्रतं ज्ञेयम्" इति[3] वचना-

---

(1) भविष्योत्तरे इति का. वि. (पृ-459, 460) ।
(2) श्लोकोऽयं गरु. पु. (1/136-4) । (3) का. वि (पृ-463)

दगृहीतैकादशीव्रतेन नैतद् व्रतं कर्त्तव्यमित्यपीह नास्ति । नन्वत्रपक्षे कथं त्रयोदश्यां पारणम्—'त्रयोदश्यां न तत्कुर्याद् द्वादशद्वादशीक्षयाद्' इति स्मरणादित्याशङ्क्योक्तं भविष्योत्तरे — [1]निषिद्धमपि कर्त्तव्यं त्रयोदश्यान्तु पारणम् ।
द्वादश्यां च निराहारो वामनं पूजयाम्यहम् ॥
उदकुम्भे स्वर्णमयं त्रयोदश्यान्तु पारणम् ।
आवाहयाम्यहं विष्णुं वामनं शङ्खचक्रिणम् ॥
सितवस्त्रयुगच्छन्ने घटे सच्छत्रपादुके ।
स्नापयामि जलैः शुद्धैर्विष्णुं पञ्चामृतादिभिः ॥
छत्रं दण्डधरं विष्णुं वामनाय नमोनमः ।
अर्घ्यं ददामि देवेश गृहाणार्घ्यं मदर्पितम् ॥
भुक्तिमुक्ति[2]प्रदातारं सर्वैश्वर्ययुतं कुरु ।
वामनाय नमो गन्धं होमोऽनेनाष्टकं शतम् ॥
ॐ नमो वासुदेवाय शिरः सम्पूजयेद् हरेः ।
श्रीधराय मुखं तद्वत् कण्ठं कृष्णाय वै नमः ॥
नमः श्रीपतये वक्षो भुजौ सर्वास्त्रधारिणे ।
व्यापकाय नमो नाभिं वामनाय नमः कटिम् ॥
त्रैलोक्यजनकायेति मैत्रं जङ्घे यजेद्धरेः ।
सर्वाधिपतये पादौ विष्णोः सर्वात्मने नमः ॥
घृतपक्वञ्च नैवेद्यं दद्याद् दध्योदनैर्वराम्[3] ।
रात्रौ जागरण कृत्वा प्रातः स्नात्वा च सङ्गमे ॥
गन्धपुष्पादिभिः पूज्य वदेत् पुष्पाञ्जलिं त्विमम् ।
नमो नमस्ते गोविन्द बुधश्रवणसंज्ञित ॥
अघौघसंक्षयं कृत्वा सर्वसौख्यप्रदो भव ।
प्रीयतां देवदेवेशं मम नित्यं जनार्दन ॥

---

(1) अग्निपुराणे (अ. 189/श्लो 3-14) ।

(2) 'प्रजाकीर्त्ति' इत्यग्निपु. । (3) 'घंटान्' इत्यग्निपु. ।

वामनो बुद्धिदाता च द्रव्यस्थो वामनः स्वयम् ।
वामनः प्रतिगृह्णाति वामनो मे ददाति च ॥
द्रव्यस्थो वामनो नित्यं वामनाय नमोनमः ।
प्रदत्तदक्षिणो विप्रान् सम्भोज्यान्नं स्वयञ्चरेत् ॥

वस्त्रधूपदीपनैवेद्यमन्त्रास्तु कूर्मपुराणादनुसरणीयाः ।

प्रसीद देवदेवेश नमस्ते विश्वभावन ।
नमस्तेऽस्त्वदितेः पुत्र पीतनिर्मलवाससे ॥ इति वस्त्रमन्त्रः ।

वनस्पतिरसो देव पुरन्ध्रीगन्धवान्शुचिः ।
धूपोऽयं देवदेवेश नमस्ते गृह्यतामिति ॥

धूपमन्त्र इत्युक्तम् । 'द्वादश्यां निराहार' इति संकल्पवाक्यम् । चकारात् निराहारो भवामि पूजयामि । त्विति समुच्चयार्थो, न तु गृहीतैकादशीव्रतमेकादश्यामिति सूचनार्थः । एकादशी-उपवासस्य श्रवणद्वादशीव्रताङ्गत्वाभावे संकल्पवाक्योपादानस्यान्याय्यत्वात् । अतएव वह्निपुराणे संकल्पवाक्येन वाक्यमस्त्येव । यथा—

विधानं शृणु राजेन्द्र यथादृष्टं मनीषिभिः ।
तथोक्तनियमं कुर्यादेकादश्यामुपोषितः ॥
दन्तकाष्ठं प्रगृह्यादौ वाग्यतो नियतेन्द्रियः ।
श्रवणद्वादशीयोगे समुपोष्य जनार्दनम् ॥
अर्च्चयित्वा विधानेन अन्नं भक्षे परेऽहनि ।
नदीनां संगमे स्नात्वा पूजयेत्तत्र वामनम् ।
सौवर्णं रत्नसंयुक्तं द्वादशांगुलमुच्छ्रितम्[1] ॥

श्रवणद्वादशीयोग इति संकल्पवाक्यम् । श्रवणद्वादशी इति योगग्रहणात्तिथिनक्षत्रयोगमात्रे व्रतानुष्ठानं न तु सम्पूर्णत्वं नित्यम् । एतच्च व्यक्तमुक्तं मत्स्यपुराणे[2]—

द्वादशी श्रवणा युक्ता कृत्स्ना पुण्यतमा तिथिः ।
न तु सा तेन संयुक्ता तावत्येव प्रशस्यते ॥

---

(1) उच्छ्रितम्—उन्नतम् । (2) का. वि. (पृ–462) ।

[1]तथा— द्वादश्यां शुक्लपक्षस्य नक्षत्रं श्रवणं यदि ।
उपोष्यैकादशीं तत्र द्वादश्यामुडुसंक्षयात् ।।

इदमुपवासद्वयं प्रति मन्तव्यम् । वह्निपुराणे—

श्रवणाद्वादशीयोगे सम्पूज्य गरुड़ध्वजम् ।
दत्त्वा दानं द्विजातिभ्यो वियोगे पारणं ततः ।।

वियोगे—श्रवणाद्वादशीयोगव्यपगमे । तथा[2]—

पारणं तिथिवृद्धौ तु द्वादश्यामुडुसंक्षयात् ।
वृद्धौ कुर्यात् त्रयोदश्यां ततो दोषं न विद्यते ।।

वृद्धौ च नक्षत्रस्येति शेषः । मत्स्यपुराणे[3]—

द्वादशी श्रवणास्पृष्टा स्पृशेदेकादशीं यदि ।
स एव वैष्णवो योगो विष्णुश्रृङ्खलसंज्ञितः ।।

स्कन्दपुराणे— मध्याह्नव्यापिनी [4]श्रोणी सदा सेव्या विचक्षणैः ।

कूर्मपुराणे— रात्रौ च श्रवणेनैव दिवा चैव कलां स्पृशेत् ।
सा तिथिः सर्वपुण्या स्यात् तत्कृतं चाक्षयं भवेत् ।।

विष्णुधर्मोत्तरे[5]—एकादशी द्वादशी च वैष्णव्यमिति तत्तु वै ।
तद् विष्णुश्रृङ्खलं नाम विष्णुसायुज्यकृद् भवेत् ।।
तस्मिन्नुपोष्य विधिवद् गच्छेद् विष्णुपुरं नरः ।
द्वादश्यामुपवासोऽत्र [6]द्वादश्यामेव पारणम् ।।
निषिद्धमपि कर्त्तव्यमाज्ञेयं परमेश्वरी । वैष्णव्यं – श्रवणा ।

वह्निपुराणे[7]— दशम्येकादशी यत्र सा नोपोष्या भवेत्तिथिः ।
श्रवणेन तु संयुक्ता सा शुभा सर्वकामदा ।।

इति श्रवणाद्वादशी ।

---

(1) स. म. (पृ–90) । (2) वह्निपुराणे इति विधा. पारि. (3/576) ।

(3) का. सा. (पृ–128), विष्णुधर्मोत्तरामृते इति का. वि. (पृ–464) ।

(4) श्रोणी—श्रवणानक्षत्रम् ।

(5) का. सा. (पृ-128), का. वि. (पृ–464, 465) ।

(6) "त्रयोदश्यान्तु" इति का. वि. पाठः । (7) विधा. पारि. (3/578) ।

अथानन्तव्रतम्

भविष्योत्तरे— [1]आराधिते महेन्द्रे तु ध्वजाकारासु यष्टिषु ।
तत्र शुक्लचतुर्दश्यामनन्तं पूजयेद्धरिम् ।।
नित्यकर्म ततः कृत्वा स्नानदेवार्च्चनादिकम् ।
कुर्याद् वेदीं नदीतीरे मण्डलं तत्र कारयेत् ।।
लोहिताभिः पताकाभिः मण्डलं तत्र वेष्टयेत् ।
अनन्तप्रतिमां तत्र स्थापयेच्छोभनां बुधः ।।
तदभावो यदा चैव शालग्रामशिलां तथा ।
वासुदेवप्रतिमां वा दर्भपत्रमयीमपि ।।
कलशं पूर्वतः स्थाप्य धान्यस्थं वारिपूरितम् ।
आम्रादिपल्लवोपेतं सर्वौषधिसमन्वितम् ।।
[2]पञ्चरत्नसमायुक्तं यवाक्षतविभूषितम् ।

नमोऽस्त्वनन्तायेति मन्त्रेण कलशं स्थापयित्वा तत्रानन्तं ध्यात्वा कलशसम्मुखे हस्तं दत्त्वा नमोऽस्त्वनन्तायेति जपेत् ।

गृहे वा सरितोऽभावे कारयेज्जलपात्रकम् ।
भावयित्वा तदा विप्रो नदीमावाहयेद् बुधः ।।
मण्डलात् पश्चिमे विद्वान् स्थापयित्वा नदीजलम् ।
ॐ मातर्नदि समागच्छ सर्वपापप्रशान्तये ।।
तीर्थानां तोयमादाय त्वामद्यावाहयाम्यहम् ।।
पूजयित्वा तु विघ्नेशं ततः पूर्वमुखः शुचिः ।
जगत्प्रभोरनन्तस्य पूजाकर्म समाचरेत् ।।

---

(1) श्लोकोऽयम् अग्निपु. (192/7) ।

(2) पञ्चरत्नं यथा—

नीलकं वज्रकं चेति पद्मरागश्च मौक्तिकम् ।
प्रवालं चेति विज्ञेयं पञ्चरत्नं मनीषिभिः ।।

तत्रायं क्रमः—अर्घ्यपात्रं स्थापयित्वा ॐ अः फट् अनन्ताय नम इति करौ संशोध्य भूतशुद्धिं कुर्यात्। ततोऽनन्तं पीतवाससं शङ्खचक्रगदापद्मधरं योगनिद्रावस्थितं नागोपरि सुप्तं सहस्रफणाऽन्वितं भावयित्वा अनन्तरूपमात्मानं चिन्तयेत् ।

तद् यथा— ध्यायेन्नारायणं देवमनन्तं विश्वतोमुखम् ।
सर्पशय्यासुखासीनं समुद्रान्तर्निवासिनम् ॥
शङ्खचक्रगदापद्मधारिणं पीतवाससम् ।
फणासहस्रविस्तीर्णं तमात्मानं विभावयेत् ॥
ॐ अः प्रक्षाल्या(स्त्रेणा)र्घ्यपात्रं गायत्र्या पूरयेज्जलम् ।
हृदा पुष्पेण सम्पूज्य जपेद् वीजमथाष्टकम् ॥
संरक्ष्यास्त्रेण मन्त्रेण कवचेना[1]वगुण्ठयेत् ।
दर्शयित्वा [2]महामुद्रां [3]शङ्खाकारां ततः पुनः ॥
पूजोपकरणद्रव्यं प्रोक्षयेद्दर्भवारिणा ।
कामन्तु बीजवद् विन्दुमण्डितश्च जगत्प्रभोः ॥

---

(1) अवगुण्ठयेत्— अवगुण्ठनमुद्रां दर्शयेत् । तस्याः लक्षणं—

यदा वाममुष्टिः कृताधोमुखीयं, भवेत्तर्जनीं तद् बहिष्ठार्जवेन ।
भवेद् भ्रामिता सर्वतः सावगुण्ठे विशेषेण मुद्रोदिता देशिकेन्द्रैः ॥
मुद्राप्रका. (पृ–4)

(2) महामुद्रालक्षणं—

मिथोऽङ्गुष्ठयुग्मं यदा युक्तरूपं, भवेदङ्गुलीनां प्रसारः परासाम् ।
महामुद्रिकेयं तथा देशिकेन्द्रः, प्रकुर्वीत तां भक्तिभारावनम्रः ॥
मुद्राप्रका. (पृ–5)

(3) शङ्खाकारां–शङ्खमुद्राम् । तल्लक्षणं यथा—

वामाङ्गुष्ठं दक्षचतुष्केण निवध्य दक्षाङ्गुष्ठं वामचतुष्काभिमुखं चेत् ।
शङ्खस्यैषा संकलिता स्यात् किल मुद्रादेव्या विष्णोश्चापि विशिष्य प्रमोदाय ।

अन्यत्राऽपि— वामाङ्गुष्ठं विधृत्यैवं मुष्टिना दक्षिणेन तु । मु. प्र. (पृ–5)
तन्मुष्टेः पृष्ठतो देशे योजयेच्चतुरङ्गुलीः ।
कथिता शङ्खमुद्रेयं गायत्र्यर्च्चनकर्मणि ॥

दीर्घस्वरयुताङ्गानां फडन्तानामुदाहृतम् ।
कराङ्गन्यासौ कृत्वा तु ततः पूजां समाचरेत् ।।
धातारञ्च सवितारं द्वारदक्षिणपार्श्वयोः ।
[1]गणं गुरुं तथा [2]वाणीं क्षेत्रपालं क्रमेण च ।।
वायव्येशाग्निनैऋत्ये स्वबीजेनैव पूजयेत् ।
धर्मं ज्ञानञ्च वैराग्यमैश्वर्यञ्च यथाक्रमम् ।।
अग्निरक्षो सरित्सर्वदिक्पालांस्तु तथार्चयेत् ।
नपुंसकैरधर्माद्यैः पद्मकन्ददलान्वितम् ।।
पूजयित्वा क्रमेणैवं मण्डलं त्रितयं पुनः ।
ब्रह्माधिदैवतं चार्कं चन्द्रं विष्ण्वधिदैवतम् ।।
शिवाधिदैवतं वह्निमासनं मूलविद्यया ।
[3]पाणिकच्छपिकां बध्वा सुगन्धिकुसुमान्विताम् ।।
उक्तं हृदयपद्मस्थं ध्यात्वाऽनन्तं सुरेश्वरम् ।
आकृष्य [4]दक्षनासायां हस्तस्थकुसुमैर्न्यसेत् ।।
मण्डले स्थापयित्वा तु तत्रस्थं चार्चयेद्धरिम् ।
क्षीरोदधिमहानागशय्यावस्थितविग्रह ।।
अत्र त्वां पूजयिष्यामि सन्निधौ भव केशव ।
आगच्छानन्त देवेश उपविश्य सुखासने ।।
फणासहस्रं विस्तार्य धारयन् सन्निधौ भव ।
ॐकारेण देवमनन्तं प्रतिमायान्तु रोपयेत् ।।

---

(1) गणं—गणेश्वरम् । (2) वाणीं—सरस्वतीम् ।

(3) पाणिकच्छपिकामुद्रा—पाणौ स्थिता कच्छपिका या सा पाणिकच्छपिकामुद्रा, कूर्ममुद्रा इत्यर्थः । तल्लक्षणं यथा—

अन्योऽन्यानामिकामध्यमन्योऽन्येनापि संस्पृशेत् ।
कनिष्ठिका युतेनैव कूर्ममुद्रा प्रकीर्त्तिता ।। मु. प्र. (पृ–21)

(4) दक्षनासायां—दक्षिणनासायाम् ।

स्नानं पाद्यमाचमनमासनं चार्घ्यमेव च ।
जितञ्च इति मन्त्रेण दत्त्वा सम्पूजयेद्धरिम् ॥
जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश ! महापुरुषपूर्वज ॥
आगच्छानन्त देवेश तेजोराशे जगत्पते ।
गृहाणार्घ्यं मया दत्तमनन्ताय नमोऽस्तु ते ॥ इति अर्घ्यमन्त्रः ।

आचमनीयमन्त्रः—ॐ यं रं लं वं अनन्तगुणरूपाय विश्वरूपधराय च ।
नमो महात्मदेवाय अनन्ताय नमोऽस्तु ते ॥

वस्त्रमन्त्रः— नारायण नमस्तेऽस्तु संसारार्णवतारक ।
त्रैलोक्यव्यापकानन्त त्राहि मां भवसागरात् ॥

यज्ञोपवीतमन्त्रः—दामोदर नमस्तेऽस्तु त्राहि मां भवसागरात् ।
ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम ॥ इति

गन्धमन्त्रः— श्रीखण्डचन्दनं दिव्यं कर्पूरादियुतं शुभम् ।
अनुलेपं गृहाणात्र सुप्रीतो भव केशव ॥ इति

पुष्पमन्त्रः— माल्यानि च सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयाहृतानि पूजार्थे गृहाण पुरुषोत्तम ॥ इति

धूपमन्त्रः— वनस्पतिरसो दिव्यो[क] गन्धाढ्यः सुमनोहरः ।
वानस्पत्यो ध्रुवं देव नानागन्धैस्तु संयुतः ॥
आधारः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

दीपमन्त्रः— आज्याक्तवर्त्तिसंयुक्तो वह्निना द्योतितं नभः ।
तमोनाशाय लोकानां दीपोऽयं प्रतिगृह्यताम् ॥

नैवेद्यमन्त्रः— ततोऽनन्तसंसारेति मन्त्रेण त्रिः प्रपूजयेत् ।
नैवेद्यं गृह्यतां देव भक्ति मे चाचलां कुरु ।
ईप्सितं मे वरं देहि परत्र च परां गतिम् ॥

(क)— "देव" इति खग पुस्तकपाठः ।

ताम्बूलमन्त्रः— त्वत्प्रीत्यै मम ताम्बूलं कर्पूरैरुपशोभितम् ।
गृहाण त्वं सलक्ष्मीक प्रसीदोदधिशायन ॥

तत आवरणपूजामन्त्रेण चतुर्दशपुष्पैश्च पूजयेत् ।

हृषीकेश नमस्तुभ्यं प्रसीद मधुसूदन ।
नानाफलानि हृद्यानि गृहाण परमेश्वर ॥

चतुर्दशफलप्रदानमन्त्रः— ततोऽनन्तसंसारेति मन्त्रेण त्रिः प्रपूजयेत् । यथाशक्ति पूजयेत् । ततः स्तवं पठेत् । अनन्तसंसारेति वक्ष्यमाणश्लोकन् ।

अनन्तं सर्वकामानामनन्तं भगवत्फलम् ।
दत्त्वा ह्यर्घ्यमनन्तं हि पुनर्जन्मनि जन्मनि ॥

ततो घृतसहिततिलमादायाग्नौ होमः । हृदयादि मन्त्रेण— यं रं लं वं क्रमः । ॐ नं हिं अनन्ताय नमः । ॐ घं तं हं श्रियै नमः । अनन्तसंसारमन्त्राभ्याञ्च । ततो अनन्ताय स्वाहेति वा होमः । पुष्पाञ्जलिं गृहीत्वा ॐ अनन्ताय साङ्गोपाङ्गाय नमः ।

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥

इति पुष्पाञ्जलिं दत्त्वा प्रणमेत् ।

ततोऽनन्तं साम्बुघटं गृहीत्वा चन्दनं तथा ।
करमूले स्त्रियः वामे दक्षिणे पुरुषस्य च ॥
लिखेत् सर्पाकृतिं तेन शोभनं चन्दनं तथा ।
पुनः प्रक्षाल्य तद् वारि स्थापयेदवधानतः ॥

ततो देवस्याग्रतो डोरकं कुङ्कुमाक्तं स्थापयित्वा अनन्तरूपिणे नमः इति त्रिः पूजयेद् गन्धपुष्पाद्यैः ।

अनन्तं काममयं देवं सर्वकामफलप्रदम् ।
अनन्तडोररूपेण पुत्रपौत्रप्रवर्धनम् ॥
अनन्तं प्रतिगृह्णामि अनन्तं वै चराम्यहम् ।
अनन्तस्तारको यस्मादनन्ताय नमोऽस्तु ते ॥

इति डोरग्रहणमन्त्रः । अनन्तसंसारमन्त्रेण डोरकबन्धनम् ।

नमोऽस्तु देवदेवाय विश्वरूपधराय च ।
सूत्रग्रन्थिषु संस्थाप्य विश्वरूप नमोऽस्तु ते ॥

इति पुरातनडोरस्थापनमन्त्रः । इति भविष्यपुराणे अनन्तव्रतपूजाविधिः ।

ततः कथां शृणुयात्—

वासुदेवं सुखासीनं सर्वलोकहिते रतम् ।
राजा पृच्छति धर्मात्मा देवदेवमिदं वचः ॥

युधिष्ठिर उवाच—व्रतान्यनेकरूपाणि कथितानि मया प्रभो ।
वैष्णवं व्रतमन्यन्मे कथय त्वं जनार्दन ॥

कृष्ण उवाच— अनन्तव्रतमस्त्यन्यत् सर्वपापहरं शुभम् ।
सर्वकामप्रदं नृणां स्त्रीणाञ्चैव युधिष्ठिर ॥
शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे भवेत् ।
तस्यानुष्ठानमात्रेण सर्वपापं प्रणश्यति ॥

युधिष्ठिर उवाच—कृष्ण कोऽयं समाख्यातो योऽनन्त इति विश्रुतः ।
किं शेषनाग आहोस्विदनन्तस्तक्षकः स्मृतः ॥
परमं तत्त्वमथवा उताहो ब्रह्म उच्यते ।
एष कोऽनन्तसंज्ञो वै तत्त्वं मे ब्रूहि केशव ॥

कृष्ण उवाच— अनन्ताख्यस्त्वहं पार्थ ममरूपं निबोधत ।
आदित्यसोमरूपेण यः काल उपपद्यते ॥
कलाकाष्ठानिमेषादिदिनरात्रिशरीरवान् ।
पक्षमासर्तुवर्षादियुगकल्पव्यवस्थया ॥
योऽयं कालो मया ख्यातः सोऽनन्त इति विश्रुतः ।
सोऽत्र कालोऽवतीर्णोऽहं भुवो भारावतारणात् ॥
दानवानां विनाशाय वसुदेवकुलोद्भवम् ।
अनन्तं विद्धि मां पार्थ कृष्णमब्जधरं शिवम् ॥
ब्रह्माणं भास्करं शेषं सर्वव्यापिनमीश्वरम् ।
विश्वरूपं महाकायं सृष्टिसंहारकारणम् ॥

प्रत्ययार्थं मया पार्थ ! तव रूपं प्रदर्शितम् ।
पूर्वमेव महावाहो योगिध्येयमनामयम् ॥
विश्वरूपमनन्तञ्च यस्मिन्निन्द्राश्चतुर्दश ।
वसवोऽष्टौ द्वादशार्का रुद्रा एकादश स्मृताः ॥
सप्तर्षयः समुद्राश्च पर्वताः सरितो द्रुमाः ।
नक्षत्राणि दिशो भूमिः पातालं भूर्भुवादिकम् ॥
मा कुरुष्वात्र सन्देहो सोऽहं पार्थ ! न संशयः ॥

युधिष्ठिर उवाच—अनन्तव्रतमाहात्म्यं विधिं वेदविदाम्वर ।
किं पुण्यं किं फलं [1]चात्र अनुष्ठानवतां नृणाम् ॥
केन चादौ पुरा कीर्णं मर्त्ये केन प्रकाशितम् ।
एतत् समस्तं विस्तार्य ब्रूह्यनन्तव्रतं हरे ॥

श्रीकृष्ण उवाच—आसीत् पुरा कृतयुगे सुमन्त्रो नाम वै द्विजः ।
[2]वसिष्ठगोत्रे चोत्पन्नां स सुरूपां भृगोः सुताम् ॥
दीक्षानाम्नीमुपयेमे वेदोक्तविधिना ततः ।
तस्याः कालेन संजाता दुहिता सर्वलक्षणा ॥
शीला नाम्नी सुशीला सा वर्धते पितृवेश्मनि ।
माता च तस्याः कालेन ज्वरदाहेन पीड़िता ॥
विननाश नदीतोये मृता स्वर्गपुरं ययौ ।
सुमन्त्रोऽपि च निर्वर्त्य दत्त्वोर्ध्वदेहिकीं क्रियाम् ॥
ततश्चान्यां पुनः कन्यां धर्मपुत्रस्य वै मुनेः ।
उपयेमे विधानेन कर्कशां नाम नामतः ॥
दुःशीलां कर्कशां चण्डीं नित्यं कलहकारिणीम् ।
साऽपि शीला पितृगृहे गृहकर्मरताऽभवत् ॥

---

(1) "चात्र किं दानं कस्य पूजनम्" इति अनन्तव्रतकथापाठः ।

(2) "वसिष्ठगोत्रसम्भूता" इति अनन्तव्रतकथापाठः ।

कुड्यस्तम्भतलद्वारदेहलीतोरणादिषु ।
चतुरङ्गिकवर्णैश्च रक्तपीतसिताऽसितैः ।।
स्वस्तिकैः शङ्खचक्राब्जं रचयन्ती पुनः पुनः ।
पित्रा दृष्टा सुमन्त्रेन स्त्रीचिह्ना यौवने स्थिता ।।
कस्मै देया मया शीला विचार्यात्यन्तदुःखितः ।
ततो दैववशात्तत्र कौण्डिन्यः समुपागतः ।।
मुनिश्रेष्ठो महाभागः कुलीनो धर्मतत्परः ।
मनसा चिन्तयामास सुमन्तुः सुतपाः सुधीः ।।
अस्मै भाग्यवशाच्छीला प्रतिपाद्या प्रयत्नतः ।।
पिता ददौ मुनीन्द्राय कौण्डिन्याय शुभे दिने ।।
गृह्योक्त-[1]वेदविधिना विवाहमकरोत्तदा ।
निर्वर्त्यौद्वाहिकं सर्वं प्रोक्तवान् कर्कशां द्विजः ।।
किञ्चिद्दायादिकं देयं जामातुः [2]परितोषणम् ।
तच्छ्रुत्वा कर्कशा क्रुद्धा प्रविश्य गृहमण्डलम् ।।
सुमन्त्रं भर्त्सयामास कर्कशैर्वचनैः पतिम् ।
पेटिकावस्थितं द्रव्यं सर्वमादाय सत्वरम् ।।
तदादाय सुवर्णं वै पितृवेश्मनि सा ययौ ।
भोज्यावशिष्टेनान्नेन पाथेयमकरोत्तदा ।।
जामातरं दुहितरं प्राहिणोच्च यथाविधि ।
कौण्डिन्योऽपि च तां कन्यां विवाह्य विधिवद् द्विजः ।।
शीलामादाय शीलाढ्यां नवोढामतिरूपिणीम् ।
गोरथे तां समावेश्य निर्जगाम शनैः शनैः ।।
ततः सा पथि गच्छन्ती शीला चन्द्रशुभानना ।
मध्याह्ने भोज्यवेलायां समुत्तीर्य सरित्तटे ।।

---

(1) "विधिना पार्थ" इति अनन्तव्रतकथापाठः ।

(2) "पारितोषिकम्" इति अनन्तव्रतकथापाठः ।

ददर्श शीला नारीणां समूहं रक्तवाससाम् ।
अर्चयन्तं चतुर्दश्यां भक्त्या देवं पृथक् पृथक् ।।
तत्र गत्वा शनैः शीला पप्रच्छ स्त्रीकदम्बकम् ।
आर्याः किमेतत् क्रियते किं नाम व्रतमीदृशम् ।।
ऊचुस्तां योषितः सर्वा अनन्तव्रतमुच्यते ।
ता उवाच पुनः शीला कथ्यतां भो करोम्यहम् ।।
विधानं कीदृशं [1]तत्र किं दानं कस्य पूजनम् ।
स्त्रिय ऊचुः— शालितण्डुलचूर्णस्य गृहीत्वा [2]प्रसृतिद्वयम् ।
तेनापूपद्वयं कुर्यान्नारायणमनुस्मरन् ।।
एकं विप्राय दातव्यमेकमात्मनि योजयेत् ।
कर्त्तव्यं सरितस्तीरे कथां श्रुत्वा हरेरिमाम् ।।
स्नात्वाऽनन्तं समभ्यर्च्य मण्डले गन्धपुष्पकैः ।
धूपैर्दीपैः सनैवेद्यैः पीतवस्त्रैश्चतुःसमैः ।।
तस्याग्रतो दृढं सूत्रं कुङ्कुमाक्तं सुडोरकम् ।
चतुर्दशग्रन्थियुक्तं वामे करतले [3]स्थितम् ।।
दक्षिणे पुरुषेणाऽपि बन्धनीयं प्रयत्नतः ।
मन्त्रेणानेन भो शीले यावद् वर्षं समाप्यते ।।
ॐ अनन्तसंसार महासमुद्रे, मग्नान् समभ्युद्धर वासुदेव ।
अनन्तरूपे विनियोजयस्व, अनन्तरूपाय नमो नमस्ते ।।
अनेन डोरकं बध्वा दद्यादाचार्यदक्षिणाम् ।
देवं सम्पूज्य भूयस्तमनन्तं विश्वरूपिणम् ।।
दत्त्वा विप्राय पूपार्धमर्धं भुक्त्वा तथैव च ।
शृणु शीले वरोऽस्माकमिदं प्रोक्तं व्रतं तव ।।
साऽपि श्रुत्वा व्रतं चक्रे शीला बध्वा सुडोरकम् ।

---

(1) "चास्य व्रतेऽस्मिन् कस्य पूजनम्" इति व्रत.वि.प.पाठः ।

(2) प्रसृतिः—मुष्टिपरिमितः । (3) 'न्यसेत्' इति व्रत. वि. प. ।

पाथेयमपि विप्राय दत्त्वा भुक्त्वा तथैव च ।।
पुनर्जगाम संहृष्टा गोरथेन स्वमाश्रमम् ।
भर्त्रा सहैव शनकैः प्रत्ययस्तत्क्षणादभूत् ।।
तेनानन्तव्रतेनास्य गृहं गोधनसंकुलम् ।
गृहाश्रमं श्रिया युक्तं धनधान्यसमाकुलम् ।।
पुत्रपौत्रसमायुक्तं रम्यं चातिथिपूजनम् ।
साऽपि माणिक्य[1]काञ्चीभिर्मुक्ताहारैर्विभूषिता ।।
नानारत्नविचित्राङ्गी तप्तकाञ्चनभूषिता ।
दिव्याङ्गवस्त्रसंछन्ना सावित्री प्रतिमाऽभवत् ।।
कदाचिदुपविष्टाया दृष्ट्वा बद्धं सुडोरकम् ।
शीलायाः हस्तमूलान्ते भर्त्रा प्रोवाच किं तव ।।
शीलयोक्तमनन्तस्य व्रतसूत्रमिदं प्रभो ।
यत्प्रसादादियं लक्ष्मीः साम्प्रतं प्राप्यते स्थिरा ।।
तस्यास्तद् वचनं श्रुत्वा साक्षेपं [2]त्रोटितं रुषा ।
कोऽनन्त इति जल्पोऽयं वदता तेन पाण्डव ।।
क्षिप्तं ज्वालाकुले वह्नौ हाहा कृत्वा प्रधाविता ।
शीला गृहीत्वा तत्सूत्रं क्षीरमध्ये समाक्षिपत् ।।
तेन कर्म विपाकेन तस्य सा श्रीः क्षयं गता ।
गोधनं तस्करैर्नीतं मन्दिरान्मूषिकैर्धनम् ।।
यन्मन्दिराद् गतं द्रव्यं पुनर्व्यावृत्यनागतम् ।
स्वजनैः कलहो मैत्रे भर्त्सनं तर्जनं तथा ।।
अनन्ताक्षेपदोषेण दारिद्र्यं पतितं गृहे ।
[3]न तेऽपि ब्रुवते लोको तेन सार्धं युधिष्ठिर ।।

---

(1) काञ्ची—मेखला, स्त्रीणामलंकारविशेषश्च ।

(2) त्रोटितं—च्छेदनं कृतम् ।

(3) 'न किञ्चित्" इति व्रत वि. प. । "न कश्चिद्" इति अ.व्र.क.।

अतिचिन्ताकुलः सोऽपि शीला वाक्यपुरःसरम् ।
अनन्ताराधनं शीघ्रं करोमीति द्विजोऽब्रवीत् ॥
ततो जगाम कौण्डिन्यो [1]निर्वेदाद् वनगह्वरम् ।
मनसाध्याय चानन्तं क्व द्रक्ष्यामीति केशवम् ॥
व्रतस्य नियमं कृत्वा ब्रह्मचारी जपन्हरिम् ।
विह्वलः प्रययौ पार्थ सोऽरण्यं जनवर्जितम् ॥
तत्रापश्यत् महाचूतं फलपुष्पसमन्वितम् ।
वर्जितं पक्षिसंघातैः [2]कीनाशभवनं तथा ॥
गत्वा पप्रच्छ तं वृक्षं दृष्टोऽनन्तस्त्वया क्वचित् ।
तमुवाच द्विजं सोऽपि नानन्तं वेद्म्यहं द्विज ॥
अनन्तं यद्यहं जाने ममैततत्फलसञ्चयम् ।
सर्वकामप्रदं नृणामभक्ष्यं कथमीदृशम् ॥
एवं निराकृतस्तेन गां ददर्श सवत्सिकाम् ।
तृणमध्ये प्रधावन्ती मितश्चेतश्च पाण्डव ॥
[क]सोऽब्रवीत् धेनुके त्वं हि नह्यनन्तं समीक्ष्यसे ।
गौरप्युवाच कौण्डिन्य नानन्तं वेद्म्यहं द्विज ॥
यद्यसौ लक्षितोऽनन्तो ममैतद् दुग्धमुत्तमम् ।
अग्राह्यं सर्वसत्त्वानां यथाऽमेध्यं द्विजर्षभ ॥
ततो व्रजन् ददर्शाग्रे वृषञ्च [3]शाद्वले स्थितम् ।
स तं पप्रच्छ गोस्वामिन् किमनन्तस्त्वयेक्षितः ॥
गोवृषस्तमुवाचाथ नानन्तो वीक्षितो मया ।
ततो व्रजन् ददर्शाग्रे रम्यं पुष्करिणीद्वयम् ॥

---

(1) निर्वेदाद्—शोकाद्, दुःखाद्वा । (2) कीनाशभवनं—यमगृहम् ।
(3) शाद्वले—नवतृणबहुलप्रदेशे ।

(क) "धेनुके ब्रूहि यद्यनन्तस्त्वयेक्षितः" इति खग पुस्तकपाठः ।

अन्योन्यजल[1]कल्लोलपर्यस्तवीचिसञ्चयम् ।
युक्तं [2]कमलकह्लारैः [3]कुमुदोत्पलमण्डितम् ।।
सेवितं भ्रमरैर्हंसैश्चक्रवाकैर्वकैस्तथा ।
तमपृच्छन् द्विजोऽनन्तो भवतीभ्यां न लक्षितः ?
पुष्करिण्यावूचतुस्तं नानन्तं विद्महे[क] द्विज ।
जानीवो यद्यनन्तोऽसौ ततो नौ जलमुत्तमम् ।।
अपेयं मनुजैः श्रान्तैरमेध्यं साधुभिर्यथा ।
ततो व्रजन् ददर्शाग्रे गर्दभं कुञ्जरं तथा ।।
तावप्युक्तौ द्विजेनाथ तमव्रतां तथा द्विजम् ।
नावाभ्यां वीक्षितोऽनन्तस्तच्छ्रुत्वा विषसाद ह ।।
उपवासपरिक्लिष्टः शुष्कगलकतालुकः ।
अस्थिचर्मावशिष्टोऽसौ निपपात विचेतनः ।।
तस्मिन् क्षणे मुनिवरं कौण्डिन्यं ब्राह्मणोत्तमम् ।
कृपया देवदेवोऽसौ प्रत्यक्षं समपद्यत ।
वृद्धब्राह्मणरूपेण इत एहीत्युवाच तम् ।
त्वामनन्तं दर्शयामि मा खेदं कुरु भो द्विज ।।
प्रविश्य गह्वरं तस्य गृहीत्वा दक्षिणं करम् ।
स्वां पुरीं दर्शयामास [4]दिव्यनारीनरैर्युताम् ।।
तत्रोपविष्टमात्मानं वरसिंहासने स्थितम् ।
पार्श्वस्थशङ्खचक्राब्जगदागरुडशोभितम् ।।
दर्शयामास विप्राय पूर्वोक्तं विश्वरूपिणम् ।

---

(1) कल्लोलपर्यस्तः—महोर्मिविस्तृतः । (2) कमलकह्लारैः—श्वेतपद्मैः ।
(2) कुमुदोत्पलमण्डितं—नीललोहितकमलैः शोभितम् ।
(3) अत्र नारीनरपदं दिव्ययोगाद्देवपरम् ।

(क). "वेद्म्यह" इति खग पुस्तकपाठः ।

विभूतिभेदैश्चानन्तं सुरूपं परमेश्वरम् ॥
ततो दृष्ट्वा द्विजोऽनन्तमुवाच परया मुदा ।
पापोऽहं पापकर्माहं पापात्मा पापसम्भवः ॥
त्राहि मां पुण्डरीकाक्ष सर्वपापहरो भव ॥
हे कृष्ण श्रीधरोऽनन्त केशवाच्युतमाधव ।
मामुद्धर त्वं शीघ्रेण पतितं दुःखसागरे ॥
एतद् यः स्मरणं कुर्याच्छेषकाले[1] प्रयत्नतः ।
स गच्छति परं स्थानं पुनर्नागमनाय च ॥
अद्य मे सफलं जन्म जीवितञ्च सुजीवितम् ॥
यत्तवाङ्घ्रि युगाब्जाग्रे शिरो मे भ्रमरायितम् ॥
तच्छ्रुत्वाऽनन्त देवोऽपि ददौ तस्मै वरत्रयम् ।
दारिद्र्यनाशनं धर्मं विष्णुलोकं तथाऽक्षयम् ॥
प्रतिगृह्य द्विजोऽप्याह भगवन्यन्मयेक्षितम् ।
कश्चूतः का च गौः कोऽसौ वृषः पुष्करिणीद्वयम् ॥
कः सरः को गजश्चैव वृद्धब्राह्मण एव च ।
देव मे ब्रूहि तत्त्वेन ततोऽनन्तस्तमब्रवीत् ॥
अनन्त उवाच— योऽसौ चूतद्रुमो दृष्टो वाराणस्यां पुरा स्थितः ।
चतुर्वेदविदां श्रेष्ठः सर्वविद्याविशारदः ॥
नाम्ना विद्यापतिर्विप्रो वित्तरूपसमन्वितः ।
वेदाभ्यासार्थमागत्य मीलितास्तु द्विजातयः ॥
शिष्येभ्यः [2]स्तुतिवाचाऽसौ काञ्चिद् विद्यां न दत्तवान् ।
तेनायं फलयुक्तोऽपि तरुत्वं गतवान् वने ॥
ततोऽस्य कोऽपि न फलं भक्षयत्यथ जिघ्रति ।
तस्य पूर्वार्जितं द्रव्यं पुत्रस्तस्य द्विजन्मनः ॥

---

(1) "क्लेशकाले" इति व्रतवि. प. ।

(2) "स्तेभ्य एवाऽसौ" इति व्रतवि. प. ।

द्विजाय दानपात्राय द्वास्यति श्रद्धयान्वितः ।
मुक्तिश्च नियता तस्य ग्रहे जीर्णत्वचो यथा ॥
एवं विधाश्च ये चान्ये तां गतिं प्राप्नुयुर्ध्रुवम् ।
पूर्वमेव कुरुक्षेत्रे वेदवेदाङ्गपारगः ॥
विप्रो धनपतिर्नाम सर्वविद्याधिपः स्थितः ।
सर्वकालं कृषिं कृत्वा भूमौ वीजं तु यद् वपेत् ॥
तद्वीजं सा समादाय प्रत्यब्दं न फलप्रदा ।
बीजापहारदोषेण भूमिर्धेनुत्वमागता ॥
ततः कोऽपि न तद् दुग्धं पिबत्यद्यापि याज्ञिकम् ।
अधुनाऽपि खुरे तस्याश्चतुर्ष्वपि वसन्ति हि ॥
माणिक्यानि तु चत्वारि यदि तानि ददाति सा ।
ब्राह्मणेभ्यस्तदा तस्याः निष्कृतिः स्यान्न संशयः ॥
पुरा तु ब्राह्मणश्रेष्ठो गोरूपधनविस्तरः ।
गोसहस्रस्य मध्ये तु युवानं रूपसुन्दरम् ॥
वृषमुत्सृज्य देवायानन्तायाऽसौ न दत्तवान् ।
सोऽयं विप्रो वृषो भूत्वाऽनन्तसेवां करोति हि ॥
यदि पुत्रैस्तदा तस्य दीयेत वृषभाः किल ।
अनन्ताराधनं चैव[1] मुक्तिरस्याविचारणा ॥
पूर्वं यत्तु त्वया दृष्टं रम्यं पुष्करिणीद्वयम् ।
धर्माधिकारिणौ विद्धि न धर्मान् प्रोचतुश्च तौ ॥
तेनाधर्मविचारेण पुष्करिण्यौ वभूवतुः ।
अपेयं सर्वसत्त्वानां पानीयममृतोपमम् ॥
यत्तु पूर्वार्जितं तस्य धनं [2]सर्वत्र तिष्ठति ।
तत्पुत्रैर्दीयते चेत्तु तयोर्मुक्तिर्भविष्यति ॥

---

(1) "कृत्वा मुक्तिः स्यान्नात्र संशयः" इति व्रतवि. प. पाठः ।

(2) "पुत्रः प्रयच्छति" इति व्रतवि. प. ।

पूर्वं हि सरयू तीरे कुलरूपगुणोत्तमः ।
धर्मानन्द इति ख्यातो धनैः समुपगर्वितः ॥
ब्राह्मणानवामन्यत तेनासौ गर्दभोऽभवत् ।
यदि पुत्राश्च पौत्राश्च पूर्वार्जितधनानि वै ॥
दत्वा द्विजातयेऽनन्तव्रतं कुर्युश्चते नराः ।
[1] विमुक्ति यास्यति तदा गर्दभो नात्र संशयः ॥
सर्वभक्षाभिधानश्चाप्यवन्त्यां ग्रामयाजकः ।
ब्राह्मणः स महावित्तो नित्योत्पत्तिः पुरा स्थितः ॥
वाजपेयाग्निहोत्रादीन् दीक्षितांश्च तपस्विनः ।
श्रोत्रियांश्च तथैवान्यान् वेदवेदाङ्गपारगान् ॥
अवामन्यत तान् सर्वान् तेन हस्तित्वमागतः ।
तत्पुत्राश्च धनैः सर्वैः पूजयित्वा यदा हरिम् ॥
यद्यनन्तव्रतं कुर्यात् तदाऽस्य मोचनं भवेत् ।
वृद्धब्राह्मण एवाहमनन्तोऽस्मि द्विजोत्तम ॥
इत्युक्तं ते मया सर्वं गच्छ विप्र पुनर्गृहम् ।
कुरुष्वैतद् व्रतं चेदं नववर्षाणि पञ्च च ॥
ततस्तुष्टः प्रदास्यामि नक्षत्रस्थानमुत्तमम् ।
नाम्ना पुनर्वसुस्त्वं हि भविताऽसि द्विजोत्तम ॥
इदं भुक्त्वा सुविपुलान् सर्वान् कामान् यथेप्सितान् ।
पुत्रपौत्रपरिवृतस्ततो मोक्षमवाप्स्यसि ॥
इति दत्वा वरं देवस्तत्रैवान्तरधीयत ।
कौण्डिन्योऽपि गृहं गत्वा चकारानन्तकं व्रतम् ॥
सम्पत्तिश्च तदा तस्य पूर्वोक्ता च बभूव ह ।
सर्वं च कथयामास यथोक्तं विश्वरूपिणा ॥
चूतादीनाञ्च पुत्रादींस्तेऽपि चक्रुस्तथा तथा ।

---

(1) "विमुक्तः स्यात्तु तव पापात्" इति व्रतवि. प. ।

विमुक्तास्तु ततस्तेभ्यः सर्वे विगतकल्मषाः ॥
अनन्तस्य प्रसादेन गतास्ते त्रिदिवं पुनः ।
शीलया सह धर्मात्मा भुक्त्वा भोगान् मनोरमान् ।
अन्ते जगाम सस्वर्गं नक्षत्रञ्च पुनर्वसुम् ।
कल्पान्तस्थायी सम्भूतो दृश्यतेऽद्यापि प्रज्ज्वलन् ॥
अनन्तव्रत[1]धर्मेण सम्यक् कृतेन कौरव ।
तस्मादिमां कथां श्रुत्वा पुनरभ्यर्च्चयेद्धरिम् ॥
यस्य यावद् भवेद् भक्तिस्तावतीं सिद्धिमाप्नुयात् ।
विप्राय दक्षिणां दद्याद् येन तुष्यति तद् गुरुः ॥
अनन्त संसारेति ततो मूलमन्त्रमुदीरयेत् ।
मन्त्रेणानेन राजेन्द्र बध्नीयात्तत्र डोरकम् ॥
ततश्चानेन मन्त्रेण पिवेत् सर्पोदकं तथा ॥
अनन्तसर्परूपेण मदङ्गे निवस स्वयम् ।
सर्पोदकेनाभिषिच्य मां पुनीहि सुरेश्वर ॥
ततः सम्पूज्य देवेशमनन्तं विश्वरूपिणम् ।
कृताञ्जलिपुटो भूत्वा जपेन्मन्त्रमिमं पुनः ॥
अनन्तरूप देवेश संसारार्णवतारक ।
प्रसादं कुरु मे देव ! अनन्ताय नमो नमः ॥
त्वत्प्रसादाच्च देवेश [2]वर्षाणि मे चतुर्दश ।
व्रतं सम्पूर्णतां यातु सन्तुष्टो भव केशव ॥
मत्पूजितोऽसि भगवन् ! देवदेव ! जगत्पते ।
मन्त्रभक्तिविहीनाऽपि [3]पूजास्तु सफला मम ॥

---

(1) "जन्येन सुकृतेन तु कौरव" इति व्रतवि. प. ।
(2) "वर्षैश्च नवपञ्चभिः" इति व्रतवि. प. ।
(3) "पूजेयं" इति व्रतवि. प. ।

ततो दद्यात् तु पूपादि ब्राह्मणाय फलानि वै ।
ताम्बूलादीनि सर्वाणि मन्त्रेणानेन पाण्डव ॥
गृहाण विप्र पूपञ्च चतुर्दशफलानि च ।
ताम्बूलादीनि सर्वाणि अनन्तप्रीतये मम ॥
स्वस्थानं गच्छ देवेश अनन्तप्रभवाप्यय ।
अवतीर्णोऽसि लोकानामुपकाराय भूतले ॥
गच्छ गच्छ परं स्थानं देवानन्त जगत्पते ।
यत्तु ब्रह्मादयो देवा न विदुस्ते परं पदम् ॥
एतत्ते कथितं पार्थ व्रतानां व्रतमुत्तमम् ।
यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥
ये च शृण्वन्ति सततं कथ्यमानां कथामिमाम् ।
सर्वपापविनिर्मुक्तास्ते यान्ति परमां गतिम् ॥
संसारसागरगुहासु सुखं विहर्तुं,
वाञ्छन्ति ये कुरुकुलोद्वह शुद्धसत्त्वाः ।
सम्पूज्य च त्रिभुवनेशमनन्तदेवम्,
वध्नन्ति दक्षिणकरे वरड़ोरकञ्च ॥

अद्येह भाद्रपदे मासि शुक्लपक्षे तत्तिथौ ध्वजाकारायष्टिमहेन्द्रध्वजोत्तरचतुर्दश्यां सिंहराशिस्थिते सवितरि कुम्भराशिस्थिते श्रीचन्द्रमसि, अमुकसगोत्रः अमुकशर्मा भविष्योत्तरोक्त चतुर्दशवर्षसमाप्यानन्तव्रताचरणफलप्राप्तिकामोऽनन्तव्रतमहं कुर्वीय ।

इत्यनन्तव्रतम् ॥

अनन्तव्रतप्रतिष्ठा

तत्र स्कन्दपुराणे– युधिष्ठिर उवाच—

अनन्तव्रतं कथितं समग्रं परमेश्वर ।
उद्यापनं मे कथय सम्यक्कृतफलप्रदम् ॥

कृष्ण उवाच— चतुर्दश तु वर्षाणि कृतं सम्यग् यदा भवेत् ।
उद्यापनं तदा कार्यं सम्पूर्णं येन जायते ॥

स्नातः शुचिर्निराहारो धौतवासाः कृतक्रियः ।
[1]गोचर्ममात्रभूखण्डं संलिप्य च विचक्षणः ॥
चतुर्हस्तप्रमाणेन वेदिकान्तु समे स्थले ।
हस्तमात्रां च वा कुर्याद् [2]उच्छ्रायेण विचक्षणः ॥
मण्डलं कारयेत्तत्र सर्वतोभद्रसंज्ञकम् ।
पङ्कजं कारयेन्मध्ये युक्तं कर्णिकया शुभम् ॥
शोभोपशोभासंयुक्तं मनोह्लादकरं परम् ।
तन्मध्ये स्थापयेत्कुण्डमव्रणं[3] मृण्मयं शुभम् ॥
हस्तमात्रं भवेत्कुण्डं खातश्चैव तदर्धतः ।
अनन्तं कारयेद्देवं सुवर्णेन विचक्षणः ॥
पञ्चदशभि[4]र्माढैस्तु द्वादशभिः षड्भिस्तथा ।
चतुर्दश[5]रत्निकं वा रौप्यसिहासमस्थितम् ॥
चतुर्भि[6]र्माषकैः पात्रं रजतेनैव स व्रती ।
अथवा ताम्रपात्रञ्च तत्र देवं प्रपूजयेत् ॥
श्वेतवस्त्रयुगाच्छन्नं चन्द्रातपविभूषितम् ।
चामरञ्च तथा शय्यां पीठकं चार्घ्यपात्रकम् ॥
तथा सुवर्णडोरञ्च यथोक्तग्रन्थिसंयुतम् ।
कृत्वा तु विधिना पार्थं देवाय च समर्पयेत् ॥

---

(1) गोचर्मपरिमाणं यथा—

दशहस्तेन वंशेन दशवंशान् समन्ततः ।
पंच चाभ्यधिकान् दद्यादेतद् गोचर्म चोच्यते ॥

इति धर्मशास्त्रशब्दकोषे ।

(2) उच्छ्रायः—उच्चता ।

(3) अव्रणम्—अक्षतम् ।

(4) माढः—अर्धकर्षपरिमाणः उत्कलदेशप्रसिद्धः ।

(5) रत्निकं— बद्धमुष्टिपूर्वकं हस्तपरिमितम् ।

(6) मापकपरिमाणं यथा— मनुना–(8–134) पंचकृष्णलको माषः ।

आचार्यं कारयेद्दान्तं वेदवेदाङ्गपारगम् ।
गन्धपुष्पादिभिर्वस्त्रैर्मुद्रिकाभरणैर्युतम् ॥
पञ्चामृतेन देवस्य स्नापनं कारयेद्व्रती ।
स्नानञ्च कारयेत्तत्र वेदोक्तविधिना[3] ततः ॥
[1]तद्विष्णोरिति मन्त्रेण हरिद्रां स्नापयेत्ततः ।
[2]आयं गौरिति मन्त्रेण नित्यस्नानञ्च कारयेत् ॥
[3]अग्निषोमेति मन्त्रेण स्नापयेत्तु प्रियाम्बुना ।
[4]उद्बुध्यस्वेति मन्त्रेण तथा [5]गन्धोदकेन तु ।
[6]इदं विष्णुरिति ऋचा स्नानं [7]भृङ्गरजेन तु ।
[8]वारुणेन च मन्त्रेण तथा स्नानन्तु कारयेत् ॥
एवं स्नानविधिं कृत्वा शय्यायां स्थापयेत्ततः ।
मातृपूजां ततः कुर्यान्मातृश्राद्धं तथैव च ॥
गृह्योक्तविधिना चैव अग्निकार्यन्तु कारयेत् ।
विधिवत् स्थापिते वह्नौ ततो देवं प्रपूजयेत् ॥
पौरुषेयविधानेन न्यासं देवस्य कारयेत् ।
तेन पूजा च कर्त्तव्या ऋचो वै षोडश स्मृताः ॥
चन्दनञ्च तथा चार्घ्यं दत्त्वा पुष्पैश्च पूजयेत् ।
धूपञ्च त्रिविधं दद्याच्चन्दनागुरुगुग्गुलैः ॥
अनेक[9]वर्णनैवेद्यं तथा दीपं प्रदीपयेत् ।
एवं पूजा तु कर्त्तव्या ततो होमन्तु कारयेत् ॥
पलाशसमिधञ्चैव तिलधान्यं घृतप्लुतम् ।

---

(1) शु. यजु. (6-5) (2) शु. यजु. (3-6) (3) शु. यजु. (2-15)
(4) शु. यजु. (15–54) (5) गन्धोदकेन—सुवासितजलैः ।
(6) शु. यजु. (5–15) (7) भृङ्गरजेन—भृङ्गराजरसेन ।
(8) शु. यजु. (4–36) । (9) वर्णः—प्रकारः ।

[1]त्रीणि पदा [2]तद् विप्रासो [3]आपो देवी तृतीयकम् ।।
एतैस्तु मन्त्रत्रितयैर्गृहीतानां शतत्रयम् ।
अष्टोत्तरशताञ्चैवानन्तमन्त्रैस्तु होमयेत् ।।
एवं पूजा तु कर्त्तव्या रात्रौ जागरणं तथा ।
गीतनृत्यादिसंयुक्तं तथा वाद्यञ्च कारयेत् ।।
युग्मदानञ्च विविधं विप्रेभ्यो नव पञ्च वा ।
प्रभाते पुनरुत्थाय कुर्यात्स्नानं यथाविधि ।।
पूर्ववत् पूजयेद्देवं पश्चाद्धोमं समाचरेत् ।
अश्वत्थसमिधां चैव होमं कुर्याद्विचक्षणः ।।
अष्टोत्तरशतं चैवानन्तमन्त्रेण होमयेत् ।
समिधाज्यचरूणाञ्च प्रत्येकं चैव मन्त्रवित् ।।
तिलान् लाजान् यवांश्चैव आज्येन च परिप्लुतान् ।
महाव्याहृतिमन्त्रेण पर्वपूरन्तु होमयेत् ।।
[4]सहस्रशीर्षेति मन्त्रेण आज्येनैव तु षोडश ।
पूर्णाहुतिं ततो दद्याद् अन्ते चैव विचक्षणः ।।
एवं समाप्ते होमे तु आचार्यं तत्र पूजयेत् ।
अर्घ्यपुष्पप्रदानेन चन्दनेन विलेपयेत् ।।
मुद्रिकां [5]कर्णवेष्टञ्च वस्त्रयुग्मं तथा नृप ।
सुवर्णं भूमिदानञ्च आचार्याय प्रदापयेत् ।।
एतत् सम्यग् यथालाभं यथा सन्तुष्यते गुरुः ।
छत्रञ्च दापयेत् पार्थ सर्वशोभासमन्वितम् ।।
उपानहौ च विप्राय तथा ताम्रमयं घटम् ।
एवं सम्पूज्य चाचार्यं पश्चान्मन्त्रं पठेद् गुरुः ।।

---

(1) शु. यजु. (34–43)।
(2) शु. यजु. (31–44)।
(3) शु. यजु. (22–35)।
(4) शु. यजु. (31-1)।
(5) कर्णवेष्टं— कुण्डलम् ।

ब्रह्माणं भास्करं शेषं सर्वव्यापिनमीश्वरम् ।
लोकेशञ्च महाकायं सृष्टिसंहारकारिणम् ।।
अनन्तं पद्मनाभञ्च केशवं मधुसूदनम् ।
नरसिंहं वामनञ्च नामानि च चतुर्दश ।।
एवं सम्पूजयेद् भक्त्या पादादारभ्यमस्तके ।
ब्राह्मणान् भोजयेत्तत्र नवपञ्चविचक्षणः ।।
दक्षिणाञ्च यथाशक्त्या कलशांश्च चतुर्दश ।
फलं यज्ञोपवीतञ्च प्रत्येकञ्च [1]कपर्दकम् ।।
पूर्वेऽहनि वा सद्यो वा कर्त्तव्यञ्च विसर्जनम् ।

पूर्वे अश्वत्थसमिदादि होमापेक्षया पूर्वोक्तेऽहनि पौर्णमासीदिने विसर्जनम् । देवताविसर्जनं प्रतिष्ठां समाप्य कर्त्तव्यम् । सद्यो वा चतुर्दशीदिने वा ।

एतेन च विधानेन यः कुर्यात् प्रयतः पुनः ।
सुपुत्रपौत्रपशुमान् धनवान् जायते नरः ।।
न दारिद्र्यं न दौर्भाग्यं नाकाले मरणं भवेत् ।
दिव्यं वर्षसहस्रान्तं स्वर्गे वसति मानवः ।।
यदा स्वर्गपरिभ्रष्टो जायते विपुले कुले ।।

इत्यनन्तप्रतिष्ठाविधिः ।

अथागस्त्यर्घ्यविधिः

तत्र विष्णुरहस्ये[2]—

युगयुगसहस्रन्तु विष्णुर्वारुणिनाऽमुना ।
आराधितः प्रसादार्थं तस्मै प्रादाद् वरं हरिः ।।
दक्षिणाशां मुखं कृत्वा गच्छ तिष्ठस्व वारुणे ।
हितार्थं सर्वलोकानां मन्नियोगाद् दृढव्रत ।।
ये त्वां तत्र स्थितं भक्त्या नार्चयिष्यन्ति मानवाः ।
सम्वत्सरस्य यत्पुण्यं मत्प्रसादाद् भवेत्तव ।।

---

(1) कपर्दकम्—प्राचीनमुद्राविशेषः । (2) रा. मा. (पृ-112) ।

ये त्वां महाविधानेन पूजयिष्यन्ति वारुणे ।
श्वेतद्वीपं गमिष्यन्ति ते नरा मत्प्रसादतः ।।
वेदवेदाङ्गविद्वांसो धनधान्यसमन्विताः ।
वारुणे ते भविष्यन्ति यस्मिन्नर्घ्यंप्रदास्तव ।।
अप्राप्ते भास्करे कन्यां सस्त्रिभागैस्त्रिभिर्दिनैः ।
अर्घ्यं दद्युरगस्त्याय ये वसन्ति महोदये ।।

भास्करे कन्यामप्राप्ते–सिंहमासे । मासस्य तृतीयभागो दशदिनानि तत्सहितैस्त्रिभिर्दिनैः त्रयोदशदिवसैः ।

[1]बृहत्संहिता—संख्याविधानाद् प्रतिदेशमस्य विज्ञाय सन्दर्शनमादिशेज्ज्ञः ।
तच्चोज्जयिन्यामगतस्य कन्यां भागैः स्मराख्यैः स्फुटभास्करस्य ।।

स्मराख्यैर्भागैः त्रयोदशभिर्दिनैः ।

ज्योतिःशास्त्रसूत्रञ्च—

पलाङ्गुलान्नवाग्निघ्ना तद्व्याप्तं नवभियुतम् ।
ऋक्षादितत्समे सूर्ये दृश्योऽगस्त्यः सदा भवेत ।।

पलाङ्गुलात् सप्तविंशत्यधिकशतचतुष्टयात् । दशनक्षत्रषडंशक षोड़शलिप्तिकाभोगे सूर्यस्यागस्त्योदयो भवेदिति संक्षेपः ।

भविष्योत्तरे— कन्यायामगते सूर्ये पूज्यो वै सप्तमदिने ।
कन्यायां समनुप्राप्ते सूर्येऽर्घ्यः सन्निवर्त्तते ।।

सप्तमदिन इति सप्तमदिनपर्यन्तमुदयानन्तरम् । दिनत्रयादूर्ध्वं– दिनत्रयं यावदित्यर्थः

मात्स्ये— आसप्तरात्रादुदयेऽर्घ्यमस्य दातव्यमेतत् सफलं नरेश ।

---

(1) बृहत्संहिता (1-12-14) भाष्यं यथा— संख्याविधानाद् गणितविधानाद् प्रतिदेशं प्रति सन्दर्शनमुदयं ज्ञात्वा पण्डितः आदिशेद् । तच्च दर्शनमुज्जयिन्यां स्फुटभास्करस्य स्फुटादित्यस्य कन्यां स्वराख्यैर्भागैः सप्तभिरंशैरप्राप्तस्य भवति । सिंहस्य भागत्रयोविंशतिं मुक्त्वेत्यर्थः ।

(2) भविष्यपु. (4-118/56-57) ।

ब्रह्माण्डपुराणे— सिंहार्धे च गते भानौ कुम्भयोन्युदिते दिवि ।
स्त्रियो वा पुरुषा वाऽपि अर्घ्यं दद्युर्महामुनेः ॥

सिंहार्धे अगस्त्ये उदितेऽर्घ्यंदानप्राप्तौ त्रयोदशदिनैः कन्यामप्राप्ते भास्कर इति वचनात् प्रथमदिनत्रयेऽर्घ्यो न दातव्यो बालत्वादिति गम्यते । सूर्ये कन्यां प्राप्तेऽर्घ्यनिवृत्तिर्वचनात् । सप्तमदिनमध्ये तु कुतश्चिद् कारणाददत्तेऽर्घ्येऽन्यत्राप्यर्घ्यदानं प्रतीयते ।

तत्रैव— स प्रातः कुम्भमादाय जलान्तं स्रोतसां व्रजेत् ।
सुस्नात्वा नियतात्मा च कुम्भं तं पूरयेज्जलैः ॥
आचम्य नियतात्मा च वाग्यतः प्रविशेद् गृहम् ।
मण्डलावर्त्तभूमौ च स्थापयेत् कलशं ततः ॥
अपराह्णे पुनः स्नात्वा नियतात्मा जितेन्द्रियः ।
काशपुष्पप्रतीकाशमयश्च पुरुषाकृतिम् ॥
स्थापयेत् कुम्भशिरसि शुक्लाम्बरमलंकृतम् ।
तत्समीपे खनेद् भूमिं [1]रत्निमात्रं प्रमाणतः ॥
[2]चतुरस्रः चतुष्कोणोदकेन पूरयेत्ततः ।
जले च प्रक्षिपेत्तत्र पुष्पश्चैव सुगन्धकम् ॥
जलजं शोभनं कृत्वा पुष्पमाल्यैरलंकृतम् ।
कुम्भे तु पूजयेद्देवं दीपमेकन्तु दापयेत् ॥
गन्धमाल्यैः सुगन्धैश्च धूपैरगुरुगुग्गुलैः ।
नैवेद्यैरपि मृष्टान्नैर्नानारससमन्वितैः ॥
पक्वमृष्टफलैर्दिव्यैरपूपैर्गुडसंयुतैः ।
अनेनैव विधानेन पूजयेत्तं महामुनिम् ॥
शान्तिमन्त्रोपचारेण ब्राह्मणैः वेदपारगैः ।

काशपुष्पप्रतीकाशमयमिति काशपुष्पमयं तत्समीपे मण्डलसन्निधौ । जलजं शोभनमिति मण्डलमध्ये पद्मलिखित इत्यर्थः ।

---

(1) रत्निमात्रं—बद्धमुष्टिहस्तपरिमितम् । (2) चतुरस्रः—वर्गाकारः ।

विष्णुरहस्ये— काशपुष्पमयीं रम्यां कृत्वा मूर्त्ति तु वारुणेः ।
प्रदोषे विन्यसेत्तां तु पूर्णे कुम्भे स्वलंकृते ॥
कुम्भस्थां पूजयेत्तां तु पुष्पधूपविलेपनैः ।
दध्यक्षतैर्बलिं दद्याद्रात्रौ कुर्यात्प्रजागरम् ॥

अथ प्रथमतः संकल्पं कृत्वा मण्डलेऽष्टदलपद्मं लिखित्वा पूजयेत् ।

तत्रायं क्रमः—भूतशुद्धिकराङ्गन्यासमर्घ्यपात्रसंस्कारं तज्जलेन पूजोपकरणादि अभ्युक्ष्य पीठे पूजां कुर्यात् । यथा – पूर्वादिदलेषु– विघ्नचारायै नमः । मृत्युञ्जयाय नमः । लोपामुद्रायै नमः । वासुदेवाय नमः । समुद्रायै नमः । गङ्गायै नमः । वसिष्ठाय नमः । विद्यायै नमः । मध्ये अगस्त्याय नमः । अथ ध्यानम्—

लम्वोदरं दीर्घश्मश्रुं चतुर्भुजं त्रिदण्डिनम् ।
अक्षमालाकमण्डलुधारिणं हृदि चिन्तयेत् ॥
पुरुषाकृतिप्रशान्तञ्च जयमङ्गलधारिणम् ।
कमण्डलुधरं शिष्यैर्मृगैश्च [1]परिवारितम् ॥
मृत्युघ्नं विषहर्तारं दर्भाक्षस्रग्धरं मुनिम् ।
तस्मिन् कुम्भे समासीनं चन्दनेन ततो न्यसेत् ॥
आगच्छ मुनिशार्दूल तेजोराशे महातपः ।
सोदके पूजिते कुम्भे आसनं क्रियतामिति ॥ अनेनावाहनमिति ।
त्वं विष्णुरुपी भगवन् कुम्भयोनिसमुद्भव ।
दक्षिणाशास्थितो देव विश्वमूर्त्ते नमोऽस्तु ते ॥

अनेन मण्डलमध्ये स्थापयेत् ।

आतापी भक्षितो येन वातापी च महासुरः ।
समुद्रः शोषितो येन सोऽगस्त्यः सम्मुखोऽस्तु मे ॥
इति सम्मुखीकरणम् ।
अगस्त्यं प्रार्थयिष्यामि कर्मणा मनसा गिरा ।
अर्चयिष्याम्यहं मंत्रं वरलोकाभिकाङ्क्षया ॥
अनेन पूजार्थं प्रार्थयेत् ।

---

(1) परिवारितं—परिवेष्टितम् ।

KENDRIYA ... Accession No 16999 Date 16.6.93 GURUVAYOOR

काशपुष्पप्रतीकाश अग्निमारुतसम्भव ।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ।।
मन्त्रेणानेन वै कुर्यात् स्नानं पूजामृषेर्द्विजः ।।
अगस्त्यमुनिशार्दूल तेजोराशे महामुने ।
गृहाणार्घ्यं महादेव विष्णुरूपि नमोऽस्तु ते ।। इत्यर्घ्यः ।
नारायण नमस्तेऽस्तु नरकार्णवतारक ।
कुम्भयोनि गतो देव त्राहि मां पुरुषोत्तम ।। इति वस्त्रमन्त्रः ।
दामोदर नमस्तेऽस्तु त्राहि मां भवसागरात् ।
सोत्तरीयं द्विजश्रेष्ठ ब्रह्मसूत्रं गृहाण मे ।। इति यज्ञोपवीतमन्त्रः ।
द्वीपान्तरसमुत्पन्नं देवानां परमं श्रियम् ।
राजानं सर्ववृक्षाणां चन्दनं मे प्रगृह्यताम् ।। इति गन्धमन्त्रः ।
धर्मार्थकाममोक्षाणां भाजनं पापनाशिनी ।
सौभाग्यारोग्यलक्ष्मीर्वा पुष्पमाला प्रगृह्यताम् ।।
ॐ नमो भगवन् देव कुम्भयोने नमोऽस्तु ते ।
[1]शारदीनदपुष्पाणि गृहाण त्वं महामुने ।।
इति काशपुष्पदानमन्त्रः ।
वनस्पतिरसो दिव्यो गन्धाढ्यः सुरभिश्च ते ।
मया निवेदितो भक्त्या धूपोऽयं प्रतिगृह्यताम् ।। इति धूपमन्त्रः ।
ज्योतिश्चक्रं च नक्षत्रं ज्ज्वलनादीन्यनेकधा ।
ज्ज्वलन्ति तेजसा यस्य तस्मै दीपं ददाम्यहम् ।। इति दीपमन्त्रः ।
त्वं विष्णु ब्रह्म रुद्रोऽसि त्वं सूर्यो जगतां पते ।
इमां मम कृतां पूजां गृहाण त्वं महामुने ।।
काशपुष्प इति तृतीयोमन्त्रः ।
त्रैलोक्ये कीर्त्यते यस्तु जगतां परिपालक ।
गन्धं गृहाण देवेश चन्दनागुरुसंयुतम् ।।

---

(1) शारदीयानि इति पाठः संगच्छते ।

पद्मपत्र विशालाक्ष नमस्ते कुम्भसम्भव ।
विश्वात्मा विश्वयोनिस्त्वं कुम्भयोने नमोऽस्तु ते ।।
इति नैवेद्यमन्त्रः ।

आचमनमन्त्रो यथा—

मन्दाकिन्यास्तु तद्वारि सर्वपापहरं शुभम् ।
गृहाणाचमनीयं त्वं मया भक्त्या निवेदितम् ।।

अथावरणपूजा—दिक्पालान् पूजयन्तीह गुरून् गणपतिं तथा ।
लोपामुद्रे वरान् देहि राजपुत्रि वरानने ।।
इमां मया कृतां पूजां गृहाण मुनिना सह ।।

अनेन लोपामुद्रां गन्धादिना पूजयेत् ।

गच्छ गच्छ परं स्थानं स्वस्थानं गच्छतां पते ।
ईप्सितं मे वरं देहि परत्र च शुभां गतिम् ।।
अगस्त्य मुनिशार्दूल तेजोराशे जगत्पते ।
इमां मम कृतां पूजां गृहीत्वा व्रज शान्तये ।। इति विसर्जनमन्त्रः ।

विष्णुरहस्ये— प्रभाते तां समादाय यायात्पुण्यजलाशयम् ।
निशावसाने तां पश्यन् जलान्ते प्रतिमां मुनेः ।
अर्घ्यं दद्यादगस्त्याय भक्त्या सम्यगुपोषितः ।।

भविष्योत्तरे— सौवर्णरौप्यपात्रेण ताम्रवर्णमयेन वा ।।
मूर्ध्नि स्थितेन नम्रेण जानुभ्यां धरणीं गतः ।।
दक्षिणाभिमुखो भूत्वा अगस्तेरीक्षणं नृप ।
दद्यादर्घ्यं प्रसन्नेन चेतसा कुरुनन्दन ।।

ब्रह्माण्डपुराणे—ऋषयेऽर्घ्यं समादाय फलैः पुष्पैश्च व्रीहिभिः ।
पूतात्मा मूर्ध्नि विन्यस्य अर्घ्यं दद्याद् प्रयत्नतः ।।

[1] विष्णुरहस्ये—

पञ्चरत्नसमायुक्तं हेमरूप्यसमन्वितम् ।

---

(1) अग्निपु. (206/15-16), रा. मा. (पृ-112) ।

[1]सप्तधान्यभृतं पात्रं दधिचन्दनसंयुतम् ।
अर्घ्यपात्रं समादाय अर्घ्यं दद्युर्द्विजातयः ॥
अगस्त्यः खनमानः रवनित्रैः प्रजामपत्यं वलमिच्छमानः ।
उभौ कर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम ॥
[2]अर्घ्यं दद्यादगस्त्याय शूद्रो मन्त्रमिदं पठन् ।
काशपुष्पप्रतीकाश अग्निमारुतसम्भव ।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥

आग्नेये— सप्तधान्यभृतं पात्रं दधिचन्दनसंयुतम् ।
अर्घ्यं दद्यादगस्त्याय स्त्रीशूद्राणाममंत्रैदिकम् ॥
अगस्त्यं वोधयिष्यामि कर्मणा मनसा गिरा ।
फलैरर्घ्यं प्रदास्यामि गृहणार्घ्यं महामुने ॥ इत्यर्घ्यदानप्रार्थना ।
येन ह्रस्वीकृतो बिन्ध्यः पीतो येन महोदधिः ।
वातापी भक्षितो येन सोऽगस्त्यः प्रीयतां मम ॥ इति प्रार्थना ।
सुरासुरमुनिश्रेष्ठ सर्वकामफलप्रद ।
वस्त्रव्रीहिफलैर्हेम्ना दत्तस्त्वर्घ्यो ह्ययं मया ॥
[3]विन्ध्यवृद्धिक्षयकर मेघतोया भयापह ।
रत्नवल्लभदेवर्षे लङ्कावास नमोऽस्तु ते ॥
आतापी भक्षितो येन समुद्रः शोषितः पुरा ।
लोपामुद्रापतिः श्रीमान् योऽसौ तस्मै नमोनमः ॥
येनोदितेन पापानि प्रशमं यान्ति राधयः ।
तस्मै नमोऽस्त्वगस्त्याय सशिष्याय सपुत्रिणे ॥ इति नमस्कारमन्त्रः ।

---

(1) यवगोधूमधान्यानि तिलाः कङ्गुस्तथैव च ।
श्यामाकं चीनकं चैव सप्तधान्यमुदाहृतम् ॥
इति विष्णुधर्मोत्तरे परि. प्र. (पृ–115)

(2) अग्निपु. (206/5–6) । (3) अग्निपु. (अध्याय 206) ।

राजपुत्रि नमस्तुभ्यं मुनिपत्नि महाव्रते ।
अर्घ्यं गृह्णीष्व देवेशि ! लोपामुद्रे यशस्विनि ॥

इति लोपामुद्रार्घ्यदानमन्त्रः ।

गच्छ गच्छ परं स्थानं स्वस्थानं जगतां पते ।
ईप्सितं मे वरं देहि परत्र च परां गतिम् ॥
अगस्त्य मुनिशार्दूल तेजोराशे जगत्पते ।
इमां मम कृतां पूजां गृहीत्वा व्रज शान्तये ॥

विसर्जनमन्त्रः— महाभद्र नमस्तेऽस्तु अगस्त्यस्थानसाधन ।
त्वत् प्रसादात् तरिष्यामि संसारार्णवसागरात् ॥

मात्स्ये— होमं कृत्वा ततः पश्चाद् वर्जयेन्मे नवं फलम् ।

होमश्च पूजामन्त्रेण स्वाहान्ते घृतस्याष्टशताहुतय इति व्रतप्रदीपकारः ।

ब्रह्माण्डपुराणे — पनसं नारिकेलञ्च गुवाकं तालमेव च ।
कदलीविल्वनारङ्गी फलान्येतानि सप्त वै ॥
प्रियङ्गवोऽणवश्चैव श्यामाका नीवारा यवाः ।
पञ्चधान्यं वृहद्धान्यं धान्यसप्तकमुच्यते ॥
तिक्तं कटु कषायञ्च मधुरं चाम्लमेव च ।
लवणं वै तिलञ्चैव सप्त चैते रसाः स्मृताः ॥
जातिचम्पकमुद्दिष्टं पद्मनागेश्वरं तथा ।
दमनकं मरुवकं पाटली सप्तमी तथा ॥
त्यजेदगस्त्यमुद्दिश्य धान्यपुष्पफलरसम् ॥
शाकं मूलं पयः सर्वं द्रव्यमीप्सितमेव वा ।

भविष्योत्तरे— फलमेकं तथा धान्यं रसवासः परित्यजेत् ।

[illegible]र्घ्यदानेऽपि धान्यादीनामेकैकमेव ग्राह्यम् । प्रतिष्ठायान्तु सप्तान्यपि त्याज्यानि । नारद उवाच—

सम्पूज्य तं मुनिं ब्रह्मन् कथमन्नादिकं त्यजेत् ।
[illegible] मे ब्रूहि यदि भक्तोऽस्मि ते प्रभो ॥

ब्रह्मोवाच— एते त्याज्यास्तथा वस्त्रमासान् द्वादश पुत्र च ।
अशक्तौ द्वादशाहानि मुहूर्त्तान्यथवा पुनः ।।
द्वादशाहं कृते यस्तु ब्राह्मणेभ्यो निवेदयेत् ।
नूनं युष्मत् प्रसादेन माऽभूद् एतद् व्रतं मम ।।
अगस्त्यप्रीणनार्थाय यन्मया प्रस्थितं शुभम् ।
अनुमान्य ततो विप्रान् स्वस्ति वाचा ततः परम् ।
द्वादश्यैव हि भोज्याः स्युः ब्राह्मणा वेदपारगाः ।
द्विगुणस्तु विधिः कार्यो मुहूर्त्तानान्तु पारणे ।।
पारणेऽपारणे चैव मृष्टान्नैर्द्विजतर्पणम् ।
ब्राह्मणान् भोजयित्वा तु ततो भुञ्जीत वाग्यतः ।।

इत्यगस्त्यार्घ्यविधिः ।।

अथागस्तिप्रतिष्ठा

ब्रह्माण्डपुराणे— एवं कृत्वा विधानेन सप्तवर्षात्मकं व्रतम् ।
सप्ताब्देत्वथ सम्पूर्णे प्रतिष्ठाविधिरुच्यते ।
पूर्ववत् स्नानपूजादि प्रकुर्याद् विधिवन्नरः ।।

मात्स्ये— प्रत्यूषसमये विद्वान् कुर्यात्तस्योदये निशि ।
स्नानं शुक्लतिलैस्तद्वत् शुक्लमाल्याम्बरो गृही ।।
स्थापयेद् वरुणं कुम्भं माल्यवस्त्रविभूषितम् ।
पञ्चरत्नसमायुक्तं घृतपात्रेण संयुतम् ।
नानाभक्ष्यफलैर्युक्तं ताम्रपात्रसमन्वितम् ।।

भविष्योत्तरे— काञ्चनं कारयित्वा तु यथाशक्त्या सुशोभनम् ।
पुरुषाकृतिं प्रशान्तं जपमङ्गलधारिणम् ।।
कमण्डलुधरं शिष्यैर्मृगैश्च परिवारितम् ।
मृत्युघ्नं विषहर्त्तारं दर्भाक्षस्रग्धरं मुनिम् ।।

मात्स्ये— अङ्गुष्ठमात्रं पुरुषं तथैव, सौवर्णमप्यायतवाहुदण्डम्,
चतुर्भुजं कुम्भमुखे निधाय धान्यानि सप्ताम्बरसंयुतानि ॥

ब्राह्मे— अर्चितव्यश्च भगवान् श्रद्धाभक्तिसमन्वितैः ।
पूर्णकुम्भैः सकुष्माण्डैः यवैर्धान्यैर्घृतेन च ॥
जातिपद्मोत्पलैः शुभैश्चन्दनेन सितेन च ।
गोभिर्वृषैस्तथा वस्त्रैः रत्नैः सागरसम्भवैः ॥
उपानच्छत्रदण्डैश्च पादूकाजिनवल्कलैः ।
भूरिणान्नेन पयसा फलैः पुष्पैः सुशोभनैः ॥
अन्नप्रकारैः भक्ष्यैश्च पेयैर्ब्राह्मणतर्पणैः ॥

ब्रह्माण्डपुराणे—प्रभाते च निशान्ते च अर्घ्यं दद्यात् समाहितः ।
अग्निकार्यं प्रकुर्वीत खन्यमाने तु कुण्डके ॥
श्रपयेच्च चरुं तत्र ब्राह्मणो वेदपारगः ।
तिलतण्डुलश्यामाकं घृते वै कङ्कतत्रयम् ॥
सप्तपालाशाः षोडशाश्वत्था द्वादशव्रीहयः ।
यवालाजादधिमधुघृतयुक्तं तथा हुनेत् ॥
आधारावाज्यभागान्ते हुत्वा वैकङ्कतत्रयम् ।
दधिमधुघृताक्तांस्तु पालाशान् सप्त तान्यपि ॥
[1]सप्त ते अग्नविति च मन्त्रेण तु पृथक पृथक् ।
अश्वत्थं पुरुषसूक्तेन दधिमधुघृतान्वितम् ॥
आज्यं चरुञ्च तेनैव जुहुयात् षोडशाहुतीः ।
द्वादशव्रीहयः सर्वा घृताक्तास्तु पृथक् पृथक् ॥

विष्णवे स्वाहा । विष्णवे शिपिविष्टाय स्वाहा । विश्वदेवस्य [2]सुपर्णोऽसि । पुन सुपर्णोऽसि, विष्णो[3]क्रमोऽसीति तिस्रः, विष्णो[4]रराटम्, त्रीणिपदा[5], [6]तद्विप्रासः ।

---

(1) शु. यजु. (17-79) ।
(2) शु. यजु. (12-4) ।
(3) शु. यजु. (12-5) ।
(4) शु. यजु. (5-21) ।
(5) शु. यजु. (34-43) ।
(6) शु. यजु. (34-44) ।

दधिमधुघृतैर्युक्तांल्लाजाक्षतसमन्विताम् ।
व्रती पूर्णाहुतिं कृत्वा जुहुयादेवमाहुतिम् ॥
श्रद्धाः कर्मण्या मन्त्रेण स्विष्टकृत्तदनन्तरम् ।
ततो दिग्देवताहोममेकैकामाज्यमाहुतिम् ॥
चरुशेषं समश्नीयाद् हवन्तेन समन्वितम् ।
गोधान्यं रजतं वस्त्रं छत्रोपानहसंयुतम् ॥
उदकुम्भोपरिस्थश्च भद्रासनसमन्वितम् ।
कांस्यपात्रसमायुक्तमाचार्याय प्रदापयेत् ॥
रसपुष्पफलानाञ्च धान्यानाञ्च तथैव च ।
एतत्सर्वसमायुक्तं विप्रेभ्यः प्रतिपादयेत् ॥
व्राह्मणान् भोजयेत्तत्र सप्त सप्त द्विजोत्तमान् ।
पायसैर्गुडमिश्रैश्च पूपैर्मृष्टैस्तथान्यकैः ॥
अन्यैश्च विविधैर्दद्याद् येन तुष्यन्ति ते द्विजाः ।
गाश्च सुवर्णवासांसि तेभ्यो दद्याच्च दक्षिणाम् ॥
प्रदक्षिणं प्रकुर्वीत प्रणम्य शिरसा महीम् ।
होमशेषं समश्नीयात् स्वजनैः सुहृदैरपि ॥

मात्स्ये— अङ्गुष्ठमात्रं पुरुषं तथैव, सुवर्णमप्यायतवाहुदण्डम् ।
चतुर्भुजं कुम्भमुखे निधाय, धान्यानि सप्तान्वरसंयुतानि ॥
सकांस्यपात्राक्षतशुक्तियुक्तं, मन्त्रेण दद्याद् द्विजपुङ्गवाय ।
उत्क्षिप्य लम्बोदर दीर्घवाहुमनन्यचेतायमदिङ्मुखस्थः ॥
श्वेताश्च दद्याद् यदि शक्तिरस्ति, रौप्याङ्घ्रिकां हैममुखीं सवत्साम् ।
धेनुं नरः क्षीरवतीं प्रणम्य, स एष घण्टाभरणां द्विजाय ॥

व्रह्माण्डपुराणे— यः करोति विधानेन अगस्त्यार्घ्यव्रतं शुभम् ।
स मोदते परं स्थानं मुनेरस्य प्रसादतः ॥
षष्टिवर्षसहस्राणि च्युतः सुकुलमाप्नुयात् ।
लभते विपुलान् भोगान् जन्मजन्मान्तरेष्वपि ॥

भविष्योत्तरे— ब्राह्मणः स्याच्चतुर्वेदः सर्वशास्त्रविशारदः ।
क्षत्रियः पृथिवीं सर्वां प्राप्नोत्यर्णवमेखलाम् ॥
वैश्यानां धान्यसम्पत्तिर्गोधनं वाऽपि विन्दपि ।
शूद्राणां धनमारोग्यं सम्मानदायिकं भवेत् ॥
प्राणाः पुत्राः प्रजायन्ते सौभाग्यं गृहमृद्धिमत् ।
विधवानां महत्पुण्यं वर्द्धते पाण्डुनन्दन ॥
कन्या भर्तारमाप्नोति व्याधेर्मुच्येत दुःखितः ।
येषु देशेष्वगस्त्याघ्र्यो दीयते क्रियते जनैः ॥
तेषु देशेषु पर्जन्यः कामवर्षी प्रजायते ।
ईतयः प्रशमं यान्ति नश्यन्ते व्याधयस्तथा ॥
पठन्ति ये त्वागस्त्याघ्र्यं व्रतं शृण्वन्ति चापरे ।
ते सर्वे पापनिर्मुक्ताश्चिरं स्थित्वा महीतले ॥
हंसयुक्तविमानेन स्वर्गं यान्ति नरोत्तमाः ।
मर्त्ये यदिच्छति गृहं परमर्धियुक्तम्, भोगान् शरीरमरुजं पशुवर्च्चपुष्टम् ।
यद्रत्नवल्लभमुनेरुदयं महार्घ्यम्, अर्घ्यं प्रयच्छ फलपुष्परसैः सधान्यैः ॥

इति अगस्तिप्रतिष्ठा ।

अथ महाष्टमीविधिः

तत्र भविष्योत्तरे –

अष्टम्याञ्च नवम्याञ्च जगन्मातरमम्बिकाम् ।
पूजयित्वाऽश्विने मासि विशोको जयति द्विषः ॥

ब्रह्मपुराणे— तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ।
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह ॥
ततोऽद्य पूजनीया स्यात्तस्मिन्महति मानवैः ।
उपोषितैर्वस्त्रधूपमाल्यैः रत्नानुलेपनैः ॥
दीपैरन्नैस्तथा भक्ष्यैः फलपुष्पैश्च धान्यकैः ।
आमिषैः विविधैश्चापि होमैः ब्राह्मणतर्पणैः ॥

विल्वपत्रैः श्रीफलैश्च चन्दनेन घृतेन च ।
पशुभिः पानकैः हृद्यैः रात्रिजागरणेन च ।।
दुर्गागृहीतशस्त्राणि पूजितव्यानि पण्डितैः ।
वाद्यभाण्डानि चिह्नानि कवचान्यायुधानि च ।।
रात्रौ च शिल्पिकृतानि तानि पूज्यानि सर्वदा ।
भागवते— सर्वदेवोत्थिता तिष्ठेद्दुर्गा लोकहिताय वै ।
स्वपेद् भाद्रसिताष्टम्यां त्रिपक्षदिवसात्परम् ।।
उत्तिष्ठत्यर्चिता देवी षोडशेऽह्नि न रात्रितः ।
दिवा स्वापे भवेद् रोगी निश्युत्थाने जनक्षयः ।।
दशम्यामश्वयुक् शुक्ले देवीं सम्प्रेषयेन्नृप ।
दिनक्षयो यदि भवेत् स्वपेद् घस्रांश्चतुर्दश ।।
न वर्धयेत् स्वापदिनं तिथिवृद्धौ कदाचन ।
[1]मूलेन प्रतिवोधयेद् भगवतीं चण्डीं प्रचण्डाकृतिम्,
अष्टम्यामुपवाससंयतधिया कृत्वा नवम्यां वलिम् ।
नानापाशवमांसमज्जरुधिरैः भक्त्या समाराधयेत्,
नक्षत्रे श्रवणे तिथिश्च दशमीं सम्प्राप्य सम्प्रेषयेत् ।।
निशायामष्टमी प्रोक्तं दुर्गोत्सवं तु कारयेत् ।
अन्यत्र चोपवासादौ नवविद्धाऽष्टमी भवेत् ।।
अष्टम्यां यत्र नवमी तत्र पूजां विवर्जयेत् ।
अष्टमीं चेदनुप्राप्य अस्तं याति दिवाकरः ।।
तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेऽहनि ।
वृथा पशुघ्नतां याति नवमीवासरार्चिते ।।
अष्टमी निशिसन्तुष्टा पूजां गृह्णाति पार्वती ।
भविष्योत्तरे— अश्वयुक् शुक्लपक्षे या अष्टमी मूलसंयुता ।
सा महानवमी नाम त्रैलोक्येऽपि च दुर्लभा ।।

---

(1) मूलेन—मूलानक्षत्रेण ।

कन्यां गते सवितरि शुक्लपक्षेऽष्टमी च या ।
मूलनक्षत्रसंयुक्ता सा महानवमी स्मृता ॥

अष्टमी-नवम्यां युक्ता । भागवते यथा—

शुक्लपक्षे चतुर्थ्यान्तु देवी केशविशोधनम् ।
प्रातरेव तु पञ्चम्यां स्नापयेच्छुभ्रकैः जलैः ॥
सप्तम्यां पत्रिकापूजा अष्टम्यां चाप्युपोषणम् ।
पूजनं जागरञ्चैव नवम्यां विधिवद् बलिम् ॥
सम्प्रेषणं दशम्याञ्च क्रीडाकौतुकमङ्गलम् ।
[1]नीराजनञ्च राज्ञां श्रीजनवृद्धिकरं महत् ॥

लिङ्गपुराणे— आर्द्राद्यपादेऽश्वयुजि प्रसुप्ता, सम्बोधिता हैमवती शिवाद्ये ।
मूलेऽर्चिता तिष्ठति सा नवम्यां, हर्यन्तपादे जगतां हिताय ॥

नक्षत्रकल्पेऽपि तथा—

पादो निशाया भागे च श्रवणस्य यदा भवेत् ।
तदा देव्याः समुत्थानं नवम्यादिविभागत. ॥

गरुडपुराणे— दुर्गोत्सवं प्रवक्ष्यामि यथोक्तं शिवभाषितम् ।
ब्रह्मक्षत्रवैश्यशूद्रा वर्णावर्णं तु यत् स्मृतम् ।
पूजनीया शिवा सर्वैरेकधा भिन्नपर्वणि ।
भिन्ने भूपादिभिः पूर्वं परं ग्राह्यं द्विजातिभिः ॥
पूजा कार्या शरत्काले भगवत्याः प्रयत्नतः ।
पूर्वपर्वणि भक्त्यर्थं विमुक्त्यर्थं परेऽहनि ॥

---

(1) नीराजनं—निर्मञ्छनम्, आरतिः । तत्र पञ्चनीराजनं यथा कालोत्तरतन्त्रे—

पञ्चनीराजनं कुर्यात् प्रथमं दीपमालया ।
द्वितीयं सोदकाब्जेन तृतीयं धौतवाससा ॥
चूताश्वत्थादिपत्रैश्च चतुर्थं परिकीर्त्तितम् ।
पञ्चमं प्रणिपातेन साष्टाङ्गेन यथाविधि ॥ शब्दक. (2/912)

पशुमांसैर्बलिं कुर्यान्निशि चेन्नृपते नरः ।
पूर्वपर्वद्विजातीनां परं व्रतवतां सदा ॥
यस्मिन्नहनि यत्कार्यं तस्मिन् तत्करणात् परम् ।
फलं स्यात् पितृदेवानामतः कालं न लङ्घयेद् ॥
सा विद्धा स्यात् त्वविद्धा चेत् सा भीमा सा शिवा ततः ।
अतस्तस्यां द्विधा पूजा द्विधा कर्म च धर्मतः ।
या पूर्वतिथिसंयुक्ता सा तिथि व्रतकर्मसु ॥
नेष्टा विद्धा च कार्याणि कुतस्तस्यां द्विजन्मनाम् ।
तिथी पूर्वापरौ प्रेते दैवकार्येषु चेत् क्रमात् ॥
यतो देवी द्विजैः पूज्या विधिज्ञैः सर्वपर्वणि ।
द्विजानामुपवासादि राजन्यस्यार्चनं परम् ॥
देवी द्विजातिभिर्नातः कार्यं प्रेतपरेऽहनि ।

लिङ्गपुराणे— कलशिकां तोयपूर्णां जयन्तीपल्लवाननाम् ।
चतुर्वर्णैस्तथा यात्रा कर्त्तव्या स्वायुधेन तु ॥

कलशिकामित्यस्य पूर्वश्लोकस्थिते पूजयित्वेत्यनेनान्वयः ।

इत्यष्टमीविधिः ।

अथास्याः पूजा संक्षेपेण लिख्यते—

प्रथमतो मूलमन्त्रेण प्राणायामत्रयानन्तरं भूतशुद्धिं कृत्वा कराङ्गन्यासौ कुर्यात् । अस्त्रेणार्घ्यपात्रं प्रक्षाल्य मूलेन पूरयित्वा कवचेनावगुण्ठ्यास्त्रेण संरक्ष्य धेनुमुद्रयाऽमृतीकृत्य तदुदकेन पूजोपकरणान्यात्मानं चाभ्युक्षेत् । ततो ॐ वायव्ये गणपतये नमः । ॐ ईशाने गुरुभ्यो नमः । मध्ये हां आधारशक्तये नमः । ॐ कूर्माय नमः । ॐ ह्रीं अनन्ताय नमः । ॐ पृथिव्यै नमः । ॐ ह्रीं विकृतास्याय सिंहाय नमः । आग्नेयादिकोणेषु ॐ धर्माय नमः । ॐ ज्ञानाय नमः । ॐ वैराग्याय नमः । ॐ ऐश्वर्याय नमः । पूर्वादिदिक्षु ॐ अधर्माय नमः । ॐ अज्ञानाय नमः । ॐ अवैराग्याय नमः । ॐ अनैश्वर्यायै नमः । ॐ हां पद्माय नमः । ॐ हां कर्णिकायै नमः । ॐ हां केशरेभ्यो नमः । मध्ये ॐ सत्त्वाय नमः । ॐ रजसे नमः । ॐ तमसे नमः । ॐ

अर्कमण्डलाय नमः । ॐ वह्निमण्डलाय नमः । ॐ सोममण्डलाय नमः । अथ पूर्वादिदलेषु ॐ जयायै नमः । ॐ विजयायै नमः । ॐ अजितायै नमः । ॐ अपराजितायै नमः । ॐ सुमुखायै नमः । ॐ दुर्मुखायै नमः । ॐ हयास्यायै नमः । ॐ व्याघ्रवक्त्रिकायै नमः । मध्ये ॐ अपराजितायै नमः । इति सम्पूज्य योनिमुद्रां दर्शयित्वा ध्यायेत् ।

यथा मात्स्ये— जटामुकुटसंयुक्तामर्धेन्दुकृतशेखराम् ।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननम् ।
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् ।
नवयौवनसम्पन्नां सर्वाभरणभूषिताम् ॥
सुचारुदर्शनामुद्यत् पीनोन्नतपयोधराम् ।
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्दिनीम् ॥
मृणालायतसंस्पर्श दशबाहु समन्विताम् ।
त्रिशूलं दक्षिणे दद्यात् खड्गचक्रं तथैव च ॥
तीक्ष्णबाणं तथा शक्तिं दक्षिणेऽपि निबोधत ।
[1]खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च ॥
घण्टां वा परशुं वाऽपि वामतः सन्निवेशयेत् ।
अधस्तान्महिषं तद्वद् द्विशिरस्कं प्रदर्शयेत् ॥
शिरश्छेदोद्भवं तद्वद् दानवं खड्गपाणिनम् ।
हृदि शूलेन निर्भिन्नं गलद्रुधिरचर्चितम् ॥
रक्तारक्तीकृताङ्गञ्च रक्तविच्छुरितेक्षणम् ।
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम् ॥
सपाशवामहस्तेन धृतकेशञ्च दुर्गया ।
वमद् रुधिरवक्त्रञ्च देव्याः सिंहं प्रदर्शयेत् ॥
देव्यास्तु दक्षिणं पादं समं सिंहोपरि स्थितम् ।
किञ्चिदूर्ध्वं तथा वाममङ्गुष्ठं महिषोपरि ॥

---

(1) खेटकं — यष्टिः, दुर्गायाः अस्त्रविशेषः इति शब्दक. (2/283) ।

एवं ध्यात्वा— आवाहितासि दुर्गे त्वं मृण्मयां श्रीफलेऽपि वा ।
स्थिराऽत्यन्तं च भूत्वा मे गृहे त्वं कामदा भव ।। इत्यावाहनम् ।

ॐ नारायण्यै विद्महे । चण्डिकायै धीमहि । तन्नो देवी प्रचोदयात् । इति स्नानमन्त्रः । ओमिति मूलमन्त्रेणासनाद्याचमनीयमधुपर्कगन्धवस्त्राणि दत्त्वा पुष्पेण त्रिः सम्पूज्य चण्डिकां गायत्र्या च द्रामित्याद्यङ्गमन्त्रैश्च पूजयेत् ।

अमृतोद्भूतं श्रीवृक्षं महादेवप्रियं सदा ।
विल्वमालां प्रयच्छामि पतितं ते सुरेश्वरि ।।

अनेन विल्वपत्रमालां विल्वपत्रञ्च दद्यात् । ततो हृन्मन्त्रेण स्वाहान्तेन घृतदीपनैवेद्यकरोद्वर्त्तनवक्त्रोद्वर्त्तनानि दत्त्वावरणपूजां कुर्यात् । यथा स्कान्दजामले—

नवपद्मात्मके स्थाने पूज्या दुर्गा च मूर्त्तिभिः ।
कर्णिकायां तथेन्द्रादौ नवतत्त्वाक्षरैः क्रमात् ।।
रुद्रचण्डा प्रचण्डा च चण्डो प्राचण्डनायिका ।
तथा चण्डवती देवी चण्डरुपा तु चण्डिका ।।
नवमी चोग्रचण्डा च मध्यस्थाग्निप्रभाकृतिः ।

मूलं यथाशक्ति जप्त्वा तद्दशांशतोऽङ्गमन्त्रांश्च जप्त्वा पुष्पाञ्जलिमादाय स्तुत्वा प्रणमेत् । ततो देवीं वामतो मण्डलिकां कृत्वा हुं इति मन्त्रेण चण्डेश्वरीपूजां कृत्वा विसर्जयेत् ।

असिर्विशसनः खड्गः तीक्ष्णधारो दुरासदः ।
श्रीगर्भो विजयश्चैव धर्माधारस्तथैव च ।।
इत्यष्टौ तव नामानि पुरा प्रोक्तानि वेधसा ।
नक्षत्रं कृत्तिका तुभ्यं गुरुर्देवो महेश्वरः ।।
हिरण्यगर्भस्ते वर्ष्मं धाता देवो जनार्दनः ।
पिता पितामहश्चैव त्वं मां पालय सर्वदा ।।
पशुजन्मप्रसूतोऽसि पूजाहोमादिकर्मणि ।
तुष्टा भवतु सा दुर्गा सरक्तपिशितैस्तव ।।

पशुप्रोक्षणमन्त्रः— ॐ नमो महामायै रुधिरप्रियङ्करि रुधिरं गृहाण गृहाण हुं फट् स्वाहा । ॐ नमो महिषमर्दिनि ॐकारमूर्त्तये पशुमस्तकं गृहाण गृहाण हुं फट्

स्वाहा । पशुमस्तकदानमन्त्रः—

घोरदंष्ट्रे करालास्ये मद्यमांस सदाप्रिये ।
बलिं गृहाण मे देवि पशुरक्तं समांसकम् ॥

रुधिरमांसयुक्तबलिदानमन्त्रः—

महिषघ्नि महामाये चामुण्डे मुण्डमालिनी ।
भव्यमारोग्यविजयं देहि देवि नमोऽस्तु ते ॥
चन्दनेन समालिप्ते कुङ्कुमेन विलेपिते ।
बिल्वपत्रार्चिते देवि दुर्गेऽहं शरण गतः ॥

शान्तिविशेषः — आप्यायन्ते पयो देवी अश्विनो द्रुपदां मुने ।
आगच्छ त्वं यविष्ठैते अंशुना श्रीश्रते तथा ॥
वसवोऽग्निः देवा मूर्धा तदेवाग्निस्ततो भवेत् ।
देवा आशासमूह्योऽसि अष्टादशामहाफलाः ॥

[1]देवीपुराणे-ब्रह्मोवाच—

आश्विने वाऽथ माघे वा चैत्रे वा श्रावणेऽपि वा ।
कृष्णादारभ्य कर्त्तव्यं व्रतं शुक्लावधेर्हरेः ॥
अष्टमीमाश्विने कृष्णामेकभक्तेन कारयेत् ।
मङ्गलारूपिणीं देवीमथरूपातिरूपिणीम ॥
पूजयेन्नवभेदेन गन्धमाल्यनिवेदनैः ।
कन्यका भोजयेत्तत्र देवीभक्तांश्च मानवान् ॥
नक्तेन नवमी कार्या यावन्न दशमीं क्षिपेत् ।
एकादशीमुपवसेत् पुनरेव विधिर्भवेत् ॥
यावच्छुक्लाष्टमी शक्र उपवासविधानतः ।
स्नानं होमो जपः पूजा कन्या भोज्याश्च प्रत्यहम् ॥
कर्त्तव्यं जितरोषेण देव्याभक्तिरतेन च ।

---

(1) देवीपु. (89/2–25) ।

नवधा पशुका[क] तत्र महिषादि अजाविकम् ।।
कर्त्तव्यं भूतवेताले नव ध्यायेत् चिकीर्षया ।
कन्या अलंकृतास्तत्र द्विजदेवीपरायणैः ।।
नटकौतुकप्रेक्षा च रथयात्रा सजागरा ।
दानं देयं यथाशक्त्या सर्वेषामपि भक्तिदा ।।
महाभैरवरूपेण त्वस्थिमाला धराश्च ये ।
पूजनीया विशेषेण वस्त्रशोभा पुरादिषु ।।
कर्त्तव्या सर्वकामानां प्रापणाय सुरोत्तम ।
अनेन विधिना शक्र यथेच्छं लभते फलम् ।।
मङ्गला भैरवी दुर्गा वाराही त्रिदशेश्वरी ।
उमा हैमवती कन्या कपाली वैटभेश्वरी ।।
काली ब्राह्मी महेशा च कौमारी मधुसूदनी ।
वाराही वासवी वर्धा नामान्येतानि वै जपेत् ।।
पूजयेद् भोजयेत् कन्याः शास्त्रदृष्टेन कर्मणा ।
वस्त्रालंकारघण्टादि कङ्कणकटिसूत्रकाः ।।
दातव्या आत्मनः शक्त्या देवीभक्तैः सुखार्थिभिः ।
अथवा नवरात्राणि सप्त पञ्च त्रिकाणि च ।।
एकभक्तेन नक्तेन अयाचितोपवासनैः ।
क्षपयेदाश्विने शक्र या शुक्ला च तथाष्टमी ।।
पूजयेन्मङ्गलां तत्र मण्ड़ले विधिकल्पिते ।
सर्वसम्भारसम्पन्ने सर्वौषधिसमन्विते ।।
सर्वकामप्रदे शक्र सर्वकामानवाप्नुयात् ।
अर्थकामस्य अर्थदं राज्यकामस्य राज्यदम् ।।
आरोग्यपुत्रदं वत्स महापातकनाशनम् ।

(क) "पशुघातं तु" इति गङ पाठः ।

सर्ववर्णैश्च कर्त्तव्यं पुंस्त्रीबालनपुंसकैः ।
सर्वकामप्रदा देवी तस्माच्छक्रमहाफला ।
अनेन विधिना वत्स ददती अविचारणात् ॥
सर्वेषां व्रतयोगानां सर्वप्रदमहाफलम् ।
नवम्याख्यं महापुण्यं तव सम्यक् प्रकाशितम् ।
नाख्येयं भक्तिहीनस्य मूर्खस्य हेतुवादिनः ।
देयं भक्ताय शान्ताय शिवविष्णुरताय च ॥
देवीभक्तः सदाचारः कन्यापूजारतो नरः ।
इहैव सर्वकामानि साधयेदविचारणात् ॥
नाधयो व्याधयस्तस्य न च शत्रुभयं भवेत् ।
[1]सङ्गरेषु जयो नित्यं महानेकोऽपि जायते ॥
श्रवणात् सर्वकामान् स लभते चाविचारणात् ॥

प्रार्तनिवेदनं संकल्पञ्च कृत्वाऽष्टदलपद्ममण्डलेऽष्टदलेषु मध्ये ॐ मङ्गलायै नमः इति मन्त्रे यथोक्तमूर्त्ति देवीं गन्धपुष्पादिभिः सम्पूज्य घृतं हुत्वा मङ्गलाभैरवीत्यादिनास्यः विवर्धयेत् । महिषाढ्यतमं पशुं नवधा छित्वा नवानां पूजितदेवानामन्तिके ॐ भूतवेतालेभ्यो नमः इति नवधाबलिं दत्त्वा कन्यात्रयं ब्राह्मणत्रयं च सम्पूज्य भोज्यादिना सन्तर्प्य वस्त्रमाल्यादिना पुरादिशोभां विधाय नटनर्तकवाद्यादिना रथयात्रां सम्पाद्य दीनानाथादीन् सन्तोष्य हविष्यमेकवारं भोजयित्वा रात्रिजागरणादिनाऽतिवाहयेत् । शुक्लाष्टम्यां च व्रतं कृत्वा नवम्यां ब्राह्मणेभ्यो यथाशक्ति काञ्चनाद्यन्यतमदक्षिणां दत्त्वा पारणं कुर्यात् । अत्राशक्तो नवरात्रैकभक्तेन पञ्चरात्रायाचितेन त्रिरात्रोपवासेन वा व्रतमेतत् कुर्यात् । इति ।

इति सामान्यदुर्गापूजा ।

---

(1) संगरेषु—संग्रामेषु ।

अथ कूष्माण्डदशमी

तत्र शाम्बपुराणे—

शिवं दशरथं तत्र ललीं देवीञ्च पूजयेत् ।
वहिः कूष्माण्डकुसुमैर्दशाहं दशभिः क्रमात् ॥
पूरयेद् विधिवत्तावद् यावत् कृष्णचतुर्थिका ।
तस्यामर्घ्यं शशाङ्काय दत्त्वा न विधवा भवेत् ॥

शिव उवाच— शृणुष्वेकमना देवि व्रतं सर्वार्थसाधनम् ।
दशरथ ललितेति ख्यातं सर्वसुरेश्वरि ॥
आश्विनस्य सिते पक्षे दशम्यां नियतः शुचिः ।
प्रातः स्नानादिकं कर्म कृत्वा पश्चादनन्तरम् ॥
प्रासादं मृण्मयं तत्र त्रिशूलोपरि चिह्नितम् ।
मध्ये मां स्थापयेत्तत्र स्थाने त्वया सिते शुभे ॥
याम्ये च स्थापयेद्देवं विघ्नेशं पापनाशनम् ।
वारुणे च कार्त्तिकेयं त्रिशिखशक्तिसंयुतम् ॥
उत्तरे चाप्युमां देवीं सिंहस्योपरिसंस्थिताम् ।
एवं नानाविधिं कृत्वा ततः पूजां समाचरेत् ॥
विनायककरं तत्र सिन्दूरेणावगुण्ठयेत् ।
कूष्माण्डपुष्पमादाय दशसंख्यञ्च सुन्दरि ॥
त्वाञ्च माञ्च ततः सम्यक् पूजयेत् सुसमाहितः ।
सुगन्धं चेच्छया धूपं गन्धं श्रीफलसम्भवम् ॥
पायसं चैव नैवेद्यं तिलतैलेन दीपकम् ।
एवं पूजाविधिं कृत्वा प्रार्थयेत् सुसमाहितः ॥
त्रिलोचन नमस्तेऽस्तु नमस्ते शशिभूषण ।
त्राहि मां त्वं विरूपाक्ष महादेव नमोऽस्तु ते ॥

दुर्गापूजामन्त्रो यथा— ॐ वरदायै नमः । ॐ अशोकायै नमः । ॐ शिवायै नमः । ॐ मृडान्यै नमः । ॐ मङ्गलकारिण्यै नमः । ॐ सौभाग्यदायिन्यै नमः । ॐ अभ-

यायै नमः । ॐ शुभदायिन्यै नमः । ॐ मदवासिन्यै नमः । ॐ सर्वमङ्गलमाङ्गल्यै नमः ।

दुर्गे देवि महाभागे ललिते शुभदे शिवे ।
सर्वकामप्रदे देवि कात्यायनि नमोऽस्तु ते ॥
सौभाग्येनोच्छ्रितां जीवभर्तृकां जीवपुत्रिकाम् ।
ऐश्वर्यभागिनीमङ्ग कुरु मां गौरि सर्वदा ॥
नमस्ते गिरिराड्पुत्रि नमस्ते पर्वतप्रिये ।
नमः कुमारजननि गौरिदेवि नमोऽस्तु ते ॥
यथोमया महादेव वियोगो न कदाचन ।
तथावयोः पतिपत्न्योः संयोगं कर्त्तुमर्हसि ॥
एवं स्तुत्वा च देवेशं देवीं स्तुत्वा समाहितः ।
काश्यपेय नमस्तुभ्यं दशरथ क्षत्रियोत्तम ॥
यथा तवेप्सितप्राप्तिस्तथा मेऽस्तु मनोरथः ।
ततस्तु पूजयेद्देवं गणेशं विघ्ननाशनम् ।
गन्धपुष्पैः समभ्यर्च्च्य इति वाणीमुदीरयेत् ॥
नमः परशुहस्ताय नमस्ते गजरूपिणे ।
अविघ्नं मे व्रतं नाथ त्वत् प्रसादाद् भवेदिह ॥
ततः सम्पूजयेद् भक्त्या कार्त्तिकेयं सुरार्चितम् ।
नमस्ते शक्तिहस्ताय नमस्तु शिखिवाहन ॥
क्रौञ्चारे त्वां नमस्यामि व्रतं मे सफलं कुरु ।
ततस्तु पूजयेद्देवीं गौरीं कनकरूपिणीम् ॥
गन्धपुष्पैः समभ्यर्च्च्य इति स्तोत्रमुदीरयेत् ।
नमस्ते सर्वदेवेशि नमस्ते सर्वसौख्यदे ॥
नमस्ते सर्वजननि नमस्ते शंकरप्रिये ।
ततो निश्युदिते चन्द्रे चन्द्रायार्घ्यं निवेदयेत् ॥
क्षीरोदार्णवसम्भूत अत्रिनेत्रसमुद्भव ।

रोहिण्या सहितो भूत्वा गृहाणाऽर्घ्यं नमोऽस्तु ते ।।
अर्घ्यमन्त्रः— यथा ते न वियोगोऽस्ति रोहिण्या सह शीतगो ।
तथा मे न वियोगोऽस्तु धनभर्तृं सुतैः सह ।।
विप्राय दक्षिणां दद्याद् यथाशक्त्या ततः परम् ।
[1]चित्रान्नञ्च समश्नीयाद् वाग्वतीसुसमाहिता ।।
एवमेव विधानेन दशवर्षाणि पूजयेत् ।
पूर्णे प्रतिष्ठा कर्त्तव्या आचार्येण विधानतः ।।
सौवर्णं दशरत्निकं पुष्पं कृत्वा सुशोभनम् ।
रौप्यं सदशरत्निकं चन्द्रं पूज्यार्घ्यपूर्ववत् ।।
शिवञ्च रजतेनैव ललितां स्वर्णेन कारयेत् ।
चन्द्रायार्घ्यं प्रकुर्वीत तस्यां रात्रौ समाहिता ।।
तन्त्रीवाद्यं प्रकुर्वीत गीतवाद्यसमन्वितम् ।
अपरे तु दिने प्राप्ते होमं कुर्याद् विचक्षणः ।।
श्रपयेच्च चरुञ्चैव यवपायसमिश्रितम् ।
पालाशसमिधस्तत्र दशप्रादेशमात्रतः ।।
वैश्वदेवीति मन्त्रेण समिदाज्यचरुश्शृतम् ।
दशदशाहुतीर्हुत्वा चापरं मधुसर्पिषा ।।
[2]शन्नो देवी [3]इरावती [4]मानस्तोके त्रयः स्मृताः ।
यवतिलसमायुक्तं जुहुयादाहुतित्रयम् ।।
विष्णवे स्वाहा । विष्णवे नित्यभूपाय स्वहा । विष्णवे शिपिविष्टाय स्वाहा ।
स्विष्टकृन् प्राशनान्ते च दानं दद्यात् प्रयत्नतः ।
शंखञ्च काञ्चनं वस्त्रं धेनुं धान्यं तथैव च ।।
पूजोपकरणं सर्वमाचार्याय प्रदापयेत् ।
दशरथ ललितान्तु या करोति महाव्रतम् ।।

---

(1) चित्रान्नं—रञ्जितप्रसाधिततण्डुलम् । (2) शु. यजु (36–12) ।,
(3) शु. यजु. (5–16) । (4) शु. यजु. (16–16) ।

द्रव्याढ्यं रूपसौभाग्यं लभते नात्र संशयः ।
लभते विपुलान् भोगान् मृता शिवपुरं व्रजेत् ॥

इति कूष्माण्डदशमी ॥

अथ कौमुदीपौर्णमासी

तत्र लिङ्गपुराणे—

आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि ।
[1]कौमुदी सा समाख्याता कार्या लोकविभूतये ॥
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावते स्थितम् ।
सुगन्धैर्निशि सद्वेशैरक्षैर्जागरणं चरेत् ॥
नारिकेलरसं पीत्वा अक्षैर्जागरणं निशि ।
तस्मै ऋद्धि प्रयच्छामि को जागर्त्ति महीतले ॥

विष्णुः— को जागर्त्ति वचोऽभिधाय पुरुषं लक्ष्मीस्त्यजेत् सुप्तकम् ।
शुक्लापञ्चदशीनिशि स्वयमिषे लोकस्ततो जागृयात् ॥

भविष्योत्तरे-कृष्ण उवाच—

मासि त्वश्वयुजि प्राप्ते पौर्णमास्यां युधिष्ठिर ।
द्यूतक्रीडाविधानञ्च कथयामि समासतः ॥
मण्डपे वा गृहे वाऽपि देवतायतनेऽपि वा ।
मुक्तादामैरलंकृत्य ध्वजैर्नानाविधैस्तथा ॥
चूताश्वत्थादिरम्भाणां वितानेन विभूषितम् ।
तन्मध्ये विलिखेत् पद्ममष्टपत्रं सकर्णिकम् ॥
कर्णिकायां न्यसेद् वाऽपि लक्ष्मीमपि सलक्षणाम् ।
चतुर्भुजां सुवर्णाभां सर्वाभरणभूषिताम् ॥

---

(1) कौमुदीशब्दव्युत्पत्तिर्यथा— जयसिंहकल्पद्रुमे-(पृ-779)—

कौ मुदन्ति जना यस्मान्नानाभावैः परस्परम् ।
हृष्टास्तुष्टाः सुखापन्नास्तेनैषा कौमुदी स्मृता ॥

वरदां भयहस्तां तां सपद्माऽर्घभूजद्वयाम् ।
पद्ममालाधरां देवीं सुमुखीं मुकुटोज्ज्वलाम् ॥
प्रसन्नवदनां देवीं फुल्लेन्दीवरलोचनाम् ।
पूर्वादिषु तु पत्रेषु वासुदेवादयः क्रमात् ॥
अञ्जनाक्षीरकाश्मीरहेमाभाः पीतवाससः ।
शङ्खचक्रधराः सर्वे सर्वाभरणभूषिताः ॥
आग्नेयादिषु पत्रेषु गुग्गुलादीन् समावहेत् ।
हेमकुम्भधरा ध्येया हस्तिनो रजतप्रभाः ॥
वस्त्रैर्गन्धैस्तथा पुष्पैर्धूपैर्दीपैर्निवेदनैः ।
उपचारैश्च विविधैर्नारिकेलफलादिभिः ॥
पूजयित्वा श्रियं देवीं देवेन्द्रञ्च तथैव च ।
मन्त्रेणानेव देवेशीं प्रार्थयेत् सुसमाहितः ॥
क्षीराब्धिमन्थनोद्भूते विष्णोर्वक्षःस्थलाश्रये ।
सर्वकामप्रदे देवि ऋद्धि यच्छ नमोऽस्तु ते ॥
ततस्तु त्रिदशेन्द्रन्तु मन्त्रेणानेन पूजयेत् ।
नमस्ते त्रिदशश्रेष्ठ नमस्ते कश्यपात्मज ॥
शचीपते नमस्तेऽस्तु नमस्ते वरदो भव ।
एवं कृत्वा विधानेन द्यूतक्रीडां समारभेत् ॥
अन्यैश्च चतुरङ्गैश्च मुष्टिस्थौल्यादिभिस्तथा ।
क्रीड़येच्च यथान्यायं युधिष्ठिर ! परस्परम् ॥
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चैवान्यवर्णकैः ।
ताम्बूलैर्नारिकेलैश्च वस्त्रैश्चैव कपर्दकैः ॥
परस्परञ्च दातव्यं पूज्यदेवं समर्चयेत् ।
रात्रौ जागरणं कुर्यात् क्रीडमानः प्रहृष्टवत् ॥
अनेन विधिना चैव देव्या चैव महेश्वरः ।
क्रीडितश्चात्र दिवसे तस्मात् पूज्यः सदा नरैः ॥

एवं यः कुरुते भक्त्या तस्य देवी प्रिया भवेत् ।
ददात्यभिमतान् कामानैहिकामुष्मिकान् सदा ॥

वासुदेवादयः– वासुदेवसंकर्षणप्रद्युम्नानिरुद्धाः । गुग्गुलादयः । तदुक्तं प्रपञ्चसारे—

गुग्गुलो दमनश्चैव सलिलश्च कुरुण्टकः ।

इति कौमुदीपौर्णमासी ।

अथाकाशदीपदानम्

तत्र विष्णुधर्मोत्तरे—

आश्वयुज्यामतीतायां यावदात्रेय कार्त्तिकी ।
तावद्दीपप्रदस्योक्तं फलं राजेन्द्र शाश्वतम् ॥
तावत्कालं प्रयच्छन्ति ये तु दीपं सदा निशि ।
तुङ्गे देशे बहिस्तेषां महत् पुण्यफलं भवेत् ॥
अप्यन्धकारे गहने प्राकाश्यं तेन जायते ।
प्राकाशान्नृपशार्दूल तेन यान्ति महत्सुखम् ॥

ब्रह्माण्डपुराणे—तुलायां तिलतैलेन सायं सन्ध्यासमागमे ।
आकाशदीपं यो दद्यान्मासमेकं निरन्तरम् ॥
सश्रीकाय श्रीपतये स श्रिया न वियुज्यते ॥

दीपदानमन्त्रो यथा शतानन्दसंग्रहे—

दामोदराय नभसि तुलायां [1]लोलया सह ।
प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे ॥

इति श्लोकं पठित्वा-अद्यादि वृश्चिकराशिरविसंक्रान्तिपर्यन्तं कार्त्तिकीपर्यन्तं वा प्रतिदिनं सायमुपक्रम्य निशि नभसि पतङ्गादिनिवारणं तावद्धि यावज्ज्वलितं प्रदीपं सश्रीकाय श्रीपतये श्रीकामोऽहमुत्सृज्य दद्याम् ।

दीपदानस्थानम्– चतुष्पथेषु रथ्यासु ब्राह्मणाऽऽवसथेषु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारे गहनेषु च ।
दीपदानाद्धि सर्वत्र महाफलमुपाश्नुते ॥

इत्याकाशदीपदानम् ।

---

(1) लोलया—लक्ष्म्या ।

अथ प्रदीपामावास्या

तत्र परिशिष्टे—तुलास्थे भास्करे दर्शे उपास्तसमये रवौ ।
एकैकस्य पितुस्त्रींस्त्रीन् प्रदद्यात् पितृयज्ञवत् ॥
शरत्पक्वैर्व्रीहिपिष्टैरनस्विन्नैस्तु पूपकैः ।
आधारैर्हविषा दीपान् प्रदद्याद् गन्धलेपिते ॥
रजसालंकृतेनैव प्रस्तीर्णे तिलदर्भकैः ।
श्यामावल्लीजकुसुमैरर्चितैर्गन्धपुष्पकैः ॥
कार्पासवर्त्तिभिश्चैव शाल्मल्यर्कविवर्जितैः ।
वसामेदोविरहितैर्न वेश्मनि कदाचन ॥
दद्याद्धि धान्यस्य स्नेहैर्धूपं गुग्गुलसर्पिषा ।
ज्योतिर्लोकमवाप्नोति तुलास्थे दीपदर्शिते ॥
दत्त्वैवं दीपमाकाशं वैश्वदेवपुरःसरम् ।
पितॄन् पितामहानन्यान् दर्शयेच्च पृथक् पृथक् ॥
आयुर्बलं धनं पुत्रमारोग्यं सुमनोरथम् ।
दीप्यमानं प्रदीपञ्च दत्त्वा शंसन्ति दातरि ॥

पितृयज्ञवत्—तर्पणवत् । न तु श्राद्धवत् । एकैकस्य पितुस्त्रींस्त्रीनिति वचनाद् । तेन क्रत्वादि विश्वेभ्यो देवेभ्यो सनकादिसप्तमनुष्येभ्यः पित्रादिभ्यश्च कृतापसव्येन दक्षिणामुखेन आवाहनादि पुरःसरं दीपा दातव्याः । अत्रायं संक्षेपार्थः—वहिः स्थंडिले शुक्लरजसाऽलंकृतेषु वास्तुप्रदेशेषु तिलदर्भान् विस्तीर्य गन्धपुष्पधूपैरभ्यर्च्च्य प्राग् एवाकाशं पश्यन् क्रत्वादि विश्वेभ्यो देवेभ्यो दीपान् दत्त्वा नीवीत्युदङ्मुखः सनकादि सप्तमनुष्येभ्य दत्त्वा कृतापसव्यो दक्षिणां दिशं पश्यन् अमुकसगोत्रामुकशर्मन् पितरेषते दीप इति वाक्येन, पित्रादिभ्यो मातामहादिभ्यश्च प्रत्येकं त्रीन् त्रीन् कृत्वा मातृपितामहीप्रपितामहीभ्य [1]एकमेकं दद्यात् । ततो बहूनां गृहदेवतानाञ्च जीवितानाञ्च ।

ब्राह्मे—
अस्त्रशस्त्रहतानान्तु भूतानां भूतदर्शिनाम् ।
उज्ज्वलं ज्योतिषा देहं दहेयं व्योमवर्त्तिना ॥

---

(1) वस्तुतस्तु समाचारात् मात्रादिभ्योऽपि त्रीन् त्रीन् दीपान् प्रयच्छन्ति ।

तिथिद्वैधे निश्चयो यथा—

अमा वसति यद्रात्रौ तत्र दीपं प्रदापयेत् ।
तर्पणं पिण्डदानञ्च श्राद्धं चैवापरेऽहनि ॥

दिनद्वयेऽपि यद् रात्रावमावास्यासम्भवस्तत् पक्षमाह —

तुलास्थे भास्करे दर्शे श्राद्धं कृत्वाऽपराह्णिकम् ।
दीपदानं तत्र कुर्याद् [1]उपास्तसमये रवौ ॥

सम्पूर्णामावास्याविषयमेतत् ।

इति प्रदीपामावास्या ।

अथात्र सुखरात्रिविधिः

ब्रह्मपुराणे— अमावास्यां तु तां लक्ष्मीः कार्त्तिके मासि केशवात् ।
अभयं प्राप्य सुप्तास्तु सुखं क्षीरोदसागरम् ॥
लक्ष्मी दैत्यभयान्मुक्ता सुखं सुप्ताम्बुजोदरे ।
अतोऽर्थं विधिवत्कार्यार्मनुष्यैः सुखसुप्तिका ॥

भविष्योत्तरे — एवं प्रभातसमयेऽमावास्यायां नराधिप ।
स्नात्वा देवान् पितॄन् भक्त्या सम्पूज्याथ प्रणम्य च ।
कृत्वा तु पार्वणं श्राद्धं दधिक्षीरघृतादिभिः ।
ततोऽपराह्णसमये घोषयेन्नगरे नृपः ।
मोक्षे वा हवने लोका यथेष्टं चेष्टतामिति ।

ब्रह्मपुराणे— दिवा तत्र न भोक्तव्यमृते वालातुराज्जनात् ।
प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम् ॥
दीपवृक्षास्ततः कार्या भक्त्या देया गृहेष्वपि ।
चतुष्पथे श्मशानेषु नदीपर्वतवेश्मसु ॥
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च ।
वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः ॥

---

(1) उपास्तसमयः—त्रिमुहूर्त्तात्मकः प्रदोषकालः ।

दीपमालापरिक्षिप्ते प्रदेशे तदनन्तरम् ।
ब्राह्मणान् भोजयित्वादौ विभुज्य प्रबुभुक्षितान् ॥
अलंकृतेन भोक्तव्यं नववस्त्रोपशोभिना ।
स्निग्धैर्मुग्धैर्विदग्धैश्च [1]बान्धवैर्निभृतैः सह ॥
शङ्करश्च पुरा द्यूतं ससर्ज सुमनोहरम् ।
कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि सत्यवत् ॥
जितश्च शंकरस्तत्र जयं लेभे च पार्वती ।
अतोऽथ शंकरो दुःखी गौरी नित्यं सुखोपिता ॥
तस्माद् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः ।
तस्मिन् द्यूते जयो यस्य तस्य सम्वत्सरः शुभः ॥
पराजयो विघ्नतस्तु लब्धनाशकरो भवेत् ।
श्रोतव्यं गीतवाद्यादिस्वनुलिप्तैः स्वलंकृतैः ॥
विशेषतश्च भोक्तव्यं प्रशस्तैर्बान्धवैः सह ।
तस्यां निशायां कर्त्तव्यं शय्यास्थानं सुशोभनम् ॥
गन्धैः पुष्पैः रत्नमाल्यैर्कुसुमैश्चाप्यलंकृतम् ।
दीपमाला परिक्षिप्तं तथा धूपेन धूपितम् ॥
दयिताभिश्च सहितैर्नेया सा च तदा निशि ।
नवैर्वस्त्रैश्च सम्पूज्या द्विजसम्बन्धिबान्धवाः ॥

दीपमालापरिक्षिप्त इति । अङ्गशेषपरिशिष्टोक्तविधिना विश्वेषां देवानां पित्रादीनाञ्च दीपदानं दर्शितम् । कार्त्तिके शुक्लपक्षे चेति । अमावास्यायां निशाशेषे द्यूतमारभ्य प्रतिपत्पर्यन्तं क्रीड़ितव्यमित्यर्थः । श्रोतव्यमिति । अमावास्यारात्रावित्यर्थः ।

भविष्योत्तरे — लोकाश्चापि पुरे हृद्ये [2]सुधाधवलिताजिरे ।
नृत्तवादित्रसम्पुष्टे सम्प्रज्ज्वलितदीपके ॥

---

(1) निभृतैः—विनीतैः । अमर. (3-1-25) ।

(2) सुधाधवलिताजिरे—शुक्लीकृताङ्गणे ।

अन्योन्यप्रतिसंहृष्टे दत्ततालनके जने ।
ताम्बूलहृष्टवदने कुङ्कुमक्षो[1]दयार्चिते ॥
दुकूलपट्टनेपथ्य स्वर्णमाणिक्यभूषिते ।
युवतिजनसंकीर्णे वस्त्रोज्ज्वलितहारिणि ॥
दीपमालाकुले रम्ये [2]विध्वस्तध्वान्तसञ्चये ।
प्रदोषे दोषरहिते शास्त्रे दोषागमे शुभे ॥

लोकाश्चेति यथेष्टं चेष्टयतीत्यर्थः । तथा—

ततोऽर्धरात्रसमये स्वयं राजा व्रजेत् पुरम् ।
अवलोकयितुं रम्यं पद्भ्यामेव शनैः शनैः ॥
महता तूर्यघोषेण ज्वलद्भिर्हस्तदीपकैः ।
हट्टशोभां ततः पश्यन् कृतरक्षां स्वकैश्चरैः ॥
तां दृष्ट्वा महदाश्चर्यम् ऋद्धिं चैवात्मनः शुभाम् ।
वलिराजप्रदोषश्च ततः स्वभवनं व्रजेत् ॥

बलिराजप्रदोषञ्चेति । बलिराजप्रदोषसमये सर्वदैव भवतीत्यर्थः ।

एवं गतेन निशीथे जने निद्रासलोचने ।
यावच्च नरनारीभिस्तूर्यड़िण्डिमवादनैः ॥
निर्माल्य च प्रकृष्टाभिरलक्ष्मीः स्वगृहाङ्गणे ।
ततः प्रवुद्धे सकले जने जातमहोत्सवे ॥
माल्यदीपकहस्ते च वन्धुस्वजनवत्सले ।
शिक्षादि[3]ललितासंघैः स्वस्तिमङ्गलवादिनि ॥
गृहाद् गृहान्तरं याति धनसुखप्रदायिनि ।
पीतकोद्वर्त्तनपरे गुरुशुश्रूषणापरे ॥
द्विजातिवादनपरे सुखरात्रीति वादिनि ।
स्ववासिनीभ्योऽटने च दीयमाने यथेच्छया ॥

---

(1) क्षोदः—चूर्णम् ।
(2) विध्वस्तध्वान्तसञ्चये—विनष्टान्धकारे ।
(3) ललितासंघैः—स्त्रीगणैः ।

राजा प्रभातसमये यथार्हं मानयेन् नमन् ।
वस्त्रैः ताम्बूलदानैश्च पुष्पकर्पूरकुङ्कुमैः ॥
भक्ष्यैः रूचावचैः भोज्यैरन्तःपुरनिवासिनः ।
ग्रामैर्विषयदानैश्च समन्तान्नृपतिर्धनैः ॥
यथार्हं तोषयित्वा ततो मल्लान् नटयन् तथा ।
वृषभां महिषांश्चैव युध्यमानान् समन्ततः ॥
गजाश्वांश्चैव योधांश्च पदातिसमलंकृतान् ।
मञ्चारूढः स्वयं पश्येन्नटनर्त्तकचारणान् ॥

ज्योतिःशास्त्रे— सुखरात्रेरुषःकाले प्रदीपोज्ज्वलितालये ।
चामरैः कुसुमैर्गन्धैर्दधिगोरोचनाफलैः ॥
वन्धुवन्धून् स्ववन्धुंश्च [1]वाचानुकूलयार्च्चयेत् ।
पूजयेच्च तथा लक्ष्मीमलक्ष्मीमलनाशनीन् ॥

ततो वन्धूनां गृहदेवतानां जीवितानाञ्च भोजनम् ।

इति सुखरात्रिविधिः ।

अथ नागचतुर्थी

युगं मध्यंदिने यत्र तत्रोपोष्य फणीश्वरान् ।
क्षीरेणाप्याय्य पञ्चम्यां पूजयेत् प्रयतो नरः ॥
विषाणि तेषां नश्यन्ति न च हिंसन्ति पन्नगाः ॥

युगं मध्यंदिने इति मध्याह्नः कर्मकालः। मध्याह्नो नाम पञ्चधाविभक्तदिवसस्य तृतीयो भागः। मध्याह्ने षोढाभेदे कार्ये पञ्चमीयोगाभावे चतुर्थी ग्राह्या । अन्यथा पञ्चमीयुक्ता ग्राह्या । क्षीरेणाप्यायपञ्चम्यामित्यादि वचनात् । युग्माग्नियुगभूतानामिति युग्मवाक्याच्च ।

इति नागचतुर्थी ।

---

(1) वाचानुकूलयार्च्चयेत् कुशलभाषणपूर्वकं कुसुमादिभिरर्च्चयेत् ।

अथ भीष्मपंचकम्

तत्र भविष्योत्तरे—

कार्त्तिकशुक्लपक्षस्य शृणु धर्मं पुरातनम् ।
एकादश्यां समारभ्य विज्ञेयं भीष्मपञ्चकम् ॥
दिनानि पञ्च पुण्यानि भीष्ममेतन्महाव्रतम् ।
ब्राह्मणैः ब्रह्मचर्येण जपहोमक्रियादिभिः ॥
क्षत्रियैश्च तथा सम्यक् शौचव्रतपरायणैः ।
पापर्द्धिः परिहन्तव्या ब्रह्मचर्येण निष्ठया ॥
मद्यमांसं परित्यज्य मैथुनं पापभाषणम् ।
शाकाहारैश्च मुन्यन्नैः कृष्णार्च्चनपरैर्नरैः ॥
स्त्रीभिर्वा भर्तुर्वाक्येन कर्त्तव्यं शुभवर्धनम् ।
विधवाभिश्च कर्त्तव्यं पुत्रपौत्रादिवृद्धये ॥
सर्वकामसमृद्ध्यर्थं मोक्षार्थमपि पाण्डव ।
नित्यं श्राद्धेन दानेन कार्त्तिकीं यावदेव तु ॥
वैश्वदेवश्च कर्त्तव्यो विष्णुध्यानपरायणैः ।
पापस्य प्रतिमा कार्या रौद्रवक्त्रातिभीषणा ॥
खड्गहस्तादिकृता स्यात् सर्वं लौहमयी नृप ।
तिलप्रस्थोपरि स्थाप्या कृष्णवस्त्राभिवेष्टिता ॥
करवीरकुसुमापीता चलत्काञ्चनकुण्डला ।
सम्पूज्य परया भक्त्या राजन्नघौघनामतः ॥
इदमुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः ।
यदन्यजन्मनि कृतमिह जन्मनि वा पुनः ॥
पापं प्रशममायातु तद् पापस्य प्रपूजनात् ।
ब्राह्मणाय प्रदातव्या कृष्णो मे प्रियतामिति ॥
अन्येषामपि दातव्यं स्वशक्त्या वसु वाञ्छितम् ।
धन्यं पुण्यं पापहरं युधिष्ठिरमहाव्रतम् ॥

जन्तुहा ब्रह्महा गोघ्नः सर्वपापैः प्रमुच्यते ॥

यद् भीष्मपञ्चकमिति प्रथितं पृथिव्यामेकादशीप्रभृति पञ्चदशीनिवद्धाम् ।
मुन्यन्नभोजनपरस्य नरस्य तस्मिन्, इष्टं फलं दिशति पाण्डव शाङ्‌र्गधन्वा ॥

पापविनाशकमिति सम्वत्सरप्रदीपकारः । विष्णुरहस्योक्तं यथा—

भीष्मेणैतद् यतः प्राप्तं व्रतं पञ्चदिनात्मकम् ।
सकाशाद् वासुदेवस्य तेनोक्तं भीष्मपञ्चकम् ॥
यथा राजा मनुष्याणां रविर्यावत् प्रतापिनाम् ।
तेजस्विनां यथा वह्निः पवनं शीघ्रगामिनाम् ॥
विप्रो यथा च पूज्यानां दानानां काञ्चनं तथा ।
भूर्लोकः सर्वलोकानां तीर्थानां जाह्नवी यथा ॥
यथाश्वमेधो यज्ञानां मथुरा मुक्तिकाङ्क्षिणाम् ।
निवासाय यथाश्रेष्ठ देवानामच्युतो यथा ॥
तथा सर्वव्रतातान्तु वरोक्तं भीष्मपञ्चकम् ।
व्रतस्यास्य गुणान् वक्तुं कः शक्तः केशवादृते ॥
व्रतं चैव महापुण्यं महापातकनाशनम् ।
ततो व्रतं प्रयत्नेन कर्त्तव्य भीष्मपञ्चकम् ॥
कार्त्तिकस्यामले पक्षे स्नात्वा सम्यग् यतव्रतः ।
एकादश्यान्तु गृह्णीयाद् व्रतं पञ्चदिनात्मकम् ॥
प्रातः स्नात्वा विधानेन मध्याह्ने च तथा व्रती ।
नद्यां निर्झरगते वा [1]समालभ्य च गोमयम् ॥
यवव्रीहितिलैः सम्यक् प्रकुर्यात्तर्पणं क्रमात् ।
देवान् ऋषीन् पितृंश्चैव ततोऽन्यां काममाचरन् ॥
स्नात्वा मौनं नरः कृत्वा धौतवासा दृढव्रतः ।
ततोऽनुपूजयेद्देवं सर्वपापहरं हरिम् ॥
स्नापयेच्चाच्युतं भक्त्या मधुक्षीरघृतेन च ।

---

(1) समालभ्य—अंगे विलिप्य ।

तथैव पञ्चगव्येन गन्धचन्दनवारिणा ।।
चन्दनेन सुगन्धेन कुङ्कुमेनाथ केशवम् ।
कर्पूरोशीर[1]मिश्रेण लेपयेद् गरुडध्वजम् ।।
अर्चयेद् रुचिरैः पुष्पैर्गन्धवर्णसमन्वितैः ।
गुग्गुलं घृतसंयुक्तं दद्यात् कृष्णाय भक्तिमान् ।।
दीपकन्तु दिवा रात्रौ दद्यात् पञ्च दिनानि तु ।
नैवेद्यं देवदेवस्य [2]परमान्नं निवेदयेत् ।।
एवमभ्यर्च्च्य देवेशं स्तुत्वा चैव प्रणम्य च ।
ॐ नमो वासुदेवाय जपेदष्टोत्तरं शतम् ।।
जुहुयाच्च घृताभ्यक्तां तिलव्रीहींस्ततो व्रती ।
षडक्षरेण मन्त्रेण स्वाहाकारान्तके नरः ।।
उपास्य पश्चिमां सन्ध्यां प्रणम्य गरुडध्वजम् ।
जपित्वा पूर्वमन्त्रन्तु क्षितिशायी भवेन्नरः ।।
सर्वमेतद् विधानन्तु कार्यं पञ्चदिनेष्वपि ।
विशेषोक्तं व्रते चास्मिन् यद्यन्यत्तत् शृणुष्व मे ।।
प्रथमेऽह्नि हरेः पादौ पूजयेत् कमलैर्हरिम् ।
द्वितीये विल्वपत्रेण जानुदेशं समर्च्चयेत् ।।
पूजयेच्च तृतीयेऽह्नि नाभिं भृङ्गरजेन तु ।
वाणविल्वजवाभिश्च ततः स्कन्धौ समर्च्चयेत् ।।
ततोऽनुपूजयेच्छीर्षं मालया चक्रपाणिनः ।
कार्त्तिके देवदेवस्य भक्त्या तद्गतमानसः ।।
अर्च्चयित्वा हृषीकेशमेकादश्यां समाहितः ।
सम्प्राश्य गोमयं सम्यक् मन्त्रवित् समुपाविशेत् ।।
गोमूत्रं मन्त्रवद् भूयो द्वादश्यां प्राशयेद् व्रती ।
क्षीरं तद्वत् त्रयोदश्यां चतुर्दश्यां तथा दधि ।।

---

(1) उशीरः—वीरणमूलः ।
(2) परमान्नं—पयःपक्वान्नम् ।

सम्प्राश्य कायशुध्यर्थं लङ्घयीत चतुर्दिनम् ।
पञ्चमे तु दिने स्नात्वा विधिवत् पूज्य केशवम् ॥
भोजयेद् ब्राह्मणान् भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ।
ततो नक्तं समश्नीयात् पञ्चगव्यपुरःसरम् ॥
एवं समापयेत् सम्यक् यथोक्तं व्रतमुत्तमम् ।
सर्वपापहरं पुण्यं प्रख्यातं भीष्मपञ्चकम् ॥
जन्मप्रभृतियन्मांसं त्यक्त्वा पुण्यं समश्नीयात् ।
तत्फलं समवाप्नोति कृत्वैव भीष्मपञ्चकम् ॥

मन्त्रवदिति । पञ्चगव्यविधिदृष्टेन प्रणवमन्त्रेण । एवमुत्तरमन्त्रो मन्तव्यः ।

इति भीष्मपंचकम् ।

अथ कार्त्तिकमासकृत्यम्

तत्र विष्णुरहस्ये—

सम्पूर्णे कार्त्तिके मासि देवर्षिपितृसेविते ।
क्रियमाणे व्रते नृणां सङ्कल्पेऽपि महत् फलम् ॥

नारदीयपुराणे—न कार्त्तिकसमो मासो न कृतेन समं युगम् ।
न वेदेन समं शास्त्रं न तीर्थं गङ्गया समम् ॥

तथा— आमिषं मैथुनं चैव कार्त्तिके तु विवर्जयेत् ।
सर्वं कालकृतं पापं दुष्कृतं चापि नश्यति ॥

तथा— मांसाशिनो हि भूपाला अत्यर्थं मृगयारताः ।
ते मासं कार्त्तिके त्यक्त्वा गता विष्ण्वालयं शुभम् ॥
एकभक्तेन नक्तेन तथैवायाचितेन च ।
कृते व्रते धरावासिर्जायते द्वीपमालिनि ॥
कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु ।
कार्त्तिके वर्जयेत् कांस्यं कार्त्तिके शुक्तिसन्धितम् ॥
अव्रतेन क्षिपेद् यस्तु मासं दामोदरप्रियम् ।
तिर्यग्योनिमवाप्नोति सर्वधर्मवहिष्कृतः ॥

तथा— न मत्स्यं भक्षयेन्मांसं न कौर्मं नान्यदेव हि ।
चण्डालो जायते राजन् कार्त्तिके मांसभक्षणात् ।।

[1]राजमार्तण्डे— तुलामकरमेषेषु प्रात स्नानं प्रशस्यते ।
हविष्यं ब्रह्मचर्यञ्च महापातकनाशनम् ।।

पितामहः— कार्तिकस्य तु यत् स्नानं माघे मासि विशेषतः ।
कृतादिनियमानाञ्च चान्द्रमानं प्रशस्यते ।।

हविष्यवस्तूनि यथा भविष्योत्तरे—

[2]हैमन्तिकं सितास्विन्नं धान्यमुद्गास्तिला यवाः ।
कलाय कङ्गुनीवारा वास्तुकं हिडमोचिका ।।
कालेयं कालशाकञ्च मूलकं केवुकेतरत् ।
कन्दं सैन्धवसामुद्रे सतिलं दधिसर्पिषी ।।
पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी ।
पिप्पलीं जीरकञ्चैव नागरं तिन्तिडीफलम् ।।
कदली लवली धात्री फलान्यगुडमैक्षवम् ।
अतैलपक्वमुनयो हविष्याणि प्रचक्षते ।।

छन्दोगपरिशिष्टे कात्यायनः—

हविष्येषु यवाः मुख्यास्तदनु व्रीहयः स्मृताः ।
माषकोद्रवगौरादीन् सर्वालाभेऽपि वर्जयेत् ।।

गौराः—श्वेतसर्षपाः । मत्स्यपुराणे—

मुद्गाश्चणककलायामिथुनानां हवींषि च ।
एतेभ्योऽन्यानि नाश्नीयान्मिथुनानामनापदि ।।

मिथुनानां द्विदलानां मध्ये । [3]गौतमः— चरुभैक्षसक्तुकणयावकशाकपयोदधिघृतमूलफलोदकानि हवींष्युत्तरोत्तरप्रशस्तानि ।

---

(1) रा. मा. (पृ–125) ।
(2) हैमन्तिकं—शालिधान्यम् ।
(3) गौ. धर्म. (27–12) ।

विष्णुधर्मोत्तरे— अमाहिष्यं तथा सर्पिर्दधिक्षीरमथापि वा ।
एतद् व्रत्यमतो विप्रा मैथुनस्य विपर्ययः ।।

इति कार्त्तिकमासकृत्यम् ।

अथ देवोत्थापनैकादशी

तत्र भविष्योत्तरे—

ततो [1]विवुध्यते देवः श्रीमान् चक्रगदाधरः ।
कार्त्तिके शुक्लपक्षस्य एकादश्याञ्च वै सुतः ।।
मन्त्रेणानेन देवेन्द्र देवमुत्थापयेद् द्विजः ।
[2]इदं विष्णुर्विचक्रमे त्रेधा च निदधे पदम् ।।
समुत्थिते ततो विष्णौ क्रियाः सर्वाः प्रवर्तयेत् ।
तत्रैव देवस्य पुनः पूर्ववत् स्नानमाचरेत् ।।
महत् तूर्यं तु वै रात्रौ भ्रामयेत् स्यन्दने स्थितम् ।
उत्थितं देवदेवेशं नगरे पार्थिवः स्वयम् ।।
दीपोद्योतकरे मार्गे नृत्यगीतसमाकुले ।
यं यं दामोदरः पश्येदुत्थितो धरणीधरः ।।
समप्रदेशे राजेन्द्र सर्वः स्वर्गाय कल्प्यते ।
रात्रौ जागरणं देयमेकादश्यां सुरालये ।।
प्रभाते विमले स्नात्वा द्वादश्यां विष्णुमर्चयेत् ।
होमयेद् हव्यवाहञ्च होमद्रव्यैर्घृतादिभिः ।।
ततो विप्रान् शुभान् स्नात्वा भोजयेदन्नविस्तरैः ।
घृतक्षीरदधिक्षौद्रकासारगुड़मोदकैः ।।

---

(1) कार्त्तिकशुक्लचतुर्दश्यां महादेवोत्थापनं विहितम् एकाम्रचन्द्रिकायां

कार्त्तिकस्य सिते पक्षे चतुर्दश्यां महेश्वरि ।
शम्भोरुत्थापनं कुर्यात् त्वया सह नगेन्द्रजे ।।
(अध्याय–12 पृ–103)

(2) शु. यजु. (5-15) ।

यजमानस्ततस्तुष्टस्त्वराहासविवर्जित. ।
एकादश दशाष्टौ वा पञ्च द्वौ वा कुरूत्तम ॥
अर्चयेच्चन्दनैश्चूर्णैः पुष्पगन्धैर्द्विजोत्तमान् ।
श्राद्धोक्तविधिना पार्थ भोजयेद् भगवद् यतीन् ॥
आचान्तेभ्यो ततो दद्यात्त्यक्तं यत् किंचिदेव हि ।
सुवासं सुमनोभीष्टं पत्रपुष्पफलादिकम् ॥
चतुरो वार्षिकान् मासान् नियमं यस्य यत् कृतम् ।
कथयित्वा द्विजेभ्यस्तं शक्त्या दद्याच्च दक्षिणाम् ॥
दत्त्वा विसर्जयेद् विप्रान् ततो भुञ्जीत स स्वयम् ।
यद् मुक्तं चतुरो मासान् प्रवृत्ति तस्य चाचरेत् ॥
एवं य आचरेत् पार्थ शोभनं धर्ममाप्नुयात् ।
अवसाने तु राजेन्द्र वासुदेवपुरं व्रजेत् ॥

नारदीयेपुराणे—चातुर्मास्यव्रतानान्तु उद्योगकरणं वद ।
परिपूर्णं भवेद् येषां व्रतानामवनीपते ॥

रुक्माङ्गद उवाच—

षड्रसं भोजनं दद्याद् ब्राह्मणे नक्तभोजने ।
अयाचितेऽनड्वाहञ्च सहिरण्यं प्रदापयेत् ॥
अमांसाशी भवेद् यस्तु गां वै दद्यात् सदक्षिणाम् ।
धात्रीं स्नाने नरो दद्याद् दधि सम्यक् तमेव वा ॥
फलानां नियमे सुभ्रु, फलदानं समाचरेत् ।
तैलस्थाने घृतं देयं घृतस्थाने पयः स्मृतम् ॥
धान्यानां नियमे धान्यमथवा शालयः स्मृताः ।
पत्रभोजी नरो दद्याद् भोजनं घृतसम्भृतम् ॥
मौने घण्टां तिलांश्चैव सहिरण्यान् प्रदापयेत् ।

अन्यत्र व्रतोद्यापनकरवाक्यानि विस्तरभयान्नात्र लिखितानि ।

इति देवोत्थापनैकादशी ।

अथ महावर्त्तिः

(अथात्र देवालये दीपमाला)

"महावर्त्तिः" इति केचित् ।

उत्थानाहर्निशीथेषु या च यस्येष्टदेवता ।
तामुद्दिश्य नरो भक्त्या दीपमालां भवालये ।।
दद्यात् परमया भक्त्या सा यया तस्य देवता ।
रूपसौभाग्यमैश्वर्यं विज्ञानज्ञानमुत्तमम् ।

इति महावर्त्तिः ।

अथ प्रथमाष्टमीनिर्णयः

[1]समाचारात् [2]उत्कलदेशे प्रथमगर्भोत्पन्नस्यायुर्विवृद्ध्यर्थं कलशे गणपत्यादिपञ्चदेवतापूजादिकं कुर्वन्ति । देशान्तरे नास्ति । तत्र व्रतसामान्योक्तः कालः ।

[3]मध्याह्नादधिकं किञ्चित् परतः प्रथमाष्टमी ।
तत्र पूजादिकं कार्यं न्यूना चेत् पूर्ववासरे ।। इति[4]

वाक्यं पठन्ति । न च तत्र मूलं पश्यामः ।

---

(1) उत्कलीयाचारे प्रचलितत्वात् ।

(2) अन्ये उत्कलीय– धर्मशास्त्रकारा यथा वीरसर्वस्वे (पृ–91)

शस्यते यत्र पूर्वाह्णे देशाचारप्रमाणतः ।
कुर्युः प्रथमपुत्रस्य मङ्गलारोपणादिकम् ।।

पण्डितसर्वस्वेऽपि (पृ-75)—

समाचारान्मार्गशीर्षे कृष्णाष्टम्याञ्च सर्वदा ।
गणेशादीन् पूजयन्ति ज्येष्ठस्यायुर्विवृद्धये ।
आशीर्गृह्णन्ति वस्त्रादि ददत्यभिनवं पुनः ।।

अत्र विशेषकालोल्लेखनाभावात् सामान्यतः पूर्वाह्ण एव कालः ।

(3) एतद् वचनमुद्धृत्य गदाधरोऽपि कालसारे (पृ–39) "तदसन्मूलमिति निवन्धकृतः" इत्यवोचत् ।

(4) ए. च. (अ–10, पृ–74) ।

कृष्णपक्षेऽष्टमी यत्र कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धा तु कर्त्तव्या परविद्धा न कस्यचित् ।। इति

निगमवचनात् तिथिद्वैधे पूर्वदिने पूजादिकं कार्यम् ।

[1]कापिले— मार्गशीर्षे कृष्णपक्षे यदा स्यात् प्रथमाष्टमी ।
ततो यात्रां समुद्दिष्टा देवदेवेन शम्भुना ।।
आज्ञां वरुणभूपाय पुरा शम्भुः प्रदत्तवान् ।
समीपं तव लिङ्गस्य यास्यामि प्रथमाष्टमीम् ।।
ततः प्रभृति भो विप्रा यात्रैका प्रथमाष्टमी ।
तत्र स्नानं जपो दानमक्षयं पापनाशने ।।

पापनाशने कुण्डे [2]एकाम्रे—

मार्गशीर्षे शुभे मासे यदा स्यात् प्रथमाष्टमी ।
तस्यां शिवस्य प्रतिमां नयेत् पापविनाशिनीम् ।।
चर्चरीशृङ्गकाहालमृदङ्गमुरजस्वनैः ।
आरोप्य शिविकायान्तु महोत्सवसमन्विताम् ।।
एवं नीत्वा महादेवं तत्र वै पापनाशने ।
उद्धृतैः सलिलैर्दिव्यैश्चन्द्रचन्दनमिश्रितैः ।। चन्द्रः—कर्पूरः ।
स्नापयेत् परमेशानं पूजयेत् भक्तितः शिवे ।
तदानीं यः शिवं पश्येत् महोत्सवसमन्विताम् ।।
स याति भवनं शम्भोरिन्द्राद्यैरपि वाञ्छितम् ।
ततः सायाह्नसमये देवं गर्भगृहं नयेत् ।
मित्रावरुणयोर्देवि पूर्ववद् गमनं पुनः ।।

तिथिद्वैधे स्कान्दे—अष्टमी प्रथमा ग्राह्या माङ्गल्या शुभदायिनी ।
अष्टमी च दिवा ग्राह्या द्वियामादूर्ध्वगामिनी ।।
पूर्वाष्टमी शैवरात्रिं सायं भोज्य जयन्तिकाम् ।

---

(1) कपि. सं. (अ-19, पृ-99), ए. च (अ-10, पृ-74) ।

(2) ए. च. (अ-10, पृ-74) ।

रक्षाञ्च दीपदानञ्च गृह्णीयात्तु त्रिभागतः ॥

दिवाभागे यदि प्रहरद्वयाद् ऊर्ध्वंगामिन्या अष्टम्याः सम्भवस्तदा सा ग्राह्या । यदि वा प्रहरद्वयादधोगामिनी भवति तदा दिवायुक्तां विहाय रात्रियुक्ता ग्राह्या ।

इति प्रथमाष्टमी ।

अथ दीपावलिकोत्सवः

तत्र [1]देवीपुराणे—

तुलास्थे दीपदानेन पूजाकार्या महाफला ।
दीपवृक्षः प्रकर्त्तव्यो दीपचक्रमथापि वा ॥
दीपयात्रा प्रकर्त्तव्या चतुर्दश्यां कुहूपु च ।
सिनीवाली यदा वत्स ! तदा कार्यं महाफलम् ॥

एतेन चतुर्दश्यमावास्याप्रतिपत्सु निशासम्वन्धिनीषु दीपदानं प्रतिपादितम् । कृष्णपक्ष इत्यनुवृत्तौ भविष्योत्तरे —

नरकाय प्रदातव्यो दीपाः सम्पूज्य देवताः ।
ततः प्रदोषसमये दीपान् दद्यान्मनोरमान् ॥
ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च ।
कुड्यागारेषु चैत्येषु सभासु च नदीषु च ॥
प्राकारोद्यानवापीषु [2]प्रतोली[3]निष्कुटेषु च ।
बुद्धागारे च चामुण्डाभैरवायतनेषु च ॥
[4]मन्दुरासु विविक्तासु हस्तिशालासु चैव हि ।

नरकाय—नरकगमनपरिहाराय । तत्र देवोत्थापनानन्तरामावास्यायाः कार्त्तिककृष्णत्वमुक्तम् । चैत्रशुक्लादिमासाभिप्रायेण । एवं सति देवीपुराणे—तुलास्थ इत्यस्य कार्त्तिककृष्णपक्ष इत्यर्थः ।

इति दीपावलिकोत्सवः ॥

---

(1) देवीपु. (59/22-23) ।
(2) प्रतोलो—ग्राममध्यमार्गः ।
(3) निष्कुटः—गृहोद्यानम् ।
(4) मन्दुरासु—अश्वशालासु ।

अथ प्रावरणषष्ठी

तत्र कूर्मपुराणे—या तु मार्गशीरे शुक्लमहाष्टमी नराधिप ।
देवद्विजगुरुभ्यश्च शीतघ्नं तत्र दीयते ॥

शीतघ्नशब्देन प्रच्छदपट्टप्रभृतय उक्ताः ।

इति प्रावरणषष्ठी ॥

अथ पाषाणचतुर्दशी

तत्र लिङ्गपुराणे—

वृश्चिके शुक्लपक्षे तु या पाषाणचतुर्दशी ।
तस्यामाराधयेद् गौरीं नक्तं पाषाणभक्षणैः ॥

पाषाणाकारः पिष्टक इति जीमूतवाहनः[1] ।

इति पाषाणचतुर्दशी ।

अथाग्नीष्टिकादानकालः

तत्र वादरायणः—मार्गे सुप्तं सिते रौद्रे माघे पैत्र्ये हुताशनम् ।
उत्थितं पूजयेद् भक्त्या भक्तियुतं पुरं नयेत् ॥
यावत् सुप्तं ततो वह्निस्तावद्दद्याद् द्विजातिषु ।
गोष्ठे चतुष्पथे वाऽपि शीतघ्नं वह्नितापनम् ॥
ततो द्विजेभ्य दातव्यं भोजनं गुडपिष्टकम् ।
दिनानि त्रीण्यग्निमुख्यं सूतकञ्च दिनद्वयम् ॥
न कुर्याच्छुभकर्माणि कुर्यादुग्राणि यत्नतः ।

सित इति पौर्णमास्यामित्यर्थः । य आपूर्यमाणपक्षस्य रात्रयस्ताः पौर्णमासीमुपयन्तीति श्रुतेरिति शतानन्दः । तिथिनक्षत्रयोर्भेदे तु पौर्णमास्यामेव पूर्वपठितत्वात् । आर्द्रायुक्तायां मार्गशीर्षपौर्णमास्यां चतुष्पथादिषु पञ्चभूसंस्कारतोऽग्निमुपसमाधाय महाव्याहृतिभिराज्यं हुत्वाऽग्नीष्टिकामुत्सृजेत् ।

इत्यग्नीष्टिकादानकालः ।

---

(1) का. वि. (पृ–470) ।

अथ पुष्यवन्दापना

तत्र व्रह्मपुराणे—इदं जगत् पुरा लक्ष्म्या त्यक्तमासीत् ततो हरिः ।
पुरन्दरश्च सोमश्च तथा पुष्यवृहस्पती ॥
पञ्चैते [1]पुष्ययोगेन पौर्णमास्यां तपोवलात् ।
अलंकृतं पुनश्चक्रुः सौभाग्योत्साहलक्ष्मिभिः ॥
तस्मान्नरैः पुष्ययोगे तत सौभाग्यवृद्धये ।
गौरसर्षपकल्केन समालभ्य स्वकां तनुम् ॥
कृतस्नाने तथा कार्यमलक्ष्मीनाशनं परम् ।
उद्वर्त्य देहञ्च तथा सर्वौषधियुतैर्जलैः ॥
स्नानं कृत्वा नवं वस्त्रं गृहीत्वाऽऽच्छादनं ततः ।
स्प्रष्टव्यं मङ्गलशतं धूपं स्रङ्माल्यशोभितम् ॥
ततो नारायणः शक्रश्चन्द्रः पुष्यवृहस्पती ।
सम्पूज्याः पुष्पधूपाद्यैर्नैवेद्यैश्च पृथक् पृथक् ॥
प्रशस्तैर्वैदिकैर्मन्त्रैः कृत्वाऽग्निहवनं शुभम् ।
धनैर्विप्राश्च सन्तर्प्या नवैर्वस्त्रैः सुशोभिताः ॥
ततः पुष्टिकरं हृद्यं भोक्तव्यं घृतपायसम् ।
पुष्यायोगेन कर्त्तव्यं राज्ञां स्नानञ्च सर्वदा ॥

मन्त्रैरिति सामान्याभिधानेऽपि तल्लिङ्गैरिति मन्तव्यम् । वैष्णवैः शाक्तैः वार्हस्पत्यैर्मन्त्रैः पावकं हुत्वा इति विष्णुवचनात् ।

इति पुष्यवन्दापना ।

अथ घृतकम्बलम्

तत्र विष्णुधर्मोत्तरे—

आलिङ्गवेदिपर्यन्तं यो दद्याद् घृतकम्वलम् ।
जागरं नृत्यगीताद्यैः सकृत् कृत्वा च पर्वणि ॥
मन्वन्तरसहस्राणि शिवलोके महीयते ।

पर्वणि—मकरसंक्रान्तौ ।

क्षीरसारं दधि प्रोक्तं दधिसारं घृतं विभो ।
पुण्यकाले करिष्यामि तेन कम्बलरूपकम् ।।
उमापते नमस्तुभ्यं नमस्ते शशिभूषण ।
प्रसीद मम देवेश गृहाण घृतकम्बलम् ।।
नमः शिवाय शान्ताय सर्वपापहराय च ।
मकरस्थे ददाम्येतद् सूर्ये तु घृतकम्बलम् ।।
देवदेव महादेव संसारार्णवतारक ।
अविघ्नेन व्रतं देव व्रतानां फलमुत्तमम् ।।

इति घृतकम्बलम् ।

अथ बकुलामावास्या

धवलसंग्रहे— पौषे तु वकुलक्षीरपायसैस्तर्पयेत् पितॄन् ।
पौषमास्यमावास्यायामित्यर्थः ।

इति वकुलामावास्या ।

अथ माघमासकृत्यम्

तत्र पद्मपुराणे - दिलीपं प्रति वसिष्ठवाक्यम्—

कर्त्तुं तु कामिनीनां ये प्रत्यासत्तिमखण्डिताम् ।
कामयन्ते मृगार्के ते स्रोतसि स्नान्तु सर्वथा ।।
विना वह्निं विना यज्ञमिष्टापूर्त्तिं विना च ये ।
वाञ्छन्ति स्वस्ति ते स्नान्तु प्रातर्माघे वहिर्जले ।।
गोभूमितिलवाग्गौरी स्वर्णधेन्वन्नकानि ये ।
अब्दे त्विच्छन्ति नाकं ते माघे स्नान्तु नराधिप ।।
ये लोका दानशीलानां ये लोका विपिनौकसाम् ।
लोका येऽतिथिभक्तानां ते माघस्नायिनामपि ।।
देवलोकान्निवर्त्तन्ते पुण्यैरन्यैः परन्तप ।

---

(1) ए. च. (अ–10, पृ 78-79) ।

कदाचिन्न निवर्त्तन्ते माघस्नानरता दिवः ।।
नातः परतरः किञ्चित् पवित्रं पापनाशनम् ।
नातः परतरः किञ्चिन्नातः परतरं महत् ।।
एतदेव परं पश्यन् सद्यो दुरितनाशनम् ।

पद्मपुराणे मासावधिश्च प्रतिपादितः- विद्याधरं प्रति भृगुमहर्षेर्वाक्यं यथा—

पुष्यस्यैकादशीं शुक्लामारभ्य स्थण्डिलेशयः ।
मासमेकं निराहारस्त्रिकालं स्नानमाचरन् ।।
त्रिकालमर्च्चयेद् विष्णुं त्यक्तभोगो जितेन्द्रियः ।
माघस्यैकादशीं शुक्लां यावद् विद्याधरोत्तम ।।

भविष्योत्तरे— पौर्णमास्यमावास्यायां वाऽऽरभ्य स्नानमारभेत् ।
त्रिंशद्दिनानि पुण्यानि मकरस्थे दिवाकरे ।।
तत्र चोत्थाय नियमं गृह्णीयाद् विधिपूर्वकम् ।
माघमासमिमं पुण्यं स्नास्येऽहं देव माधव ।।
तीर्थस्यास्य जले नित्यमिति संकल्प्य चेतसि ।

मकरस्थे दिवाकर इति वचनात् संक्रान्तिदिनादप्यारभ्य स्नातव्यम् ।

नारदीयपुराणे—सरिन्निर्झरतोयेषु शस्तं तड़ागवापिजे ।
जलेषु न यदुष्णश्च शस्तं भाण्डाश्रितं च यत् ।।
न सौख्याज्जायते पुण्यं दुःखादेव प्रवर्त्तते ।
न वह्निं सेवयेत् स्नातो नास्नातो वा वरानने ।
होमार्थं सेवयेद् वह्निं न शीतार्थं कदाचन ।
यावत् प्रभा वरारोहे तावत् सूर्योदयः स्मृतः ।।
अभ्रसंच्छादितं सूर्यं यदि कश्चिन्न पश्यति ।
न भवेन्नोदिते देवि एवं प्रातर्विधीयते ।।
सरितामप्यभावे तु नवकुम्भस्थितं जलम् ।
वायुना ताडितं रात्रौ गंगास्नानसमं विदुः ।।
माघमासि वरारोहे शस्तं वै निम्नगा जलम् ।

माघस्नाने वरारोहे दुर्गतिं नेह पश्यति ॥
तन्नास्ति पातकं लोके यन्न स्नानाद् विशोधयेत् ।
अग्निप्रवेशादधिकं माघस्नानं वरानने ॥
जीवद्भिः भुज्यते दुःखं मृतो दुःखं न पश्यति ।
एतस्मात् कारणात् सुभ्रु माघस्नानं विशिष्यते ॥
पद्मपुराणे— ग्रहाणाञ्च यथा सूर्यो नक्षत्राणां यथा शशी ।
मासानाञ्च यथा माघः श्रेष्ठः सर्वसु कर्मसु ॥
मकरस्थे रवौ माघे प्रातःकाले तथाऽमले ।
गोष्पदेऽपि तथा स्नानं स्वर्गदं पापिनामपि ॥
योगोऽयं सुलभो राजन् त्रैलोक्ये सचराचरे ।
अस्मिन् योगे त्वशक्तोऽपि स्नायादपि दिनत्रयम् ॥
देयं किञ्चिद् यथाशक्ति दारिद्र्याभावमिच्छता ।
त्रिः स्नानेनाऽपि माघेन बलिनो दीर्घजीविनः ॥
पञ्च वा सप्त वाऽप्यह्नि चन्द्रवद् वर्धते फलम् ।
अथातः सम्प्रवक्ष्यामि माघस्नानविधिं परम् ॥
कर्त्तव्यो नियमः कश्चिद् व्रतरूपो नरोत्तमैः ।
फलातिशयहेतोर्वै किञ्चिद् भोज्यं त्यजेद् बुधः ॥
भूमौ शयीत होतव्यमाज्यं तिलविमिश्रितम् ।
त्रिकालं चार्च्चयेन्नित्यं वासुदेवं सनातनम् ॥
दातव्यो दीपकोऽखण्डो देवमुद्दिश्य माधवम् ।
इन्धनं कम्बलं वस्त्रमुपानत् कुसुमं घृतम् ॥
तैलं कार्पासकोष्ठञ्च तूली तूलवती पटी ।
अन्नं चैव यथाशक्ति देयं माघे नराधिप ॥
स्वर्णञ्च [1]रत्तिकामात्रं दद्याद् वेदविदे तथा ।
तद्दानमक्षयं राजन् समुद्र इव सर्वदा ॥

---

(1) रत्तिकामात्रं—पलस्याशीतितमो भागः ।

परस्याग्निं न सेवेत त्यजेद् विप्रः प्रतिग्रहः ।
माघान्ते भोजयेद् विप्रान् यथाशक्ति नराधिप ॥
देया च दक्षिणा तेभ्य आत्मनो हितमिच्छता ॥

एकादशीविधाने माघमासोद्यापनं यथा—

कर्त्तव्यं श्रद्दधानेन त्वक्षयं स्वर्गमिच्छता ।
मकरस्थे रवौ माघे यद् गृहे क्रियते नरैः ॥
षडब्दफलदं तद्धि मकरस्थे दिवाकरे ।
बहिः स्नानन्तु कर्त्तव्यं वाप्यादौ द्वादशाब्दिकम् ॥
तडागे द्विगुणं राजन् नद्यां प्रातश्चतुर्गुणम् ।
दशधा देवखाते च शतधा च महानदौ ॥
शतं चतुर्गुणं राजन् महानद्योऽस्तु सङ्गमे ।
सहस्रगुणितं सर्वं तद् फलं मकरे रवौ ॥
गङ्गायां स्नानमात्रेण लभते मानुषो नृप ।
गङ्गायां येऽवगाहन्ते माघे मासि नृपोत्तम ॥
चतुर्युगसहस्रं ते न पतन्ति सुरालयात् ।
शतेन गुणितं माघे सहस्रं राजसत्तम ॥
निर्दिष्टमृषिभिः स्नानं गङ्गायमुनसङ्गमे ।

नारदीयपुराणे—अहन्यहनि दातव्यास्तिला वै शर्करान्विताः ।
अनिमेषसुखोत्सन्नाः[क] स सहायान् प्रदापयेत् ॥
पावके चैव होतव्यास्तथा गव्यसमन्विताः ।
माघावसाने सुभवे [1]षड्रसं तस्य दापयेत् ॥

---

(1) तुवरस्तु कषायोऽस्त्री मधुरो लवणः कटुः ।
तिक्ताम्लश्च रसाः पुंसि तद्वत्सु षडमी त्रिषु ॥
इति अमर (1-5-9) स्मरणात् ।

(क) "त्पन्ना" इति ग पाठः ।

सूर्यो मे प्रीयतां देव विष्णुमूर्त्तिर्निरञ्जनः ।
दम्पत्योर्वाससी सूक्ष्मे सप्तधान्यसमन्विते ।।
त्रिशच्च मोदकाः देयाः कृतास्तिलमयाः शुभे ।
त्रिभागास्तु तिलानां हि चतुर्थः शंकरांशकः ।।
नागरञ्च त्वचो चैला तमालं चैव दापयेत् ।
मरीचमिश्रितान् कृत्वा ब्राह्मणेभ्यः प्रदापयेत् ।।
अनभ्यङ्गी वरारोहे सर्वमासं नयेद् व्रती ।
सवितुः प्रसवस्येह परं धाम जले मम ।।
त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा ।
दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते ।।
परिपूर्णं कुरुष्वेदं माघस्नानं मयाच्युत ।
यथा नारायणः सूर्यो यथा नारायणो जलम् ।।
यथा नारायणो माघस्तथा पापं विनश्यतु ।
एवं माघप्लवी याति भित्वा बिम्बं रवेः शुभे ।
तीर्थयात्री वरारोहे माघस्नायी प्रकीर्त्तितः ।।

भारते— ब्रह्मक्षत्रविशाञ्चैव मन्त्रवत् स्नानमिष्यते ।
तूष्णीमेव हि शूद्रस्य स्त्रीणाञ्च कुरुनन्दन ।।

माघद्वादश्यां तैलाभ्यङ्गे महादोषः प्रतिपादितः पद्मपुराणे विद्याधरं प्रति भृगोः वाक्यं यथा— उपोष्यैकादशीं माघे तैलाभ्यङ्गः कृतस्त्वया ।
द्वादश्यां प्राग्भवे देव तेन व्याघ्रमुखो भवान् ।।

इति माघमासकृत्यम् ।

अथ माघकृष्णचतुर्दशी

[1]माघे मासि रटन्त्यापः कृष्णपक्षे चतुर्दशीम् ।
ब्रह्मघ्नमपि चाण्डालं कं पतन्तं पुनीमहे ।।

---

(1) ए. च. (अ–13, पृ–113)।

वराहपुराणे — [1]माघकृष्णचतुर्दश्यां विष्णोर्देहान् मरीचयः ।
निश्चेरुस्तिलकाकाराः शतशोऽथ सहस्रशः ॥
अनर्काभ्युदिते काले सत्सु तारांशुकेष्वपि ।
राजा च तत्र सम्पूज्यो यमः प्रलयभास्करः ।
सर्वाङ्गसन्धिसम्भूता नद्यो विष्णुश्च तत्र च ।
अरुणोदयवेलायामारटन्त्यपि नित्यशः ॥
नियुक्ता विष्णुना सर्वाः कस्य पापं पुनीमहे ।
यां काञ्चित् सरितं प्राप्य कृष्णपक्षे चतुर्दशीम् ।
यमुनायां विशेषेण नियतस्तर्पयेत् पुमान् ॥
यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्वभूतक्षयाय च ॥
दध्नोदराय दण्डाय प्रेताधिपतये नमः ।
पाशिने चित्रगुप्ताय रौद्रायौदुम्बराय च ॥
एकैकस्य तिलान् मिश्रान् दद्याद् त्रींस्त्रीन् जलाञ्जलीन् ।
सम्वत्सरकृतं पापं तत्क्षणादेव नश्यति ॥

इति माघकृष्णचतुर्दशी ।

अथ श्रीपंचमी

तत्र पुराणे— माघशुक्लचतुर्थ्यान्तु वरामाराध्य च श्रियम् ।
[2]पञ्चम्यां कुन्दकुसुमैः पूज्या कौन्दीसमृद्धये ॥ कौन्दी–सरस्वती ।

इति श्रीपञ्चमी ।

---

(1) ए. च. (अ–13, पृ- 113–114) ।

(2) पञ्चम्यां पूर्वाह्णे एव सरस्वतीपूजा क्रियते । "सोदयं त्रिमुहूर्त्तमेव पूर्वाह्णः । उभयत्र सत्त्वेऽप्यसत्त्वे च पूर्वेद्युः स्वीकुर्वन्ति" । प. स. (पृ–81) ।
कालसारेऽपि-गौडसम्वत्सरप्रदीपवचनं—
माघे मासि सिते पक्षे पञ्चमी या श्रियः प्रिया ।
तस्याः पूर्वाह्ण एवेह कार्यः सारस्वतोत्सवः । का. सा. (पृ–69)

अथ माघसप्तमी

तत्र स्मृतिसमुच्चये—

सूर्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
[1]अरुणोदयवेलायां स्नानं तत्र महाफलम् ॥

तथा— सूर्याय फलगन्धार्कपत्ररक्तप्रसूनवत् ।
दद्यादुत्थाय तत्रार्घ्यं सप्तधा यदि वा त्रिधा ॥

मात्स्ये— माघमासस्य सप्तम्यामुदयत्येव भास्करे ।
विधिवच्च तिलस्नानं महापातकनाशनम् ॥

स्नानमन्त्रो यथा—यद् यज्जन्मकृतं पापं मया सप्तसु जन्मसु ।
तन्मे रोगञ्च शोकञ्च माकरी हन्तु सप्तमी ॥

अर्घ्यमन्त्रस्तु— जननि ! सर्वभूतानां सप्तमि ! सप्तसप्तिके ॥
सप्तव्याहृतिके देवि नमस्ते रविमण्डले ॥

नमस्कारमन्त्रो यथा—

सप्तसप्तिवहप्रीत सप्तलोकप्रदीपक ।
सप्तम्याञ्च नमस्तुभ्यं नमोऽनन्ताय वेधसे ॥

[2]ब्रह्मपुराणे-ब्रह्मोवाच—

तत्रास्ते भारते वर्षे दक्षिणोदधिसंज्ञितः ।
ओड्रदेश इति ख्यातः स्वर्गमोक्षप्रदायकः ॥

अनु० पुरोहितकर्मकाण्डेऽपि— केचित्तु कुन्दकुसुमानुरोधेन प्रदोषे स्वीकुर्वन्ति । तन्मन्दं, साक्षात् पूर्वानुष्ठानश्रवणविरोधात् । सर्वपुष्पसाधारण्येन प्रातः पूजाकर्मणि कुन्दस्य विनियोज्यत्वे दोषाभावाच्च । पुरो. कर्म. (6–109)

समाचारादपि दिवा एव पूर्वाह्णे च क्रियते ।
न क्वापि अपराह्णे तादृशी व्यवस्था हेया ॥

(1) अरुणोदयवेलायां—अरुणोदयकाले, तस्य कालस्य लक्षणं यथा—
उदयात् प्राक् चतस्रस्तु नाडिका अरुणोदयः ॥ इति ।

(2) ब्रह्मपु. (अ. 28/1–53) । प. सं. (पृ–81)

समुद्रादुत्तरं तावद् यावद् विरजमण्डलम् ।
देशोऽसौ पुण्यशीलानां गुण्यैः सद्भिरलंकृतः ॥
तस्मिन् देशे प्रसूता ये ब्राह्मणा वेदपारगाः ।
तपःस्वाध्यायनिरता दृश्याः पूज्याश्च ते सदा ॥
श्राद्धे दाने विवाहे च यज्ञे वाऽऽचार्यकर्मणि ।
प्रशस्ताः सर्वकार्येषु तत्र देशोद्भवाः द्विजाः ॥
षट्कर्मनिरतास्तत्र ब्राह्मणा वेदपारगाः ।
इतिहासविदग्धाश्च पुराणार्थविशारदाः ॥
सर्वशास्त्रार्थकुशला यज्वानो वीतमत्सराः ।
अग्निहोत्ररताः केचित् स्मार्ताग्निविधितत्पराः ॥
पुत्रदारधनैर्युक्ता दातारः सत्यवादिनः ।
निवसन्त्युत्कले पुण्ये यज्ञोत्सवविभूषिते ॥
इतरेऽपि [1]च ये वर्णाः क्षत्रियाद्याः सुसंयताः ।
स्वकर्मनिरताः शान्तास्तत्र तिष्ठन्ति धार्मिकाः ॥
कोणादित्य इति ख्यातस्तत्रदेशे व्यवस्थितः ।
यं दृष्ट्वा भास्करं मर्त्यः सर्वपापैः प्रमुच्यते ॥
मुनय ऊचुः— श्रोतुमिच्छामहे ब्रूहि क्षेत्रं सूर्यस्य शाश्वतम् ।
तस्मिन् देशे सुसमृद्धे यत्रास्ते स दिवाकरः ॥
ब्रह्मोवाच— लवणस्योदधेस्तीरे पवित्रे सुमनोहरे ।
सर्वत्र वालुकाकीर्णे देशे सर्वगुणान्विते ॥
चम्पकाशोकवकुलैः करवीरैः सपाटलैः ।
पुन्नागैः करवीरैश्च बकुलैर्नागकेसरैः ॥
जवातगरवाणैश्च अतिमुक्तैः सकुब्जकैः ।
मालती कुन्दपुष्पैश्च तथान्यैर्मल्लिकादिभिः ॥
केतकीवन[2]षण्डैश्च सर्वत्र कुसुमोज्ज्वलैः ।

---

(1) "त्रयो" इति ब्रह्मपु. । (2) "खण्डैश्च सर्वर्त्तु" इति ब्रह्मपु. ।

[1]ककुदैर्लकुचैः शालैः पनसैर्देवदारुभिः ॥
सरलैर्मुचकुन्दैश्च चन्दनैश्च सितेतरैः ।
अश्वत्थैः शतपत्रैश्च आम्रैराम्रातकैस्तथा ॥
तालैः पूगफलैश्चैव नारिकेलैः कपित्थकैः ।
अन्यैश्च विविधैर्वृक्षैः सर्वतः समलंकृतैः ॥
क्षेत्रं तत्र रवेः पुण्यमास्ते जगति विश्रुतम् ।
समन्ताद् योजनं ग्रामं भुक्तिमुक्तिफलप्रदम् ॥
आस्ते तत्र स्वयं देवः सहस्रांशुर्दिवाकरः ।
कोणादित्य इति ख्यातो भुक्तिमुक्तिफलप्रदः ॥
माघे मासि सिते पक्षे सप्तम्यां संयतेन्द्रियः ।
कृतोपवासो यस्तत्र गत्वा तु मकरालये ॥
कृतशौचो विशुद्धात्मा स्मरेद्देवं दिवाकरम् ।
सागरे विधिवत् स्नात्वा [2]शर्वर्यन्ते समाहितः ॥
देवान् यक्षान् मनुष्यांश्च पितॄन् संतर्प्य च द्विजान् ।
उत्तीर्य वाससी धौते निर्मले परिधाय च ॥
आचम्य प्रयतो भूत्वा तीरे तस्य महोदधेः ।
उपविश्योदये काले प्राङ्मुखः सवितुस्तदा ॥
विलिख्य पद्मं मेधावी रक्तचन्दनवारिणा ।
अष्टपत्रं केसराग्रं वर्त्तुलं चोक्तकर्णिकम् ॥
तिलतण्डुलतोयञ्च रक्तचन्दनसंयुतम् ।
रक्तपुष्पञ्च दर्भञ्च कृत्वा वै ताम्रभाजने ॥
ताम्राभावेऽर्कपत्रस्य पुटे कृत्वा तिलोदकम् ।
पिधाय तं मुनिश्रेष्ठाः पत्रं पात्रेण विन्यसेत् ॥
करन्यासाङ्गविन्यासौ कृत्वाऽङ्गैर्हृदयादिभिः ।
आत्मानं भास्करं ध्यात्वा सम्यक्श्रद्धासमन्वितः ॥

---

(1) "कदम्बैः" इति ब्रह्मपु. । (2) शर्वर्यन्ते—रात्र्यन्ते ।

मध्येऽग्निदले धीमान् वै नैऋते श्वसने दले ।
कामारिं गोचरे चैव पुनर्मध्ये तु पूजयेत् ॥
प्रभूतं विमलं सारमाराध्यं परमं सुखम् ।
सम्पूज्य पद्ममावाह्य गगनात्तत्र भास्करम् ॥
कर्णिकोपरि संस्थाप्य ततो मुद्रां प्रदर्शयेत् ।
कृत्वा स्नानादिकं सर्वं ध्यात्वा तं सुसमाहितः ॥

सितपद्मोपरि रविं तेजोविम्बे व्यवस्थितम् ।
पिङ्गाक्षं द्विभुजं रक्तं पद्महस्तारुणान्वितम् ॥
सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम् ।
अभयवरदं शान्तं प्रभामण्डलमण्डितम् ॥
उद्यन्तं भास्करं ध्यात्वा सान्द्रसिन्दूरसन्निभम् ।
ततस्तत्पात्रमादाय जानुभ्यां धरणीं गतः ॥

कृत्वा शिरसि तत्पात्रमेकचित्तश्च वाग्यतः ।
त्र्यक्षरेण च मन्त्रेण सूर्यायार्घ्यं निवेदयेत् ॥
अदीक्षितस्तु [1]नाम्ना तु सूर्यायार्घ्यं प्रयच्छति ।
श्रद्धया भावयुक्तेन भक्तिग्राह्यो रविर्यतः ॥
अग्निर्निरृतिवाय्वीशमध्ये पूर्वादिदिक्षु च ।
हृच्छिरश्च शिखावर्मनेत्रमन्त्रञ्च पूजयेत् ॥
दत्त्वा गन्धञ्च पुष्पञ्च दीपं नैवेद्यमेव च ।
जप्त्वा स्तुत्वा नमस्कृत्य मुद्रां वध्वा विसर्जयेत् ॥

ये चार्घ्यं सम्प्रयच्छन्ति सूर्याय नियतेन्द्रियाः ।
ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्राश्च संयताः ॥
भक्तिभावेन सततं विशुद्धेनान्तरात्मना ।
ते भुक्त्वाऽभिमतान् कामान् प्राप्नुवन्ति शुभां गतिम् ।

---

(1) "तस्यैव नाम्नैवाऽर्घ्यं" इति ब्रह्मपु. ।

त्रैलोक्य[1]व्यापकं देवं भास्करं गगनेचरम् ।
ये च स्मरन्ति मनुजास्ते सर्वे सुखभागिनः ॥
यावन्न दीयते चार्घ्यं भास्कराय निवेदितम् ॥
तावन्न पूजयेद्विष्णुं शंकरं वा सुरेश्वरम् ॥
तस्मात् प्रयत्नमास्थाय दद्यादर्घ्यं दिने दिने ।
आदित्याय शुचिर्भूत्वा पुष्पैर्गन्धैर्मनोरमैः ॥
एवं ददाति यश्चार्घ्यं सप्तम्यां सुसमाहितः ।
आदित्याय शुचिः स्नातः स लभेदीप्सितं फलम् ॥
रोगाद् विमुच्यते रोगी वित्तार्थी लभते धनम् ।
विद्यां प्राप्नोति विद्यार्थी सुतार्थी पुत्रवान् भवेत् ॥
यं यं काममभिध्यायन् सूर्यायार्घ्यं प्रयच्छति ।
तस्य तस्य फलं सम्यक् प्राप्नोति पुरुषः सुधीः ॥
स्नात्वैव सागरे सम्यक् सूर्यायार्घ्यं प्रणम्य च ।
नरो वा यदि वा नारी सर्वकामफलं लभेत् ॥
सूर्य[2]गङ्गाम्भसि स्नात्वा कुशैर्वा सिच्य मूर्धनि ।
सर्वपापविनिर्मुक्तो नरो याति त्रिविष्टपम् ॥
ततः सूर्यालयं गच्छेत् पुष्पमादाय वाग्यतः ।
प्रविश्य पूजयेद् भानुं कृत्वा तं त्रिः प्रदक्षिणम् ॥
तान्त्रिकैर्वैदिकैर्मन्त्रैर्भानोस्तस्य च बुद्धिमान् ।
पूजयेत् परया भक्त्या कोणार्कं मुनिसत्तमाः ।
गन्धैः पुष्पैस्तथा धूपैर्जपैर्नैवेद्यकैर्वरैः ॥
दण्डवत्प्रणिपातैश्च जयशब्दैस्तथा स्तवैः ।

---

(1) "दीपकं" इति ब्रह्मपु. पाठः ।

(2) सूर्यगङ्गायाः स्वरूपं नित्याचारप्रदीपे भविष्यपुराणवचनं यथा—

भास्करायतनाभ्यासे यत्तोयं पूर्वतः स्थितम् ।
सूर्यगंगेति विज्ञेयं तत्र स्नात्वा दिवं व्रजेत् ॥ इति ।

एवं सम्पूज्य तं देवं सहस्रांशुं जगद्गुरुम् ॥
दशानामश्वमेधानां फलं प्राप्नोति मानवः ।
सर्वपापविनिर्मुक्तः स्वर्गलोकं व्रजेन्नरः ॥
सप्तावरान् सप्तपरान् वंशानुद्धृत्य भो द्विजाः ।
विमानेनार्कवर्णेन कामगेन सुवर्च्चसा ॥
गीयमानाश्च गन्धर्वैः सूर्यलोकं व्रजन्ति ते ।
भुक्त्वा तत्र वरान् भोगान् यावदाभूतसंप्लवम् ॥
पुण्यक्षयादिहायातः प्रवरे योगिनां कुले ।
चतुर्वेदी भवेद्विप्रः स्वधर्मनियतः शुचिः ॥
योगं विवस्वतः प्राप्य ततो मोक्षमवाप्नुयात् ॥

अत्राक्षारभोजनं कुर्वन्ति ।

रविवारेण सप्तम्यां शुक्लायामुत्तरायणे ।
पुंनाम्नि चैव नक्षत्रे गृह्णीयात् सप्तमीव्रतम् ॥

पुंनामनक्षत्राणि यथा—

हस्तो मैत्रस्तथा पुष्यः शोणा मृगपुनर्वसू ।
पुंनामधेयनक्षत्राण्येतान्याहुर्मनीषिणः ॥

अक्षारद्रव्यं यथा स्मृतिः—

गव्यमस्विन्नधान्यञ्च तिलमुद्गौ च मागधी ।
आमतण्डुलमुद्गाश्च सद्यो दधि घृतं पयः ।
अक्षाराः कथिताः ह्येते अन्ये क्षाराः प्रकीर्त्तिताः ॥
दन्तकाष्ठं [क] तथागस्तिस्त्रिकदुस्त्रिफला तथा ।
भोज्यपत्रं तथैवैतदक्षारं परिचक्षते ॥

शुण्ठीपिप्पलीमरीचेषु त्रिकटुशब्दो वर्त्तते । हरीतकीविभीतक्यामलकीषु च त्रिफलाशब्दः ॥

इति माघसप्तमी ।

(क) "तथैवापस्त्रिकदुस्त्रिफला तथा" इति खघङच पाठः ।

अथ भीष्माष्टमी

तत्र पुराणे— माघे मासि सिताष्टम्यां सलिलं भीष्मवर्मणे ।
श्राद्धं च ये सदा कुर्युस्ते स्युः सन्ततिभागिनः ॥
वैयाघ्रपद्यसगोत्राय सांकृतिप्रवराय च ।
अपुत्राय ददाम्येतत् सलिलं भीष्मवर्मणे ॥

किञ्चिदन्यदपि—शुक्लाष्टम्यां तु माघस्य दद्याद् भीष्मस्य यो जलम् ।
सम्वत्सरकृतं पापं तत्क्षणादेव नश्यति ॥
वैयाघ्रपदगोत्राय शान्तनुप्रवराय च ।
अपुत्राय ददाम्येतत् सलिलं भीष्मवर्मणे ॥

एतच्च ब्राह्मणव्यतिरिक्तानामेव ।

ब्राह्मणस्त्वन्यवर्णस्य यः करोत्यौर्ध्वदेहिकम् ।
तदवर्णत्वमसौ याति इहलोके परत्र च ॥
सवर्णेभ्यो जलं देयं नासवर्णे कथञ्चन ।

इत्यादिवचनं यथाकथञ्चित् सर्ववर्णविषयस्य स्मरणात् ।

यथा— अष्टम्याञ्च सिते पक्षे भीष्माय तु तिलोदकम् ।
अन्नञ्च विधिवद् दद्युः सर्वे वर्णाः द्विजातयः ॥
वसून् रुद्रान् तथादित्यान्नमस्कार स्वधान्वितान् ।
एते सर्वस्य पितर एष्वायत्ता मनुष्यकाः ॥

इति वचनेन वसुमध्यपातिनो भीष्मस्य सर्वपितृत्वादित्याशयः । अतएव कुतपकाल-व्यापिन्यामष्टम्यामिदं कार्यम् ।

इति भीष्माष्टमी ॥

अथ भैम्येकादशी

तत्र [1]गरुडपुराणे—

माघे मासे शुक्लपक्षे पुष्यर्क्षेण युता पुरा ।
एकादशी तथा चैका भीमेन समुपोषिता ॥

---

(1) गरुडपु. (1-127-1/21) ।

अर्च्चयंस्तु व्रतं कृत्वा पितृणामनृणो भवेत् ।
भीमद्वादशी विख्याता प्राणिनां पुण्यवर्द्धिनी ॥
नक्षत्रेण विनाप्येषा ब्रह्महत्यादि नाशयेत् ।
विनिहन्ति महापापं कुनृपो विषयं यथा ॥
कुपुत्रस्तु कुलं तद्वत् कुभार्या च पतिं यथा ।
अधर्मश्च यथा धर्मं कुमन्त्री नृपतिं यथा ॥
अज्ञानेन यथा ज्ञानमशौचेन यथा शुचिम् ।
अश्रद्धया यथा श्राद्धं सत्यं चैवानृतं यथा ॥
हितं यथोष्णमाहन्यादनर्थं चार्थसञ्चयः ।
यथा प्रकीर्तनाद् दानं तपो वै विस्मयाद् यथा ॥
अशिक्षया यथा पुत्रो गावो दूरगतैर्यथा ।
[क] क्रोधनेन यथा शान्तिर्यथा वित्तमवर्धनात् ॥
यथा समीहनाद् ज्ञानं फलानाश्च यतव्रताः ।
तथैव पापनाशाय प्रोक्तेयं द्वादशी शुभा ॥
ब्रह्महत्या सुरापानं स्तेयो गुर्वङ्गनागमः ।
युगपदुपहन्त्येतान् न निहन्ति त्रिपुष्करम् ॥
न चापि नैमिषं क्षेत्रं कुरुक्षेत्रं प्रभासकम् ।
कालिन्दी यमुना गङ्गा न रेवा न सरस्वती ॥
न चैव सर्वतीर्थानि एकादश्या समानि तु ।
न दानं न जपो होमो न चान्यत् सुकृतं क्वचित् ॥
एकतः पृथिवीदानमेकतो हरिवासरः ।
ततोऽप्येका महापुण्या इयमेकादशी वरा ॥
अस्मिन् वराहवपुषं कृत्वा देवन्तु हाटकम् ।
घटोपरि नवे पात्रे कृत्वा वै ताम्रभाजने ॥

(क) “कुधनेन यथा श्राद्धं” इति खग पाठः ।

सर्वंबीजभृतो विप्रा. सितवस्त्रावगुण्ठिते ।
सहिरण्यप्रदीपाद्यैः कृत्वा पूजां प्रयत्नतः ॥
वराहाय नमः पादौ क्रोड़ाकृति[क][1] नमः कटिम् ।
नाभिं गम्भीरघोषाय उरः श्रीवत्सधारिणे ॥
बाहुं सहस्रशिरसे ग्रीवां सर्वेश्वराय च ।
मुखं सर्वात्मने पूज्यं ललाटं प्रभवाय च ॥
केशाः शतमयूखाय पूज्या देवस्य चक्रिणः ।
विधिना पूजयित्वा तु कृत्वा जागरणं निशि ॥
श्रुत्वा पुराणं देवस्य माहात्म्यं प्रतिपादकम् ।
प्रातर्विप्राय दत्त्वा च याचकाय शुभाय तत् ॥
कनकक्रोड़सहितं सन्निवेद्य परिच्छदम् ।
पश्चात्तु पारणं कुर्यान्नातितृप्तः सुहृद्वृतः ॥
एवं कृत्वा नरो विप्रा न भूयः पुरुषो भवेत् ।
उपोष्यैकादशीं पुण्यां मुच्यते वै ऋणत्रयात् ॥
मनोभिलषितावाप्तिः कृत्वा सर्वव्रतादिकम् ॥

इति भैम्येकादशी ।

अथ वह्न्युत्सवपौर्णमासी

तत्र लिङ्गपुराणे–वह्न्युत्सवः सिते पक्षे माघमास्यार्द्रभे निशि ।
द्वादश्यां पञ्चदश्यां वा भवेद् वह्निमहोत्सवः ॥

पूजामन्त्रः— भगवन् गार्हपत्याग्ने योनिस्त्वं सर्वकर्मणाम् ।
त्वन्तु आहवनीयोऽग्निर्दक्षिणाग्निर्धनाय च ॥
युष्मदाप्यायिताः देवा वृक्षाः शस्यादिहेतवः ।
भवन्ति यस्मादखिलं जगद् भवति नान्यतः ॥

---

(1) अत्र अविभक्तिकनिर्देशः आर्षः ।

(क) "क्रोडाकृतये" इति खग पाठः ।

एवं त्वत्तो भवत्येतत् तेन सत्येन ते नमः ॥

इति वह्न्युत्सवपौर्णमासी ।

अथ शिवरात्रिः

तत्र प्रभासपुराणे– ईश्वर उवाच—

माघफाल्गुनयोर्मध्ये कृष्णपक्षे चतुर्दशी ।
शिवरात्रिस्तु सा ज्ञेया सर्वयज्ञोत्तमोत्तमा ॥
माघान्ते च वर्षे वर्षे कृष्णा प्रथमफाल्गुनी ।
[1]निशायोगाच्च सा ग्राह्या नान्ययोगा विचारणा ॥
सर्वयज्ञमयी सा तु सर्वपापहराणि वा ।
तपस्विनी तपोहन्त्री मत्कलापूर्वकल्पिता ॥

अद्येहेत्यादि— अमुक सगोत्रः, अमुकशर्मा, प्रभासपुराणोक्तशिवरात्रिव्रतफलप्राप्तिकामः प्रभासपुराद्युक्तविधिना यथाशक्तिवैकल्पितपदार्थानुष्ठानेनाचार्यप्रत्ययेन शिवरात्रिव्रतमहं कुर्वीय । स्नानकाले प्रार्थना यथा—

आपस्त्वमसि देवेश ज्योतिषां पतिरेव च ।
पापं नाशय मे देव वाङ्मनःकर्मभिः कृतम् ॥
त्वमापः ज्योतिः सर्वेषां दैत्यदानवरक्षसाम् ।
सान्निध्यं सर्वतीर्थानां स्नानकाले भवेन्मम ॥
स्नातोऽहं सर्वतीर्थेषु गर्त्तप्रस्रवणेषु च ।
नदीषु देवखातेषु स्नानमेतेषु मे भवेत् ॥
नियमश्च करिष्यामि देवदेव तवाज्ञया ।
द्वादश्याञ्च द्विजः कुर्यान्मन्त्रेणानेन यन्त्रिणाम् ॥
रात्रिं प्रपद्ये जननीं सर्वभूतनिवेशिनीम् ।
भद्रां भगवतीं कृष्णां विश्वस्य जगतो निशाम् ॥

---

(1) निशायोगाच्च निशीथव्यापिनीतिथिः शिवरात्रिव्रतग्रहणे उत्तमा । स्कन्दपुराणे—

निशीथसंयुता या तु कृष्णपक्षे चतुर्दशी ।
उपोष्या सा तिथिः श्रेष्ठा शिवसायुज्यकारिणी ॥ (2-35-82)

संवेशिनीं प्रपद्येऽहं ग्रहनक्षत्रमालिनीम् ।।
[क]प्रपन्नोऽहं शिवां रात्रिं भद्रे या च मसीमहि ॥

द्वादश्यां चेति चकारात् त्रयोदश्यां पूर्वंगामित्वे सम्पूर्णत्वे च क्रमेण तिथिद्वयं ज्ञेयम् ।

पूजयित्वा शिवं शान्तं त्रयोदश्यां यथाविधि ।
शिवस्याग्रे गुरोर्वापि प्रतिज्ञां कारयेत्सुधीः ।।

तद्यथा— प्रातर्देव चतुर्दश्यां जागरिष्याम्यहं निशि ।
पूजां दानं जपं होमं करिष्याम्यात्मशक्तितः ।।
चतुर्दश्यां निराहारो भूत्वा चैवाऽपरेऽहनि ।
भोक्ष्येऽहं वै विरूपाक्ष शरणं मे भवाव्यय ।।
ततः प्रभातसमये कृत्वा स्नानं यथाविधि ।
आचार्यमाश्रित्य तिष्ठेत् सत्यशौचदयान्वितः ।।
पश्चादस्तं गते भानौ प्रविश्य यागमन्दिरम् ।
पूर्वपूजां विसृज्याथ नीरक्षीरघृतादिभिः ।।
स्नापयेल्लिङ्गमेकान्ते तत्र पूजां समाचरेत् ।
[1]षडक्षरेण मन्त्रेण महादेवं प्रपूजयेत् ।।
द्वारपालं गणेशञ्च गुरुं नन्दि दिगीश्वरान् ।
ततः पुष्पैश्च विविधैर्गन्धमाल्यानुलेपनैः ।।
धूपव्यावृत्तघण्टादिदीपमाल्योपशोभितैः ।
शर्कराक्षीरदध्यन्नखण्डलड्डुकमण्डकैः ।।
अन्यैश्च फलमूलाद्यैर्नैवेद्यैः सुमनोहरैः ।
सुसूक्ष्माणि च वस्त्राणि निवेद्य गुरुदेवयोः ।।
ज्ञेयो "नमः शिवाये"ति मन्त्रः सर्वार्थसाधकः ।
सर्वमन्त्राधिकश्चायमोङ्काराद्यषडक्षर ।। इति ।

---

(1) षडक्षरमन्त्रः यथा— ॐ नमः शिवाय ।

(क) प्रपन्नेऽहं शिवां रात्रिं भद्रे पारमसीमहि इति म पाठः ।

शिवधर्मे— अनेन विधिना सम्यक् पूजयित्वा महेश्वरम् ।
होमकुण्डं समासाद्य शिवमन्त्रेण होमयेत् ॥
तिलतण्डुलव्रीहिभिश्चरुं कुर्याद् विचक्षणः ।
मूलमन्त्रेण होतव्यं तिलैरष्टोत्तरं शतम् ॥
दत्त्वा पूर्णाहुतिं चैव तत्तु देवस्य दापयेत् ।
[1]पञ्चामृतन्तु पूजायां यामे यामे च कारयेत् ॥
हरशंकरसर्वज्ञ व्रतानां फलदायक ।
शिवरात्रिव्रतं देव करोमि त्वत्प्रसादतः ॥

अनुज्ञाने वाक्यमिदम्—

प्रथमे च द्वियामे च त्रियामे च चतुर्थके ।
भक्त्या सम्पूजयेद्देवं पश्चादर्घ्यं समर्पयेत् ॥
अर्घ्यं पुष्पफलोपेतं कुशविल्वचतुः[2]समम् ।
दूर्वाङ्कुराक्षतोपेतं स्वाहान्तं मूलसंयुतम् ॥

अर्घ्यदानार्थं क्षमापयेत् । मन्त्रो यथा—

पुराकृतं च यत्कर्म इहलोके च यत्कृतम् ।
करिष्यामि च यत् किञ्चिद् घोरं कर्म सुदारुणम् ॥
हर संहर तत्पापं कालकूटविषं यथा ।
त्रिपुरश्च यथा दग्धं यथा कालस्त्वया हतः ॥
तथा मे दुष्कृतं सर्वं शम्भो नेत्राग्निना दह ।
जितोऽहं भवदोषेण कामलोभग्रहेण च ।
त्वद्भक्तिरचला मेऽस्तु शिवजन्मनि जन्मनि ॥
इहलोके परां भक्तिं परलोके परं पदम् ।
देहि मे देवदेवेश त्रैलोक्येऽप्यात्मयोगताम् ॥

---

(1) दधि दुग्धं घृतं चैव मधुसंयुतशर्करम् ।
पञ्चामृतमिति प्रोक्तं सर्वकर्मण्युदाहृतम् ॥

(2) चतुःसमम्—कस्तूरिका ।

अर्घ्यमन्त्रो यथा—नमः शिवाय शान्ताय सर्वपापहराय च ।
शिवरात्रौ ददाम्यर्घ्यं भक्त्या तुभ्यमहं विभो ॥
प्रथमप्रहरे— नमः शिवाय शान्ताय भक्तिमुक्तिप्रदाय च ।
शिवरात्रौ ददाम्यर्घ्यं सर्वाभिमतसाधकम् ॥
द्वितीयप्रहरे— ज्ञानादज्ञानतो वाऽथ मया दत्तन्तु शंकर ।
गृहाणार्घ्यं महादेव शिवरात्रौ प्रसीद मे ॥
तृतीयप्रहरे— शिवशंकरसर्वज्ञ प्रभो पशुपते हर ।
गृहाणार्घ्यमुमाकान्त शिवरात्रौ प्रसीद मे ॥
चतुर्थप्रहरे— प्रतियामं निशि स्नानं कार्या पूजा च भक्तितः ।
देहाशक्तवशेनाथ स्नानं मन्त्रादिना चरेत् ॥
जपं कृत्वा तथा होमं ध्यानं चागमवाचनम् ।
प्रतियामेषु कर्त्तव्यं ध्रुवताराप्रदर्शनम् ॥

आगमवचनम्—शिवरात्रिमाहात्म्यश्रवणम् । "शृणुयाच्च तत्कथा"मिति गरुडपुराणवचनात् ।
नैवेद्यैः विविधैश्चैव भक्ष्याभोज्यान्नपानकैः ।
नृत्यगीतरवैश्चैव स्तुतिस्तोत्रैरनेकशः ॥
नानाविधैरुपायैश्च यागागारे क्षपेत् क्षपाम् ।
मूलमन्त्रं तथा जप्त्वा प्रभातेऽथ क्षमापयेत् ।
अविघ्नेन व्रतं देव त्वत्प्रसादसमन्वितम् ॥
क्षमस्व जगतां नाथ त्रैलोक्याधिपते हर ॥
व्रतोपवासयागाद्यैः सुकृतं यन्मया कृतम् ।
[1]त्वत्करस्थं महादेव ममास्तु फलसाधकः ॥
ज्ञानावाप्तिरिहैवाऽस्तु त्वत्प्रसादान्मम प्रभो ।
एवमस्त्विति तेनोक्तः सव्रती फलभाग् भवेत् ॥

व्रतोपवासेति पठित्वा देवस्य दक्षिणकरे पुष्पं दत्त्वा व्रतं फलं देवे निवेदयेदित्यर्थः ।
चतुर्दश्यामुषः काले स्नात्वाऽभ्यर्च्य शिवं गुरुम् ।

---

(1) त्वत्करस्थं—त्वदधीनम् ।

दत्त्वा कुम्भञ्च गुरवे द्विजादींश्चाभिपूजयेत् ।।
स्वसामर्थ्यानुसारेण कर्त्तव्यं भोज्यमादरात् ।
स्थावरं जङ्गमं चैव लिङ्गं हि द्विविधं स्मृतम् ।।
अतएव हि कुर्वन्ति पूजां तत्र तपस्विनाम् ।
नमस्कृत्य प्रकर्त्तव्यं लिङ्गानां शिवसेवकैः ।।
त्वत्प्रसादान्मया देव व्रतमर्घ्यसमन्वितम् ।
प्रसन्नो भव मे श्रीमन् मद्गृहं प्रति गम्यताम् ।।
त्वदालोकनमात्रेण पवित्रोऽत्र न संशयः ।
इत्युक्त्वा तु प्रयत्नेन गृहीत्वा तु तपोधनान् ।।
वस्त्रं छत्रञ्च कौपीनं पादत्राणं तथैव च ।
दक्षिणाञ्च ततो दत्त्वा प्रणिपत्य क्षमापयेत् ।।
देवादिदेव भूतेश लोकानुग्रहकारक ।
यन्मया श्रद्धया दत्तं प्रीयतां तेन मे प्रभो ।।
इति क्षमाप्य च यतीन् कुर्याद् द्वादशवार्षिकान् ।
काले स्त्रीपुत्रराज्यादि प्राप्य शैवपुरं व्रजेत् ।।
एवमेव क्षणं देवि वर्षे वर्षे तथैव च ।
अत्यन्तं भक्तिभावेन यः कुर्यादीदृशं व्रतम् ।।
जानामि तं महादेवि स च जानाति मां खलु ।
त्वयैव सहितो भूत्वा पश्यामि स्फुटमादरात् ।।
एवं द्वादशवर्षाणि शिवरात्रौ प्रजागरात् ।
प्राप्नोति फलमत्युग्रं[1] यत्सुरैरपि दुर्लभम् ।।
स एव भक्तोऽथ स एव मुक्तः, साधुः स एकैकमनाः स एव ।
स एव जीवेत् सफलः स एव, अकारि येनेह [2]शमीशयज्ञः ।।
निष्फलं तद्व्रतं यत् स्यात् कृतं स्याद्दक्षिणां विना ।
अतः सर्वेषु यज्ञेषु दक्षिणैव फलप्रदा ।।

---

(1) उग्रम्—असाध्यम् ।

(2) शमीशयज्ञः—मङ्गलप्रदशिवपूजा ।

दक्षिणया सुवर्णेन आचार्याय प्रपूजयेत् ।
अन्येषां ब्राह्मणानाञ्च यथाशक्त्या प्रपूजनम् ॥
ततः प्रदक्षिणं कृत्वा नमस्कारं समाचरेत् ॥
तस्य पुण्यफलं दिव्यं विमानं सर्वगामिकन्[क] ।
युगकोटिसहस्राणि शिवलोके महीयते ॥

पद्मावतीपुराणे—अखिलायां त्रयोदश्यां तदन्ते च चतुर्दशी ।
तस्य कामफलावाप्तिस्तेनैव परिपच्यते ॥
यत्पापं कुरुते जन्तुः पैशुन्यञ्च कृतघ्नताम् ।
मित्रद्रोहे च यत्पापं यत्पापं पारदारिकात् ॥
अभक्ष्यभक्षणात् पापमगम्यागमनात्तथा ।
तत्सर्वं विलयं याति [1]भूतायां पारणे कृते ॥

इति शिवरात्रिः ।

अथ दोलायात्रा

तत्र [2]ब्रह्मपुराणे–नरो दोलागतं दृष्ट्वा गोविन्दं त्रिदशार्चितम् ।
[3]फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत् ॥

स्मृतिः— फाल्गुनपौर्णमास्यान्तु कार्यः फल्गुमहोत्सवः ।
गोविन्दो दोलया क्रीडेत् तत्रार्यम्णि गले रवौ ॥

अर्यम्णि—उत्तरफाल्गुन्याम् ।

इति दोलायात्रा ।

इति द्वादशमासनिर्णयः ।

---

(1) भूतायां—चतुर्दश्याम् । (2) ब्रह्मपु. (63–18) ।
(3) फाल्गुन्यां—फाल्गुनपूर्णिमायाम् ।

(क) "स्वर्गगामिकम्" इति ख पाठः ।

अथ षड्जयन्तीकथनम्

तत्र चैत्रशुक्लनवम्यां रामनवमीव्रतनिर्णयः —

अष्टम्यां चैत्रमासस्य शुक्लपक्षे जितेन्द्रियः ।
दन्तधावनपूर्वन्तु प्रातः स्नायाद् यथाविधि ॥
दान्तं कुटुम्बिनं विप्रं वेदशास्त्ररतं सदा ।
श्रीरामपूजानिरतं सुशीलं दम्भवर्जितम् ॥
विधिज्ञं राममन्त्राणां राममन्त्रैकसाधनम् ।
आहूय भक्त्या सम्पूज्य वृणुयात् प्रार्थयन्निति ॥
श्रीरामप्रतिमादानं करिष्येऽहं द्विजोत्तम ।
तत्राचार्यो भव प्रीतः श्रीरामोऽपि त्वमेव मे ॥
आचार्यं भोजयेत्पश्चात् सात्त्विकान्नैः सुविस्तरम् ।
भुञ्जीत स्वयमप्येवं हृदि राममनुस्मरन् ॥

तत्रैकभक्तनिवेदनमन्त्रः—

नवम्यामङ्गभूतेन एकभक्तेन राघव ।
इक्ष्वाकुवंशतिलक प्रीतो भव भवप्रिय ॥
ततः प्रातः समुत्थाय स्नात्वा सन्ध्यां विधाय च ।
प्रातः सर्वाणि कर्माणि शीघ्रमेव समापयेद् ॥

उपवासनिवेदनमन्त्रः—

उपोष्य नवमीं यावद् यामेष्वष्टसु राघव ।
तेन प्रीतो भव त्वं भो संसारात् त्राहि मां हरे ॥
विधिवन्निर्मिते यागमण्डपे परमोत्सवे ।
पुण्याहं वाचयित्वा तु सद्भिः संकल्पमाचरेद् ॥

संकल्पः— अस्यां रामनवम्यान्तु समाराधनतत्परः ।
उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि ॥
इमां स्वर्णमयीं रामनवम्यां सुप्रयच्छतः ।
श्रीरामप्रीतये दास्ये रामभक्ताय धीमते ॥

प्रीतो राम हर त्वाशु पापानि बहुशानि मे ।
अनेक जन्मसंसिद्धान्यभ्यस्तानि महान्ति च ॥
मूर्त्ति श्रीरामचन्द्रस्य सुवर्णस्य [1]पलेन तु ।
अशक्तश्चेत्पलार्धेन तदर्धेनाऽपि वा चरेत् ॥
रौप्येण वाऽथ लौहेन शिलया दारुणाऽथवा ।
[2]लेप्यञ्च [3]लेख्यं वा कुर्यात् कौशल्यां कथितां शुभाम् ॥
वामांगे जननीं चास्य संश्लिष्टां वामपाणिना ।
दक्षिणांके दशरथं पुत्रावेक्षणतत्परम् ॥
पृष्ठतो लक्ष्मणं देवं सछत्रं सह चामरम् ।
पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ ॥
अग्रे व्यग्रं हनुमन्तं रामानुग्रहकारिणम् ।
आसनोपरि संविश्य न्यासजालं विधाय च ॥
शंखं प्रपूजयेदग्रे गन्धपुष्पाक्षतादिभिः ।
कलशं वामभागस्थं पूजाद्रव्याणि चादरात् ॥
पात्रञ्च प्रेषयेद् भक्त्या [4]चात्मानं मन्त्रमुच्चरन् ।
सर्वेषां राममन्त्राणां मन्त्रराजः षडक्षरः ॥
तारकं ब्रह्म चेत्युक्तस्तेन पूजा प्रशस्यते ।
विलिखेत् सर्वतोभद्रं वेदिकोपरिसुन्दरम् ॥
सर्वव्रते समुद्दिष्टं सर्वतोभद्रमण्डलम् ।
मध्ये तीर्थोदकैः पूर्णकुम्भरत्नोदकं शुभम् ॥
चुतपल्लवपुष्पैश्च युक्तं न्यसेदलंकृतम् ।
सौवर्णे राजते ताम्रे पात्रे षट्कोणमालिखेत् ॥
अलाभे बिल्वपीठे वा कलशोपरि संस्थिते ।
उपर्यास्तीर्य वस्त्रेऽर्घे अच्छिन्ने सदृशे शुभे ॥

---

(1) पलेन — कर्षचतुष्टयेन । (2) लेप्यम् — मृत्तिकानिर्मितम् ।
(3) लेख्यम्—चित्रिताकृतिः । (4) शु यजु. (29–17) ।

दिव्यसिंहासने तत्र स्थापयेदर्च्चयेत्सुधीः ।
पीठार्चां विधिवत् कृत्वा दत्त्वा चार्घ्यादिकं तथा ॥
क्षीरादिना च स्नपनं कुर्यादावाहनादिकम् ।
नानारत्नविचित्राणि दद्यादाभरणानि च ॥
[1]हिमाम्बुघृष्टरुचिरं [2]घनसारसमन्वितम् ।
गन्धं दद्यात् प्रयत्नेन सागुरुं च सकुङ्कुमम् ॥
कह्लारकेतकीजातीपुन्नागाद्यैः प्रपूजयेत् ।
चम्पकैः [3]शतपत्रैश्च सुगन्धैः सुमनोहरैः ॥
चूतपल्लववृन्दैश्च दूर्वाभिस्तुलसीदलैः ।
कोमलैर्विल्वपत्रैश्च अशोककुसुमैस्तथा ॥

अत्र कौशल्याद्यृचः—

रामस्य जननी चापि रामात्मकमिदं जगत् ।
अतस्त्वां पूजयिष्यामि लोकमातर्नमोऽस्तु ते ॥
नमो दशरथायेति पूजयेत् पितरं ततः ।
ततोऽनुज्ञाप्य देवेशं परिवारान् समर्च्चयेत् ॥
पूर्वंषट्कोणकोणेषु हृदयादीनि षट्क्रमात् ॥ इति प्रथमावरणम् ।
हनुमन्तं ससुग्रीवं भरतं सविभीषणम् ।
लक्ष्मणाङ्गदशत्रुघ्नान् जाम्ववन्तं दलेष्विमान् ॥
इति द्वितीयावरणम् ।
धृतिं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्धनम् ।
तत्कोणे धर्मपालश्च सुमन्त्रं दलमध्यतः ॥ इति तृतीयावरणम् ।
घण्टाश्च वादयन् धूपं दीपं चास्मै निवेदयेत् ।
भक्ष्यभोज्यादिना भक्त्या नैवेद्यं विधिनाऽर्पयेत् ॥
[4]आचामश्च सुताम्बूलं [5]महानीराजनं ततः ।

---

(1) हिमम्—कर्पूरम् । (2) घनसारः—कस्तूरी । (3) शतपत्रैः—पद्मैः ।
(4) आचामम्—आचमनम् । (5) महानीराजनं—महादीपः ।

नमस्कुर्यात् ततस्तस्मै स्तुत्वा च पूजयेन्मनुः ॥
शृण्वन् जयन्तीमाहात्म्यं दिव्यां रामकथां तथा ।
रामभक्तैः समं यामं नयेद्राममनुस्मरन् ॥ इति प्रथमयामकृत्यम् ।
शंखपात्रार्चनात् किञ्चित् कुर्याद् यामे[1]ब्वतन्त्रितः ।
यामे द्वितीये सम्पूज्य मध्याह्ने जन्म भावयेत् ॥
[3]उच्चस्थे ग्रहपञ्चके सुरगुरौ शुक्रे नवम्यां तिथौ,
लग्ने कर्कटके पुनर्वसुयुते मेषं गते पूषणि ।
निर्दग्धुं निखिलाः पलाशसमिधो मेध्यादयोध्याऽरणे–
राविर्भूतमभूतपूर्वविभवं यत्किंचिदेकं महः ॥
मत्त्वैव वादयेत् वाद्यानर्घ्यं दत्त्वा जगत्पतेः ।
फलपुष्पाम्बुसम्पूर्णं गृहीत्वा शंखमुज्ज्वलम् ॥
अशोकचूतकुसुमैर्युक्तञ्च तुलसीदलैः ।
अर्घ्यमन्त्रः— दशाननवधार्थाय धर्मसंस्थापनाय च ॥
दानवानां विनाशाय दैत्यानां निधनाय च ।
परित्राणाय साधूनां जातो रामः स्वयं हरिः ॥
गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघ ।
पुनः पुष्पाञ्जलिं दत्त्वा यामे यामे त्वतन्द्रितः ॥
पूजयेद् विधिवद् भक्त्या दिवारात्रिं नयेद् बुधः ।
ततः प्रातः समुत्थाय नित्यकृत्यं समाप्य च ॥
विधिवद्राममभ्यर्च्य भक्त्याचार्यं प्रतोष्य च ।
ब्राह्मणैः सह भुञ्जीत तेभ्यो दद्याच्च दक्षिणाम् ॥
पारणमन्त्रः— तव प्रसादस्वीकारात् कृतं यत् पारणं मया ।
व्रतेनानेन सन्तुष्टो रामभक्तिं प्रयच्छ मे ॥ इति ।

---

(1) अतन्त्रितः—जागरुकः ।   (2) महः—कान्तिः ।
(3) चम्पूरा. (बाल–29श्लो) ।

कृत्वैव ब्रह्महत्यादिपापेभ्यो मुच्यते ध्रुवम् ।
तुलापुरुषदानादिफलं प्राप्नोति मानवः ॥
अनेकजन्मसंसिद्ध[1] पापेभ्यो विप्रमुच्यते ।
[2]अकिञ्चनोऽपि नियतमुपोष्य नवमीदिने ॥
कृत्वा जागरणं भक्त्या पूजयेद् विधिवन्मुने ।
गङ्गायां प्रक्षिपेल्लेख्यां लेप्यामूर्त्ति गृहे न्यसेत् ॥
आचार्याय च हैमार्दि दद्याच्च प्रतिमां बुधः ॥

इति रामनवमीव्रतविधिः ।

अन्यजयन्तीपञ्चकव्रतं स्वेषु स्वेषु मासेषु प्राग्दर्शितम् । मासेषु यथा—

वैशाखशुक्लचतुर्दश्यां — नृसिंहस्य जन्म ।
एवं भाद्रकृष्णाष्टम्यां — श्रीकृष्णस्य जन्म ।
अत्र शुक्लद्वादश्यां — वामनस्य ।
आश्विनशुक्लाष्टम्यां — दुर्गायाः ।
फाल्गुनकृष्णचतुर्दश्यां — शिवस्य ।

इति षड्जयन्तीव्रतकथनम् ।

—*—

---

(1) संसिद्धः—समुपार्जितः ।

(2) अकिञ्चनः—नितान्तनिर्धनः ।

अथ स्नानादिपुण्ययोगाः

तत्रादौ व्यतीपातयोगः

तत्र ज्योतिःशास्त्रे—

गुरौ भौमे च सिंहस्थे वैशाखे द्वादशी सिता ।
हस्तानक्षत्रसंयुक्ता सा व्यतीपातसंज्ञिता ॥
पञ्चाननस्थौ गुरुभूमिपुत्रौ, मेषे रविः स्याद् यदि शुक्लपक्षे ।
मासाभिधाना करभेन युक्ता, तिथिर्व्यतीपात इतीह योगः ॥
अस्मिंस्तु गोभूमिहिरण्यवासोदानेन सर्वं परिहाय पापम् ।
सुरत्वमिन्द्रत्वमनामयत्वं, मर्त्याधिपत्यं लभते मनुष्यः ॥

विष्णुपुराणे— श्राद्धार्थमागतं द्रव्यं विशिष्टमथवा द्विजम् ।
श्राद्धं विज्ञाय कुर्वीत व्यतीपातेऽयने तथा ॥

इति व्यतीपातयोगः ।

अथ महावैशाखीयोगः

तत्र स्कन्दपुराणे—मेषेऽर्के कार्मुके[1] जीवे मकरस्थेऽथवा द्विज ।
पूर्णिमा रविवारेण तुलास्थे तु शनैश्चरे ॥
वरीयो योगयुक्ते च विशाखर्क्षे यदा शशी ।
महाशब्दा तदा ज्ञेया कोटिसूर्यग्रहाधिका ॥
कोटिजन्मकृतं पापं दृष्ट्वा श्रीपुरुषोत्तमम् ।
महावैशाख्यां मुञ्चन्ति [2]स्नानं कृत्वा महोदधौ ॥

इति महावैशाखी योगः ।

---

(1) कार्मुके—धनुराशौ ।

(2) स्नानं तु सप्तविधं यथा— वृहत्पराशरः (2–82)—

मन्त्रं पार्थिवमाग्नेयं वायव्यं दिव्यमेव च ।
वारुणं मानसं चेति सप्तस्नानान्यनुक्रमात् ॥

अथ महाज्यैष्ठीयोगः

गालवः— वृषस्थेऽर्के शशिगुरू वृश्चिके पूर्णिमा गुरोः ।
दिने महाफलो योगो महाज्यैष्ठीति सोच्यते ॥

कूर्मपुराणे— ऐन्द्रे गुरुः शशी चैव प्राजापत्यगते रवौ ।
पौर्णमासी गुरौ ज्यैष्ठी महाज्यैष्ठीति सा स्मृता ॥
महाज्यैष्ठ्यान्तु यो गच्छेत् क्षेत्रं श्रीपुरुषोत्तमम् ।
व्रजेत् पदानि यावन्ति क्रतुतुल्यानि तानि वै ॥
तत्र गत्वा हरेर्धाम दृष्ट्वा श्रीपुरुषोत्तमम् ।
विश्रम्य विधिवत् स्नायात् प्रतितीर्थानि वै क्रमात् ॥
दशपापहरादीनि सप्तैव च दिनानि तु ।
सावित्र्यादीनि सप्तैव नैऋतान्तानि तानि तु ॥
यस्तिष्ठेत्सप्तरात्राणि सप्तमन्वन्तराणि सः ।
सत्यलोके वसन्मर्त्यः स्वयं भूत्वा चतुर्भुजः ॥

प्राजापत्य गत इत्युपलक्षणम् । कृत्तिकारोहिणीमृगशिरसामन्यतमनक्षत्र इति ज्ञेयम् ।

तथा च गर्गः— प्राजापत्ये च सौम्येऽर्के ऐन्द्रे शशीगुरू तथा ।
मैत्रेऽथ पूर्णिमा ज्येष्ठी [1]महाज्यैष्ठीति सोच्यते ॥
योगैकेन विहीनेन मता देव प्रिया बुधैः ।
द्वाभ्यां भद्रेति विख्याता राकैव त्रिविधा मता ॥

गालवश्च— वृषस्थेऽर्के यत्र कुत्र गुर्विन्दू वृश्चिके तथा ।
गुरौ ज्यैष्ठी महत् शब्द नामेन्द्राग्निस्थितैश्च तैः ॥

इन्द्राग्नीत्यादि ज्येष्ठागताभ्यां गुर्विन्दुभ्यां कृत्तिकागतेनार्केण महाज्यैष्ठी स्यादित्यर्थः ।

इति महाज्यैष्ठी योगः ।

---

(1) बृहद्धर्मपुराणे (16–27) महाज्यैष्ठी स्वरूपं यथा—
पूर्णिमा ज्येष्ठमासस्य युक्ता चेत् ज्येष्ठया भवेत् ।
महाज्यैष्ठीति विज्ञेया युक्ता वाप्यनुराधया ।
शनिवारस्य योगस्तु फलाधिक्यात् प्रशस्यते ॥

अथ महाकार्त्तिकीयोगः

तत्र [1]विष्णुपुराणे—

विशाखायां यदा सूर्यश्चरत्यंशं तृतीयकम् ।
तदा चन्द्रं विजानीयात् कृत्तिकाशिरसि स्थितम् ।।
कृत्तिकायां यदा चन्द्रः प्रथमाङ्घ्रौ भवेत् क्वचित् ।
महती सा तिथिर्ज्ञेया स्नानदानेषु चोत्तमा ।।
यदा यामं तु भवति तिथौ तस्याञ्च कुत्रचित् ।
तिथिः साऽपि महापुण्या ऋषिभिः परिकीर्त्तिता ।।
प्राजापत्यं यदा ऋक्षं तिथौ तस्यां नराधिप ।
सा महाकार्त्तिकी प्रोक्ता देवानामपि दुर्लभा ।।
मन्दे चार्के गुरौ वाऽपि वारेष्वेतेषु च त्रिषु ।
त्रीण्येतानि च ऋक्षाणि स्वयं प्रोक्तानि ब्रह्मणा ।।
तत्राश्वमेधिकं पुण्यं स्नातस्य तु भवेन्नृप ।
दानमक्षयतां याति पितॄणां तर्पणं तथा ।।

भारते— आकामावैषु यच्छ्राद्धं यच्च दानं यथाविधि ।
उपवासादिकं यच्च तदनन्तफलं स्मृतम् ।।

इति महाकार्त्तिकीयोगः ।

अथ रोहिणीप्रतिपद्योगः

तत्राग्नेयपुराणे—अनुमत्यामतीतायां प्रतिपद्रोहिणी शशी ।
यदा भवति संयोगः कार्त्तिकेषु विशेषतः ।।
मुहूर्त्तमप्यहोरात्रे यस्मिन् युक्तोपलभ्यते ।
रोहिणीप्रतिपच्चन्द्रे अर्घ्यदानं महाफलम् ।।
वृश्चिकस्थे यदा भानुः पक्षादौ च प्रजापतिः ।
षष्टि [2] सन्निहितं पुण्यं भौमे वा यदि वा रवौ ।।

---

(1) वि. पु. (2-3-78/83) ।

(2) सन्निहितं—क्षेत्रविशेषः ।

तस्मिन् काले नृपश्रेष्ठ कुरुक्षेत्राधिकं फलम् ।
दशानामश्वमेधानां फलं प्राप्नोत्यसंशयम् ।।
एवं ज्ञात्वा विशेषेण गन्तव्यं पुरुषोत्तमम् ।
लक्षसन्निहितं पुण्यं स्नात्वा चैव महोदधौ ।। इति

तार्क्ष्यपुराणे— सरोहिणीकचन्द्राय विष्णवे सश्रिये तथा ।
स्नानं करोमि देवेश व्रतं मे सफलं कुरु ।।
स्थण्डिले रजते वाऽपि भवेद् विष्णुं सलक्ष्मीकम् ।
विष्णुरूपं शशाङ्केति लक्ष्मीं तां रोहिणीति च ।।
प्रजापतिं बुधं ध्यायेद् गायत्रीं रोहिणीं तथा ।
सोमाय सोमेश्वराय गोविन्दाय नमो नमः ।।
शशीचन्द्रशशाङ्केन्दुरोषधीशो निशाकरः ।
हिमांशुसोमवित्यष्टौ प्रतिनामानि पूजयेत् ।।
वलभद्रश्च कृष्णश्च वासुदेवश्च रोहिणी ।
रुक्मिणी चानिरुद्धश्च प्रद्युम्नो गरुडस्तथा ।।
देवकी च यशोदा च पूजनीया द्विजातिभिः ।।

अष्टदलपद्मं लिखित्वा- अष्टदलेषु पूर्वादितः शश्यादीनभ्यर्च्य पद्मवद् बहिस्तथैव ऋक्मिणीसहितं कृष्णं रोहिणीसहितं वलं वसुदेवं देवकीमनिरुद्धं प्रद्युम्नं गरुडं यशोदामष्टदिक्षु पूजयित्वा कर्णिकायां सोमाय सोमेश्वराय इति मन्त्रेण सोमरूपिणं गोविन्दमर्च्चयेत् ।

सुगन्धैः कुसुमैः श्वेतैः पुष्पैर्धूपैः प्रदीपकैः ।
शालिदध्योदनफलैः मध्याह्ने घृतपायसैः ।।
संतर्प्य ब्राह्मणान् तद्वत् सायं सम्पूजयेत्ततः ।
नमः सोमाय चन्द्राय विष्णवे ब्रह्मणे नमः ।।
सलक्ष्मीकाप्रमेयाय जगत्यमृतरूपिणे ।
सरोहिणीकदेवाय शशाङ्कायामृताय च ।।
पुष्पं ददामि देवेश मण्डलेऽस्मिन् सुपूजिते ।

सायं पूजामन्त्रः— ततो घृताक्षतं वाऽपि जुहुयाद् घृतपायसम् ॥
स्वाहा सोमाय हरये ब्रह्मणे प्रणवात्मने ।
महालक्ष्म्यै सरोहिण्यै स्वाहा प्रतिपदे तथा ॥
प्रतिमन्त्रं सप्त सप्त जुहुयादाहुतीर्व्रती ।
ततो व्याहृतिभिश्चादावन्ते स्विष्टकृदाचरेत् ॥
ततश्चन्द्रोदये काले बहिर्गोमयलेपिते ।
पूर्ववद् पूजयेद् विष्णुं सलक्ष्मीं चन्द्रसम्मुखम् ॥
एवं सम्पूज्य देवेशं ततस्त्वर्घ्यं निवेदयेत् ।
जगदाप्यायिन्निन्दो त्वं जगद्रक्षैककेशव ॥
सरोहिणीकदेवेश सलक्ष्मीकामृतामृत ।
रोहिण्या सहितो भूत्वा गृहाणार्घ्यं नमोऽस्तु ते ॥
शंखे तोयं समादाय सपुष्पफलचन्दनम् ।
जानुभ्यामवनीं गत्वा चन्द्रायार्घ्यं निवेदयेत् ॥
उपोषितव्यं भोक्तव्यं तैलक्षारविवर्जितम् ।
शशाङ्काय समुद्दिश्य दद्याद्रजतदक्षिणाम् ॥
इति रोहिणीप्रतिपद्योगः ॥

अथ महोदध्यमावास्या

तत्र कूर्मपुराणे— मार्गे मासि सिनीवाल्यां सागरे यत्र कुत्रचित् ।
स्नात्वाऽश्वमेधावभृथस्नानस्य लभते फलम् ॥
पितृणां तृप्तिरक्षय्या कृते सतिलतर्पणे ।
हविष्यमिष्टैः [1]शस्तान्नैः श्राद्धकल्पैस्तथामृतम् ॥
पूजया चाग्निकार्येण दानैश्चैवाश्वमेधिकम् ।
फलमाप्नोत्यसन्दिग्धं तस्मादेतां समाचरेत् ॥
सागरस्योदकं पीत्वा प्रतिगण्डूषसंख्यया ।
सोमपानसमं पुण्यं वारिणा हृद्गतेन तु ॥

---

(1) शस्तान्नैः—प्रशस्तान्नैः हविष्यान्नैरित्यर्थः ।

भुक्त्वा तस्यावशिष्टान्नं दत्त्वा च पिण्डमात्रकम् ।
तिष्ठेद् वर्षसहस्राणि प्रतिग्रासश्च संख्यया ॥
सागरस्योत्तरे तीरे भूस्वर्गस्य तु दक्षिणे ।
तत्र स्नात्वा च संतर्प्य कृत्वा पूजादिकाः क्रियाः ॥
पायसैर्घृतपूपैश्च दधिभक्तैर्विशेषतः ।
अन्नैः पवित्रभक्ष्यैश्च श्राद्धं कृत्वा प्रभुज्य च ॥
वहुसुवर्णयज्ञानां सप्तानां फलमाप्नुयात् ।
विशाखायास्तुरीयेऽंशे सचन्द्रे च गते रवौ ॥
तथा मैत्रगते भानौ षड्गुणं फलमश्नुते ।
तथैवेन्द्रगते सूर्ये षड्गुणात्षड्गुणं भवेत् ॥
सोमवारे विशेषेण साक्षयफलदा कुहूः ।
तस्यां मोक्षोत्तमे क्षेत्रे देशे श्रीपुरुषोत्तमे ॥
तत्रोषसि समुत्थाय शुचिराचम्य वाग्यतः ।
मनसा केशवं ध्यायन् दक्षिणाभिमुखो व्रजेत् ॥
सागरे विधिवत् स्नात्वा पुराणपुरुषं स्मरेत् ।
पुनर्मौनं समास्थाय केशवं चिन्तयन् व्रजेत् ॥
यत्रासौ तिष्ठते देवः पुराणः पुरुषोत्तमः ।
पुराणपुरुषेत्युक्त्वा स्पृष्ट्वोर्ध्वमवलोक्य च ॥
नमस्य च ततो गच्छेत् प्रासादद्वारदेशतः ।
अवलोक्य ततो देवान् गोविन्दादीन् पुनः पुनः ॥
प्रासादं तं परिभ्राम्य पूर्ववत् प्रतिनामभिः ।
प्रविश्य मन्दिरं रामं सुभद्रां च सुचारिणीम् ॥
कृष्णाञ्च पूर्ववज्जप्त्वा प्रणवञ्च प्रणम्य च ।
तथैवाभ्यर्च्च्य देवेशान् अवलोक्य तथैव च ॥
सह विष्णुकथाभिश्च विष्णु विष्ण्वति वा जपेत् ।
शिरस्यञ्जलिमादाय कुर्याद् वाचो विसर्जनम् ॥

मध्याह्ने च ततः कुर्यात्स्नानदानादिकां क्रियाम्।
पूजां होमं तथा श्राद्धमम्बुपानञ्च भोजनम् ॥
दशायुताश्वमेधानां कृत्वा फलमवाप्नुयात् ।
सागरस्य तु जलान्ते श्रीकृष्णस्य च दक्षिणे ॥
सर्वमक्षय्यमाप्नोति कृष्णमुद्दिश्य कर्मणः ।
स्नानदानादि यत्कर्म सर्वं तत् सागराम्भसा ॥
कर्त्तव्यमुपवासन्तु तृट्पानपचनादृते ।
महाज्यैष्ठ्यान्तु यत्पुण्यं तस्यामेव हि तत्सदा ॥
देशकालहितं पुण्यं हरिणा कूर्मरूपिणा ।
विरञ्चिना पुरा प्रोक्तं महाज्यैष्ठीफलं तथा ॥

इति महोदध्यमावास्या ।

अथार्धोदययोगः

मृगार्केन्दुक्षये पाते वारार्कश्रवणे यदि ।
अर्धोदयः स विज्ञेयः सहस्रार्कग्रहैः समः ॥
अर्कश्रुतिव्यतीपाते युक्ता सा माघपुष्ययोः ।
असावर्धोदयो योगः कोट्यर्कग्रहसन्निभः ॥
अमार्कपातक्षवणैर्युक्ता चेत् पुष्यमाघयोः ।
अर्धोदयः स विज्ञेयः कोटिसन्निहितं फलम् ॥

वायुपुराणे— कोटिजन्मकृतं पापं दृष्ट्वा श्रीपुरुषोत्तमम् ।
अर्धोदयायां मुञ्चन्ति स्नानं कृत्वा महोदधौ ।
यत् किञ्चिद्दीयते दानं सर्वमक्षयमश्नुते ॥

अर्धोदययोगं प्रति स्कन्दपुराणे—

देव देव महादेव ब्रूहि मे वदतां वर ।
पापक्षयकरं नृणां भवेत् काले कदा शिव ॥
प्रायशो दुःखिनो मर्त्याः प्राकृतैः पापसञ्चयैः ।
यदि कश्चिदुपायोऽस्ति ततो ब्रूहि सुनिश्चितम् ॥

शिव उवाच – श्रृणु पुत्र प्रवक्ष्यामि सर्वपापप्रणाशनः ।
सर्वकामप्रदो नृणामुपायो निश्चितो मया ।।
माघ इन्दुक्षये पाते वारेऽर्के श्रवणं यदि ।
अर्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः ।।
तदेव कोटिगुणितं पुरुषोत्तमसन्निधौ ।
तावद् गर्जन्ति पापानि सुवहूनि महान्त्यपि ।।
यावन्नर्धोदयोऽभ्येति सर्वपापप्रणाशनः ।
अदत्त्वा लङ्घितो यस्मात् प्राकृताऽभ्युदयस्य हि ।।
अर्घं हिनस्त्यतः सोऽयमर्धोदय इति स्मृतः ।
दिवैव सोऽयं तु प्रोक्तो न तु रात्रौ षडानन ।।
नान्यः पुण्यतमः कालो योऽर्धोदयसमो भवेत् ।
अर्धोदये महापुण्ये सर्वं गङ्गासमं जलम् ।।
ततो देयानि द्रव्याणि भूदानप्रभृतीनि च ।
पापक्षयादिभिर्मर्त्यैः स्वर्गादिफलकाङ्क्षया ।।
तुलापुरुषदस्तत्र सदाशिवपुरं व्रजेत् ।
हिरण्यगर्भदो मर्त्यो गर्भवासं न चाप्नुयात् ।।
गोसहस्रप्रदो मर्त्यः सहस्राक्षपुरं व्रजेत् ।
एवमादीनि दानानि कृत्वा सम्यग् विधानतः ।।
मुच्यते सर्वपापेभ्यः स नरः सुखमेधते ।
स्कन्द उवाच— प्रायशो हि कदा मर्त्या मन्दभाग्या महेश्वर ।
अशक्ता भूमिदानादौ मुच्यन्ते किल्विषैः कथम् ।।
शिव उवाच— चतुःषष्टि पलं कांस्यं सत्पात्रं तत्र कारयेत् ।
चत्वारिंशत् पलं वापि पञ्चविंशकमेव वा ।।
निधाय पायसं तत्र पद्ममष्टदलं लिखेत् ।
पद्मस्य कर्णिकायान्तु [1]कर्षमात्रं सुवर्णकम् ।।

---

(1) कर्षमात्रं—षोडशरत्तिकापरिमाणम् ।

तदभावे तदर्धं वा तदर्धमपि निक्षिपेत् ।
चन्द्रादिभिरलंकृत्य ब्राह्मणाय निवेदयेत् ।।
सुवर्णमयमन्नं हि व्रह्मपात्रं जनार्दनम् ।
तस्मादेतत् त्रयं दद्यात् त्रयीमन्त्रमभेदतः ।।
सुवर्णमायसं ताम्रं तस्मादेतत्त्रयीमयम् ।
आवयोः साधकं यस्मात्तद् गृहाण द्विजोत्तम ।
इत्युच्चार्य द्विजं भक्त्या नमस्कृत्य क्षमापयेत् ।।
एवं यः कुरुते दानमर्धोदयमहातिथौ ।
सर्वान् कामानवाप्नोति कार्त्तिकेय न संशय ।।
[1]गोचर्ममात्रं यो भूमिं दद्यादर्धोदये सति ।
तदभावे यथाशक्ति यो ददाति वसुन्धराम् ।।
स चक्रवर्त्ती भवति प्रसादान्मम षण्मुख ।
अर्धोदये यो वहुदुग्धदोग्ध्रीं, सवस्त्रवत्सां तु यथोक्तदक्षिणाम् ।
अलंकृताय द्विजपुङ्गवाय, दत्त्वैति लोकं मम पापमुक्तः ।।
अधोगतिं गतान् सर्वानुद्धरत्यखिलान् पितॄन् ।
तिलपात्रप्रदानेन अर्धोदयतिथौ नरः ।।
अर्धोदये भूमिसुवर्णवस्त्र-गोदानमत्र द्विजपुङ्गवेभ्यः ।
अजत्वमिन्द्रत्वमनामयत्वं महीपतित्वं लभते मनुष्यः ।।
एतत्ते कथितं पुत्र प्रीत्या गुह्यतमं परम् ।
श्रुतं पापहरं पुंसां किं भूयः श्रोतुमिच्छसि ।।

इति अर्धोदययोगः ।

---

(1) गोचर्मभूमिपरिमाणं यथा पराशरेण—

गवां शतं सैकवृषं यत्र तिष्ठत्ययन्त्रितम् ।
तत्क्षेत्रं दशगुणितं गोचर्म परिकीर्त्तितम् ।।

(परा. स्मृ. 12-48)

अथ महामाघीयोगः

तत्र वायुपुराणे—मेषपृष्ठे यदा सौरिः[1] सिंहे च गुरुचन्द्रमा ।
भास्करे श्रवणामध्ये महामाघीति सा स्मृता ॥

[2]राजमार्तण्डे— पौर्णमास्यो भवन्त्यन्याः कामं नक्षत्रयोगतः ।
माघ एव तु माघी स्यान्मकरस्थे दिवाकरे ॥

इति महामाघीयोगः ।

अथ पापनाशिनी योगः

तत्र [3]ब्रह्माण्डपुराणे—

पुनर्वसौ [4]देवगुरौ निशाकरे, निशेशवारेऽमर[5]पूज्यकेऽथवा ।
कुम्भे रवौ [6]मत्स्यगते वृहस्पतौ, एकादशी स्यात्खलु पापनाशिनी ॥
जप्यञ्च तप्यञ्च जपोऽर्जितं हुतं, यत्किञ्चिदस्यां किल धर्मसञ्चितम् ।
अनन्तपुण्यानि भवन्ति तस्य वै, सूर्यग्रहात्कोट्यधिकं फलं तथा ॥
[7]क्षारोदके वा त्ववगाह्य यो नरः, सम्पूज्य कृष्णं रजनीमुपोषितः ।
एतेन पापं दशजन्मभिः कृतं, जेघ्नीयते तस्य समग्रमाशु तत् ॥
पुनर्वसौ तु नक्षत्रे यदा चन्द्रवृहस्पती ।

निशेशवारे—चन्द्रवारे गुरोर्वारे वा । कुम्भे रवौ—सौरफाल्गुने ।
मत्स्यगते—मीनगते, कर्कटगत इति केचित् ।

वायुपुराणे— कुम्भे वा यदि वा मीने फाल्गुनैकादशी सिता ।
पुष्यर्क्षे गुरुसंयुक्ता महापापप्रणाशिनी ॥

वराहपुराणे— एकादश्यां सिते पक्षे पुष्यर्क्षं यत्र सत्तम ।
तिथौ भवति सा प्रोक्ता विष्णुना पापनाशिनी ॥

---

(1) सौरिः—शनैश्चरः ।
(2) रा. मा. (पृ–126) ।
(3) का. वि. (पृ–458) ।
(4) देवगुरौ—वृहस्पतौ ।
(5) अमरपूज्यके—गुरुवासरे ।
(6) मत्स्यगते—मीनराशौ गते ।
(7) क्षारोदके—महोदधौ ।

यस्यामाराध्य गोविन्दं जगतामीश्वरं परम् ।
सप्तजन्मकृतात् पापात् मुच्यते नात्र संशयः ।।
यश्चोपवासं कुरुते तिथौ तस्यां द्विजोत्तम ।
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ।।
दानं यत् दीयते किञ्चित् समुद्दिश्य जनार्दनम् ।
होमो वा क्रियते तस्यामक्षयं फलमीरितम् ।।

इति पापनाशिनीयोगः ।

अथ गोविन्दद्वादशीयोगः

तत्र तार्क्ष्यपुराणे—फाल्गुनस्यामले पक्षे कुम्भस्थे दिवसाधिपे ।
जीवे धनुषि योगे च शोभने रविवासरे ।।
पुष्यर्क्षे यदि सम्पूर्णा गोविन्दद्वादशी स्मृता ।
गोविन्दद्वादशीं प्राप्य गच्छेच्छ्रीपुरुषोत्तमम् ।।
व्रतमापूर्य तत्रैव विष्णुसायुज्यमाप्नुयात् ।
महाज्यैष्ठ्यां दशगुणं फलं प्राप्नोति मानवः ।।

ब्रह्माण्डपुराणे— कुम्भस्थे भास्करे राजन् मकरे चाङ्गिरःशनी ।
द्वादशी शुक्लपक्षस्य पुष्यर्क्षे जायते यदि ।।
तिथिरेषा महापुण्या ब्रह्मणा परिकीर्त्तिता ।
गोविन्दद्वादशी नाम महापातकनाशिनी ।।
तस्यां कृत्वोदधिस्नानं दृष्ट्वा च पुरुषोत्तमम् ।
यत्फलं प्राप्यते सम्यक् शृणुष्वावहितो नृप ।।
[1]श्वेतसन्निहितो गङ्गामवगाह्य विधानतः ।
त्रयोदशमहाज्यैष्ठ्याः फलमाप्नोति मानवः ।।

विष्णुधर्मे— फाल्गुनामलपक्षस्य पुष्यर्क्षे द्वादशी यदि ।
गोविन्दद्वादशी नाम महापातकनाशिनी ।।

---

(1) श्वेतसन्निहितो—श्वेतमाधवनिकटे श्वेतगङ्गायां स्नात्वेति तात्पर्यम् ।

तस्यामुपोष्य विधिवन्नरः संक्षीणकल्मषः ।
प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभाम् ॥
तार्क्ष्यपुराणे— दशम्यामेकभक्तश्च नियतात्मा परेऽहनि ।
पञ्चतीर्थं नरः कृत्वा एकादश्यामभोजनम् ॥
ततः प्रभाते विमले दुर्लभा पुरुषोत्तमे ।
द्वादशीयोगयुक्तेयं महापातकनाशिनी ॥
पञ्चतीर्थं पुनः कुर्यात् पूजाञ्च मण्ड़ले हरेः ।
मण्डलं कारयेत्तत्र सर्वतोभद्रसंज्ञितम् ॥
भूतशुद्धिं ततः कृत्वा सोपन्यासं न्यसेद् व्रती ।
पीठपूजादिकं कृत्वा न्यसेद् गोविन्दमासने ॥
पाद्यमर्घ्यादिकं कृत्वा पूजयेदञ्जलित्रयम् ।
गोविन्देति समुच्चार्य पुरुषसूक्तक्रमेण वा ॥
गन्धपुष्पादिनैवेद्यैः धूपैर्नानाविधैरपि ।
समभ्यर्च्च्य जपेन्मन्त्रं तत्त्वं गोविन्दशब्दितम् ॥
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ।
अष्टाविंशतिकं वाऽपि जपेन्मन्त्रं समाहितः ॥
प्रदक्षिणं ततः कुर्याद् प्रणमेद्दण्डवत्क्षितौ ।
कृताञ्जलिपुटो भूत्वा इमं मन्त्रमुदीरयेत् ॥
नमो ब्रह्मण्यदेवाय श्रीधरायाव्ययात्मने ।
ऋग्यजुःसामरूपाय गोविन्दाय नमोऽस्तु ते ॥
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
कृष्णस्य मुखमालोक्य होमं कुर्याद् यथाविधि ।
आज्यं संस्कृत्य विधिवद् जुहुयात् षोडशाहुतीः ॥
पुनराज्येन जुहुयात् सहस्रं शतमेव वा ।
मूलमन्त्रेण मेधावी वाग्यतः पापशुद्धये ॥

पूर्णाहुतिं ततो दद्याद् धृत्वा स्विष्टकृतं तथा ।
जुहुयान्मूलमन्त्रेण घृतेनैवाहुतित्रयम् ॥
दक्षिणाञ्च ततो दद्याद् वित्तशाठ्यविवर्जितः ।
गोभूहिरण्यवासांसि ब्राह्मणेभ्यो [1]विमत्सरः ॥
रात्रौ जागरणं कुर्याद् ध्यानजपपरायणः ।
प्रातः काले तु सम्प्राप्ते त्रयोदश्यान्तु पारणन् ॥
ब्राह्मणान् भोजयेत्तत्र दीनान्धवधिरानपि ।
य इमं कुरुते योगं क्षेत्रे श्रीपुरुषोत्तमे ॥
स याति परमं स्थानं यत्र देवो निरञ्जनः ।
वालवृद्धातुराः कन्या येऽसमर्था उपोषितुम् ॥
हविष्यकारणं कृत्वा विष्णुपूजनतत्पराः ।
[2]आप्तोर्यामफलं प्राप्य विष्णुलोकं व्रजन्ति ते ॥
यत्र तत्र हरेः स्थाने यः कुर्याद् व्रतमीदृशम् ।
स विष्णोः स्थानमासाद्य भुङ्क्ते भोगान् विशेषतः ॥
पुनर्ब्राह्मण्यमासाद्य जातो जातिस्मरो भवेत् ।
वैष्णवं योगमासाद्य कैवल्यं लभते तु सः ॥

[3]राजमार्तण्डे— संयोगे द्वादशी पुष्ये कुम्भसंस्थे दिवाकरे ।
महापुण्यतमे काले पूज्या ब्रह्महरीश्वराः ॥
कुम्भे तिग्ममयूखमालिनि [4]निशानाथोपगूढे गुरौ,
द्वादश्यां विधिवद् विधाय विविधां पूजां हरेः श्रद्धया ।
पूपं प्राश्य हविष्यमच्युतकथां शृण्वन् व्यपोहत्यघम्,
द्वादश्यां विधिरेष पुण्यविगमे कार्यो बुधैः श्रद्धया ॥

---

(1) विमत्सरः—ईर्ष्यारहितः ।

(2) आप्तोर्यामफलं—सप्तसोमसंस्थाकस्य सोमयागस्य अन्तिमा संस्था आप्तोर्यामः ।

(3) रा. मा. (पृ–127) ।

(4) निशानाथः—चन्द्रः ।

द्वादश्यां शुक्लपक्षे शशिनि गुरुयुते कुम्भसंस्थे [1]खरांशौ,
पूजां कृत्वा मुरारेर्विधिविहितहविः प्राशयेन्मन्त्रपूतम् ।
पुष्या ऋक्षं न चेत् स्यात्तदपि विधिमयं वासुदेवस्य कृत्स्नम्,
द्वादश्यामेव कुर्यान्नहि भवति विधिः द्वादशीमन्तरेण ।।

इति गोविन्दद्वादशीयोगः ।

अथ वारुणीयोगः

स्कन्दपुराणे— [2]वारुणेन समायुक्ता [3]मधौ कृष्णात्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्यग्रहशतैः समा ।।
शनिवारसमायुक्ता सा महावारुणी स्मृता ।
गङ्गायां यदि लभ्येत कोटिसूर्यग्रहैः समा ।।
शुभयोगसमायुक्ता शनौ शतभिषा यदि ।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ।   कुलं—पुरुषः ।

ज्योतिषे— चैत्रेऽसिते वारुणऋक्षयोगे त्रयोदशी सूर्यसुतस्य वारे ।,
योगे शुभे स्यात्करणे गरे च गङ्गाजलार्कग्रहकोटितुल्यः ।।

योग इति शेषः। रात्रावपि वारुण्यां गङ्गायां स्नानं कर्त्तव्यम् ।

ब्रह्माण्डे— दिवारात्रौ च सन्ध्यायां गङ्गायान्तु प्रसङ्गतः ।
स्नात्वाश्वमेधजं पुण्यं गृहेऽप्युद्धृततज्जलैः ।। इति वचनात् ।
महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।
तस्यां स्नानं न कर्त्तव्यं काम्यनैमित्तिकादृते ।। इति
महानिशायामपि काम्यनैमित्तिकस्नानं प्रतीयते ।

इति वारुणीयोगः ।

अथ [क]सिंहबृहस्पतियोगे गोदावरीस्नानयोगः

शिवपुराणे— बृहस्पतिर्यदा सिंहं निमग्ने संक्रमिष्यति ।
तस्मिन् क्षणे तस्य स्थाने त्वं हि पूज्या भविष्यसि ।।

---

(1) खरांशौ—सूर्ये ।
(2) वारुणेन—शतभिषानक्षत्रेण ।
(3) मधौ—पूर्णिमान्तचैत्रे मासि ।

(क) खगघङच पुस्तकेषु नास्त्ययं विषयः ।

ततो [1]गोदावरीवापीसंयोगे स्नानमुत्तमम् ।
ये कुर्वन्ति नरा धन्या ब्रह्मलोकमवाप्नुयुः ॥

माहात्म्यम्— गोदावर्य्यां नरः स्नात्वा दृष्ट्वा मल्लिङ्गमुत्तमम् ।
शिवप्रीतिमवाप्नोति मन्त्रसिद्धिस्तु जायते ॥
अहोभाग्यमहोभाग्यं मुनीनां भावितात्मनाम् ।
गोदावर्य्यां सकृत्स्नानं दुरितौघविनाशनम् ॥

[2]एकाम्रके विशेषः—

हेलयाऽश्रद्धया वाऽपि यद्येकाम्रवने मम ।
दर्शनं कोटियज्ञानां फलदं नात्र संशयः ॥
गोदावरी गोमती च कृष्णा चैव पुनःपुना ।
ब्राह्मी रेवा च कावेरी ततो वैतरणी स्मृता ॥
जाह्नवी च ततः प्रोक्ता तपोगन्धवहा सरित् ।
इत्येता दश धाराश्च सन्ति क्षेत्रे[3] सुरार्चिते ॥

गोदावरी स्नानमन्त्रः—

सिंहराशिगते जीवे गोदावरि शुभप्रदे ।
निमज्जेऽहं महाभागे अनन्तफलदा भव ॥
गोदावरि महापुण्ये त्रिकोटिकुलपाविनि ।
पापं नाशय मे देवि निमज्जेऽहं तवाम्भसि ॥
गोदावरि महापुण्ये महाभागे सरिद्वरे ।
निमज्जेऽहं पुण्यशीले मां समुद्धर पातकात् ॥

नमस्कारः— त्र्यम्बकस्य जटोद्भूते गौतमस्याघनाशिनि ।
सप्तधासागरं याते गोदावरि नमोऽस्तु ते ॥

---

(1) भुवनेश्वरक्षेत्रे विन्दुसागरस्योत्तरांशे गोदावर्य्याः स्थानम् । तत्र विन्दुसागरस्योत्तरतीरे गोदावरीमुद्दिश्य स्नातव्यम् ।

(2) ए. च. (अ–3, पृ–20), कपि. सं. (अ–17, पृ–82) ।

(3) क्षेत्रे सुरार्चिते—भुवनेश्वरे लिङ्गराजक्षेत्रे ।

गोवाहनजटाजूटगोमण्डलसुसंस्थिते ।
गोविन्दचरणोद्भूते गोदावरि नमोऽस्तु ते ॥

प्रार्थना — पापिष्ठा ये च पाषण्डा ये च ब्राह्मणनिन्दकाः ।
गुरुभक्तिविहीना ये स्नात्वा ते त्रिदिवं गताः ॥
गोदावर्यां सकृत्स्नानं सकृद्दानं प्रदीयते ।
ब्रह्महत्यादि पापानि विलयं यान्ति तत्क्षणम् ॥

इति गोदावरीस्नानयोगविधिः ।

अथ [क]कृष्णागङ्गास्नानविधिः

योगस्तु— कन्यां गते देवगुरौ कृष्णास्नानं करोति यः ।
ब्रह्महत्यादि पापानि कुलकोटिं समुद्धरेत् ॥
इन्द्रनीलाद्रिमूलार्द्रयोर्वासः पापविनाशकः ।
क्षेत्रं प्रयागकाशीभ्यां सत्यं शतगुणाधिकम् ॥
तत्र स्नात्वा हरिं दृष्ट्वा पुनर्जन्म न लभ्यते ।
कावेरी तुङ्गभद्रा च कृष्णवेणी च [1]गौतमी ॥
भागीरथी च ह्येतास्तु पञ्च गङ्गाः प्रकीर्त्तिताः ॥

स्नानमन्त्रस्तु — कृष्णे कृष्णाङ्गसम्भूते जन्तूनां पापहारिणी ।
भक्त्या स्नानं करोम्यद्य मम पापक्षयं कुरु ॥

वाक्यम्-आन्ध्रेदेशे [2]श्रीदुर्गक्षेत्रे कृष्णागोदावर्यारन्तराले इन्द्रनीलाद्रिमूलार्द्रयोर्मध्ये च श्रीकृष्णागङ्गातीरे देवब्राह्मणसन्निधौ । नृसिंहदर्शनमन्त्रस्तु सत्यज्ञानमिति ।

इति कन्यागुरौ कृष्णास्नानयोगविधिः ।

---

(1) गौतमी — गोदावरी ।

(2) जयदुर्गामन्दिरसमीपे साम्प्रतिक "विजयवाडा" नामक स्थाने ।

(क) विषयोऽयं खघङच पुस्तकेषु नास्ति ।

अथ [क]सागरस्नानविधिः

तत्रादावन्यस्मिन् प्रातः स्नानादिकं कृत्वा भैरवाज्ञां गृहीत्वा स्नानार्थं सिन्धोस्तीरं व्रजेत् । भैरवाज्ञा यथा—

तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥

तत उग्रसेनस्य पार्श्वं गत्वा प्रार्थयेत् ।

[1]ॐउग्रसेन महावाहो वलवन्नुग्रविक्रम ।
समुद्रस्नानकामोऽहमनुज्ञां दातुमर्हसि ॥

इत्यनुज्ञां गृहीत्वा गच्छेत् । तीरे तिष्ठन् समुद्रं प्रार्थयेत् ।

[2]अश्वमेधाङ्गगोकोटिखुरक्षुण्णमहीतले ।
तन्मूत्रफेनदानाम्भः पूरिताखिलपावन ॥
स्नातुं तवागतः पुण्ये सर्वतीर्थमये जले ।
पूर्वजन्मसहस्रोत्थं पापं स्नानाद्विमोचय ॥

इत्यनुज्ञां गृहीत्वा महावाक्यपुरःसरं संकल्पं कुर्यात् । ततः स्नानमन्त्रः—

[3]अश्वमेधाङ्गसम्भूत तीर्थसर्वाघनाशन ।
जन्मकोटिभवं पापं त्वयि स्नानाद् विनश्यतु ॥

ततः प्रार्थना— [4]जन्मकोटिसहस्रेषु यत्पापं पूर्वमर्जितम् ।
तच्छेषं विलयं यातु देहि मे ब्रह्मशाश्वतम् ॥

ततो नमस्कारः— [5]त्वमग्निर्जगतां नाथ रेतोधाः कामदीपनः ।
प्रधानं सर्वभूतानां जीवानां प्रभुरव्ययः ॥
अमृतस्यारणिस्त्वं हि देवयोनेऽप्यपां[6] पते ।

---

(1) स्कन्द. वैष्णव. (2-30-65/66)
(2) स्कन्द. वैष्णव. (2-31-6/7)
(3) स्कन्द. वैष्णव. (2-31-9)
(4) स्कन्द. वैष्णव. (2-30-101) ।
(5) स्कन्द. वैष्णव. (2-30-98-100)
(6) अपां पतिः—वरुणः ।

(क) विषयोऽयं खघङच पुस्तकेषु नास्ति ।

[1]वृजिनं हर मे सर्वं तीर्थराज नमोऽस्तु ते ।।
सागरस्योत्तरे तीरे [2]भूस्वर्गस्य च दक्षिणे ।
तत्र स्नात्वा च संतर्प्य कुर्यात्पूजादिकाः क्रियाः ।
स्नात्वाश्वमेधावभृथस्नानस्य लभते फलम् ।।
पितृणां तृप्तिरक्षय्या कृते सतिलतर्पणे ।
वहुसुवर्णयज्ञानां सप्तानां फलमाप्नुयात् ।।
सागरस्योदकं पीत्वा प्रति गण्डूषसंख्यया ।
सोमपानसमं पुण्यं वारिणा हृद्गतेन तु ।।
सागरे विधिवत्स्नात्वा दृष्ट्वा नारायणं परम् ।
यत् किञ्चिद्दीयते दानं तद्दानं मेरुसम्मितम् ।।
तदा दानानि देयानि भूदानप्रभृतीनि च ।
पापक्षयादिभिर्मर्त्यैः स्वर्गादिफलकाङ्क्षया ।।
कोटिजन्मकृतं पापं नाशयेद् तत्क्षणाद् ध्रुवम् ।
स्नानं दानं तथा जप्यमक्षय्यफलभाग् भवेत् ।।

सागरे विधिवत्स्नात्वा मौनीभूत्वा प्रासादान्तः प्रविश्य श्रीजगन्नाथं वलभद्रं सुभद्रां सुदर्शनं सम्पश्येत् । तत्र गरुडनमस्कारः—

[3]छन्दोमय जगद्धामन् यानरूपं त्रिवृद्वपुः ।
यज्ञरूपजगद्व्यापिन् प्रीयमाणाय ते नमः ।।
वैनतेय नमस्तुभ्यं नमस्ते कश्यपात्मज ।
विष्णुवाह नमस्तुभ्यं पक्षिराज नमोऽस्तु ते ।।

ततः कल्पवटनमस्कारः—

[4]अमर त्वं सदा कल्प विष्णोरायतनं महत् ।

---

(1) वृजिनम्—किल्विषम् ।

(2) भूस्वर्गस्य— स्वर्गद्वारस्य, पुरुषोत्तमक्षेत्रे महोदधेस्तीरे स्वर्गद्वारनाम्ना स्थानविशेषोऽस्ति ।

(3) स्कन्द. वैष्णव. (2-30-30/31) । (4) स्कन्द. वैष्णव. (2-30-26/27)

न्यग्रोध हर मे पापं विष्णुरूप नमोऽस्तु ते ॥
नमोऽस्त्वव्यक्तरूपाय महाप्रलयस्थायिने ।
एकाश्रयाय जगतां कल्पवृक्षाय ते नमः ॥

ततो बलभद्रदर्शनं—
रेवती प्राणनाथस्त्वं कामपाल हलायुध ।
भक्त्यानतं पादयोस्ते रक्ष मामप्यरक्षितम् ॥

ततो जगन्नाथस्य—[1]देव देव जगन्नाथ संसारार्णवतारक ।
भक्त्यानुग्राहक सदा रक्ष मां पादयोर्नतम् ॥
जयकृष्ण जगन्नाथ जय सर्वाघनाशन ।
जयाशेष जगद्वन्द्य पादाम्भोजे नमोऽस्तु ते ॥

सुभद्रायाः— सुभद्रे सुभगे देवि सदा भद्रप्रदायिनि ।
त्वत् प्रसादान्महालक्ष्मीः स्थिरीभवतु सर्वदा ॥

सुदर्शनस्य— [2]सुदर्शन नमस्तेऽस्तु कोटिसूर्यसमप्रभ ।
अज्ञानतिमिरान्धस्य विष्णोर्मार्गं प्रदर्शय ॥

एवं दर्शनादिकं समाप्य ब्राह्मणभोजनं कुर्यात् । इष्टैः सह स्वयमपि भुञ्जीयात् ।

इति सागरस्नानविधिः ।

अथ [क]संगमस्नानयोग

शतानन्दः— श्रवणे संगमाः पुण्याः कुरुक्षेत्रसमाः स्मृताः ।
विशेषाद् वुधसंयुक्ततृतीयायां विशेषतः ॥

इति संगमस्नानयोगः ।

इति स्नानदानादिपुण्ययोगाः ।

---

(1) स्कन्द. वैष्णव. (2-30-36/37) ।
(2) स्कन्द. वैष्णव. (2-30-86/87) ।

(क) विषयोऽयं पुस्तकेषु नास्ति ।

अथ [क]गङ्गास्नानार्थं यात्राविधिः

तत्रादौ यात्रामन्त्र.—

गङ्गे गन्तुं प्रतीरन्ते यात्रा या विहिता मया ।
निर्विघ्नात् सिद्धिमाप्नोतु त्वत्प्रसादात्सुरेश्वरि ॥

अत्र पथिपठनमन्त्रः—

गंगे देवि जगन्मात र्देहि मे दर्शनं शुभम् ।
वचोभिः कोमलैरेभिः कुर्यात् श्रमनिवारणम् ॥

पथिमानसमन्त्रः—जन्मजन्मार्जितं पापं स्वल्पं वा यदि वा वहु ।
गङ्गादेवीप्रसादेन सर्वं मे यातु संक्षयम् ॥

पथिक्रिया— शौचमाचमनं [1]स्नानं नैर्मल्यं मलकर्षणम् ।
वस्त्रप्रक्षालनं क्रीडां भक्तिं श्रद्धां समाचरेत् ॥

---

(1) स्नानं द्विविधं यथा— माधवीये शङ्खः —

स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः ।
तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं भवेत् ॥

मुख्यस्नानमपि षड्विधं यथा आग्नेयपुराणे—

नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम् ।
क्रियास्नानं तथा षष्ठं पोढ़ास्नानं प्रकीर्त्तितम् ॥

षड्विधानां स्नानां लक्षणानि यथा—

अस्नातश्च पुमानार्हो जपाग्निहवनादिषु ।
प्रातः स्नानं तदर्थन्तु नित्यस्नानं प्रकीर्त्तितम् ॥
चण्डालशवयूपादि स्पृष्ट्वा स्नानं रजस्वलाम् ।
स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं हि तद् ॥
पुण्यस्नानादिकं यत्तु दैवज्ञविधिचोदितम् ।
तद्धि काम्यं समुद्दिष्टं नाकामस्तत्प्रयोजनम् ॥

(क) विषयोऽयं खगघङच पुस्तकेषु नास्ति ।

अन्यतीर्थप्रशंसां च ह्यन्यतीर्थरतिः तथा ।
अन्यतीर्थस्य गमननियमं परिवर्जयेत् ॥

दर्शनमन्त्रः— अद्य मे सफलं जन्म जीवितञ्च सुजीवितम् ।
साक्षाद् ब्रह्मस्वरूपां त्वामपश्यं चर्मचक्षुषा ॥
धन्या मे जननी चाद्य धन्यं मम कुलं हि तत् ।
विष्णुस्वरूपां त्वां देवीमपश्यं चर्मचक्षुषा ॥
धन्यः पिता मे श्वशुरो धन्यो मातामहस्तथा ।
त्रिपुरारिशिरश्चारामपश्यं चर्मचक्षुषा ॥

नमस्कारमन्त्रः—देवि ! त्वद्दर्शनादेव महापातकिनो मम ।
विनष्टमभवत्पापं जन्मकोटिसमुद्भवम् ॥

स्पर्शनमन्त्रः— गङ्गे देवि जगद्धात्रि, पादाभ्यां सलिलं तव ।
स्पृशामीत्यपराधं मे प्रसन्ना क्षन्तुमर्हसि ॥

प्रार्थना— स्वर्गारोहणसोपान त्वदीयमुदकं शुभे ।
अतः स्पृशामि पादाभ्यां गङ्गे देवि नमोऽस्तु ते ॥
ततस्तु मस्तके धृत्वा गाङ्गेयं वारि भक्तितः ।
स्नानार्थं प्रपठेत्स्तोत्रं प्राज्ञो गंगेति कीर्त्तयेत् ॥

ॐ गंगेदेवीति मन्त्रस्य । ब्रह्मविष्णुविरूपाक्षा ऋषयः । ऋग्यजुःसामानि छन्दांसि । श्रीगङ्गादेवी देवता । ममेहजन्मनि जन्मान्तरे वा ज्ञानाज्ञानसकृदत्यन्ताभ्यासकृतब्रह्म-

---

अनु० जप्तुकामः पवित्राणि वाऽर्चिष्यन् देवताः पितॄन् ।
स्नानं समाचरेद्यस्तु क्रियाङ्गं तत्प्रकीर्त्तितम् ॥
मलापकर्षणं नाम स्नानमभ्यङ्गपूर्वकम् ।
मलापकर्षणार्थाय प्रवृत्तिस्तस्य नान्यथा ॥
सरःसु देवखातेषु तीर्थेषु च नदीषु च ।
क्रियास्नानं समुद्दिष्टं स्नानं तत्र मनाक् क्रिया ॥

आचा. भू. (पृ–1)

हत्यादिपञ्चमहापातकातिपातकोपपातकक्षयपूर्वकसकलभोगप्राप्तिपूर्वकश्रीसुरेश्वरविष्णुलोकप्राप्तये पतितपाविन्यामलकनन्दायां गङ्गायां स्नानकर्मणि विनियोगः ।

ध्यानम् –

शितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां, करधृतकलशोद्यच्चित्फलाभीत्यभीष्टाम् ।
विधिहरिहररूपां शक्रदेवादिजुष्टाम्, कलितशितदुकूलां जाह्नवीं तां नमामि ॥

इति ध्यात्वा स्नानार्थं संकल्पं कुर्यात् । तद्यथा–देशकालवाक्यानन्तरं महावाक्यं कृत्वा, अमुकसगोत्रः श्रीमान् अमुकदेवशर्मा मम ज्ञानाज्ञानसप्तजन्मावच्छिन्नाभक्ष्यभक्षणपतितान्नभक्षणतत्सम्भाषणतत्संसर्गब्रह्महत्यादिपञ्चमहापातकातिपातकोपपातकप्रकीर्णकसंकीर्णकानुलोमप्रतिलोमानिर्वचनीयरजस्वलास्वस्त्रीगमनतत्संसृष्टान्नभक्षणसंततासत्यभाषणमण्यादिरत्नापहरणसामान्यसकलवस्त्वपहरणसखापितृमातृपुत्रपत्न्यादिसर्वसाधुवधपितृमातृपत्नीपुत्रसाधुविप्रादि-सर्वप्राणिहिंसाजनितमहारौरवादि-नरकपतनयमकिङ्करताडननिवारणवहुपरदारागमनवालयौवनवार्धक्यदशादिजन्यसर्वपापक्षयपूर्वकब्रह्मलोकाधिकरणकपरमहंसदर्शनसाङ्गाधीतचतुर्वेदब्राह्मणसम्प्रदानककपिलालक्षधेनुसालंकृतकन्याशतसहस्रदानफलश्रीमन्नारायणदक्षिणभुजवासतदुत्तरीयमर्त्यलोकप्राप्तिसर्वगुणाश्रयानेकभोगैश्वर्यसुखयशोविश्वदातृत्वफलप्राप्तिकामः श्रीभगवतो वासुदेवस्य प्रीतये महावारुण्यां महामहावारुण्यां वा, त्रिपथगामिन्यामलकनन्दायां गङ्गायां स्नानसंकल्पमहं करिष्ये । स्नानमन्त्रस्तु—

ॐ विष्णुपादाग्रसम्भूते गङ्गे त्रिपथगामिनि ।
धर्मद्रवीति विख्याते पापं मे हर जाह्नवि ॥

कर्दमलेपनमन्त्रः– त्वत्कर्दमैं रतिस्निग्धैः सर्वपापप्रणाशनैः ।
मया संलिप्यते गात्रं मातर्मे पातकं हर ॥
ततः पूर्वोक्तमन्त्रेण पुनः स्नानं समाचरेत् ।
ततस्तु मुण्डनं कार्यं गंगातीरे प्रयत्नतः ॥

मुण्डनमन्त्रः—

जानन्तु देवाः सततं दिविस्था (ष्णा) धर्मार्थतो मुण्डनमाश्रयामि ।
यशांसि श्रीकीर्त्तिविभूतयश्च, भवतु मे विष्णुपुरे निवासः ॥

पुनः स्नानार्थं गंगां प्रार्थयेत् । यथा—

ब्रह्मस्वरूपा गंगात्वं स्नानमाचर्यते मया ।
त्वदीये निर्मले तोये यथोक्तं फलदा भव ॥

एवं सम्प्रार्थ्य पूर्वोक्तस्नानमन्त्रेण स्नानं कार्यम् । ततो जलगण्डूषपानम् ।

तन्मन्त्रः— वहुकन्याभूरिभूमि वहुगोदाने यत्फलम् ।
रथाश्वगजदानानां यत्फलं समुदाहृतम् ।
ततोऽधिकफलं देहि गंगे त्वत्तोयपानतः ॥

वारुण्यां स्नानमन्त्रः—

अयि गंगेऽनवद्यांगि हरचूडाकृताश्रये ।
मज्जतो हर मे पापं वारुण्यां तव वारिणि ॥

महामहावारुण्यां स्नानमन्त्रः—

त्रिकोटिकुलमुद्धृत्य महापापं त्रिकोटिजम् ।
महामहेतिवारुण्यां मज्जतो हर जाह्नवि ॥

सर्वत्र विष्णुपादाग्रसम्भूतेति ।

जड़तां जाड्यतां मोच्य पंकैः पङ्कं व्यपोहतु ।
अस्माकं ध्यायतां तेन क्षयं यातु ह्यधोगतिः । इति ।

मन्त्रं समुच्चार्य यथेच्छयास्नानं समाप्य सन्ध्यादिकं कृत्वा रुद्राक्षमाला-गंगामृत्तिकादि ग्रहणं कृत्वा पितॄन् ध्यात्वा तर्पयेत् । ततः करौ सम्पुटीकृत्य स्तुतिमारभेत ।

तद्यथा— विष्णुपादोदकोद्भूता ब्रह्मलोकादुपागता ।
त्रिभिः स्रोतोभिरास्नातं या पुनाति जगत्त्रयम् ॥
स्वर्गारोहणनिःश्रेणी सन्ततानन्दकारिणी ।
अनेकदुरितोद्धारकारिणी ब्रह्मरूपिणी ॥
श्रीमहेशजटाजूटवासिनी दुःखनाशिनी ।
भजमानजनस्वान्तकालकेलिविनाशिनी ॥
सगरान्वयनिर्वाणकारिणी स्वर्गचारिणी ।
त्रिमार्गचारिणी देवी लोकानां कीर्त्तिकारिणी ॥

दर्शनस्पर्शनस्नानकीर्त्तनध्यानसेवनैः ।
पुण्यान् सुपुण्यपुरुषान् पावयन्ती सहस्रशः ॥
गंगा गंगेति गंगेति यैस्त्रिसन्ध्यमतन्द्रितैः ।
सुदूरस्थैश्च तत्पापं हन्ति जन्म त्रयार्जितम् ॥
योजनानां सहस्रेषु गङ्गां यः स्मरते नरः ।
अपि दुष्कृतकर्माऽसौ लभते परमां गतिम् ॥ इति प्रार्थयेत् ।

इति गङ्गास्नानविधिः ।

अथ [क]दैवव्रतानुरूपतिथिनिरूपणम्

तत्र ज्योतिःशास्त्रे—

विवाहव्रतयज्ञेषु सौरमानं प्रशस्यते ।
पार्वणे चाष्टकाश्राद्धे चान्द्रमिष्टं तथाब्दिके ॥

जाबालिः— दिवा रात्रौ व्रतं यत् स्यादेकमेव व्रतं तु यत् ।
तस्यामुभयव्यापिन्यां नारभेत व्रतं व्रती ॥

उभयव्यापिन्यां—दिनद्वयव्यापिन्याम् ।

पद्मपुराणे— दिवा रात्रौ व्रतं सर्वमेकमेव तिथौ स्मृतम् ।
तस्यामुभययोगिन्यां नारभेत व्रतं व्रती ॥

अत्र नारभेतेति वचनादारम्भस्यैव प्रतिषेधः ।

ज्योतिःशास्त्रे— अहःसु तिथयः पुण्याः कर्मानुष्ठानतो दिवा ।
नक्तादिव्रतयोगेषु रात्रियोगो विशिष्यते ॥

दिवामात्रे कर्मानुष्ठानार्थम् । अहःसु स्थिता दिनमात्रव्यापिन्यस्ति या सा पूज्या इत्यर्थः । मार्कण्डेयः—

कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।
तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम् ॥

व्रतग्रहणानन्तरं दिनमात्रसाध्ये च यदा तिथिद्वैधं तदा पूर्वा ग्राह्या परा वेत्याशङ्कायामाह बृहन्मनुः—

(क) विषयोऽयं च पु. नास्ति ।

यथास्तं सविता याति पितरस्तामुपासते ।
तिथिस्तेभ्योऽपराह्णे हि स्वयं दत्ता स्वयम्भुवा ॥
दैवे कर्मणि सम्प्राप्ते यस्मादभ्युदितो रविः ।

बौधायनोऽपि— उदयन्नेव सविता यां तिथिं प्रतिपद्यते ।
सा तिथिः सकला ग्राह्या दानाध्ययनकर्मसु ॥

देवलोऽपि— यां तिथिं समनुप्राप्य चोदयं याति भास्करः ।
सा तिथिः सकला ज्ञेया स्नानदानजपादिषु ॥

[1]शङ्करगीतायां—सा तिथिस्तदहोरात्रं यस्यामभ्युदितो रविः ।
तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम् ॥

ह्रासवृद्धी न कारणमिति वचनात् ।

खर्वो दर्पस्तथा हिंस्रा त्रिविधं तिथिलक्षणम् ।
खर्वदर्पौ परौ ग्राह्यौ हिंस्रा स्यात् पूर्वकालिकी ॥

इत्यादि स्मृत्यन्तरं नियमव्रतादिषु न प्रविशतीति दर्शितम् ।

यां तिथिं समनुप्राप्य चास्तं याति दिवाकरः ।
सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु ॥

इति स्मृत्यन्तरवचनं तूदयास्पर्शतिथिविषयम् । दिनद्वयेऽप्युदयगामित्वे ग्राह्यात्वमुक्तमाग्नेयपुराणे— मासि सम्वत्सरे चैव तिथिद्वैधं यदा भवेत् ।
[क]तत्रोत्तरोत्तमा ग्राह्या पूर्वा स्यान्मलसम्भवा ॥

युग्मतिथिषु विशेष उक्तः परिशिष्टे—

युग्माग्नीकृतभूते च षण्मुनीवसुरन्ध्रकैः ।
रुद्रोऽथ द्वादशीयुक्तश्चतुर्दश्या तु पूर्णिमा ॥
प्रतिपदि त्वमावास्या तिथ्योर्युग्मं महाफलम् ।
एतद्व्यस्तं महादोषं प्रवदन्ति मनीषिणः ॥

---

(1) विष्णुधर्मो. (1-60-25/26) ।

(क) "तत्रोत्तरा तु सा" इति ग पाठः ।

द्वितीयातृतीये । चतुर्थीपञ्चमौ । षष्ठीसप्तम्यौ । अष्टमीनवम्यौ । एकादशीद्वादश्यौ । चतुर्दशीपौर्णमास्यौ । प्रतिपदमावास्ये । इति युग्मानि । द्वितीयातृतीयायुग्मतिथौ द्वितीयायास्तृतीयायाश्च कृत्यं कर्त्तव्यमित्यर्थः । एवमपरयुग्मतिथिष्वपि ज्ञेयम् । तथा च शङ्करगीतायाम्—

एकादश्यष्टमी षष्ठी द्वितीया तु चतुर्थिका ।
चतुर्दश्यप्यमावास्या उपोष्याः स्युः परान्विताः ॥

एकादश्याद्याश्चतुर्थीपर्यन्ताः पक्षद्वयस्य सम्बन्धिन्योऽविशेषात् । चतुर्दशी तु शुक्लैव । तथा च तत्रैव— अमावास्याष्टमी षष्ठी शुक्ला चैव चतुर्दशी ।
एताः परयुताः कार्याः पराः पूर्वेण संयुताः ॥

परा उपान्त तिथिभ्यः परभूताः प्रतिपदादयः ।

मार्कण्डेयपुराणे—द्वितीयैकादशी षष्ठी अष्टमी च चतुर्दशी ।
कर्त्तव्याः परसंयुक्ता अपराः पूर्वसंयुताः ॥ अपरास्तृतीयादयः ।

[1]गर्गः— एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ।
अमावास्या द्वितीया च उपोष्याः स्युः परान्विताः ॥

पौर्णमासी चतुर्दशीति समस्तपदम् । तेन शुक्लाचतुर्दशीत्यर्थं इति केचित् । तदयुक्तम् । शुक्ला चैव चतुर्दशी[2]त्यकरणात् । किन्त्वसमस्तमेव । तेन पौर्णमास्यपि परयुतैवोपोष्या । तथा च शतानन्दलिखितं वाक्यम्—

तृतीया पौर्णमासी च सोपोष्या या परान्विता ।
तिथिहानौ पूर्वविद्धा पित्र्यर्थे चापराह्णिकी ॥

तिथिहानौ–तिथिक्षये । ननु युग्माग्नी इह द्विवचनविरुद्धमेतत् । सत्यम् । उपवासव्रते परविद्धा, तदितरव्रते पूर्वविद्धा । पौर्णमासी तृतीया चेति न कश्चिद्विरोधः । अथवा तिथिहानौ तिथिह्रास इत्यर्थे तिथिवृद्धौ परविद्धा, तिथिह्रासे पूर्वविद्धा पूज्येति व्यवस्थापनीयम् । गारुडपुराणे—

चतुर्दशीं प्रतिपदं पूर्वमिश्रामुपवसेद् ।
पौर्णमासीममावास्यां प्रतिपन्मिश्रितां मुने ॥

---

(1) का. वि. (पृ–476), का. मा (पृ–190) (2) स्पष्टतया अप्रदर्शितत्वात् ।

द्वितीयां तृतीयामिश्रां तृतीयामप्युपावसेत् ।
चतुर्थ्या सङ्गता नित्यं चतुर्थीं वा जयान्विताम् ॥
पञ्चमी षष्ठीसंयुक्तां षष्ठ्या युक्तां तु सप्तमीम् ।

चतुर्थी कृष्णपक्षस्येति शेषः ।

षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी ।
एताः परयुताः पूज्याः पराः पूर्वेण संयुता ॥

[1]इति स्मृतेः । शिवरात्रिव्रतमधिकृत्य—

माघफाल्गुनयोर्मध्ये कृष्णा या च चतुर्दशी ।
कामयुक्ताऽपि सोपोष्या कुर्वन् जागरणं व्रती ॥

[2]इत्याग्नेयपुराणवचनात् । प्रतिपदं शुक्लां चतुर्थीं वाऽनया युतामिति । अनया वक्ष्यमाणया पञ्चम्या । अथवा अनया तृतीयया । अत्र पक्षे गणेश्वरचतुर्थीव्रतमधिकृत्यैतद् वेदितव्यम् । पञ्चमीषष्ठीसंयुतामिति । तेन पञ्चमीत्यस्यानया चतुर्थ्या युतामित्यर्थः । संयुक्तामिति । सप्तम्येति परिणतानुषङ्गः । एतद् व्यस्तं महादोषमिति यदुक्तं तदुपवर्ण्यमप्यस्ति ।

यथा नारदीयपुराणे—

पूर्वविद्धा न कर्त्तव्या द्वितीया षष्ठिकैव च ।
अष्टम्येकादशी भूता धर्मकामार्थकाङ्क्षिभिः ॥

भूता – शुक्लचतुर्दशी । [3]परिशिष्टे —

नागविद्धा तु या षष्ठी सप्तम्याश्च तथाष्टमी ।
दशम्येकादशीविद्धा त्रयोदश्या चतुर्दशी ॥
भूतविद्धाप्यमावास्या न ग्राह्या मुनिपुङ्गवैः ॥

नागः—पञ्चमी, भूतं—चतुर्दशी ।

गर्गः— नन्दाविद्धा तु या पूर्णा द्वादशी मकरे सिता ।
भृगुणा नष्टचन्द्रा च ता एता निष्फलाः स्मृताः ॥

---

(1) का. वि. (पृ-476) (2) अग्नि. (193-1/2) ।
(3) सौरपु. (51-10) ।

पूर्णा—पञ्चमी, दशमी च । पौर्णमासीव्रतादन्यत्र ।

[1]स्कन्दपुराणे— षष्ठ्येकादश्यमावास्या पूर्वविद्धा तथाष्टमी ।
सप्तमी परविद्धा च नोपोष्यं तिथिपञ्चकम् ॥

[2]जावालिः— नागविद्धा तु या षष्ठी रुद्रविद्धो दिवाकरः ।
कामविद्धा भवेद्विष्णुरपूज्यास्ते तु वासराः ॥

रुद्रः—षष्ठी । दिवाकरः—सप्तमी । कामस्त्रयोदशी । विष्णुर्द्वादशी ।

[3]विष्णुधर्मोत्तरे—अष्टम्या नवमीयुक्ता नवम्या चाष्टमी तथा ।
अर्द्धनारीश्वरप्राया उमामाहेश्वरीतिथिः ॥

राजमार्तण्डे— दिवातिव्यापिनी षष्ठी सप्तम्यामष्टमी भवेत् ।
षष्ठ्यामेव तदा कुर्याद् आदित्यव्रतमुत्तमम् ॥
षष्ठी रात्रिकलां यावत् सप्तम्यामष्टमी भवेत् ।
षष्ठ्यां सौरव्रतं कुर्यादष्टम्यामेव पारणम् ॥

दिवातिव्यापिनीति । दिनमतिक्रम्य रात्रिमपि व्याप्नुवती ।

षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी ।
एताः परयुताः पूज्याः पराः पूर्वयुतास्तथा ॥

कृष्णपक्षे चतुर्दशीति केचित् । तदसत् । तदा ह्यत्र कृष्णपक्षस्य ग्रहणं, शुक्ला चैव चतुर्दशीत्यत्र शुक्लग्रहणमनर्थकं स्यात् । यासां युग्मत्वसम्भवे व्यस्तानां दोष उक्तस्तासां युग्मत्वाभावे सति व्यस्तानामपि पूज्यत्वम् ।

तदुक्तं वौधायनेन—

घटिका वाऽप्यमावास्या प्रतिपत्सु न चेत्तदा ।
भूतविद्धाऽपि सा कार्या दैवे पित्र्ये च कर्मणि ॥

तिथिहानौ पूर्वविद्धेति वचनादन्यापि निर्दिष्टयुग्मतिथित्वशांभावे पूर्वविद्धा ग्राह्येति निर्णेतव्यम् । अत्र सर्वत्रोपवासपदहोरात्रसाध्यव्रतादिपरम् । अत्र वारुणोदयसमय—

---

(1) रा. मा. (पृ–105), का. मा. (पृ–123) ।

(2) रा. मा. (पृ–105), निगमे इति का. मा. (पृ–122) ।

(3) पद्मपु. इति का. मा. (पृ–247) ।

मात्रसाध्ये माघसप्तमीविहितस्नानादौ चाऽष्टमीविद्धाऽपि पूज्या भवति । युग्मतिथीनां पूज्यता तु व्रतोपवासादिकं प्रति, नत्वेकोद्दिष्टं श्राद्धं प्रत्यपि । तथा च [1]निगमः—

द्वितीयादिकयुग्मानां पूज्यता नियमादिषु ।
एकोद्दिष्टव्याब्दवृद्ध्यादौ वृद्धिह्लासादिचोदना ॥

इति दैवव्रतानुरूपतिथिनिरूपणम् ।

अथैकादशी संक्षेपेण निरूप्यते

तत्र स्कन्दपुराणे—

ब्रह्मचारी गृहस्थो वा वानप्रस्थो यतिस्तथा ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो भर्तृमती तथा ॥
अभर्तृका तथान्यो वा सूतवैदेहिकादिकः ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥
एकादश्यां तु यो भुङ्क्ते मोहानाहृतचेतनः ।
शुक्लायामथ कृष्णायां निरयं याति स ध्रुवम् ॥

कात्यायनः— अष्टवर्षाधिको मर्त्यो ह्यपूर्णाशीतिवत्सरः ।
एकादश्यामुपवसेत् पक्षयोरुभयोरपि ॥

[2]वराहपुराणे— एकादश्यां निराहारो यो भुङ्क्ते द्वादशीदिने ।
शुक्ले वा यदि वा कृष्णे तद्व्रतं वैष्णवं महत् ॥

वह्निपुराणे— व्रते चीर्णे न चेद्दानं करोत्यन्ते स्वशक्तितः ।
न तस्य फलमादत्ते लोभात् स पुरुषो व्रती ॥

तत्र युक्ताया लक्षणमुक्तं [3]सौरधर्मोत्तरे—

कीदृशस्तु भवेद् वेधो योगो वा विप्र कीदृशः ।
योगवेधौ समाचक्ष्व ययोर्वेष्टमुपोषणम् ॥
या तिथिः स्पृशते राजन् प्रातर्वक्त्रावलोकिनी ।

---

(1) का. वि. (पृ—485) । (2) का. वि. (पृ—426) ।
(3) का. वि. (पृ—444-445) ।

स वेध इति विज्ञेयो योगः सूर्योदयो मतः ॥

येषामिति वाक्यापेक्षया बहुवचनम् । सूर्योदयकाले दशम्याः स्थितिर्योग उच्यते । तेनोदयकाले दशम्या स्पृष्टा युक्तामित्यर्थः ।

दशम्यैकादशीं युक्तां प्रमादाद् यो ह्युपोषयेत् ।
सम्वत्सरकृतं पुण्यं तस्य नश्यति भूपते ॥

ब्रह्माण्डपुराणे— रविचक्रार्धमात्राऽपि दशमी श्रूयते यदि ।
शुद्धाऽपि द्वादशी कार्या त्रयोदश्यान्तु पारणम् ॥

शुद्धाऽपीति केवला । अपिशब्दादेकादशी सा ह्यपीत्यर्थः । त्रयोदश्यामिति द्वादशीसहितायामित्यर्थः । तथा विष्णुरहस्ये—

दशम्येकादशी युक्ता समुपोष्या भवेत्तदा ।
मुहूर्तं द्वादशी न स्यात् त्रयोदश्यां यदा मुने ॥

स्कन्दपुराणे— शुद्धाऽपि द्वादशी ग्राह्या परतो द्वादशी यदि ।
पारणं तु न कर्त्तव्यमुपोष्य द्वादशीमिह ॥
त्रयोदश्यां नरैर्नित्यं धर्मशुद्धिमवेप्सुभिः ।

तथा— द्वादश्यामतिरिक्तायां यो भुङ्क्ते पूर्ववासरे ।
द्वादश द्वादशीर्हन्ति द्वादशीं वा परित्यजन् ॥

द्वादशीं वेति वा शब्द इवार्थे । द्वादशीवेलामतिक्रम्य त्रयोदशीसमये पारणं कुर्वन्नित्यर्थः । [1]भविष्यपुराणे—

एकादशी दशा युक्ता परतोऽपि न वर्धते ।
यतिभिः गृहिभिश्चैव सैवोपोष्या सदा तिथिः ॥

परतोऽपि न वर्धत इति । एकादशी द्वादशी वेत्यर्थः ।

तथा— एकादशी दशा युक्ता वर्धमाने विवर्जयेत् ।
पक्षहानौ सिते सोमे कुर्वीत दशमीयुता ॥

[2]बौधायनः— एकादशी कलायुक्तामुपोष्य द्वादशीं नरः ।
त्रयोदशीं तु भुञ्जानो विष्णुसायुज्यमृच्छति ॥

---

(1) का. वि. (पृ–443) । (2) का. वि. (पृ–440) ।

विष्णुसायुज्यमृच्छतीति वचनान्मोक्षकाङ्क्षिणां यतीनामेवेदं वेदितव्यम् । तथा च

स्कन्दपुराणे— कलाऽप्येकादशी यत्र द्वादश्यनुगता भवेत् ।
दिनक्षयेऽपि सा पूज्या यतीनामुत्तमा तिथिः ॥

अथ प्रवेशिनी

तल्लक्षणं सप्रयोजनमुक्तम्- कूर्मपुराणे—

उदयात् प्राग् दशम्यास्तु श्लेषः संयोग उच्यते ।
उपरिष्टात् प्रवेशस्तु तस्मात्तां वर्जयेत् सदा ॥

सूर्योदयादुपरिष्टाद् दशम्याः श्लेषः प्रवेश उच्यते ।

तथा— कुर्यादलाभे संयुक्तां नालाभेऽपि प्रवेशिनी ।
उपोष्या द्वादशी तत्र त्रयोदश्यान्तु पारणम् ॥

नालाभेऽपीति । परदिने एकादशी उदयस्यालाभेऽपि प्रवेशिनीं न कुर्यादित्यर्थः । अयमर्थश्च स्मृत्यन्तरे स्पष्ट एव । तथा च विष्णुधर्मे—

द्वादशी संगता यत्र भवत्येकादशी कला ।
दिनक्षयेऽपि स्यात् पुण्या दशम्या न कथञ्चन ॥

नारदीयपुराणे— उपवासदिनं विद्धं यदा भवति पूर्वया ।
द्वितीयेऽह्नि यदा न स्यात् स्वल्पाऽप्येकादशी तिथिः ॥
तत्रोपवासविहितः कथं तद् वद पुत्रक ।

सूत उवाच— यदा न प्राप्यते विप्रा द्वादश्यां पूर्ववासरः ।
[1]रविचक्रार्धमानोऽपि तदोपोष्य परं दिनम् ॥

वराहपुराणे— [2]एकादशी विलुप्ता चेत् परतो द्वादशी स्थिता ।
उपोष्या द्वादशी तत्र यदीच्छेत् परमं पदम् ॥

---

(1) रविचक्रार्धमानः—सूर्यमण्डलस्यार्धोदयोपलक्षितः कालः ।

(2) एकादश्याः क्षये द्वादश्याः ग्राह्यत्वमुक्तं गर्गसंहितायाम् (8-32/34)—

दशमी पञ्चपञ्चाशद् घटिकाश्चेत् प्रदृश्यते ।
तर्हि चैकादशी त्याज्या द्वादशीं समुपोषयेत् ॥

द्वादश्यामुपवासन्तु ये वै कुर्वन्ति मानवाः ।
वत्स मामेव गच्छन्ति मम व्रतपरायणाः ॥

स्कन्दपुराणे— कलाऽप्येकादशी यत्र परतो द्वादशी भवेत् ।
तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तु पारणे ॥
दशम्येकादशी यत्र तत्र सन्निहितोऽसुरः ।
एकादशीद्वादशी यत्र तत्र सन्निहितो हरिः ॥
तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणे ।

तथा— द्विस्पृशैकादशी यत्र तत्र सन्निहितो हरिः ।
तमेवोपवसेत् कालमकामो विष्णुतत्परः ॥

द्विस्पृशा इति द्वादशीति शेषः । मत्स्यपुराणे—

एकादशी द्वादशी यत्र तत्र सन्निहितो हरिः ।
तमेवोपवसेत् कालमकामो विष्णुतत्परः ॥

एकादश्याः प्रवेशिनीत्वे यदा त्रयोदशीदिने द्वादश्याः निर्गमस्तदा त्रयोदश्यां पारणविधानादुपोष्या । द्वादशी च तत्रेति वचनाच्च निर्गतायामेव द्वादश्यामुपवासः प्राप्नोति, किन्त्वेकादशीसहितायामेव कर्त्तव्यम् ।

नागविद्धा तु या षष्ठी रुद्रविद्धो दिवाकरः ।
कामविद्धो यदा [1]विष्णुरपूज्यास्ते तु वासराः ॥ [2]इति

जाबालिवचनात् त्रयोदशीसहिताया निन्दितत्वात् । तत्त्वसागरसंहितायाम्—

द्वादश्येकादशी यत्र द्वादशी परतोऽपि हि ।
द्वादश्यां पारणं कुर्यात् क्रतुकोटिफलं लभेत् ॥

अनु० दशमी पलमात्रेण त्याज्या चैकादशी तिथिः ।
मदिरा बिन्दुपातेन त्याज्यं गाङ्गघटं यथा ॥
एकादशी यदा वृद्धि द्वादशी वा क्षयं गता ।
तदा परा ह्युपोष्या स्यात् पूर्वा वै द्वादशी व्रता ॥

(1) विष्णुः—द्वादशी ।

(2) रा. मा. (पृ–105), निगम इति का. मा. (पृ–122) ।

द्वादश्यां पारणं कुर्यादिति । एकादशीसहितां द्वादशीमुपोष्येति शेषः । एकादशी पक्षे सति द्वादश्या वृद्धावपि द्वादशीमुपोष्य द्वादश्यामेव पारणम् । ननु प्रवेशिन्यनुग्राहकवाक्यान्यपि श्रूयन्ते । ततो विरोधः ।

तथा [1]भविष्यपुराणे—

उपोष्य पारणे प्राप्ते न विन्देद् द्वादशीं यदि ।
दशम्याऽपि हि विद्धा स्यादेकादश्यैव पुण्यभाक् ॥

न विन्देद् द्वादशीमिति । त्रयोदशीदिने इत्यर्थः । उद्दालकः—

एकादशी न लभेत् चेत् सकला द्वादशी भवेत् ।
उपोष्य दशमीविद्धा मुनिरुद्दालकोऽब्रवीत् ॥

तत्त्वसागरसंहितायाम्—

दशम्येकादशी यत्र सा नोपोष्या फलापहा ।
सैवोपोष्या कलाप्येका द्वादशी च न विद्यते ॥ इति ।

अन्यान्यप्येवं विधानि वाक्यानि सन्ति वहुत्वान्न लिखितानि । सत्यं, वैष्णवं प्रति नैतानि वचनानि । किन्तु धनदव्रतमधिकृत्यैव । तथा च स्कन्दपुराणे—

उपोष्य दिननाशे तु पूजयित्वा धनेश्वरम् ।
द्वादश्यां तु जलं प्राश्य विष्णोः कार्यमुपोषणम् ॥
त्रयोदश्यां पारणन्तु कार्यं संसारमुक्तये ।
द्वादश्यां भोजनं चैव विद्धायां हर्युपोषणम् ॥
यः कुर्यान्मन्दवुद्धिर्हि निरयं सोऽपि गच्छति ।
यानि कानि च वाक्यानि विद्धातिथिपराणि च ।
धनदाग्न्यपराणि स्युर्वैष्णवी न च सा युता ॥

एतद्वाक्यं प्रवेशिनीपरमेवैतदिति केचित् । तत्तु विचारणीयम् । "द्वादश्यां पारणं चैवे"त्यनेन द्वादशीपारणस्याप्यनिषिद्धत्वात् । युक्तायाञ्च त्रयोदशीपारणं निषिद्धम् । द्वादश्यां च जलं प्राश्येत्येतदुभयव्रतिनमधिकृत्योक्तम् । यदा तु त्र्यहस्पृक्तिथिर्भवति

---

(1) वचनान्येतानि एकादशीक्षयविषयाणि ।

तदा पूर्वस्यापवाद उक्तो भविष्योत्तरे—

यदा कौन्तेय संसिध्येदेकादश्यां तिथित्रयम् ।
तत्र क्रतुशतं पुण्यं द्वादशी पारणा भवेत् ।
वैष्णवीं सिद्धिमाप्नोति नरस्तद्गतमानसः ॥

एकादश्यां तिथित्रये तु विशेषमाह विष्णुः—

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
त्र्यहस्पृक् तदहोरात्रं नोपोष्यं तत्सुतार्थिभिः ॥
उपोष्यैकादशीं यस्तु त्रयोदश्याञ्च पारणम् ।
करोति तस्य नश्यन्ति द्वादश्यो द्वादशैव तु ॥

ननूपवासाकरणे दोष उक्तो मत्स्यपुराणे यथा—

परिगृह्य व्रतं सम्यगेकादश्यामुपोषणम् ।
न समापयते यस्तु स याति नरकं नरः ॥

इत्याशङ्क्य स एवाह—

एकादशी कलामात्रा द्वादशी च क्षयं गता ।
क्षीणा सा द्वादशी प्रोक्ता नक्तं तत्र विधीयते ॥

[1]स्कन्दपुराणे— [2]दश्यामेकादशीविद्धा द्वादशी च क्षयं गता ।
नक्तं तत्र प्रकुर्वीत नोपवासो विधीयते ॥

तत्रैव काम्यव्रतप्रकरणे—

[3]एकादशी द्वादशी च तच्छेषे च त्रयोदशी ।
स्नानं दानं जपं होमं कृत्वा ब्राह्मणवाचनम् ॥
निर्वर्त्य द्वादशीकर्म ततो नक्तेन वर्त्तयेत् ।
दिनक्षये तु सम्प्राप्ते नोपोष्यौ नियमौ स्मृतौ ॥

---

(1) का. वि. (पृ- 448) । (2) दशी—दशमी ।

(3) श्लोकोऽयं बृहन्ना. (27–48) । चतुर्वर्गचिन्तामणावपि (परि. पृ-238) यदा च दशमीविद्धा एकादशी द्वादश्याञ्च कियन्मात्रा विद्यते, रात्रिशेषे च त्रयोदशी, तदा गृहस्थव्यतिरिक्तानां तत्रोपवासः ।

उपवासे पुत्रनाशो नियमे च धनक्षयः ।

नियमशब्दश्चात्र हविष्यभोजनौदनादिकं व्याचष्टे ।

दिनक्षयेऽर्कसंक्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः ।। इति ।

मत्स्य[1]पुराणवचनमप्येतद्विषयम् ।

यत्तु— तिथित्रयस्य संस्पर्शादहोरात्रे भृगूत्तम ।
त्र्यहस्पृक् स विनिर्दिष्टः पुण्यः परमपावनः ।।
तत्रोपोष्य शिरःस्नातैः कर्त्तव्यं देवतार्च्चनम् ।
जपहोमौ तथा दानं कामयद्भिर्महाफलम् ।। इति

विष्णुधर्मोत्तरवाक्यं तन्नैमित्तिकार्थमेव । न तु गृहीतैकादशीव्रतस्यानुष्ठानार्थम् ।

एकादशी द्वादशी यत्र तच्छेषे च त्रयोदशी ।
त्रिःस्पृशा सा तिथिः प्रोक्ता सर्वपापहरा शुभा ।
उपवासकृतस्तत्र महापातकनाशनः ।। इति

[2]सौरधर्मोत्तरवाक्ये नैमित्तिकत्वं वक्तव्यमेव । महापातकनाशन इति वचनात् पतितविषयं बोद्धव्यम् । तथा [3]गारुडपुराणे—

एकादशी द्वादशी च विशेषेण त्रयोदशी ।
त्रिमिश्रा सा तिथिः प्रोक्ता सर्वपापहरा शुभा ।।
एकादशीमुपोष्यैव द्वादश्यामथवा द्विज ।
त्रिमिश्रां वाऽपि कुर्वीत न दशम्या युता क्वचित् ।।

त्रिमिश्रामप्युपोष्य पारणं कुर्वीतेत्यर्थः । इति प्रवेशिनी ।

अथ यद्यैकादशी सम्पूर्णा सति वर्धते द्वादशी च क्षयं गता

तदा कुत्रोपवास इत्याशङ्क्याह प्रचेताः —

सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
तत्रोत्तरां यतिः कुर्यात् पूर्वामुपवसेद् गृही ।।

---

(1) का. वि. (पृ–447), का मा. (पृ–165) ।

(2) का. वि. (पृ–447) । (3) गरुड पु. (1–125–5/6) ।

पूर्वापरा—शुक्लाकृष्णा । गृहीत्युपलक्षणम् । तथा च भविष्योत्तरे—

एकादशीद्वयं यत्र शुद्धं कुरुकुलोद्वह ।
अन्योपोष्या च यतिभिराद्या चाश्रमिभिस्त्रिभिः ॥

पारणं त्वेकादशीवेलामतिक्रम्यैव कार्यम् । तदुक्तम्—

तिथीन मेव सर्वासामुपोष्य व्रतचारिणः ।
तिथ्यन्ते पारणं कुर्युर्विना शिवचतुर्दशीम् ॥

स्कन्दपुराणे— यत्रोपवासस्तिथिषु भेषु वारेषु वा पुनः ।
योगेषु वाऽनन्तरकं पारणे नातिलङ्घयेत् ॥
पारणं तत्र नो कार्यमतिरिक्ते परेऽहनि ॥

अनन्तरकं—द्वादश्यादि । परे द्वादश्याद्यौ । यदि व्रतदिनमतिरिक्तं तदा तत्र पारणं न कार्यं किन्तु व्रततिथिसमाप्तावेवेत्यर्थः । गृहिप्रभृतीनामुत्तरस्यामुपवासे दोष उक्तो

विष्णुधर्मोत्तरे— पूर्णामिकादशीं हित्वा यः कलां समुपोषयेत् । (सैकादशी)

राजमार्तण्डे— एकादशी विवृद्धा चेत् शुक्ले कृष्णेऽथवा भवेत् ।
तत्रोत्तरां यतिः कुर्यात् पूर्वामुपवसेद् गृही ॥

भागवतपुराणे— या तिथिर्व्रजते वृद्धि पूर्वा वा यदि वा परा ।
द्वादशी तत्र नश्यन्ती त्रयोदश्यान्तु पारणे ॥

स्कन्दपुराणे — उपोष्यैकादशीं यस्तु त्रयोदश्यान्तु पारणम् ।
करोति तस्य नश्यन्ति द्वादश्यो द्वादशैव तु ॥
एकादशीमुपोष्यैव द्वादश्यां पारणं स्मृतम् ।
त्रयोदश्यां न तत् कुर्यात् द्वादशद्वादशीक्षयात् ॥

इत्यादीनि त्रयोदशीपारणनिषेधवाक्यानि एतद्विषयाणि । द्वादशीवेलामतिक्रम्य त्रयोदशीसमये पारणकरणे च ज्ञेयानि । यतीनां तु दोषशङ्का नास्तीति प्रतिपादयितुमुक्तं स्कन्दपुराणे —

कलाऽप्येकादशी यत्र द्वादश्यनुगता भवेत् ।
दिनक्षयेऽपि सा पूज्या यतीनामुत्तमा तिथिः ॥

इत्येकादशी सम्पूर्णा सति द्वादशीक्षयोपवास निरूपणम् ।

अथैकादश्याः सम्पूर्णत्वे सति यद्येकादशीद्वादश्योर्वृद्धिः

तदा कुत्रोपवास इत्याकाङ्क्षायामाह प्रचेताः—

पूर्णाऽप्येकादशी त्याज्या वर्धयेद् द्वितयं यदि ।
द्वादश्यां पारणालाभे पूर्वैव परिगृह्यते ॥

द्वितयम्—एकादशीद्वादश्योः । पूर्णायाः परिग्रहे दोषमाह स एव—

सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
उपोष्या सा द्वितीया तु द्वादशी यदि दृश्यते ॥
कलाकाष्ठाऽपि द्वादशी यदि स्यादपरेऽहनि ।
द्वादश द्वादशीर्हन्ति पूर्वस्मिन् पारणे कृते ॥

सौरधर्मोत्तरे— एकादशीमुपोष्यैव द्वादशीमप्युपोषयेत् ।
विमिश्रां वाऽपि कुर्वीत न दशम्या युतां क्वचित् ॥

द्वादशीमेकादशीसहिताम् । अत्रोपोष्येति क्त्वाप्रत्ययनिर्देशात् उपवासद्वयं विहितम् । [1]तदुपवासद्वयविधानं विधवां प्रत्येव प्रतिपत्तव्यम् । विधवानामेवैकादशीदिने भोजननिषेधवाक्यस्य कात्यायनेनाभिहितत्वात् ।

[2]तथा च— विधवा या भवेन्नारी भुञ्जीतैकादशीदिने ।
तस्यास्तु सुकृतं नश्येद् भ्रूणहत्या दिने दिने ।

अथैकादश्याः सम्पूर्णत्वे द्वादशीमात्रवृद्धौ

एकादश्यामेवोपवासस्तत्परित्यागे कारणाभावात् । अथ समाचारविरुद्धानि वाक्यानि प्रदर्श्य समर्थ्यन्ते—

यत्तु (जन्तु) जन्मसहस्रेण सदा पुण्यार्जितं फलम् ।
अरुणोदयविद्धायामुपवासाद् व्यपोहति ॥

---

(1) उपवासद्वयमपि समर्थयति गदाधरः— स्मृत्यन्तरमालम्ब्य माधवाचार्यैरुपवासद्वयासामर्थ्ये यो द्वादश्यामेकोपवासो लिखितः सोऽपि अस्मद्देशस्मार्तैर्नाद्रियते । का. सा. (पृ–115) ।

(2) सौरधर्मोत्तरे इति का. सा. (पृ–111) ।

निवारितस्तु विद्वद्भिः कल्पकोटियुतं फलम् ।
यदनादिकृतं पुण्यं परं यच्च करिष्यति ।।
तत्सर्वं विलयं याति परेषामुपवासनात् ।।
एवं विद्धां परित्यज्य द्वादश्यामुपवासने ।।
कोटिजन्मार्जितं पापमेकयैव विनश्यति ।
उदयात् प्राक् नाडीचतुष्टयं (यदि) दशमी विद्धयति ।।

उदयावधि दशमी तिष्ठति चेद्, तदा अरुणोदयविद्धैकादशी भवति ।

तथा च तत्रैव— मुहूर्तद्वयसंस्पृष्टा वर्ज्या चैकादशी तिथिः ।
अन्यास्तु यामसंस्पृष्टा उदयात् प्रागपि ध्रुवम् ।।

इत्यस्य प्रस्तुतत्वादुदयात् प्रागिति लक्ष्यते ।

नारदीयपुराणे— चतस्रो घटिका प्रातररुणोदय उच्यते ।
यतीनां स्नानकालोऽयं गङ्गाम्भः सदृशः स्मृतः ।।

घटिकात्र नाडी । सौरधर्मोत्तरेऽपि—

कीदृशस्तु भवेद्वेधो योगो वा विप्र कीदृशः ।
योगवेधौ समाचक्ष्व ययोर्वेष्टमुपोषणम् ।।
या तिथिः स्पृशते राजन् प्रातर्वक्त्रावलोकिनी ।
सवेध इति विज्ञेयो योगः सूर्योदयो मतः ।।

या पूर्वतिथिः वक्त्रावलोकिनी सती प्रातः स्पृशति स वेधको नाम इत्यर्थः । तिथिशब्दः द्विलिङ्गत्वात् स इति पुंसा निर्देशः । वक्त्रमुत्तरवासरमुखम् । उदयसमयस्तदवलोकिनी न तु तत्स्पर्शिनी । उदयाव्यवहितपूर्वक्षणपर्यन्तव्यापिनीत्यर्थः । तदिदमेकादशीमात्रवृद्धौ सति विषयतया द्वादशीमात्रवृद्धावुभयवृद्धौ च सर्वपरतया वोद्धव्यम् ।

अतएवोक्तं मत्स्यपुराणे—

एकादशीदशा विद्धा परतोऽपि न विद्यते ।
गृहिभिर्यतिभिश्चैव सैवोपोष्या सदा तिथिः ।।

परत इति । एकादशीमात्रं द्वादशीमात्रमुभयं वा ।

यत्तु नारदीयपुराणे—

प्रातः सूर्यविहीनं हि दशम्यां चारुलोचने ।
एकादशी विमिश्रान्तु क्षपयिष्यन्ति ये नराः ॥
उपवासेऽर्च्चने स्नाने दाने जागरणे तथा ।
सर्वं दिवार्जितं पुण्यं यास्यति तव मोहिनि ॥

प्रातररुणोदयः वैनतेयोदयस्त्वयमिति प्रकृतत्वात् । अरुणोदयस्य प्रथमनाडीत्रये दशमी, ततः एकादशी यद् वा दशम्या अन्तिमनाड़ीत्रयं, चैकादश्याः प्रथमा नाडी तदा सा मिश्रोच्यते । क्वचिदेषा सविदग्धोक्ता । तथा च नारदीयपुराणे—

उदयात् प्राक् घटिका व्यापिन्येकादशी यदि ।
सा विदग्धैकादशी नाम वर्जयेद् धर्मकाङ्क्षकः ॥

एतच्च द्वादशीमात्रवृद्धावेकादशीद्वादश्युभयवृद्धौ चान्तर्गतमेव । तथा च मिश्राया व्यवस्थापनानि वाक्यानि नारदीयपुराणे—

त्रयोदश्यां यदा न स्याद् द्वादशी घटिकाद्वयम् ।
दशम्यैकादशी मिश्रा सैवोपोष्या सदा तिथिः ॥

विष्णुरहस्ये— मुहूर्त्तं द्वादशी न स्यात् त्रयोदश्यां यदा मुने ।
उपोष्या दशमीमिश्रा सदैवैकादशी तदा ॥

[1]कूर्मपुराणे— त्रयोदश्यां न लभ्येत द्वादशी यदि किञ्चन ।
उपोष्यैकादशी तत्र दशमी मिश्रिताऽपि वा ॥

वा शब्दाद् एकादशीमात्रवृद्धौ द्वादशीमिश्रिता यतिभिरुपोष्येत्यर्थः ।

कलाकाष्ठादिविवेकः द्वादश्याः

विष्णुधर्मोत्तरे – एकादश्यां द्वादशी चेत् तत्रोपोष्य क्रतोः फलम् ।
आवसेत त्रयोदश्यां न भवेद् द्वादशी यदि ।
उपोष्यैकादशी तत्र दशमीमिश्रिता तु या ॥

यद्येकादश्यां त्रयोदश्याञ्च द्वादशी तदैकादशीसहितायां द्वादश्यामुपोष्य क्रतोः फलमावसेदाप्नुयादित्यर्थः । यदि त्रयोदश्या न द्वादशी तदा दशमी मिश्रितैकादशी गृहि-

---

(1) गोभिलवचनमिति का. सा. (पृ–116) ।

भिरुपोष्या । "उत्तरां तु यतिः कुर्यात् पूर्वामुपवसेद् गृही"ति वचनानुसारादित्यर्थः । अथवा त्रयोदश्यां तु शब्दादेकादश्यां न द्वादशी यदा तदा दशमीमिश्रितैव चतुर्भिरप्याश्रमिभिरुपोष्येत्यर्थः । यत्तु [1]नारदीयपुराणे—

उदयात् प्राङ्मुहूर्त्तेन व्यापिन्येकादशी यदि ।
संयुक्तैकादशी नाम वर्जयेद् धर्मवृद्धये ॥
पुत्रपौत्रसमृद्ध्यर्थं द्वादश्यामुपवासयेत् ।
तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तु पारणे ॥

तदपि द्वादशीवृद्धिविषयवाक्येऽन्तर्गतम् । त्रयोदशीपारणविधानस्य, द्वादशीसहितत्रयोदशीविषयत्वात् । तथा च विष्णुरहस्ये—

दशमीशेषसंयुक्ता उपोष्यैकादशी तदा ।
यदि न स्यात् त्रयोदश्यां मुहूर्त्तं द्वादशी तिथिः ॥

कूर्मपुराणे—कुर्यादलाभे संयुक्तां, द्वादशीदिने एकादश्याः अलाभे यतिभिरपि संयुक्ता कार्येत्यर्थः ।

ननु— कलाकाष्ठाऽपि द्वादशी यदि स्यादपरेऽह्नि ।
द्वादश द्वादशीर्हन्ति पूर्वस्मिन् पारणे कृते ॥ इति

प्राचेतसवचनेन कलामात्रद्वादश्यां पारणमुक्तमसङ्गतमिति प्रतिभाति । आह्निकदेवार्च्चनादिक्रियाकलापस्य तावति काले कर्त्तुमशक्यत्वादित्याशङ्क्योक्तम् ।

नारदीयपुराणे—अल्पायामथ विप्रेन्द्रा द्वादश्यामरुणोदये ।
स्नानार्चनक्रियाः कार्या दानहोमादिसंयुताः ॥
त्रयोदश्यां हि शुद्धायां पारणे पृथिवीफलम् ।
शतयज्ञाधिकं वाऽपि नरः प्राप्नोत्यसंशयम् ॥
एतस्मात् कारणाद् विप्र प्रत्यूषे स्नानमाचरेत् ।
पितृतर्पणसंयुक्तं स्वल्पां दृष्ट्वा च द्वादशीम् ॥
महाहानिकरी ह्येषा द्वादशी लङ्घिता नृणाम् ।
करोति धर्महरणमस्नातेव सरस्वती ॥

---

(1) गारुड़े इति का. मा. (पृ–157) ।

स्कन्दपुराणे— जलादि पारणं कुर्याद् यद्यनन्तरलङ्घनम् ।

अनन्तरलङ्घनं द्वादशीलङ्घनं यदि स्यादित्यर्थः ।

तथा— अशक्तौ पारणस्यापि कुर्यादुदकपारणम् ।
शक्तस्तु पारणं कुर्वन्नरोऽधर्मे न लिप्यते ॥
पारयित्वोदकेनापि भुञ्जानो नैव दुष्यति ।
अशिताऽनशिता यस्मादापो विद्वद्भिरीरिता ॥

इत्येकादश्यादिनिरूपणम् ।

अथ रविवारादिपाते व्यवस्था

तत्र [1]कूर्मपुराणे–संक्रान्त्यां कृष्णपक्षे च रविशुक्रदिने तथा ।
एकादश्यां न कुर्वीत उपवासञ्च पारणम् ॥

[2]गौतमः— आदित्येऽहनि संक्रान्तावसितैकादशीषु च ।
व्यतीपाते कृते श्राद्धे पुत्री नोपवसेद् गृही ॥

काम्यनैमित्तिकयोरेवायं निषेधः । न नित्यस्य । तथा च स्कन्दपुराणे—

यानि कानि च वाक्यानि कृष्णैकादशीवर्जने ।
भरण्यादिनिषेधे च तानि काम्यफलार्थिनः ॥
कामिनोऽपि हि नित्यार्थं कुर्युरेवोपवासनम् ।
प्रीणनार्थं हरेर्नित्यं न तु काम्यव्यपेक्षया ॥
तस्माच्छुक्लामथ कृष्णां भरण्यादियुतामपि ।
प्रत्यवायनिराशार्थमुपवासीत नित्यशः ॥
प्रीणनार्थं हरेश्चापि विष्णुलोकस्य आप्तये ।

कामिनोऽपीति । काम्यपि नित्यबुद्ध्या उपवसेत्तत्र सोऽप्युपवसेदेवेत्यर्थः ।

कात्यायनः— एकादशीषु कृष्णासु रविसंक्रमणेषु च ।
चन्द्रसूर्योपरागे च न कुर्यात् पुत्रवान् गृही ॥
तन्निमित्तोपवासस्य निषेधोऽयमुदाहृतः ।

---

(1) रा. मा. (पृ–108) । (2) का. मा. (पृ–164) ।

[1]प्रयुक्त्यन्तरयुक्तस्य न विधिर्न निषेधनम् ॥

[2]स्मृतिमीमांसायाम्—

आदित्येऽहनि संक्रान्त्यां ग्रहणे चन्द्रसूर्ययोः ।
पारणं चोपवासश्च न कुर्यात् पुत्रवान् गृही ॥
तन्निमित्तोपवासस्य निषेधोऽयमुदाहृतः ।
[3]नानुषङ्गकृतो ग्राह्यो यतो नित्यमुपोषणम् ॥

तन्निमित्तस्यादित्यवारादिनिमित्तोपवासस्य नैकादशीनिमित्तस्य रविवारादिपाते सतीत्यर्थः । तत्र हेतुर्यतो नित्यमुपोषणमिति । अस्ति च वारेषु [4]उपवासविधानम् । यथा स्मृतिसमुच्चये— सप्तवारानुपोष्यैव सप्तधा सप्तजन्मसु ।
सर्वपापविनिर्मुक्तः सर्वसम्पदमाप्नुयात् ॥

अतएव रविवारादियोगे एकादश्युपवासस्य प्राशस्त्यमुक्तमप्यस्ति । यथा विष्णुधर्मोत्तरे-

एकादश्यां यदा राम आदित्यस्य दिनं भवेत् ।
उपोष्या सा महापुण्या सर्वपापहरा तिथिः ॥

[5]सनत्कुमारीये—रविवारेण संयुक्ता तथा संक्रान्तिसंयुता ।
एकादशी सदोपोष्या सर्वसम्पत्करी तिथिः ॥
संक्रान्तिरविवारौ वा एकादश्यां यदा नृप ।
उपोष्या सा महापुण्या सर्वपापहरा तिथिः ॥

---

(1) अन्यनिमित्तकोपवासस्य इत्यर्थः । (2) जैमिनिरिति का. मा (पृ–146)

(3) एकादश्युपवासस्य नित्यत्वात् संक्रान्त्याद्युपवासस्य च काम्यत्वात् काम्योपवास–निषेधेन नित्योपवासः सिद्ध्यति । अन्योद्देशेनानुष्ठितस्यान्यत्रोपकारसंपादनं प्रसङ्गः । इति धर्मशास्त्रशब्दकोषे । यः प्रसङ्गः स एवानुषङ्गः । अत्रापि नित्यैकादश्युपवासे संक्रान्तिरविवाराद्युपवासः प्रसङ्गादनुषज्यते ।

(4) सप्तवारेषु उपवासविधानमुत्कले प्रसिद्धम् । तेषां मूलन्तु पुराणमेव । यथाऽग्निपुराणे (195/1)—

वारव्रतानि वक्ष्यामि भुक्तिप्रदानि हि ॥

(5) चतु. चिन्ता. परि. (पृ–184) ।

चन्द्रकेतुचरिते—पङ्गोः पतङ्गवारे च संक्रान्तौ ग्रहणेषु च ।
पारणं चोपवासश्च कर्त्तव्यमविशङ्कया ।।

स्मृतिः— ग्रहणादिनिमित्तेन सूर्यसंक्रमणादिना ।
तिथीनां दूषितानाञ्च कथं तूपोषणं भवेत् ।।
तिथिमात्रन्तु सञ्चिन्त्य सर्वं त्यक्त्वा फलं नरैः ।
उपोष्या सा महापुण्या पुत्रपौत्रप्रवर्धिनी ।।
उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत् ।
उपवासं तदा कुर्यादाघ्राय पितृसेवितम् ।।

विष्णुरहस्ये— परिगृह्य व्रतं सम्यगेकादश्यामुपोषणम् ।
न समापयते यस्तु स याति नरकं नरः ।।

[1]तथा— तस्मात् प्रमादे दुःखे वा सूतके मृतकेऽपि वा ।
स्नात्वा कायव्रतं कुर्याद्दानार्चनविवर्जितम् ।।

[2]स्मृतिः— परमापदमापन्ने हर्षे च समुपस्थिते ।
सूतके मृतके चैव न त्याज्यं द्वादशीव्रतम् ।।
सूतके मृतके स्नात्वा प्रणम्य मनसा हरिम् ।
एकादश्यां न भुञ्जीत व्रतमेवं न लङ्घयेत् ।।
द्वादश्याञ्च ततो भुक्त्वा सूतकान्ते जनार्दनम् ।
पूजयित्वा विधानेन भोजयेच्च द्विजोत्तमम् ।।
यथोक्ते च व्रते चीर्णे यथोक्तफलभाग् भवेत् ।
व्रतभङ्गान्महादुःखं प्राप्नोति नरकं तथा ।।

[3]ऋष्यशृङ्गः— एकादश्यां न भुञ्जीत नारी दृष्टे रजस्यपि ।
असामर्थ्येऽप्यकरणं नास्तीत्युक्तं न संशयः ।।

[4]वराहपुराणे— असामर्थ्ये शरीरस्य व्रते च समुपस्थिते ।
कारयेद् धर्मपत्नीं वा पुत्रं वा विनयान्विताम् ।।

---

(1) का. वि. (पृ–449) ।

(2) वराहपुराणे इति का. वि. (पृ-449) ।

(3) का. मा. (पृ–170) ।

(4) का. वि. (पृ–450) ।

भगिनीं भ्रातरं वाऽपि व्रतमस्य न लङ्घयेत् ।
भार्या भर्तृव्रतं कुर्याद् भार्यायाश्च पतिस्तथा ॥
असामर्थ्ये तयोस्ताभ्यां व्रतभङ्गो न विद्यते ।

स्कन्दपुराणे— आत्मा पुत्रः पुरोधाश्च भ्राता पत्नी सखा पिता ।
यात्रायां धर्मकार्येषु जायन्ते प्रति[1]हस्तकाः ॥
एभिः कृतं महादेवि स्वयमेव कृतं भवेत् ॥

आत्मा–आत्मीयः । कात्यायनः—

शृणु यो वाऽन्यमुद्दिश्य एकादशमुपोषति ।
यमुद्दिश्य कृतो विप्रास्तस्य पूर्णफलं भवेत् ।
कर्त्ता दशगुणं पुण्यं प्राप्नोत्यत्र न संशयः ॥

स्कन्दपुराणे— अशक्तावुपवासस्य भक्ष्यं किञ्चित् प्रकल्पयेत् ।
सर्वथा पुरुषैः कार्यमेकादश्युपवासनम् ॥

[2]नक्तं हविष्यान्नमनोदनं वा, फलं तिलाः क्षीरमथाम्बु चाज्यम् ।
यत् पञ्चगव्यं यदि वाऽपि वायुः, प्रशस्तमत्रोत्तरमुत्तरं स्यात् ॥

वायुभक्षणम् उपवासप्रतिनिधिरेव न तूपवासः । रामायणे पृथक्त्वेनोपादानात् ।

तथा च— जलाशी मारुताहारो निराहारस्तथैव च ।

भविष्ये— दन्तखाद्यं भवेद् यस्तु तदोदनमिति स्मृतम् ।
भक्ष्यं चोष्यं तथा लेह्यमोदनं त्रिः प्रकीर्त्तितम् ॥

ये पञ्चानोदनं प्रोक्तमिति । [3]मार्कण्डेयः—

एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन भक्ष्येण नैव द्वादशिको भवेत् ॥

ब्रह्मपुराणे— शिष्यव्रतं प्रकुर्वन्ति गुरुसम्बन्धिबान्धवाः ।
गुर्विणी बालवत्सा च रोगी तल्पपरायणः ॥

---

(1) प्रतिहस्तकाः—प्रतिनिधयः ।

(2) का. वि. (पृ–431), का. मा. (पृ–165) ।

(3) का. वि. (पृ-430), का. मा. (पृ–166) ।

एते नक्तेन भुञ्जन्ति बालाः कन्यास्तथैव च ॥

विष्णुः— दिनार्धसमयेऽतीते भुज्यते नियमेन यत् ।
तदेकभक्तमित्युक्तमतस्तत्स्याद्दिवैव हि ॥

अयाचितमप्येवम् । ब्राह्मे—

व्रतस्थः प्राणरक्षार्थं कथंचिदुदकं पिवेत् ।
फलमूले च वा क्षीरं यज्ञशिष्टश्च यद्धविः ॥

इति रविवारादिपाते व्यवस्था ।

अथ संकल्पग्रहणम्

तत्र दशमीदिवसविषयं पठति—

वासुदेवप्रसादेन करोम्यद्य व्रताशनम् ॥
उपवासं करिष्ये श्वः प्रसीद गरुडध्वज ॥

[1]देवलः— अकृत्वा प्रातराहारं स्नात्वाऽऽचम्य समाहितः ।
सूर्यादिदेवताभ्यश्च निवेद्य व्रतमाहरेत् ॥

आहरेत्—गृह्णीयात् संकल्पयेदिति यावत् । सूर्यादिदेवताभ्यश्च [2]देवलेनैवोक्ताः—

सूर्यः सोमो यमः कालो महाभूतानि पञ्च च ।
दैवतानि हि जानन्ति वृत्तं जन्तोः शुभाशुभम् ॥

तेन सूर्यसोमयमकालमहाभूतानि । अमुकपुराणोक्त अमुकव्रतं मया कर्त्तव्यमिति निवेद्य संकल्पं कुर्यात् । मत्स्यपुराणे—

गृहीत्वोदुम्वरं पात्रं वारिपूर्णमुदङ्मुखः ।
उपवासन्तु गृह्णीयाद् यदा संकल्पयेद् द्विजः ॥
ततः संकल्पयेद् विद्वान्नुपवासव्रतादिकम् ।
फलानि समभिधाय निष्कामोऽपि हरिप्रियः ॥

---

(1) कृत्यकल्प. व्रत. (पृ–4) । (2) कृ. र. (पृ–56) ।

(3) कृत्यकल्प. व्रत. (पृ-4), कृ.र. (पृ–54), शान्तिपर्वणि इति का.वि, (पृ-456) वराहपुराणे इति का. मा. (पृ–169 ।

[1]वराहपुराणे— एकादश्यां निराहारः स्थित्वा चैवाऽपरेऽहनि ।
भोक्ष्येऽहं पुण्डरीकाक्ष शरणं मे भवाच्युत ॥
इदं व्रतं मया देव गृहीतं पुरतस्तव ।
निर्विघ्नात् सिद्धिमायातु प्रसन्ने त्वयि केशव ॥

अपरमपि प्रार्थना वाक्यं यथा—

मम चित्तं कुचित्तं वा स्वप्ने भुक्तमथापि वा ।
दन्तान्तरे विलग्नं वा क्षमस्व मधुसूदन ॥

आदित्यपुराणे—स्नात्वा स्त्री प्रातरुत्थाय पतिमाराधयेत् सती ।
उपवासार्थमथवा व्रतं कार्यं धृते व्रते ॥
स्पृष्ट्वा कराभ्यां चरणे सततं तं नमस्य च ।
गृहीत्वोदुम्बरं पात्रं सकुशं साक्षतं तथा ॥

आग्नेयपुराणे — [2]गृहीतेऽस्मिन् व्रते देव यद्यपूर्णे म्रियाम्यहम् ।
व्रतं भवतु सम्पूर्णं प्रसन्ने त्वयि केशव ॥
सन्त्यज्य चाष्टमं भागमुदयात् यत्र कुत्रचित् ।
तिथ्योर्युग्मेऽप्ययुग्मे वा सकृदाह्निकमाचरेत् ॥

अष्टमभागोऽष्टममुहूर्त्तः । इति संकल्पः ।

अथ दशम्यादिषु नियमः

तत्र स्कन्दपुराणे—

दिनत्रयं मैथुनञ्च स्वाध्यायं पारणादनु ।
त्रिरात्रमेव चाध्वानं वर्जयेदुपवासकः ॥
उपोष्य गच्छन्नध्वानं मृत्तिकां धारयन् व्रजेत् ।
आधयो व्याधयश्चैव अथवाऽपि ऋचं जपेत् ॥
नदीं तितीर्षुः मृत्पिण्डांस्त्रीन् गृहीत्वा विनिक्षिपेत् ।
एवं कुले परं तीरे प्रतरन् परतोऽपरम् ॥

---

(1) नारदपु. (21-15) ।   (2) का. वि. (पृ-333) ।

पूर्वोक्तेन विधानेन भोजनं पुष्टिदायकम् ।
भूयो यथेच्छतो रात्रौ सर्वत्रैष विधिः स्मृतः ।।

कात्यायनोऽपि— अथ नित्योपवासी चेत् सायं प्रातर्भुंजिक्रियाः ।
सन्त्यजेन्मतिमान् विप्रः सम्प्राप्ते हरिवासरे ।।
अतः ऊर्ध्वं यथेष्टं तु कारयेच्च यथाविधि ।
शक्तिमांस्तु पुनः कुर्यान्नियमं सविशेषणम् ।।
सायमाद्यन्तयोरह्नोः प्रातः सायञ्च मध्यमे ।
उपवासफलं प्रेत्सुर्जह्याद् भक्तचतुष्टयम् ।।

आदित्यपुराणे—अञ्जनं रोचनं वाऽपि गन्धं सुमनसस्तथा ।
व्रतके चोपवासे च नित्यमेव विवर्जयेत् ।।

रोचनं—कुसुमादिना गात्रोज्ज्वलीकरणम् ।

शिरसोऽभ्यञ्जनं सौम्य नैवमेतत् प्रशस्यते ।
न पादयोर्न गात्रस्य स्नेहेनेनि व्यवस्थितिः ।।
[1]असकृत्तोयपानेन ताम्बूलस्य च भक्षणात् ।
उपवासो विनश्येत दिवास्वप्नाक्षमैथुनैः ।।
असत्यभाषणं द्यूतं दिवास्वप्नञ्च मैथुनम् ।
एकादश्यां न कुर्वीत उपवासपरो नरः ।।

[2]गरुडपुराणे— स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।।
संकल्पोऽध्यवसायश्च कार्यनिष्पत्तिरेव च ।।
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।।

[3]पुराणे— एकादश्यां द्वादश्यान्तु प्रतिपक्षं च यो नरः ।
दीपं ददाति कृष्णाय तस्यापि शृणु यत् फलम् ।।
सुवर्णमणिमुक्ताढ्यं मनोज्ञमतिशोभनम् ।

---

(1) का. वि. (पृ–452), रा. मा. (पृ–108) ।

(2) का. सा. (पृ–43), का. वि. (पृ–452) ।

(3) का. वि. (पृ–465) ।

रत्नमालाकुलं काम्यं विमानं सोधिगच्छति ।।

[1]कूर्मपुराणे— कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणम् ।
व्यायामञ्च प्रवासञ्च दिवा स्वप्नमथाञ्जनम् ।।
तिलपिष्टं मसूरांश्च द्वादशैतानि वैष्णवः ।
द्वादश्यां वर्जयेन्नित्यं सर्वपापैः प्रमुच्यते ।।

[2]कात्यायनः— अज्ञानतिमिरान्धस्य व्रतेनानेन केशव ।
प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव ।।
इति मन्त्रेण देवाय उपवासं समर्पयेत् ।
[3]पारणञ्च ततः कुर्याद् भगवद् भक्तिभावितः ।।

इति दशम्यादिषु नियमः ।

अथ नक्तव्रतकालनिरूपणम्

तत्र [4]भविष्यपुराणे—

[5]नक्षत्रदर्शनान्नक्तं केचिदिच्छन्ति सत्तमाः ।
मुहूर्त्तोनं दिनं केचित् प्रवदन्ति मनीषिणः ।।
नक्षत्रदर्शनं नक्तमहं मन्ये गणाधिप ।।

एतदेव सोपपत्तिकमुक्तं तत्रैव—

देवैस्तु भुक्तं पूर्वाह्णे मध्याह्ने मुनिभिस्तथा ।
अपराह्णे च पितृभिः सन्ध्यायां गुह्यकादिभिः ।।

---

(1) का. वि. (पृ–468), का. मा. (पृ–168) ।

(2) बृहन्ना. (21–20) ।

(3) "पार तीर कर्म समाप्तौ" धातोः पारणाशब्दनिष्पत्तिः । पारणा नाम कर्मसमाप्तिः इति प. स. (पृ–60) ।

(4) का. सा. (पृ–47), कृ.र. (पृ–57), वर्षक्रि. (पृ–37), कृत्यकल्प. व्रत. (पृ–3)

(5) नक्षत्रदर्शनं तु प्रदोषकालोपलक्षकम् । तदुक्तं बृहन्नारदीये (27–10)
प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ।
उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः ।।

सर्ववेलामतिक्रम्य निशि भुञ्जीत पण्डितः ।
किञ्चिन्नक्षत्रवृन्देषु उद्गाथेषु समाहितः ॥

सौरनक्ते त्वन्यदुक्तं–[1]नरसिंहपुराणे—

आत्मनो द्विगुणां छायां यदा सन्तिष्ठते रविः ।
सौरनक्तं विजानीयाद् न नक्तं निशि भोजनम् ॥

इति नक्तव्रतकालनिरूपणम् ॥

अथ नक्षत्रव्रतानुष्ठानकालनिरूपणम्

तत्र [2]विष्णुधर्मोत्तरे—

उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः ।
यत्र वा युज्यते राम निशीथे शशिना सह ॥

यत्र वा युज्यत इति वाक्यं दिनद्वयेऽपि सूर्यास्तमनसमयास्पर्शे सति बोद्धव्यम् ।

तथा च— भुक्ते जागरणे नक्ते चन्द्राद्यर्घ्यव्रते तथा ।
ताराव्रतेषु सर्वेषु रात्रियोगो विशिष्यते ॥

दिनद्वयेऽप्यस्तमनसमयाप्राप्तौ "खर्वदर्पौ परौ ग्राह्यौ हिंस्रा स्यात् पूर्वकालिकी" इति बौधायनवचनानुसारेण व्यवस्था मन्तव्या ।

स्कन्दपुराणे— एतानि वर्जयेन्नक्ते अन्नानि सुरसुन्दरि ।
निष्पावा आढकी चैव मुद्गा माषाः कुलित्थकाः ॥
मसूरा राजमाषाश्च गोधूमास्त्रिपुटास्तथा ।
चणका वर्त्तुलाश्चापि सूक्ताश्चैव क्रमादपः ॥

स्कन्दपुराणे— यत्रोपवासस्तिथिषु [3]भेषु वारेषु वा पुनः ।
योगेषु चानन्तऋकं पारणे नातिलङ्घयेद् ॥
पारणं तत्र नो कार्यमतिरिक्ते परे भवेद् ।
योगेष्वेवापि चेत्तत्र पारणं न विधीयते ॥

---

(1) वर्षक्रि. (पृ–37), कृत्यकल्प. व्रत. (पृ–3) ।
(2) का. मां. (पृ–209), का. वि. (पृ-503) ।
(3) भेषु— नक्षत्रेषु ।

योगेषु तिथिनक्षत्रयोरेका तिथिस्तारा वा । एतच्च श्रवणद्वादशीजयन्त्यष्टमीव्यतिरिक्तसांयोगिकव्रतविषयम् । तयोर्विशेषितस्य दर्शितत्वात् ।

शङ्करगीतायाम्—नक्षत्राणि समस्तानि पूरयित्वा तु पारणम् ।

इति व्रतानुष्ठानकालनिरूपणम् ॥

अथ श्राद्धकालाः

तत्राद्यौ एकोद्दिष्टश्राद्धकालनिरूपणम्

तत्र [1]ब्रह्मपुराणे—

पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पैतृकम् ।
एकोद्दिष्टन्तु मध्याह्ने प्रातवृद्धिर्निमित्तकम् ॥

एकोद्दिष्टम्—साम्वत्सरिकम् ।

[2]राजमार्त्तण्डे— आमपात्रन्तु पूर्वाह्णे एकोद्दिष्टन्तु मध्यतः ।
पार्वणं चापराह्णे तु वृद्धिश्राद्धं तु लाग्निकम् ॥

आमपात्रमित्येकोद्दिष्टविषयमिदम् । पार्वणं त्वपराह्ण एव । तदुक्तम्—

मध्याह्नात् परतः कालः कुतपः स उदाहृतः ।
आमपात्रेण तत्रैव पितॄणां दत्तमक्षयम् ॥

एवं सति नित्यश्राद्धमपि न पूर्वाह्णे कार्यम् । 'पञ्चमे च तथाभागे संविभागो यथार्हत' इत्यस्य वाधायां कारणाभावात् । लाग्निकमिति । श्राद्धनिमित्तपुत्रजन्मादि लग्नानन्तरं कार्यम् । उपनयनादि प्रति नियतकालनिमित्तकं च प्रातः । एकोद्दिष्टकालनिमित्तकं तु प्रातः कर्त्तव्यमित्यर्थः । [3]मध्याह्ने मुहूर्त्तषट्काद् ऊर्ध्वं मुहूर्त्तत्रिके । तत्रापि मध्यमो मुहूर्त्तः कुतपः ।

---

(1) का. वि. (पृ–370) । (2) का. वि (पृ–367) ।
(3) मत्स्य. पु. (22–84/85) ।

तथा च मत्स्यपुराणे—

अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्वदा ।
तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः ॥
मध्याह्ने सर्वदा यस्मान्मन्दीभवति भास्करः ।
तस्मादनन्तफलदस्तत्रारम्भो विशिष्यते ॥

विशिष्यत इति वचनात् तत्रारम्भोविशिष्टस्तदप्राप्तौ पुनरन्यत्राऽरम्भोऽदुष्ट इति मन्यते । अत्र मध्याह्नपदमष्टममुहूर्त्तपरः । तथा च [1]वायुपुराणप्रोक्तम्—

दिवसस्याष्टमे भागे मन्दीभवति भास्करः ।
स कालः [2]कुतपो ज्ञेयः पितॄणां दत्तमक्षयम् ॥

[3]गौतमः— आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः ।
विधिज्ञो विधिमास्थाय रौहिणेयं न लङ्घयेत् ॥
रौहिणं लङ्घयेद् यस्तु ज्ञानादज्ञानतोऽपि वा ।
आसुरं भवेच्छ्राद्धं पितॄणां नोपतिष्ठते ॥

[4]वायुपुराणे— [5]शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः ।
कृष्णपक्षस्यापराह्णे रौहिणेयं न लङ्घयेत् ॥

पूर्वाह्णे द्विधाविभक्तदिवसस्य पूर्वभागसमीपके मुहूर्त्ते कुतप इति यावता कृष्णपक्षस्यापराह्णे द्विधाविभक्तदिवसस्यापरभागे नवमे मुहूर्त्ते । "रौहिणेयं न लङ्घयेद" इति

---

(1) लघुहारीतः–99 श्लो (स्मृ. स.), वसिष्ठः (11/33) ।

(2) कुतपकालः स्मृतिचन्द्रिकायां (श्राद्धका) पुराणवचनम्—

कुं यत्र गोपतिर्गोभिः कार्त्स्न्येन तपति क्षणे ।
स काल कुतपो नाम श्राद्धं तत्र प्रदीयते ॥

वायुपुराणे–मुहूर्त्तात् सप्तमादूर्ध्वं मुहूर्त्तान्नवमादधः ।
स काल कुतपो नाम पितॄणां दत्तमक्षयम् ॥

(3) का. वि. (पृ-372), पितृक. (पृ-146), श्लोकगौतम इति का. सा. (पृ-306)

(4) का. वि. (पृ-366), मार्कण्ड़ेय इति का. मा. (पृ-100) ।

(5) अत्र शुक्लकृष्णपक्षयोः दैवपित्र्यपरत्वेनोच्यते ।

स्मृत्यन्तरवाक्यानुरोधात् । रौहिणेयो नवमो मुहूर्त्तः । तथा च मत्स्यपुराणे—

अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्वदा ।
रौद्रः श्वेतश्च मैत्रश्च तथा सारतटः स्मृतः ॥
सावित्रो विजयश्चैव गान्धर्वः कुतपस्तथा ।
रौहिणेय विरञ्चिश्च जयोऽथ नैर्ऋतिस्तथा ॥
माहेन्द्रो वारुणश्चैव भगः पञ्चदशः स्मृतः ॥

एतेन तिथिद्वैधे पूर्वापरा वा मध्याह्नव्यापिनीतिथिरेकोद्दिष्टश्राद्धे ग्राह्येत्युक्तं भवति ।

तथा च स्मृतिः—मध्याह्नव्यापिनी या तु तिथिः पूर्वापराऽपि वा ।
सा तिथिः सकला ज्ञेया पितॄणां श्राद्धकर्मणि ॥

नारदीयपुराणे— पैत्रेऽस्तमनवेलायां स्पृशन्पूर्णैव गम्यते ।
न तत्र दैविकी ग्राह्या दैवे ह्यौदयिकी तिथिः ॥

अत्रास्तमनवेलायामिति द्वितीयार्थे सप्तम्यन्तं प्रतिरूपकमव्ययम् । दिनद्वयेऽपि मध्याह्नस्पर्शेऽस्तमनवेलां स्पृशती पूर्वातिथिर्ग्राह्या इत्यर्थः । तिथिशब्दस्य द्विलिङ्गत्वात् स्पृशन्निति पुंस्त्वनिर्देशः । यदा तु दिनद्वयेऽप्युक्तकालस्य लाभस्तदा ह्रासवृद्ध्यादिना व्यवस्था । तथा [1]वौधायनः—

खर्वो दर्पस्तथा हिंस्रस्त्रिविधं तिथिलक्षणम् ।
खर्वदर्पौ परौ ग्राह्यौ हिंस्रा स्यात् पूर्वकालिकी ॥
खर्वा समतिथिर्ज्ञेया दर्पा वृद्धिमती स्मृता ।
क्षीयमाणा तिथिर्हिंस्रा निर्णयः प्रागुदीरितः ॥
द्वियामाथ त्रियामाथ त्रिसन्ध्याव्यापिनी तिथिः ।
श्राद्धोपवासदानेषु शस्ता वृद्धौ सदा तिथिः ॥

हिंस्राविषयमुक्तम् । नारदीयपुराणे—

[2]दर्शञ्च पौर्णमासञ्च पितु साम्वत्सरं दिनम् ।
पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते ॥
हानिश्च सन्ततेः प्रोक्ता दौर्भाग्यं समवाप्नुयात् ।
एतच्छ्रुतं मया विप्राः कृष्णद्वैपायनात् पुरा ॥

इति एकोद्दिष्टश्राद्धकालः ।

---

(1) का. वि. (पृ–50)। (2) का. मा (पृ–104)।

अथैकदिनेऽनेकश्राद्धानुष्ठानकालनिरूपणम्

तत्र जावालिः—यदैकत्र भवेयाताम् एकोद्दिष्टश्च पार्वणम् ।
पार्वणं त्वभिनिर्वर्त्य एकोद्दिष्टं समाचरेत् ॥

पार्वणम्—अमावास्यादिविहितम् । एकोद्दिष्टं— पितृव्यादिसाम्वत्सरिकम् । न तु पितृसाम्वत्सरिकम् । तस्य पृथगनुष्ठानाभावात् ।

तदुक्तम्— पर्वकालो मृताहश्च यदैकत्रद्वयं भवेत् ।
पार्वणं तत्र कर्त्तव्यं नैकोद्दिष्टं कदाचन ॥

एकोद्दिष्टमत्र पितृसाम्वत्सरिकम् । तथा—

ये मृता दर्शकाले तु तेषां पार्वणवत् सदा ।
पुत्रः श्राद्धद्वयं कुर्यादेष श्राद्धविधिः स्मृतः ॥

श्राद्धद्वयमिति । मातृसाम्वत्सरिके पार्वणश्राद्धम् । मात्रादिश्राद्धं चेत्यर्थः । श्राद्धद्वयमिति पाठे पिण्डपितृयज्ञाख्यं दर्शविहितं मातृसाम्वत्सरिकं चेत्यर्थः । अत्र श्राद्धत्रयं त्रिपुरुषश्राद्धं पार्वणयुक्तं न पृथगित्यर्थे मातृसाम्वत्सरिकस्यापि पृथक्करणं नायाति । सत्यम् । "श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न विहित"मिति [1]जावालिवचनेन मातृश्राद्धनिषेधे युक्त्यभावात् । अत्र पुत्र इति वचनान्मात्रादीनां दर्शकालमृतानां पार्वणवच्छ्राद्धं न भवति । किन्त्वेकोद्दिष्टमेव ।

तथा च— एकाहनि च नष्टानां बहूनामथवा द्वयोः ।
तन्त्रेण श्रपणं कृत्वा पृथग् श्राद्धं प्रकल्पयेत् ॥
कृत्वा पूर्वमृतस्यादौ द्वितीयस्य ततः परम् ।
तृतीयस्य ततः कार्यं सन्निपाते त्वयं क्रमः ॥

सन्निपात इति । एकोद्दिष्टानामिति शेषः ।

न तु— नैकश्राद्धद्वयं कुर्यात् समानेऽहनि कुत्रचित् ।
न होमं हन्तर्ति चैव पितॄणाञ्च तिलोदकमिति ॥

वचनादेकदिने श्राद्धद्वयनिषेधोऽस्ति । तत्कथं तस्यानुष्ठानकालनिरूपणमुपपन्नम् ।

---

(1) श्रा. मञ्ज. (पृ–178)।

पार्वणे काम्ये च नित्यकामश्च न कर्त्तव्यम् । नैमित्तिके नित्यं नैमित्तिकं च कर्त्तव्यमिति व्यवस्था । [1]जावालिः—

श्राद्धं कृत्वा च तस्यैव पुनः श्राद्धं न तद्दिने ।
नैमित्तिकन्तु कर्त्तव्यं निमित्तानुक्रमोदये ॥

नैमित्तिकमत्र जातकर्मादिविहितं साम्वत्सरिकश्च ॥ इति ।

अथाविदितमृताहकालनिरूपणम्

तत्र मार्कण्डेय— न ज्ञायेत मृताहश्चेत् प्रमीते प्रोषिते सति ।
प्रवासवासरे देयं तन्मासेन्दुक्षयेऽपि वा ॥

प्रवासवासरस्यापि ज्ञाने गमनमासस्य दर्शे । प्रवासमासस्याप्यज्ञाने प्राह प्रचेताः—

अपरिज्ञाने मृताहेऽमावास्यायां श्रवणदिवसे वा ।

प्रोषितस्य मरणश्रवणं विनाऽपि । तथा च स्मृतिः—

गतस्य न भवेद् वार्त्ता यस्य द्वादशवार्षिकी ।
प्रेतावधारणं तस्य कर्त्तव्यं सूतवान्धवैः ॥
पिता प्रवसितो यस्य न च वार्त्ता न चागमः ।
ऊर्ध्वं पञ्चदशाद् वर्षाद् कार्या पिण्डोदकक्रिया ॥ इति वचनात् ।
प्रोषितस्तु पिता पुत्रैः प्रतीक्ष्य विंशतिः समा ।
तीर्णः पञ्चदशाब्दानि पश्चान्मृतवदाचरेत् ॥ इति

हारीतवचनाच्च । मरणेऽवधारिते गमनदिनगमनमासयोर[2]परिज्ञाने प्राहतुः [3]यमहारीतौ— श्राद्धविघ्ने समुत्पन्ने मृताहेऽविदितेऽथवा ।

---

(1) श्राद्धम. (पृ–178) ।

(2) प्रवासमरणे दिनमासयोरज्ञानेऽपरार्कटीकायां यथा—
प्रोषितमरणे मासपरिज्ञाने मृततिथिज्ञानाभावे सति परिज्ञातमासामावास्यायां तस्य मृताहकालः । तथा मृततिथिपरिज्ञाने मासज्ञानाभावे सति तदा मार्गशिरोमासि माघमासे वा तस्यां परिज्ञातायां तिथौ तस्य मृताहकालः । तथा मृततिथिमासापरिज्ञाने प्रस्थानदिनमासौ ग्राह्यौ । याज्ञ. अपरार्कटीका(पृ-545)

(3) का. वि. (पृ–373) ।

एकादश्यां प्रकुर्वीत कृष्णपक्षे विशेषतः ॥

विशेषं विवृणोति स्मृतिः—

आषाढ़कृष्णपक्षस्य तिथिरेकादशी च या ।
तदारभ्यैव कर्त्तव्याः पिण्डदानोदकक्रियाः ॥
मार्गशीर्षे माघमासे वैशाखे ज्येष्ठ एव च ।
एषु चतुर्षु मासेषु कृष्णपक्षे विशेषतः ॥

अपुत्रस्यैवेत्यर्थः । तथा च पुराणे—

मृताहं यो न जानाति मानवस्तु खगोत्तम ।
तेन श्राद्धममावास्यां कार्यं सम्वत्सरं भवेत् ।
मासे मार्गशिरे वाऽपि माघे मासि खगोत्तम ॥

स्मृतिः— यन्मासि यदहर्ज्ञातं तन्मासि तदहः क्रियाः ।
दिनाज्ञाने कुहूर्ज्ञेया आषाढस्य यथा कुहूः ॥

कुहूर्गमनमाससम्वन्धिनी । अन्यथा गमनमासस्याप्यज्ञाने । गालवः—

पलाशैस्त्रिशतैः पत्रैः कृत्वा वा प्रकृतिं कुशैः ।
शरैर्जुहुयादग्नौ वा प्रोषितस्यावधारणे ॥

अमुकदिने मृत इति प्रोषितस्य मरणे मासद्वयादूर्ध्वं श्रुतौ कर्त्तव्यमाह—

श्रुत्वाऽथ प्रेतकृत्यं तु आत्रिपक्षं समाचरेत् ।
दर्शे च पतितं शेषं यथाकालं समापयेत् ॥ इति ।

अथ विघ्नितश्राद्धकालनिरूपणम्

तत्र [1]ऋष्यशृङ्गः—

देये पितॄणां श्राद्धे तु आशौचं यदि जायते ।
आशौचे च व्यतिक्रान्ते तेषां श्राद्धं प्रदीयते ॥
शुचीभूतेन दातव्यं या तिथिः प्रतिपद्यते ।
सा तिथिस्तस्य कर्त्तव्या न त्वन्या वै कदाचन ॥

---

(1) का. सा. (पृ–314) ।

स्मृतिः— श्राद्धविघ्ने समुत्पन्ने मृते रजसि सूतके ।
वदन्ति शुद्धौ तत्कार्यं दर्शे वाऽपि मनीषिणः ।।

[1]लघुहारीतः— श्राद्धविघ्ने समुत्पन्ने मृताहेऽविदितेऽथवा ।
एकादश्यान्तु कर्त्तव्यं कृष्णपक्षे विशेषतः ।।

[2]राजमार्तण्डे— श्राद्धविघ्ने समुत्पन्ने मृतस्याविदिते दिने ।
अमावास्यां प्रकुर्वीत वदन्त्येके मनीषिणः ।।

श्राद्धविघ्ने मृतरजः [3]सूतकादिरूपे । एषु वाक्येषु पूर्वपूर्वाऽसम्भवे उत्तरोत्तरग्रहणम् ।

रजःशुद्धिस्तु [4]पञ्चमे दिने ।

तथा च शंखः— शुद्धा भर्त्तुश्चतुर्थेऽह्नि न शुद्धा दैवपित्र्ययोः ।
दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुध्यति ।।

द्विभार्यस्य तु रजोदोषो न प्रविशति । शुद्धपत्नीकस्याप्येवमिति केचित् । [5]यत्तु —

अपत्नीकः प्रवासी च भार्या यस्य रजस्वला ।
आमश्राद्धं द्विजो दद्याद् शूद्रो दद्यात् सदैव हि ।। इति

रजस्युत्पन्ने [6]आमश्राद्धं विहितम् । तदमावास्यादि श्राद्धविषयमेव । तथा च [7]लघुहारीतः—

श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्त्तितम् ।
अमावास्यादिनियतं माससम्वत्सराद्दते ।।

मासिकं साम्वत्सरिकं श्राद्धं वर्जयित्वेत्यर्थः ।

---

(1) यमहारितौ इति का. वि: (पृ–373), मरीचि इति का. सा. (पृ–373) ।

(2) रा. मा. (पृ–121) ।

(3) सूतकादिरूपे विघ्ने तु तच्छुध्यनन्तरं कार्यम् । स्मृत्यर्थ. (पृ–62) ।

(4) पितृभक्तावपि— रजस्वलां चतुर्थदिनस्नातामपि न पाचयेत् । पितृभ. (पृ–3)

(5) का. वि. (पृ–374), रा. मा. (पृ–120) ।

(6) रजादिरूपविघ्ने त्वामश्राद्धं विहितं यथा स्कन्दपुराणे (7-1-206-52)—

द्रव्याभावे द्विजाभावे प्रवासे पुत्रजन्मनि ।
आमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वला ।।

(7) श्रा. म. (पृ–26), याज्ञ. अपरार्क. (पृ–468) ।

अन्नेनैव मासिकं साम्वत्सरिकम् । एकभार्यस्य रजोदोषे मासिकसाम्वत्सरिके स्वयं पाकेनैव कर्त्तव्ये । न त्वामेन । नाप्यमावास्यादौ । आमपात्रदानञ्च पाकासम्भव एव ज्ञेयम् । तदुक्तं भविष्यपुराणे—

पाकाभावेऽधिकारः स्याद् विप्रादीनां नराधिप ।
अपत्नीकानां महाबाहो विदेशगमनादिभिः ॥

अपत्नीकानामिति बहुवचनेन प्रवासिरजस्वलाभार्ययोः सूचितम् । विदेशगमनादिभिरित्यादिशब्देन पत्न्यभावभार्यारजस्वलात्वयोर्ग्रहणम् । पाकासम्भवस्तु आत्मनोऽन्येन सगोत्रेण ज्ञातव्यम् । तथा च स्मृतिः—

समर्थोऽस्मीति यः पाकं पत्न्यभावे तु विह्वलः ।
करोति श्राद्धं सम्पन्नैः श्राद्धदोषैर्व्रजत्यधः ॥

विस्मृतिरूपविघ्ने तु—

[1]एकोद्दिष्टे तु सम्प्राप्ते यदि विघ्नः प्रजायते ।
मासेऽन्यस्मिन् तिथौ तस्मिन् श्राद्धं कुर्यात् प्रयत्नतः ॥

श्राद्धादौ पाकक्रियानन्तरं सूतकमृतक-रजोदोषो नास्ति । तथा च शुद्धिचन्द्रिकायाम्—

प्रारम्भो वरणं यागे संकल्पो व्रतसत्रयोः ।
नान्दीमुखं विवाहादौ श्राद्धादौ च पचिक्रिया ॥

सत्रम्—सदा दानम् । स्मृतिसारे—

श्राद्धे यज्ञे तथोद्वाहे मृते रजसि सूतके ।
अत्राशुद्धि न कुर्वीत यावत्कर्म समाप्यते ॥

सवर्णभार्याद्वयमध्ये यदि वा कनिष्ठा भार्या रजस्वला तदा विरोधो नास्ति ज्येष्ठभार्याया एव धर्मकृत्याधिकारात् । तथा च [2]याज्ञवल्क्यः—

सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत् ।
सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतराम् ॥

सवर्णायां सत्यामन्यामसवर्णां धर्मकार्यं न कारयेत् । धर्म्ये विधौ सवर्णासु भार्यासु मध्ये ज्येष्ठभार्यां विना इतरां मध्यमां कनिष्ठां वा धर्मकृत्यं न कारयेत् । ज्येष्ठया इति विनाशब्दयोगे तृतीया ।

---

(1) श्रा. म. (पृ–25) । (2) याज्ञ. स्मृ (1–88) ।

स्मृतिसारे— गृहे मृते प्रसूते च मातापित्रोर्मृतेऽहनि ।
सूतके मृतके चैव काम्यश्राद्धे महोत्सवे ।।
देशस्योपद्रवे चैव चाण्डालस्पर्शने तथा ।
तस्करादेः प्रवेशे च पूर्वपाकं परित्यजेत् ।।

इति विघ्नितश्राद्धकालः ।

अथ सपिण्डीकरणविषयः

[1]गार्ग्यः— सपिण्डीकरणश्राद्धं प्राप्ते काले न चेत् कृतम् ।
रौद्रे हस्तेऽथवा मैत्रे कर्त्तव्यं स्वमृताहनि ।।

स्मृतिः— सपिण्डीकरणे त्रीणि ऋक्षाण्याहुर्मनीषिणः ।
प्राजापत्यं तथादित्यं नक्षत्रं मित्रदैवतम् ।।

एवं सति प्रसंगेन सपिण्डीकरणश्राद्धकालोऽप्युच्यते । तथा च [2]कालादर्शे—

एकादशे द्वादशेऽह्नि त्रिपक्षे वा त्रिमासि वा ।
षष्ठे चैकादशे त्वब्दे सम्पूर्णे वा शुभागमे ।
सपिण्डीकरणस्येत्थमष्टौ कालाः प्रकीर्त्तिताः ।।

त्रिमासि—तृतीये मासि । शुभागमे शुभस्य विवाहादेरागमे उपस्थिते । अब्दे पूर्णे । 'अथ सपिण्डीकरण सम्वत्सरे पूर्णे त्रिपक्षे वा यदहर्वा वृद्धिरापद्यते ।' इति बौधायनः । अथ [3]सपिण्डीकरणं सम्वत्सरे सम्पूर्णे त्रिपक्षे वा तृतीये मासि वा षष्ठे चैकादशाहे वा । विशेषमाह—

साग्नौ कर्त्र्युभावाद्यौ प्रेते साग्नावनन्तरम् ।
अनग्नेस्तु द्वितीयाद्याः सप्त काला उदाहृताः ।।

कर्तरि साग्नौ आहिताग्नौ उभौ आब्दकालौ । एकादशाहद्वादशाहौ ।

---

(1) श्राद्धदी. (पृ–41), व्यास इति का. सा. (पृ–344) ।

(2) श्राद्धदी. (पृ–41) ।

(3) सपिण्डीकरणकालः भारद्वाजगृह्यसूत्रे यथा—
संवत्सरे सपिण्डीकरणमेकादशे मासि षष्ठे चतुर्थे द्वादशेऽहनि ।
भार. गृह्य. (3-17-1) ।

[1]कार्ष्णाजिनिः—सपिण्डीकरणं कुर्यात् पूर्ववच्चाग्निमान्सुतः ।
परतो दशरात्राच्चेत् कुहूराद्यो परीतरः ।।

दशरात्रात् परतः कुहूश्चेदेकादशाहे कुहूश्चेदित्यर्थः । इतरोऽनग्निः ।

[2]गोभिलः— साग्निकश्च यदा कर्ता प्रेतश्चानग्निमान् भवेत् ।
द्वादशाहे तदा कार्यं सपिण्डीकरणं सुतैः ॥

[3]भविष्यपुराणे – सपिण्डीकरणं कुर्याद् यजमानस्त्वनग्निमान् ।
अनाहिताग्नेः प्रेतस्य पूर्णेऽब्दे भरतर्षभ ।।
द्वादशेऽह्नि षष्ठे वा त्रिपक्षे वा त्रिमासि वा ।
एकादशेऽपि वा मासि मङ्गलस्याप्युपस्थितौ ॥ इति ।

[4]सुमन्तुः – प्रेतश्चेदाहिताग्निः स्यात् कर्ताऽनग्निर्यदा भवेत् ।
सपिण्डीकरणं तस्य कुर्यात् पक्षे तृतीयके ।।

अनग्नेः अनाहिताग्नेः द्वादशाहाद्याः सप्त कालाः पूर्वोक्ता इत्यर्थः । अयमर्थश्च पूर्वोक्तभविष्यपुराणे सूचितः ।

इति सपिण्डीकरणविषयः ।

अथ साम्वत्सरिकश्राद्धनिषेधकालः

तत्र [5]मनुः— पितर्युपरते पुत्रो मातुः श्राद्धान्निवर्त्तते ।
मातर्यपि च वृत्तायां पितुः श्राद्धादृते समाः ।।

ऋते समा इति साम्वत्सरिकं श्राद्धं वर्जयित्वा । इदन्तु सन्निहितवाक्येनैव सम्वद्ध्यते । न तु पूर्ववाक्येनापीति । तदुक्तं [6]शंखेन—

मातर्यपि च वृत्तायां श्राद्धं कुर्वीत पैतृकम् ।
तस्या न वत्सरं कुर्यात् प्रेते पितरि च क्वचित् ॥

---

(1) का. सा. (पृ–336), चतुर्वि. (पृ–169)।

(2) चतुर्वि. (पृ–170), श्रा. म. (पृ–141)।

(3) का. सा. (पृ–336), मद. पारि. (पृ–630)।

(4) का. सा. (पृ-337), मद. पारि. (पृ-630)।

(5) बृहन्मनुरिति का. सा. (पृ-238)। 6) शंखोक्तेरिति का. सा. (पृ-238)।

[1]सम्वत्सरम्— साम्वत्सरिकम् । पूर्ववाक्ये नञो न सम्बन्धः । कुर्यादिति पुनरुपादानात् ।

माता भ्राता सपिण्ड़ो वा सकुल्यो वान्धवस्तथा ।
मृतेष्वेव न कुर्वीत कुर्वीत जनके मृते ।।
माता चैव सुतो भ्राता पत्नी वाऽपि विपद्यते ।
अत्र श्राद्धं प्रकुर्वीत न कुर्याज्जनके मृते ।।
पितरौ प्रमृतौ यस्य तस्याशुचिगृहं भवेत् ।
अन्यश्राद्धं न कुर्वीत यावत् पूर्णो न वत्सरः ।।

प्रेतश्राद्धन्तु कर्त्तव्यमन्येषां भ्रात्रादीनामपि श्राद्धम् ।

[2]वृहन्मनुः— अन्येषां प्रेतकार्याणि महागुरुनिपातने ।
कुर्युः सम्वत्सरात् पूर्वं नैकोद्दिष्टं न पार्वणम् ।।

[3]तथा— पित्रोरब्दमशौचं स्यात् षण्मासं मातुरेव च ।
मासत्रयन्तु भार्यायास्तदर्धं भ्रातृपुत्रयोः ।। मातुः–सपत्नमातुः ।

इति साम्वत्सरिकश्राद्धनिषेधकालः ।

---

(1) वाक्यमिदं श्राद्धप्रदीपे, कालसारे (पृ–238) अपि उद्धृतम् ।
जनकमरणाब्दे मातृवार्षिकमपि न कार्यम् । मातृमरणाब्दे तु पितृवार्षिकश्राद्धमात्रं कार्यम् । उपर्युक्त वृहन्मनुशंखवचनानुसारं ग्रन्थकृता सिद्धान्तितम् । परन्तु विप्रमिश्रः श्राद्धप्रदीपे देशाचारविरोधेन अनुषङ्गाधिकरणाश्रयणेन मातृसाम्वत्सरिके विकल्पं कथयति । तत्रापि उभयोः मातापित्रोः मरणसम्वत्सरे उभयोः साम्वत्सरिकं कार्यमिति विप्रमिश्रैः प्रतिपादितम् । परन्तु गदाधरः कालसारे विप्रमिश्रस्योपर्युक्तमतं खण्डयति । प्रथमतः वाक्ययोः विरोधाभावात् विकल्पं तथा च आचारस्य कृत्यकौमुद्यादिषु अलिखितत्वेन अनादृतत्वात् स्मृत्यपेक्षयाद्व्यान्तरितप्रामाण्येनाचारस्य दुर्वलत्वमित्युक्त्वा आचारे अप्रचलितत्वात् तस्य मतं दृढमप्रास्यति । अत्रापि ग्रन्थकृतः वृहस्पतेः गौरवं महत्वञ्च कालसारे प्रतिपादितम् ।

(2) का. सा. (पृ–236) । (3) का. सा. (पृ–236) ।

ऊनश्राद्धम्

तत्र [1]गार्ग्यः— नन्दायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे ।
उनश्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् ॥

मरीचिः— द्विपुष्करं च नन्दा स्युः सिनीवाल्यां भृगोर्दिने ।
चतुर्दश्याञ्च नोन्नानि कृत्तिकासु त्रिपुष्करे ॥

सप्तम्यादि पुनर्वस्वादि अदशशनैश्चरादितिथिनक्षत्रवारत्रिपुष्करयोगे ऊनश्राद्धानि त्रीणि च ऊनमासिकोनषाण्मासिकोनसम्वत्सररूपाणि ।

वृद्धिश्राद्धादिकालनिर्णयः

तत्र— नैमित्तिकञ्च यच्छ्राद्धं निमित्तानन्तरं हि तत् ।
नान्दीमुखाह्वयं प्रातर्लाग्निकं त्वपराह्णतः ॥
यच्छ्राद्धं नैमित्तिकं स्यात् निमित्तानन्तरं हि तत् ॥

नान्दीमुखाह्वयम् आभ्यु[2]दयिकश्राद्धं प्रातः पूर्वाह्णे भवेत् ।

गार्ग्यः— ललाटसम्मिते भानौ प्रथमः प्रहरः स्मृतः ।
स एवाधिकसंयुक्तः प्रातरित्यभ्यधीयते ॥

अधिकेन—उत्तरप्रहरार्धेन संयुक्तः । [3]शातातपः—
आमश्राद्धन्तु पूर्वाह्णे एकोद्दिष्टन्तु मध्यमे ।
पार्वणं त्वपराह्णे तु प्रातर्वृद्धिनिमित्तकम् ॥

लौगाक्षिः— नियतेषु निमित्तेषु प्रःतवृद्धिनिमित्तकम् ।
तेषामनियतत्वाच्च तदानन्तर्य्यमिष्यते ॥

अनुकूलवशेन तिथीनां नियतत्वे प्रातर्वृद्धिनिमित्तकम् । पुत्रजन्मादिनिमित्तेन तिथीनामनियतत्वे निमित्तानन्तरं वृद्धिश्राद्धमित्यर्थः ।

कार्ष्णाजिनिः— प्रादुर्भवेत् पुत्रपुत्र्योर्ग्रहणे चन्द्रसूर्ययोः ।
स्नानानन्तरमासेषु पितॄन् श्राद्धे न तर्पयेत् ॥

---

(1) श्रा. म. (पृ–130), मद. पारि. (पृ-516) ।

(2) श्राद्धम. (पृ-79) । (3) का सा. (पृ-315) ।

कालादर्शे तु— एकोद्दिष्टन्तु मध्याह्ने [1]नवश्राद्धादिकं भवेत् ।

नवश्राद्धादिकमेकोद्दिष्टं मध्याह्ने भवेत् ।

[2]देवलः— पूर्वाह्णे दैविकं कर्म त्वपराह्णे च पैतृकम् ।
एकोद्दिष्टन्तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् ॥ इति ।

गौतमः— आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः ।
विधिज्ञो विधिमास्थाय [3]रौहिणेयं न लङ्घयेत् ॥

इति वृद्धिश्राद्धादिकालनिर्णयः ।

अथ मृताहश्राद्धनिर्णयः

प्रत्याब्दिकेष्वेवमेव तिथिर्ग्राह्याऽऽपराह्णिकी ।
उभयत्र तथात्वे तु महत्त्वेन विनिर्णयः ॥
समत्वे पूर्वविद्धैव अतथात्वेति सा यदि ।
त्रिमुहूर्त्ता भवेत् सायं सर्वेष्वयं विनिर्णयः ॥

प्रत्याब्दिके—मृताहे प्रतिसंवत्सरे क्रियमाणे श्राद्धेऽपि एवमेव । अमावास्यामिव आपराह्णिकी अपराह्णव्यापिनीतिथिर्ग्राह्या ।

तथा च [4]श्रुतिः—पूर्वाह्णे देवानां मध्यदिने मनुष्याणाम् अपराह्णे पितॄणामिति ।

[5]हारीतोऽपि— अपराह्णः पितॄणान्तु याऽपराह्णानुगामिनी ।
साऽऽराध्या पितृकार्येषु न पूर्वास्तानुगामिनी ॥

उभयत्र तथात्वे अपराह्णव्यापित्वे महत्त्वेन निर्णयः स्यात् । यत्र मृततिथिः महती स्यात् सा ग्राह्येत्यर्थः ।

तदाह [6]मरीचिः- द्व्यपराह्णव्यापिनी स्याद् आब्दिकस्य यदा तिथिः ।

---

(1) नवश्राद्धं यथाऽऽङ्गिरसा चतुर्वि. (पृ–168)—
प्रथमेऽह्नि तृतीयेऽह्नि पञ्चमे सप्तमे तथा ।
नवमैकादशे चैव तन्नवश्राद्धमुच्यते ॥

(2) का. वि. (पृ–367) । (3) रौहिणेयं—नवममुहूर्त्तम् ।

(4) का. वि. (पृ–474) । 5) का. सा. (पृ–307) ।

(6) का. सा. (पृ-310) ।

महती तत्र तद्विद्धां प्रशंसन्ति महर्षयः ॥ इति ।

द्व्यपराह्णौ व्याप्नोतीति द्व्यपराह्णव्यापिनी । अपराह्णद्वये समत्वे उभयत्रतिथेस्तुल्यत्वे पूर्वविद्धैव ग्राह्या ।

तदाह [1]नारदः—दर्शश्च पौर्णमासश्च पितुः साम्वत्सरं दिनम् ।
पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते ॥

उभयत्र तथात्वे तु । क्षयगामितया अपराह्णद्वयाव्यापित्वे सा पूर्वविद्धा ग्राह्या । यदि पूर्वेऽह्नि सायं मृततिथिः त्रिमुहूर्त्ता भवतिः साऽऽराध्या ।

तदाह गोभिलः—द्व्यहस्य व्यापिनी चेत् स्यान्मृताहस्य यदा तिथिः ।
पूर्वविद्धैव कर्त्तव्या त्रिमुहूर्त्ता भवेद् यदि ॥

पूर्वेद्युः सायमिति वाक्यशेषः । [2]कार्ष्णाजिनिरपि—
अह्नोऽस्तमनवेलायां कलामात्राऽपि या तिथिः ।
सैव प्रत्याब्दिकी ग्राह्या नापरा पुत्रहानिदा ॥

इयमपि पूर्वेऽह्नि त्रिमुहूर्त्ता स्वीकार्या इत्येवं परन् । कलामात्रा ग्राह्या सुतरां त्रिमुहूर्त्तेत्यर्थः ।

ननु समत्वे पूर्वविद्धा स्वीकार्येत्यनेनैव पूर्वविद्धा स्वीकारसिद्धा चेत् तथात्वे सति पुनरुक्तिर्वाच्या । मैवम् । प्रत्याब्दिकेष्वेवमेवेति । प्रत्याब्दिकेऽप्येवमेवेति प्रत्याब्दिके धर्मातिदेशादपराह्णव्यापित्वेऽप्यमावास्यामिव परविद्धास्वीकारप्रसक्तावयं विधिरिति न वेत्यर्थः । पूर्वेद्युस्त्रिमुहूर्त्ताभावे परविद्धैव ग्राह्या ।

यथा गोभिलः— मुहूर्त्तोऽपि न चेद् ग्राह्या परैव कुतपे हि सा ॥ इति ।

अत्र कुतपशब्दः कुतपरौहिणेयविरिञ्चिपरः । ननु तिथेः क्षयविषये परविद्धाग्रहणे कुतपव्यापित्वं युक्तम् । तर्हि पूर्वविद्धाग्रहणं न स्यात् । मृततिथेरपराह्णे कुतपाऽभावात् । सत्यम् ।

---

(1) का. सा. (पृ-309), का. मा. (पृ-191) ।

(2) व्यास इति का. सा. (पृ–309) ।

(3) इदं कर्त्तव्यमिति उपदेशः । तद्वत् इत्थं कर्त्तव्यमित्यतिदेशः । अतिदेशस्य वीज "वति" प्रयोगः ।

"सा तिथिस्तदहोरात्रं यस्यामस्तमिथाद्रविः" [1]इति वचनानुसारादस्तमयतिथेः सार्वतिथित्वात् पूर्वविद्धाग्रहणमिति न विरोधः। नन्वेवं परविद्धाग्रहणेऽपि—

[2]यां तिथिं समनुप्राप्य उदयं याति भास्करः।
सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु॥

इति वचनानुसारात्तु नैव तिथिवृद्धिविषयत्वादस्य वचनस्य। यदामावास्यायां रवि-ग्रहणे प्रत्याब्दिकमनेन कर्त्तुं न शक्यते तदा आमेन हेम्ना वा कुर्यात्।

तदाह [3]गोभिलः—दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थिते।
अन्नेनासम्भवे हेम्ना कुर्यादामेन वा सुतः॥

अयं निर्णयः प्रत्याब्दिकश्राद्धनिर्णयश्च सर्वेषु सर्वस्मृतिकर्तृणामभिप्रेतः॥

इति मृताहश्राद्धनिर्णयः।

अथामावास्याश्राद्धनिरूपणम्

तत्रामावास्याशब्दार्थ उच्यते। [4]ब्रह्माण्डपुराणे—

अमा वसेतामृक्षे तु यदा चन्द्रदिवाकरौ।
एषा पञ्चदशी रात्रिरमावास्या तत. स्मृताः॥

अमाशब्दः सहार्थे। [5]देवीपुराणे—

अमा नाम रवेः रश्मिः सूर्यलोके प्रतिष्ठिता।
यस्मात् सोमो वसत्यस्याममावास्या ततः स्मृता॥

[6]मत्स्यपद्मपुराणयोः—

पितृयज्ञन्तु निर्वर्त्य तर्पणाख्यं तु योऽग्निमान्।
पिण्डान्वाहार्यकं कुर्याच्छ्राद्धमिन्दुक्षये सदा॥

तत्र तर्पणाख्यमिति विशेषणं पितृयज्ञत्वेन प्रसिद्धयोः पित्र्यबलि-नित्यश्राद्धयोः व्यावृत्त्यर्थम्।

---

(1) विष्णुधर्मोत्त. (1-60-251), का. वि. (पृ–501)।

(2) का. वि. (पृ–503)। (3) का. सा. (पृ–313), श्राद्धदी. (पृ–75)।

(4) का. मा. (पृ–179), का वि. (पृ–354)।

(5) देवीपु. (118-1)। (6) मत्स्यपु. (16-21)।

[1]मनुः— [2]पितृयज्ञन्तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान् ।
पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् ॥
[3]पिण्डानां मासिकं श्राद्धमन्वाहार्यं विदुर्बुधाः ।
तदामिषेण कर्त्तव्यं प्रशस्तेन प्रयत्नतः ॥

पितृयज्ञोऽत्र पिण्डपितृयज्ञः । मासानुमासिकमिति । मासग्रहणान्मासिकं पिण्डपितृयज्ञाख्यम् । अनुमासिकञ्च षाट्पुरुषिकं पार्वणं श्राद्धम् । तद्द्वैविध्यस्य दर्शयिष्यमाणत्वात् संज्ञाद्वयम् । [4]न च मासानुमासिकमित्यस्य प्रतिमासभवमित्येतावानर्थः ।

---

(1) मनु. (3-122/123) ।

(2) अमावास्याश्राद्धे तिथिद्वैधे पौर्वापर्यञ्च निर्णीतं यथा—
कदाचित्तिथिद्वैधे चन्द्रक्षयदिने साग्नेः पिण्डपितृयज्ञदर्शश्राद्धयोः युगपत् प्राप्तौ तत्रैव मनुना क्रमः नियम्यते इति स्मृतिचन्द्रिकाकारः । पिण्डपितृयज्ञः श्रुत्या अपराह्णे विहितः । ततः तदनन्तरभावि पिण्डान्वाहार्यकश्राद्धं कदाचित् प्रतिपद्यपि भवेदिति मनोरभिप्राय इति हेमाद्रिः । पिण्डपितृयज्ञे न केवलं साग्नेरेवाधिकारः निरग्नेरप्यधिकारोऽस्ति । किन्तु साग्नेः पिण्डपितृयज्ञानन्तरं पिण्डान्वाहार्यकं विधेयमिति मनुना नियम्यते इति श्रीदत्तोपाध्यायः । पिण्डान्वाहार्यकं मासानुमासिकमिति व्यवहारानुगुणसंज्ञाद्वयमिति सर्वज्ञनारायणः । दर्शश्राद्धस्य पिण्डपितृयज्ञानन्तरविधेयत्वमुक्तमिति राघवानन्दनन्दनरामचन्द्रगोविन्दराजाः । मासानुमासिकशब्दो मासगतां वीप्सामाचष्टे । अतश्च पिण्डान्वाहार्यकश्राद्धस्य नित्यतासिद्धिः । अनुमासिकशब्दाद् वीप्सायामवगतायामपि अतिरिक्ते मासशब्दप्रयोगे नैव दोषः, यत पद्यग्रन्थे गौरवं नाद्रियते इति मेधातिथिः । पिण्डान्वाहार्यकश्राद्धं नित्यं प्रतिमासं विधेयञ्च, विप्रपदमत्र द्विजातिपरमिति कुल्लूकः ।

(3) "पितॄणां" इति मनुस्मृतिपाठः ।

(4) अग्निमतः अमावास्यायां श्राद्धद्वयं प्राप्तम् । पिण्डपितृयज्ञः दर्शश्राद्धं च । तत्र पिण्डपितृयज्ञस्य श्रौतत्वात् प्राथम्यं दर्शश्राद्धस्य तदनन्तरवर्त्तित्वं च मनुना दर्शितं पितृयज्ञं तु निर्वर्त्येति । नात्र पितृयज्ञः "पितृयज्ञस्तु तर्पणं"मित्युक्तं तर्पणात्मकं कर्म न वा अहरहर्विहितः पित्र्योर्बलिः । अपि तु पिण्डपितृयज्ञ एवेति

अनुमासिकमिति सिद्धे मासि ग्रहणानर्थक्यात् । पिण्डान्वाहार्यं श्राद्धं द्विविधं भवति । पिण्डान्वाहार्यकमिति 'क' प्रत्ययेन पिण्डेभ्योऽन्वाहार्यं यस्मिन्निति वहुव्रीहिद्योतकेन—

[1]पिण्डेभ्योस्त्वल्पिकामात्राः समादायानुपूर्वशः ।
तानेव विप्रानासीनानशयेद् यत्नतो द्विजः ।। इति
यस्मादभ्युद्धृतान्मात्राद् भक्षयन्ति द्विजातयः ।
अन्वाहार्यकमित्युक्तं तस्मात्तु चन्द्रसंक्षये ।। इति

तथाक्रमं मनुपद्मपुराणोक्तं वौधायनादिव्यवस्थितं श्राद्धमुक्तम् । अनुमासिकमित्यनुशब्देनायमर्थः सूचितः । पिण्डानां मासिकमित्यनेनाऽपि साधारणं पिण्डान्वाहार्यश्राद्धमभिहितम् । मासिकं दर्शश्राद्धम् । पिण्डानां पिण्डपितृयज्ञसम्वन्धिनामनु पश्चादाहार्यं कर्त्तव्यं वुधा विदुरित्यर्थः । अग्निमानिति वचनात् पिण्डपितृयज्ञपूर्वकं श्राद्धं निरग्निर्न करोति केवलं तु श्राद्धं कुर्यादेव ।

अनु० सर्वैर्व्याख्यातम् । पुनश्च पिण्डपितृयज्ञशब्दस्य व्युत्पत्तिर्वहुधा दर्शिता आचार्यैः ।

तत्र कृत्यकौमुदीकार वृहस्पतिस्तु पिण्डान्वाहार्यकशब्दं द्विधा व्याख्याति । "पिण्डेभ्यः मात्रा आहृत्य ब्राह्मणा भोज्यन्ते अस्मिन्" इति व्युत्पत्त्या पिण्डान्वाहार्यकं पार्वणश्राद्धम् । अस्मिन् पक्षे "पिण्डेभ्यस्त्वल्पिका मात्रा" इति मनुवचनं, तथा "यस्मादभ्युद्धृतान्मात्रादि"ति पद्मपुराणवचनं च प्रमाणत्वेनोपन्यस्यति ।

पुनश्च पिण्डानां पिण्डपितृयज्ञसम्वन्धिनाम् अनु पश्चाद् आहार्यं कर्त्तव्यमिति पिण्डान्वाहार्यकं दर्शशाद्धम् इत्युक्त्वा तत्र "पिण्डानां मासिकं श्राद्धमन्वाहार्यं विदुर्वुधा" इति मनुवचनं प्रमाणत्वेनावतारयति । पिण्डान्वाहार्यकशब्दमित्थं द्विधा व्याख्याय मासानुमासिकशब्दं पिण्डपितृयज्ञदर्शश्राद्धरूपार्थद्वयज्ञापकं नामद्वयं मन्यते । तन्मते मासिकं पिण्डपितृयज्ञः अनुमासिकं दर्शश्राद्धम् एतद्द्वयमनयोः संज्ञाद्वयं न तु पिण्डान्वाहार्यकशब्दस्य मासानुमासिकशब्दः विशेषणम् । अपरे सर्वे व्याख्यातारः निवन्धारश्च मासानुमासिकशब्दं पिण्डान्वाहार्यकशब्दस्य विशेषणं मन्यन्ते, किन्तु वृहस्पतिः मासानुमासिकशब्दं विशेष्यं तथा संज्ञाद्वयं च मन्यते इति अस्य सर्वेभ्यो वैशिष्ट्यम् ।

(1) मनु. (3-219) ।

तथा चोशनाः— कुर्यादहरहः श्राद्धं प्रमीतपितृको द्विजः ।
साग्निकोऽनग्निको वाऽपि दर्शे दर्शे विशेषतः ।।

लघुहारीतः— अमावास्यादिनियतं प्रोषिते सहचारिणम् ।
पत्यौ तु कारयेन्नित्यमन्येनाप्यृत्विगादिना ।।

सहचारिणी—पत्नी । यतोऽकरणे प्रत्यवायोऽपि स्मृतः । तथा च—

न करोति हि यः श्राद्धं प्रमीतपितृको द्विजः ।
इन्दुक्षये मासि मासि प्रायश्चित्तीयते तु सः ।।

अभावे [1]पिण्डमात्रमपि देयम् । तथा च धौम्यः—

पिण्डमात्रं प्रदातव्यमभावे द्रव्यविप्रयोः ।
श्राद्धाहनि तु सम्प्राप्ते भवेन्निरशनोऽपि वा ।।

अमावास्यादिनद्वयस्पर्शे यत्रापराह्णव्यापिन्यमावास्या तत्र श्राद्धं कर्त्तव्यम् । तथा च शतपथ[2]श्रुतिः—पूर्वाह्णो वै देवानां मध्यन्दिन मनुष्याणामपराह्णः पितॄणाम् ।

तस्मादपराह्णे पितॄणां दत्तमक्षयमिति ।
[3]पिण्डान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते ।
वासरस्य तृतीयांशे नातिसन्ध्यासमीपतः ।।

राजनि—चन्द्रे, तृतीयांशे—त्रिधाविभक्तदिनस्य तृतीये भागे । पूर्वाह्णमध्याह्नापराह्णव्यवस्थयाऽपराह्ण इति यावत् । शस्यत इत्युक्तत्वात् अत्र श्राद्धं प्रशस्तं न तु दशमो मुहूर्त्तः श्राद्धकालो न भवतीति । नातिसन्ध्यासमीपत अन्तिममुहूर्त्तत्रय इत्यर्थः । तथा च [4]मत्स्यपुराणे—

---

(1) पिण्डप्रमाणं यथा अङ्गिरसा (स्मृतिच. श्राद्धकाण्डे)—

कपित्थविल्वमात्रान्वा पिण्डान् दद्याद् विधानतः ।
कुक्कुटाण्डप्रमाणान्वा यदि वाऽऽमलकी समान् ।
वदरेण समान्वापि दद्याच्छ्रद्धा समन्वितः ।।

(2) का. वि. (पृ–474) ।

(3) छ. प. कात्यायन. (2-81), गोभिल (2-82/83) ।

(4) मत्स्य. पु. (22–82/83) ।

प्रातः कालो त्रिमुहूर्त्तः सङ्गवस्तावदेव तु ।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्तथाऽपरः ॥
सायाह्नस्त्रिमुहूर्त्तस्तु तत्र श्राद्धं न कारयेत् ।
राक्षसी नाम सा वेला सर्वकर्मसु गर्हिता ॥

भविष्यपुराणे— आसप्तमान्मुहूर्त्ताद् वै दैवकार्यं प्रशस्यते ।
श्राद्धादशात् पितुः कार्यं धर्म्यं बोधाय पश्चिमम् ।

[1]मत्स्यपुराणे— ऊर्ध्वं मुहूर्त्तात् कुतपाद् यन्मुहूर्त्तचतुष्टयम् ।
मुहूर्त्तपञ्चकं वाऽपि स्वधाभवनमिष्यते ॥

कुतपादष्टमात् । ननु दिनद्वयेऽपराह्णव्यापित्वे कुत्र स्यादित्येतदाह—

प्रचेताः— [2]सिनीवाली कुहूश्चैव श्रुत्येक्ते पितृकर्मणि ।
स्यातां चेद्द्वे तु मध्याह्ने श्राद्धादि स्यान् कथं तदा ॥
तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूर्मता ।
साम्येऽपि च कुहूर्ज्ञेया वेदवेदाङ्गवेदिभिः ॥

मध्याह्न इति । प्राह्णाऽपराह्णमध्याह्न त्रिसन्ध्यमिति [3]लिङ्गानुशासनवचनात् त्रिधाविभक्तदिवसस्य तृतीये भागे । अथवा मध्याह्ने गते सत्यपराह्ण इति यावत् । मध्याह्नादिति केचित् पठन्ति, तदा ऊर्ध्वमिति व्याख्येयम् । एतदेव विविच्याह छन्दोगपरिशिष्टे [4]कात्यायनः—

यदा चतुर्दशीयामं तुरीयमनुपूरयेत् ।
अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते ॥

चतुर्दश्यास्तुरीयं याम यदा क्षीयमाणा अमावास्या पूरयेदिति सम्बन्धः ।

---

(1) मत्स्यपु. (22-83) ।

(2) सिनीवाल्यादीनां ग्राह्यत्वं यथा सौरपुराणे (51–16)—

सिनीवाली द्विजैर्ग्राह्या साग्निकैः श्राद्धकर्मणि ।
कुहूः स्त्रीभिस्तथा शूद्रैरपि चान्यैरनग्निकैः ॥

(3) अमर. (1–4–3) । (4) कात्यायन. (2–82) ।

अनुशब्देन तुरीययामाद् पूर्वंपूरणे तावदिष्यत इति सूचितम् । ननु—
यदहःस्वेव चन्द्रमा न दृश्येतताममावास्यायां कुर्वीत इति [1]गोभिलवचनात् ।
तदेव वाव सोमो राजा देवानामन्नं यच्चन्द्रमाः स एतां रात्रिं न पुरस्तान्न च पश्चाद्
दृश्यत इति शतपथश्रुतेश्च चन्द्रादर्शन एव श्राद्धं विहितम् ।

चतुर्दश्याञ्च मृणालतुल्यश्चन्द्रमा दृश्यते ।

तत्कथं यदा चतुर्दशीयाममिति वचनमुपपन्नम् । किञ्च 'क्षीणे राजनी'त्युक्ते कथममावास्यायां प्राप्तिः । क्षीणशब्दस्य कृशपर्यायत्वेन चन्द्रमसः कार्श्यस्यान्यत्रापि तिथौ सम्भवादित्याशङ्क्याह स एव ।

[2]यदुक्तं— यदहःस्वेव दर्शनं नैति चन्द्रमाः ।
तत्क्षयापेक्षया ज्ञेयं क्षीणे राजनि चेत्यपि ॥

अदर्शनस्य लयलक्षणत्वादित्यर्थः । तथा च—

यदहरेष पुरस्ताच्चन्द्रमा नोदेति तदहः ददात्येष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स एतां रात्रिं क्षीयते तत्क्षीणे देवानामन्ने पितृभ्यो ददात्यथैतेभ्योऽपि समदंकरोतीति शतपथश्रुतावपि क्षीणशब्देनोपसंहारः कृतः । क्षीणशब्दोऽपि कृशपर्य्यायो न भवतीत्यर्थः । ननु यदहःस्वेव चन्द्रमा न दृश्यत इत्येवोक्तं चतुर्दश्यां श्राद्धविधिः गोभिलस्याभिप्रेतो न भवति ततो विरोध इत्याशङ्क्याह [3]स एव ।

यच्चोक्तं दृश्यमानेऽपि तच्चतुर्दश्यपेक्षया ।
अमावास्यां प्रतीक्षेत तदन्ते वाऽपि वर्त्तयेत् ॥

"दृश्यमानेऽप्येकदे"ति [4]गोभिलवचनं पूर्वोक्त चतुर्दशीविषयमित्यर्थः । तदन्ते चतुर्दशीशेषे यदा अमावास्या श्राद्धयोग्यकालव्यापिनी तदा प्रथमः पक्षः । इतरथा तु द्वितीयः । ननु तत् क्षयापेक्षया ज्ञेयमित्युक्ते कुतश्चतुर्दश्यां श्राद्धमुत्तरदिनेऽमावास्या अपराह्णे प्राप्तावपि वा कुतः पूर्वदिने श्राद्धमित्याह [5]स एव—

(1 गोभिलगृह्य. (1–5–8) ।

(2) गोभिलगृह्य. (1–5-8), छ. प. कात्यायनः (2–83) ।

(3) गोभिलगृह्य. (1–5–9) । (4) गोभिलगृह्य. (1–2–9) ।

(5) गोभिलगृह्य. (1–5–8), छ. प. कात्यायनः (2–85)

अष्टमेऽंशे चतुर्दश्याः क्षीणो भवति चन्द्रमाः ।
अमावास्याऽष्टमांशे च पुनः किल भवेदणुः ॥

अयमर्थश्च शंखलिखितवाक्येषु व्यक्त एव ।

[1]यथा— यस्यां सन्ध्यागतः सोमो मृणालमिव दृश्यते ।
अपराह्णे तु या तस्यां पिण्डानां करणं ध्रुवम् ॥

उत्तरदिनेऽणुरूपस्य चन्द्रमसो विद्यमानत्वे तत्क्षयाभावान्न तत्र श्राद्धं कर्त्तव्यमित्यर्थः । एतस्मादेव हेतोर्यदाऽमावास्याया न वृद्धिक्षयौ, किन्तु स्तम्भेन दिनद्वयेऽप्यपराह्णसम्बन्ध्यमावास्यासम्भवस्तदा पूर्वदिन एव श्राद्धमिति [2]केचित् । तदसम्यक् । "साम्येऽपि च कुहूर्ज्ञेये"ति प्राचेतसवचनात् । "दृश्यमानेऽप्येकदे"ति[3] गोभिलसूत्रे ,एकदेत्यभिधानाच्च । अन्यथा तिथिक्षयतिथिस्तम्भयोश्चतुर्दश्यां श्राद्धस्य कर्त्तव्यत्वे कथमेवंविधं वचनमुपपद्यते ।

एतेना'मावास्याष्टमांशे च पुनः किल भवेदणुरि"ति वचनं क्षयपक्ष एव ज्ञेयम् । प्रकृतत्वादिति तात्पर्यार्थः । पूर्वस्यापवादमाह[4]—

आग्रहायण्यमावास्या तथा ज्येष्ठस्य या भवेत् ।
विशेषमाभ्यां ब्रुवते चन्द्रचारविदो जनाः ॥
अत्रेन्दुराद्ये प्रहरेऽवतिष्ठते, चतुर्थभागोनकलावशिष्टः ।
तदन्त एव क्षयमेति कृत्स्नमेवं ज्योतिश्चक्रविदो वदन्ति ॥

आग्रहायण्यमावास्या-मार्गशीर्षामावास्या । आद्ये प्रहरेऽमावास्यायामिति शेषः । तदन्त एव अमावास्यान्त एव । अनयोस्तु ज्योतिःशास्त्रानुसारेण चद्रगतेर्वैलक्षण्यादष्टमांशे चतुर्दश्याः क्षीणो भवतीत्यादिप्रकारस्यासम्भवादुत्तरदिन एवामावास्याष्टमांशेऽपि श्राद्धं कर्त्तव्यमित्यर्थः । यदा पूर्वदिने समग्रश्राद्धकालव्यापिनीचतुर्दशी परदिनेऽपराह्णादर्वागमावास्या तद्विषयमाह—

---

(1) का. मा. (पृ–191) । (2) चण्डेश्वरा (कृ. र. पृ–624)दयः ।

(3) "दृश्यमानेऽप्येकदा गताध्वा भवति" । गोभिलगृह्य. (1-5-9) ।

(4) गोभिलगृह्य. (1-5-9), कात्यायनः (2-86/87) ।

[1]निगमः— पूर्वाह्णे चेदमावास्या नापराह्णे भवेद् क्वचिद् ।
प्रतिपद्यपि कुर्वीत श्राद्धं श्राद्धविदो विदुः ॥

पूर्वाह्णेऽपराह्णाद् पूर्वभागे नवमे मुहूर्त्ते ।

"ऊर्ध्वं मुहूर्त्ताद् कुतपाद् यन्मुहूर्त्तचतुष्टयम्" [2]इत्यनेन नवममुहूर्त्तस्य स्वधाभवनत्वाभिधानमेतद्विषयम् । अत्र विषये परदिने यागकालाप्राप्तौ पूर्वदिने श्राद्धयागश्च कर्त्तव्य इति विद्याकरेणोक्तम् । दर्शितश्च वाक्यं यथा—

चन्द्रयुक्ता त्वमावास्या पितृपक्षे निराकृता ।
कुहूकाले च कर्त्तव्यमुभयं तु पृथक् पृथक् ॥

प्रातर्युक्त इति प्रायिकमित्यनेन मतान्तरं दर्शयिष्यते ।

आवर्त्तने यदा सन्धिस्ततः पूर्वमथापि वा ।
[3]तदहर्याग इष्येत परतश्चेद् परेऽहनि ॥ इति

पुराणवचनम् । परतश्चेद् परेऽहनीति वाक्यमेतद्विषयतया प्रतिपत्तव्यम् ।

आदित्यस्योदयो यत्र अमावास्यानुवर्त्तते ।
अपराह्णः सविज्ञेयः पितॄणां दत्तमक्षयम् ॥
अरुणोदयवेलायाममावास्या यदा भवेद् ।
स कालः परमो ज्ञेयः पितॄणां दत्तमक्षयम् ॥

[4]इति स्मृत्यन्तरवचने द्वयं निगमवचनस्यैवोपपादकम् । एवं विषये पूर्वतिथेः निन्दाऽपि श्रूयते । तथा च [5]बौधायनः—

मध्याह्नात् परतो यत्र चतुर्दश्यतिवर्त्तते ।
सिनीवाली सा विज्ञेया पितृकार्येषु निष्फला ॥

परत इति । मुहूर्त्तचतुष्टयपर्यन्त इत्यर्थः ।

प्रतिपत्सु त्वमावास्या पूर्वाह्णव्यापिनी यदि ।
भूतविद्धैव सा कार्या पैत्र्ये कर्मणि सर्वदा ॥

---

(1) का. वि. (पृ-358) । (2 का. सा. (पृ-303) ।

(3) "तस्मिन्नहनि यष्टव्यं" इति गोभिलगृह्यभाष्ये (1-5-8) ।

(4) का. वि. (पृ-359) । (5) का. वि. (पृ-357) ।

[1]इति जाबालिवचनं परदिनेऽप्यमावास्यायाः अष्टममुहूर्त्तपर्यन्तमात्रव्यापित्वे सति ज्ञेयम्। पूर्वाह्णव्यापिनीति द्विधाविभक्तदिवसस्य पूर्वभागमात्रव्यापिनी।

[2]अतएव— आवर्त्तने यदा सन्धिस्ततः पूर्वमथापि वा।
तदहर्याग इष्येत परतश्चेत् परेऽहनि॥

इति पुराणवचनमुपपन्नम्। आवर्त्तने मध्यदिने।

[3]स्मृत्यन्तरेऽपि—पूर्वाह्णे चाथ मध्याह्णे यदि पर्व समाप्यते।
उपोष्य तदहस्तत्र श्वो भूते याग इष्यते॥

तदहरिति पूर्वदिनम्। [4]तथा—

मध्यन्दिनात् स्यादहनीह यस्मात् प्राक् पर्वणः सन्धिरियं द्वितीया।
सा खर्विका वाजसनेऽपि मत्या, तस्यामुपोष्याऽथ परेद्युरिष्टिः॥

सा—पूर्वा। तस्यां—पूर्वस्याम्। छन्दोगपरिशिष्टे [5]कात्यायनः—

सम्मिश्रा या चतुर्दश्या अमावास्या भवेत् क्वचित्।
खर्विकां तां विदुः केचिदुपेध्वमिति चापरे।

सम्मिश्रिता— सम्यक्मिश्रिता। स्वधाभवनकालव्यापिन्यां चतुर्दश्यामित्यर्थः। खर्विकामिति निन्दयाऽनुष्ठानानङ्गत्वमुक्तम्। एतच्च परदिनेऽमावास्यायाः प्रहरद्वयाधिककालव्यापित्वे सति ज्ञेयम्। इदमयुक्तम्। पुनः खर्विकां दिनद्वयेऽपि व्यापिनीमित्येतदेव। खर्वा समतिथिर्ज्ञेयेति वचनानुसारादिति केचित्। तन्न बुध्यते। खर्वा समतिथिरित्यस्य सर्वसम्मतत्वे केचिदित्यस्यान्याय्यत्वात्। उपेध्वमिति चापरे इति। अपरे तु तामेव पूर्वोक्तचतुर्दश्या सम्मिश्रामेवानुष्ठानार्थमुपगच्छेतेति ब्रुवते। एतत् परदिनेऽमावास्यायाः प्रहरद्वयमात्रव्यापित्वे सति मन्तव्यम्। इति।

इति अमावास्याश्राद्धनिरूपणम्॥

---

(1) का. वि. (पृ-351)। (2) गोभिलगृह्य. (1-5-8)।
(3) गोभिलगृह्य. (1-5-8), लौगाक्षिरिति का. मा. (पृ-201)।
(4) का. मा. (पृ–201)। (3) का. सा. (पृ-349)।

अथामावास्यावृद्धौ निर्णयः

[1]कात्यायनः— वर्धमानाममावास्यां लक्षयेदपरेऽहनि ।
यामांस्त्रीनधिकान् वाऽपि पितृयज्ञस्ततो भवेत् ।।

प्रथमातिक्रमे किं कारणमित्याशङ्क्य क्वचिदुक्तम्—
चन्द्रक्षयेऽपराह्णेऽपि प्राप्ते भूतयुते दिने ।
तथापि स्वानुरोधेन कुहूर्ग्राह्यापराह्णिकी ।।

चन्द्रक्षये दर्शे पारिभाषिकस्येष्टिकालस्यासम्भवादित्यर्थः । एवं विषये पूर्वदिनं प्रति निन्दाऽपि श्रूयते ।

[2]यथा— भूतविद्धाममावास्यां मोहादज्ञानतोऽपि वा ।
श्राद्धकर्मणि ये कुर्युस्तेषामायुः प्रहीयते ।।

[3]तथा— भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम् ।
तुलामकरमेषेषु कन्यायां मिथुनेऽपि च ।
भूतविद्धाऽप्यमावास्या पूजनीया प्रयत्नतः ।।

एतत्तु दिनद्वयेऽपि अपराह्णव्यापिदर्शसद्भावे सति वृद्धौ साम्ये च ज्ञेयम् ।

[4]यत्तु— घटिकैकाऽप्यमावास्या प्रतिपत्सु न चेत्तदा ।
भूतविद्धाऽपि सा कार्या दैवे पित्र्ये च कर्मणि ।। इति

बौधायनवचनं तदामावास्यायाः सर्वथा क्षयाभिप्रायेणैव । अतएव घटिकैकापीत्यपि शब्दोऽल्पस्याप्यभावसूचकः प्रयुक्तः । ननु द्वितीयस्याममावास्यायाममावास्यानुष्ठेयानुष्ठाने प्रतिपदनुष्ठेयं पक्षादिचरुप्रभृति द्वितीयाविधिरपि प्रसज्येत । तच्चायत्तनिषिद्धम् । एषा वै सुमना नामेष्टिरित्यादि तैत्तिरीयश्रुतौ निन्दनात् ।

यथा क्षीयमाणाऽमावास्यापक्षे—
पर्वणो यश्चतुर्थांश आद्याः प्रतिपदस्त्रयः ।
स यागकालो विज्ञेयः प्रातर्युक्तो मनीषिभिः ।।

---

(1) कृ. र. (पृ–18[illegible]) । (2) का. वि. (पृ-357) ।
(3) रा. मा. (पृ–106) । (4) रा. मा. (पृ–106) ।

[1]इति बौधायनवचनेन चोक्तयागकालस्य परदिनसम्भवे कुतः पूर्वत्र श्राद्धमित्याह–छन्दोगपरिशिष्टे [2]कात्यायनः—

पूर्वाह्ण एव कुर्वीत विद्धेऽप्यन्ये मनीषिणः ।

पूर्वाह्ण एवेति । एतेन प्रातर्युक्त इति प्रायिकमुक्तम् । विद्धेऽपीति द्वितीयारहितस्येष्टिकालस्य प्राप्तौ तु स एव यागार्ह इति [3]लक्ष्मीधरः । अन्ये इति । अन्ये वाजसनेयिप्रभृतयो न बह्वृचा इत्यर्थः । बह्वृचाः कुत्र कुर्वन्तीत्याशङ्क्योक्तम् ।

स्मृत्यन्तरे— प्रतिपद्यपि कुर्वीत द्वितीया यदि दृश्यते ।
यागं तत्र न कुर्वीत विश्वेदेवाः पराङ्मुखाः ॥
[4]पर्वणोऽंशे तुरीयेऽपि कार्या चेष्टिर्द्विजातिभिः ।
द्वितीयासहितं यस्माद् दूषयन्त्याश्वलायनाः ॥

अतएव श्राद्धमधिकृत्याह लघुहारीतः—

त्रिमुहूर्त्ता च कर्त्तव्या पूर्वा दर्शा च बह्वृचैः ।
कुहूरध्वर्युभिः कार्या यथेष्टं सामगीतिभिः ॥

कात्यायनपरिशिष्टे—

पञ्चदशेऽह्नि यष्टव्यं तिथिहानिर्यदा भवेत् ।
सप्तदशेऽह्नि तद् वृद्धावन्यथा षोडशे स्थितः ॥
[5]दर्शे स्नात्वा पितृभ्यस्तु दद्यात् कृष्णतिलोदकम् ।
अन्नञ्च विधिवद् दद्यात् सन्ततिस्तेन वर्धते ॥
[6]दर्शे स्नानं न कुर्वीत मातापित्रोस्तु जीवतोः ।
नवम्यां च न चेत्तत्र निमित्तान्तरसम्भवः ॥
[7]श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके ।
यद्यमा रविवारेण व्यतीपातः स उच्यते ॥

---

(1) कृ. र. (पृ–194), कृत्यकल्प. श्राद्ध. (पृ–13) ।

(2) कृत्यकल्प. श्राद्ध. (पृ–13) ।

(3) कृत्यकल्प श्राद्ध. (पृ–13) ।

(4) श्लोकोऽयं का.मा. (पृ-205) ।

(5) का. वि. (पृ–362) ।

(6) का. वि. (पृ–339) ।

(7) का.वि. (पृ-364), श्राद्धदी. (पृ-141)

नागदैवतमश्लेषा । मस्तकं मृगशिरः । व्यतीपातविधिर्भागवते यथा—

[1]स्नानं दानं तथा होमं श्राद्धं देवार्चनं तथा ।
व्यतीपातेषु यत् पुण्यं कोटिसन्निहिताधिकम् ॥
कृत्वोपवासं पूर्वस्मिन् दिने संयतवाङ्नरः ।
प्रातः स्नात्वा वासुदेवं ध्यात्वा मौनी दृढव्रतः ॥
उदकुम्भं समास्थाय स्थापयेद् पद्ममण्डले ।
कृत्वा तु पूजयेद्देवं वासुदेवञ्च शक्तितः ॥
सूक्तेन पौरुषेणैव प्रार्थयेद् तदनन्तरम् ।
अनेकजन्मकोट्यादि अशुभं सञ्चितं मया ॥
तत्सर्वं विलयं यातु त्वत्प्रसादाज्जनार्दन ।
योनिकोटिसहस्रेषु गत्वा गत्वा सुदुःखितः ।
त्वत्प्रसादात् तरिष्यामि दुःखं संसारसम्भवम् ।
सावित्र्या तु प्रकुर्वीत होमं तत्र तिलैः नरैः ॥
शतमष्टोत्तरं वाऽपि सहस्रं वाऽभि शक्तितः ।
स्त्रीशूद्रैरपि कर्त्तव्या पूजा होमश्च शक्तितः ॥
[2]अमावास्या यदा रौद्रे पुष्यर्क्षे च पुनर्वसौ ।
द्वादशाब्दां तदा तृप्तिं प्रयान्ति पितरोऽर्चिताः ॥
[3]अमावास्या यदा मैत्रे विशाखास्वातियोगिनी ।
श्राद्धे पितृगणाः तृप्तिं नूनं यान्त्यष्टवार्षिकीम् ॥

मैत्रम् अनुराधा ।

[4]वासवाजैकपादर्क्षे पितॄणां तृप्तिमिच्छताम् ।
वारुणेनाप्यमावास्या देवानामपि दुर्लभा ॥

वासवो–धनिष्ठा, अजैकपाद्—पूर्वभाद्रपदा । वारुणं—शतभिषा ।

---

(1) श्राद्धदी. (पृ-141) ।
(2) वि. पु. (3-14-8) ।
(3) वि. पु. (3-14-7) ।
(4) वि. पु. (3-14-9) ।

[1]अमा वै सोमवारेण रविवारेण सप्तमी ।
चतुर्थी भौमवारेण विषुवादधिकं फलम् ॥
[2]अमावास्यां भवेद् वारो यदा भूमिसुतस्य वै ।
जाह्नवीस्नानमात्रेण गोसहस्रफलं लभेत् ॥ इति

इति अमावास्यावृद्धौ निर्णयः ।

अथ द्वादशपौर्णमासीनिरूपणम्

तत्र ब्रह्माण्डपुराणे—

[3]राका चानुमतिश्चैव पूर्णिमा द्विविधा स्मृता ।
पूर्वदिने कलाहीने पौर्णमास्यां निशाकरे ॥
पूर्णिमानुमतिर्ज्ञेया या चास्तमितभास्करा ।
[4]यस्मात्तामनुमन्यन्ते पितरो दैवतैः सह ॥
तस्मादनुमतिर्नाम पूर्णिमा प्रथमा स्मृता ॥
यदा चास्तमिते सूर्ये पूर्णचन्द्रस्य चोद्गमः ।
रञ्जनाच्चैव लोकस्य राकेति कवयो विदुः ॥

[5]श्रुतिरपि — या पूर्वा पौर्णमासी साऽनुमति योत्तरा सा राकेति ।

ब्रह्मपुराणे— ह्रासे त्वनुमतिर्ग्राह्या पर्वकाले मनीषिभिः ।
वृद्धौ साम्येऽपि राका स्याच्चन्द्रसूर्यव्यपेक्षया ॥

[6]राजमार्तण्डे— माससंज्ञे यदा ऋक्षे चन्द्रः सम्पूर्णमण्डलः ।
गुरुणा याति संयोगं सा तिथिर्महती स्मृता ॥

---

(1) रा. मा. (पृ–106), का. वि. (पृ–492) ।

(2) का. सा. (पृ–470) ।

(3) का. वि. (पृ–346), गोभिलगृह्यभाष्य. (1-5-9) ।

(4) का मा. (पृ–198) । 'लोकस्य' स्थाने 'चन्द्रस्य' इति गोभिलगृह्यभाष्ये (1–5–10) ।

(5) काठकश्रुतिरिति का. मा (पृ–198) ।

(6) रा. मा. (पृ–128) ।

माससंज्ञे—विशाखादि नक्षत्रे । चन्द्रगुरुसंयोगस्त्वेकराशिगतत्वे स्यात् ।

[1]उक्तञ्च— एकराशिगतौ स्यातां यदा गुरुनिशाकरौ ।
पौर्णमासी तु महती सर्वपापहरातिथिः ॥
[2]महामाघी प्रयागे तु नैमिषे फाल्गुनी तथा ।
शालग्रामे महाचैत्री कृता पुण्यतमा स्मृता ॥
गङ्गाद्वारे तु वैशाखी ज्यैष्ठी तु पुरुषोत्तमे ।
आषाढी कनखले चैव केदारे श्रावणी तथा ॥
महाभाद्री वदर्याञ्च कुब्जायाञ्च महाश्विनी ।
पुष्करे कार्त्तिकी कन्याकुब्जे मार्गशिरी स्मृता ॥
अयोध्यायां महापौषी कृताः स्युः सुमहाफलाः ।
स्थानेष्वेतेषु कर्त्तव्या मानवैः पुण्यकाङ्क्षिभिः ॥

[3]वैशाख्यां विशाखयुक्तायां ब्राह्मणसप्तकं क्षौद्रयुतैः तिलैः सम्पूज्य धर्मराजानं प्रीणयित्वा सर्वपापेभ्यो पूतो भवति । ज्यैष्ठी ज्येष्ठायुक्ता चेत् स्यात्, छत्रोपानहप्रदानेन गवाधिपत्यं प्राप्नोति । आषाढ्यां आषाढयुक्तायाम् अन्नपानप्रदानेन तदेवाक्षयमाप्नोति । श्रावण्यां श्रवणयुक्तायां धवलधेनुं सान्नां वासोयुगाच्छादितां दत्त्वा स्वर्गलोकमवाप्नोति । प्रौष्ठपद्यां प्रौष्ठपदयुक्तायां गोप्रदानेन सर्वपापैर्विमुक्तो भवति । अश्वयुज्याम् अश्विनीयुक्ते चन्द्रमसि घृतपूर्णभाजनं सुवर्णयुतं विप्राय दत्त्वा दीप्ताग्निर्भवति । कार्त्तिकी चेत् कृत्तिकायुक्ता स्यात्तस्यां सितमुक्षाणमन्यवर्णं वा शशाङ्कोदये सर्वसस्यरत्नगन्धोपेतं दीपमध्ये ब्राह्मणाय दत्त्वा कान्तारभयं न पश्यति । मार्गशीर्षशुक्लपञ्चदश्यां मृगशिरोयुक्तायां चूर्णितलवणस्य सुवर्णतलाभं प्रस्थमेकं चन्द्रोदये ब्राह्मणाय प्रतिपादयेत् । अनेन कर्मणा रूपसौभाग्यमभिजायते । पौषी चेत् पुष्ययुता स्यात्तस्यां गौरसर्षपकल्केनाच्छादितशरीरं गव्यघृतपूर्णकुम्भेनाभिषिक्तं सर्वौषधीभिः सर्वगन्धैः सर्ववीजैश्च सुस्नातं घृतेन भगवन्तं वासुदेवं स्नापयित्वा सुवर्णेन घृतेन ब्राह्मणान् स्वस्ति वाचयेत् । वासोयुगं दद्यात् । अनेन कर्मणा पापै-

---

(1) का. सा. (पृ 461)। (2) का. वि. (पृ–351), रा. मा. (पृ–128) ।
(3) विष्णुस्मृतिः (अ. 90–1–16) ।

मुच्यते । माघी मघायुक्ता चेत्तिलैः श्राद्धं कृत्वा पूतो भवति । फाल्गुनी फाल्गुनयुता चेत् स्यात् तस्यां ब्राह्मणाय सुसंस्कृतं स्वास्तीर्णं शयनीयं निवेद्य मनोज्ञां भार्यां रूपवतीं प्राप्नोति । साऽपि तथा भर्त्तारम् । चैत्री चित्रायुता चेत् स्यात् तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोति ।

इति द्वादशपौर्णमासीनिरूपणम् ।

अथ ग्रहणनिरूपणम्

तत्र [1]जावालिः—संक्रान्तेः पुण्यकालस्तु षोडशोभयतः कलाः ।
चन्द्रसूर्यो[2]परागे तु यावद्दर्शनगोचरः ॥

चन्द्रसूर्योपरागस्य निमित्ततयोपादानात् ज्ञानस्यैव निमित्तता । ज्ञानमात्रे प्राप्ते [3]यावद्दर्शनगोचर इति वचनात् । राहुदर्शन इत्यादि वचनाच्च चाक्षुषज्ञानविषयसत्त्वैव निमित्तता । चाक्षुषज्ञान एव दर्शनपदस्य मुख्यत्वात् । तेन मेघादिच्छन्ने स्नानादिकं न कर्त्तव्यमिति [4]लक्ष्मीधरः । अतएव रात्रिसम्बन्धि सूर्यग्रहणं दिनसम्बन्धि चन्द्रग्रहणं नाद्रियते । चाक्षुषज्ञानविषयत्वाभावात् ।

तथा [5]पठन्ति— रात्रौ सूर्यग्रहश्चन्द्रग्रहो यदि दिवा भवेत् ।
नादेश्यं तद्द्वयं राज्ञे यच्च सूक्ष्मगतं भवेत् ॥

सूक्ष्मगतं—चक्षुग्रहणायोग्यम् । तदुक्तम्—

इन्दोः षोड़शकाद् भागाद्रवेर्द्वादशभागतः ।
नूनं भवेत्यनादेश्यं विम्वस्य ग्रहणं सदा ॥

चाक्षुषज्ञानं द्विविधम् । स्वदृष्टमदृष्टम् । अदृष्टं विदृष्ट्या जननिवेदनश्च ।

---

(1) देवीपु. (24–7), कृत्यकल्प. नियत. (पृ–368), कृ. र. (पृ–625), वर्षक्रि. (पृ–95) ।

(2) उपरागो पर्वप्रतिरत्सन्धौ राहुणा सूर्याचन्द्रमसोः ग्रासः । इति स्मृतिसा. (पृ–167) ।

(3) यावद्दर्शनगोचर इति-यावद्दर्शनयोग्योपरागो वर्त्तते तावद्दर्शनानन्तरं स्नानादि क्रिया । कृ. र. (पृ–625) ।

(4) कृत्यकल्प. नियत. (पृ–369) । (5) का. वि. (पृ–528) ।

[1]तथा— नाड्यः षोडशपूर्वेण संक्रान्तेस्तु परेण च ।
राहोर्दर्शनमात्रेण पुण्यकालः प्रकीर्त्तितः ।। इति

वैवस्वतोमात्रशब्देन एनमर्थमवोचत् । [2]मनुः—

नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन ।
नोपरक्तं न वारिस्थं मध्यञ्च नभसो गतम् ।। इति

ननु न राहुग्रस्तमिति सूर्यदर्शननिषेधात् कथं सूर्यग्रहणं चक्षुर्ग्राह्यं भवतु, सत्यम् । सूर्यग्रहणे ज्ञाते यदपरं रागप्राप्तदर्शनं तदेवानेन निषिद्धम् । न तु प्रथमदर्शनमपीत्यतो न कश्चिद्विरोधः ।

[3]मार्कण्ड़ेयः— चन्द्रस्य यदि वा भानोर्यस्मिन्नहनि भार्गव ।
ग्रहणं तु भवेत्तस्मिन् तत्पूर्वं भोजनक्रियाम् ।।
नाचरेत् सग्रहे चैव तथैवास्तमुपागते ।।

तत्पूर्वं भोजनक्रियाम् । चन्द्रग्रहणे रात्रौ सूर्यग्रहणे चाह्निग्रहणसमयात् पूर्वं भोजनक्रियां नाचरेदित्यर्थः । तथा च [4]स्मृतिः—

नाद्यात् सूर्यग्रहात् पूर्वमह्नि सायं शशिग्रहात् ।
ग्रहकाले च नाश्नीयात् स्नात्वाऽश्नीयाच्च मुक्तयोः ।।

चन्द्रग्रहणे विशेषमाह [5]मार्कण्ड़ेयः—

ग्रहणं चेद् भवेदिन्दोः प्रथमादधियामतः ।
भुञ्जीतावर्त्तनात् पूर्वं पश्चिमे प्रथमादधः ।।
रात्रेरपरभागे तु शशिनो ग्रहणं यदि ।
प्रातरेव तदाऽश्नीयात् पद्मयोनेरिदं वचः ।।

न परभागो अपरभागः पूर्वभाग इत्यर्थः ।

---

(1) का. वि. (पृ–531) । (2) मनु. (4-37) ।
(3) विष्णुधर्मो. (2-93-1) ।
(4) कृ. र. (पृ–626), कृत्यकल्प. नियत. (पृ–309), हे. काल. (पृ–380) ।
(5) वृद्धवरिष्ठ इति स. म. (पृ–134) ।

[1]स्मृतिः— मुक्ते शशिनि भुञ्जीत यदि न स्यान्महा[2]निशा ।
मुक्तिं दृष्ट्वा परेऽह्न्यद्याद् ग्रस्तास्तमितयोस्तयोः ॥

दृष्ट्वा- ज्ञात्वा । तेन परस्मिन्नप्यह्नि चन्द्रस्य वा सूर्यस्य वा दर्शनाभावे तदुदयं ज्ञात्वा स्नात्वा भोजनादिकं कर्त्तव्यम् इति सिद्धम् । [3]दृष्ट्वेत्यस्य मुख्योऽर्थः कुत इति चेद् । सत्यम् । मार्कण्डेयवचनात् । तथा च भोजनमित्यनुवृत्तौ [4]तद्वचनम्—

नाचरेत् सग्रहे चैव तथैवास्तमुपागते ।
यावद् स्यान्नोदयस्तस्य नाश्नीयात्तावदेव तु ॥
मुक्तिं दृष्ट्वा तु भुञ्जीत स्नानं कृत्वा विधानतः ॥

अत्रोदयपदोपादानात् पूर्वक्तोऽर्थोऽन्यथा न यावद्दर्शनं तस्येति ब्रूयात् । [5]अन्यदपि पठन्ति— मेघमालादिदोषेण मुक्तयोरनवेक्षणे ।
आकलय्य ततः कालं भुञ्जीत स्नानपूर्वकम् ॥

एतद्दिनरात्रशेषे मुक्तयोः मेघमालादिदोषेणास्तपर्यन्तादर्शनेऽपि मन्तव्यम् । परेऽह्नि अद्यादिति वचनाद् भोजनमेव ग्रस्तास्तमिते न कर्त्तव्यम् । तेन संध्यावन्दनहोमपाक-स्पर्शादिकं तु कर्त्तव्यमेव । भोजनं तु परगृहे न कर्त्तव्यम् । तदुक्तं ब्रह्मपुराणे—

अश्नीयादथ तत्काले ग्रस्तयोः चन्द्रसूर्ययोः ।
मुक्तयोश्च कृतस्नानः पश्चाद् कुर्यात् स्ववेश्मनि ॥

कुर्यादिति । विपरिणतमर्थमनुपद्यते । ग्रहणकाले भोजने प्रायश्चित्तमाह—

---

(1) कूर्मपु. (2–19-15/16), कृ. र. (पृ–626), वक्रिकौ(पृ–104), कृत्यकल्प नियत. (पृ–309), हे. काल. (पृ-380), भोजदेव इति का. वि. (पृ-539)

(2) महानिशा—रात्रेः प्रथमार्धप्रहरादूर्ध्वं मुहूर्त्तचतुष्टयम् इति कल्पतरु. नियत. (पृ-370) ।

(3) 'तेन मुक्तिं दृष्ट्वा' इति शास्त्रतो ज्ञात्वा अपरेऽहनि रात्रौ वाऽश्नीयादित्यर्थः । ग्रहणकाले च नाश्नीयादित्युक्तनिषेधस्यैवानुवादः । दृष्ट्वा इति प्रत्यक्षदर्शनाभिधानात् । नित्याचा. प. (1-117) ।

(4) विष्णुधर्मोत्त. (2-93-2) । (5) वक्रिकौ. (पृ–100) ।

¹अङ्गिराः— याजकान्नं नवश्राद्धं सग्रहे चैव भोजनम् ।
नारीणां प्रथमे गर्भे भुक्त्वा चान्द्रायणं चरेत् ॥

ग्रहणनिमित्तं स्नानमुष्णोदके न कर्त्तव्यम् । तथा च—

मृते जन्मनि संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥

स्नाने मन्त्रविशेषं पठन्ति । तथा—

स्वस्थानं गम्यतां राहो त्यज्यतां चन्द्रसंगमः ।
कर्मचण्डालयोने त्वं मम पापक्षयं कुरु ॥

ज्योतिःशास्त्रे— जन्मार्के जन्मनक्षत्रे सप्तमे चाष्टमे तथा ।
चतुर्थे द्वादशे चैव न कुर्याद् ग्रहदर्शनम् ॥

पूर्वदिने कृतोपवासस्य विशेषमाह । ²शातातपः—

अहोरात्रन्तु नाश्नीयाच्चन्द्रसूर्यं ग्रहे यदा ।
मुक्ति दृष्ट्वा तु भुञ्जीत स्नानं कृत्वा विधानतः ॥
सूर्यचन्द्रमसोर्लोकानक्षयान् याति मानवः ।
धौतपाप्मा विशुद्धात्मा मोदते तत्र देववत् ॥

³लिङ्गपुराणे— यस्त्रिरात्रमुपोषित्वा ग्रहणे चन्द्रसूर्ययोः ।
स्नात्वा दत्त्वा च विधिवन्मोदते ब्रह्मणा सह ॥
एकरात्रमुपोष्यैव स्नात्वा दत्त्वा च शक्तितः ।
कंचुकादिव सर्पस्य निष्कृतिः पापकोषतः ॥

अन्यदप्युक्तम्— वारे तिथौ च नक्षत्रे संक्रान्तौ ग्रहसूतके ।
नक्तं हविष्यमक्षारमुपवासं च यश्चरेत् ।
स सर्वकामसम्पूर्णो दीर्घमायुरवाप्नुयात् ॥

उपवासस्तु गृहिणा न कर्त्तव्यः ।

---

(1) अङ्गिरा स्मृ. श्लो.–109 (स्मृ. स.) ।

(2) का. वि. (पृ–537), वक्रिकौ. (पृ-101), कृ.र. (पृ-625) कृत्यकल्प नियत. (पृ–369) । (3) का. वि. (पृ-523) ।

तदुक्तं [1]मत्स्यपुराणे—

दिनक्षयेऽर्कसंक्रान्त्यां ग्रहणे चन्द्रसूर्ययोः ।
उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः ॥

[2]स्मृतिः— सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।
स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेत् ॥

यदि राहुदर्शने सूतकं कथं तर्हि दानादिष्वधिकारः, इत्याशङ्क्य "स्नात्वा कर्माणि कुर्वीते[3]त्युक्तम् । सर्वकर्मप्रसङ्गे "शृतमन्नं विवर्जयेत्" [4]इत्यनेन नित्यक्रिया निषिद्धा ।

ननु स्नातस्य कर्माधिकारित्वेऽपि कथं स्मार्त्तकर्माधिकारः । सूतके स्मार्त्तकर्मणां निषेधात् । न च स्नानानन्तरं सूतकनिवृत्तिरिति वाच्यम् ।

ग्रहणे शावमाशौचं विमुक्तौ सौतिकं स्मृतम् ।
तयोः सम्पत्तिमात्रेण उपस्पृश्य क्रियाक्रमः ॥

इति [5]ब्रह्माण्डपुराणवचनेन मुक्तिसमाप्तिपर्यन्तं सूतकानुवृत्तेरुक्तत्वात् । सत्यम् । राहुदर्शनसूतकेतर सूतक एव स्मार्त्तकर्म निषिद्धम् । तथा च व्याघ्रपादः[6]—

स्मार्त्तकर्मपरित्यागो राहोरन्यत्र सूतके ।

सूतककर्मविधानस्य पाकभाण्डस्पर्शनिषेधो ग्रहणनिमित्तेतरकर्मनिषेधश्च फलम् । सूतकाशौचिनाऽपि राहुदर्शने स्नानादिकं कर्त्तव्यमेव ।

तथा च [7]लिङ्गपुराणे—

चन्द्रसूर्यग्रहे स्नायात् सूतके मृतकेऽपि च ।
अस्नायी मृतमाप्नोति स्नायी पापं न विन्दति ॥

---

(1) का. वि. (पृ-447) । (2) षट्त्रिंशन्मत इति का. वि. (पृ-533) ।

(3) नित्याचा. प. (पृ-125) । (4) नित्याचा. प. (पृ–125) ।

(5) का. वि. (पृ–534), व. क्रि. कौ. (पृ–99) ।

(6) का. वि. (पृ-534) ।

(7) का. वि. (पृ-528), व. क्रि. कौ (पृ-108), द्वै. नि. (पृ–85) ।

सूतके मृतके चैव न दोषो राहुदर्शने ।
तावत्कालं भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते ॥

सूतकादौ सकलकर्मनिषेधे पूर्ववाक्येन स्नानादेशाप्लावनमात्रे द्वितीयवाक्ये शुद्धिप्रतिपादनात् साङ्गमदृष्टार्थं स्नानं कार्यमिति ज्ञाप्यते । न पुनरन्यदपि । स्नानमात्रस्य एव पूर्वक्रान्तत्वादिति [1]जीमूतवाहनः । अन्ये तु मन्यन्ते, नहि सूतकादावाप्लावनमपि निषिद्धम् । येन तत्पूर्ववाक्येन विधातव्यम् । किन्तु पूर्ववाक्येन सांगस्नानं विहितम् । द्वितीयवाक्येन जपादावप्यधिकारो दर्शित इति ।

देवलः— यथा स्नानञ्च दानञ्च सूर्यस्य ग्रहणे दिवा ।
सोमस्यैव तथा रात्रौ स्नानं दानं विधीयते ॥

[2]ब्रह्मपुराणे— नित्यं द्वयोरयनयोस्तथा विषुवतोर्द्वयोः ।
चन्द्रार्कयोर्ग्रहणयोर्व्यतीपातेऽथ पर्वसु ॥
अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपम् ।
यः करोति प्रसन्नात्मा तस्य स्यादक्षयं च तत् ॥

[3]विष्णुः— संध्यारात्रौ न कर्त्तव्यं श्राद्धं खलु विचक्षणैः ।
तयोरपि च कर्त्तव्यं यदि स्याद्राहुदर्शनम् ॥

शातातपः— [4]सर्वस्वेनाऽपि कर्त्तव्यं श्राद्धं खलु विचक्षणैः ।
अकुर्वाणस्तु तच्छ्राद्धं पङ्के गौरिव मज्जति ॥
आपद्यनग्नौ तीर्थे च चन्द्रसूर्यग्रहेऽपि च ।
आमश्राद्धं द्विजो दद्याच्छूद्रो दद्यात् सदैव हि ॥

मार्कण्डेयः— ग्रहणे च व्यतीपाते नवसस्यसमागमे ।
युगादौ षडशीत्याश्च ग्रहाच्छादन एव च ॥
नित्यश्राद्धे च संक्रान्त्यामपिण्डं श्राद्धमिष्यते ॥

---

(1) का. वि. (पृ-536) ।

(2) कृ. र. (पृ-628), व. क्रि. कौ. (पृ-91), का. मा (पृ-221) ।

(3) का. वि. (पृ-527), विष्णु. धर्म. (77-8) ।

(4) कृ. र. (पृ-625) ।

[1]यमः— ग्रहोपरागसंक्रान्ती पर्वोत्सवमहालये ।
निर्वपेत् त्रीन् नरः पिण्डानेकमेव मृताहनि ॥

अत्र पिण्डविधिनिषेधयोरेकत्रानुपपत्तावाहिताग्नेः पितुर्न च पिण्डैरेव ब्राह्मणानपि भोजयेदिति नियमात् साग्निना सपिण्डं निरग्निना च पिण्डरहितमिति केचित् । षोडशि[2]ग्रहणाग्रहणवद् विकल्प इत्यपरे । यमवाक्ये पिण्डशब्दस्यान्नव्यञ्जनसमुदाय एवार्थ इत्यन्ये मन्यन्ते । अत्रापि पिण्डशब्दप्रवृत्तेः । तथा च शंखः—

होमो दैवो बलिर्भौतः पित्र्यः पिण्डक्रिया स्मृतः ।
स्वाध्यायो ब्रह्मयज्ञश्च नृयज्ञोऽतिथिपूजनम् ॥

दानन्तु मुक्तिकाल एव ज्ञेयम् । तथा च शातातपः—

[3]अयनादौ सदा देयं द्रव्यमिष्टं गृहेषु यत् ।
षडशीतिमुखेऽतीते विमोक्षे चन्द्रसूर्ययोः ॥

---

(1) यम. श्लो. 83 (स्मृ. स.) ।

(2) षोडशीग्रहणाग्रहणवद् विकल्पः यथा— अतिरात्रे षोडशिनं गृह्णाति । नातिरात्रे षोडशिनं गृह्णाति । इति । अत्र शबरस्वामी प्राह— अतिरात्रवर्जिता गृह्णाति षोडशिनमिति । अतिरात्रयागस्तु ज्योतिष्टोमयागस्य सप्तप्रकारभेदान्तर्गताग्निष्टोमयागस्य विकृतिरूपो यागः । षोडशी यज्ञीयपात्रविशेषः । तत्र अतिरात्रे षोड़शिनं गृह्णातीत्यतिरात्रे षोडशिग्रहणं विहितं तथा नातिरात्रे षोड़शिनं गृह्णातीति प्रतिषेधात् ग्रहणाभावो विहितः । तयोर्ग्रहणाग्रहणयोः परस्परविरुद्धयोरेकस्मिन् प्रयोगेऽनुष्ठातुमशक्यत्वात् क्वचित् प्रयोगे ग्रहणानुष्ठानं प्रयोगान्तरे तदभावानुष्ठानमिति । व्रीहिभिर्यजेत यवैर्वा यजेतेतिवद् विकल्पः । स चाष्टदोषदुष्टः ।

तथाऽत्रापि संक्रान्त्यादिषु पिण्ड़दानविधिनिषेधवचनयोः प्रामाण्यात् क्वचित् पिण्डदानं न कर्त्तव्यम् । क्वचिच्च पिण्डदानं कर्त्तव्यमिति उदितानुदितहोमवद् वा विकल्पः कल्पनीय इति । ततश्च दानविधिपक्षे फलभूमा कल्पनीयेति ग्रन्थकृतः स्वारस्यम् ।

(3) का. वि. (पृ–536) ।

स्मृतिसमुच्चये — [1]उपमर्दे लक्षगुणं ग्रहणे चन्द्रसूर्ययोः ।
पुण्यं कोटिगुणं मध्ये मुक्तिकालेऽप्यनन्तकम् ॥

[2]व्यासः— सर्वं भूमिसमं दानं सर्वे भूमिसमा द्विजाः ।
सर्वं गङ्गासमं तोयं राहुग्रस्ते दिवाकरे ॥
इन्दोर्लक्षगुणं पुण्यं रवेर्दशगुणं स्मृतम् ।
गङ्गातोये तु सम्प्राप्ते इन्दोः कोटि रवेर्दश ॥

अन्यकाले यत्र कुत्रचित् स्नानादिना यत्फलं भवति तदिन्दोर्ग्रहणे लक्षगुणं भवति । रवेर्ग्रहणे तु चन्द्रग्रहणफलाद्दशगुणमित्यर्थः ।

[3]तथा— गवां कोटिप्रदानस्य सम्यग् दत्तस्य यत् फलम् ।
तत् फलं जाह्नवीस्नाने राहुग्रस्ते निशाकरे ॥
दिवाकरे पुनस्तच्च दशसंख्यमुदाहृतम् ॥
चन्द्रसूर्यग्रहे चैव योऽवगाहेत जाह्नवीम् ।
स स्नातः सर्वतीर्थेषु किमर्थमटते महीम् ॥

[4]देवीपुराणे— कार्त्तिके ग्रहणं श्रेष्ठं गङ्गायमुनसङ्गमे ।
मार्गे तु ग्रहणं पुण्यं देविकायां महामुने ॥
पौषे तु नर्मदा पुण्या माघे सन्निहिता शुभा ।
फाल्गुने वरुणा पुण्या चैत्रे पुण्या सरस्वती ॥
वैशाखे तु महापुण्या चन्द्रभागा सरिद्वरा ।
ज्यैष्ठे तु कौशिकी पुण्या आषाढे तापिका नदी ॥
श्रावणे सिन्धुनाम्ना च भाद्रे श्रेष्ठा च गण्डुकी ।
आश्विने सरयूश्रेष्ठा भूयः पुण्या तु नर्मदा ॥
गोदावरी महापुण्या चन्द्रे राहुसमन्विते ।
सूर्ये च राहुणा ग्रस्ते तमोभूते महामुने ॥

---

(1) का. वि. (पृ–537) ।

(2) पद्मपु. सृष्टि. (47-237/238), का. वि. (पृ–521) ।

(3) व्यास इति का. सा. (पृ–455) । (4) देवीपु. (74-11/20) ।

नर्मदातोयसंस्पर्शात् कृतकृत्या भवन्ति ते ।
ये सूर्ये सैंहिकेयेन ग्रस्ते रेवाजलं नराः ॥
स्पृष्ट्वा क्रतुशतफलं दृष्ट्वा गोदानजं फलम् ।
स्मृत्वा गोमेधतुल्यं तु पीत्वा [1]सौत्रामणीं लभेत् ॥
स्नात्वा [2]वाजिमखं पुण्यं प्राप्नुयादविचारतः ।
रविचन्द्रोपरागे तु अयने चोत्तरे तथा ॥
एवं गङ्गाऽपि द्रष्टव्या तद् वदेव सरस्वती ।
शिवादित्यफलं यच्च मण्डले समुदाहृतम् ।
सग्रहे मण्डले योगे तदपि प्राप्नुयान्नरः ॥

[3]मत्स्यपुराणे— गङ्गाकनखले पुण्ये प्रयागः पुष्करं गया ।
कुरुक्षेत्रं तथा पुण्यं राहुग्रस्ते दिवाकरे ॥
कोटिजन्मकृतं पापं पुरुषोत्तमसन्निधौ ।
कृत्वा सूर्यग्रहे स्नानं विमुञ्चन्ति महोदधौ ॥
दशजन्मकृतं पापं स्नानान्नश्यति पुष्करे ।
शतजन्मकृतं पापं गङ्गासागरसङ्गमे ॥
जन्मान्तरसहस्रेण यत् पापं समुपार्जितम् ।
तत्सर्वं सन्निहित्यायां राहुग्रस्ते दिवाकरे ॥

स्नानान्नश्यतीति सम्बन्धः। नदीनां [4]रजोदोषो ग्रहणकाले न विद्यते। तथा च

---

(1) सौत्रामणीं—सौत्रामणीयागस्य फलम् ।

(2) वाजिमखं—अश्वमेधयागम् ।

(3) का. सा. (पृ 455), का. मा. (पृ–225), का वि. (पृ–523) ।

(4) कासाञ्चित् नदीनां रजोदोषो कदापि नास्ति । ताः यथा—

सरस्वतीनदी पुण्या तथा वैतरणी नदी ।
आपगा च महापुण्या गङ्गा मन्दाकिनीनदी ॥
मधुश्रवा अम्लुनदी कौशिकी पापनाशिनी ।
दृषद्वती महापुण्या तथा हिरण्वती नदी ॥

छन्दोगपरिशिष्टे कात्यायनः—

उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च ।
चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते ॥

[1]स्मृतिसमुच्चये—सूर्यग्रहः सूर्यवारे सोमे सोमग्रहस्तथा ।
चूडामणिरिति ख्यातस्तत्रानन्तफलं स्मृतम् ।
वारेष्वन्येषु यत् पुण्यं ग्रहणे चन्द्रसूर्ययोः ।
तत् पुण्यं कोटिगुणितं ग्रासे चूडामणौ स्मृतम् ॥

[2]मत्स्यपुराणे – यस्य राशिं समासाद्य भवेद् ग्रहणसंप्लवः ।
तस्य स्नानं प्रवक्ष्यामि मन्त्रौषधिविधानतः ॥
चन्द्रोपरागं सम्प्राप्य कृत्वा ब्राह्मणवाचनम् ।
सम्पूज्य चतुरो विप्रान् शुक्लमाल्यानुलेपनैः ॥
पूर्वमेवोपरागस्य समासाद्यौषधादिकम् ।
स्थापयेच्चतुरः [3]कुम्भान् ब्राह्मणान् सागरानिति ॥
गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात् ।
राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत् ॥
पञ्चगव्यञ्च[4] कुम्भेषु शुद्धमुक्ताफलानि च ।
रोचनां शङ्खपद्मौ च पञ्चभंगसमन्वितौ ॥
पलाशाश्वत्थकपित्थविल्वोदुम्बरपल्लवैः ।

अनु० वर्षाकालवशः सर्वा वर्जयित्वा सरस्वतीम् ।
एतासामुदकं पुण्यं प्रावृट्काले प्रकीर्त्तितम् ॥
रजस्वलात्वमेतासां विद्यते न कदाचन ।
तीर्थस्य च प्रभावेण पुण्या ह्येताः सरिद्वराः ॥

वाम. पु. (34-6/9)

(1) कां. मा. (पृ–225), का. वि. (पृ–523) ।

(2) मत्स्य. पु. (67–2/22) । (3) 'नव्रणान्' इति मत्स्य. पु. ।

(4) 'पञ्चरत्नं पञ्चत्वक् पञ्चपल्लवम्' इति नि. सि. पाठः ।

पञ्चभंग इति ख्यातो वालानां शान्तिकारकः ॥
स्फटिकं चन्दनं श्वेतं तीर्थवारिससर्षपम् ।
गजदन्तं सकुमुदं तत्रैवोशिरगुग्गुलुम् ।
एतत् सर्वं विनिक्षिप्य कुम्भेष्वावाहयेत् सुरान् ।
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥
आयान्तु यजमानस्य दुरितक्षयकारकाः ।
योऽसौ वज्रधरो देव आदित्यानां प्रभुर्मतः ॥
सहस्रनयनश्चन्द्रो ग्रहपीडां व्यपोहतु ॥
मुखं यः सर्वभूतानां सप्तार्चिरमितद्युतिः ।
चन्द्रोपरागसम्भूतामग्निपीडां व्यपोहतु ॥
यः कर्मसाक्षी लोकानां धर्मो महिषवाहनः ।
यमश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु ॥
रक्षो गणाधिपः श्रीमान् प्रलयानलसन्निभः ।
खड्गव्यग्रोऽतिभीमश्च रक्षः पीडां व्यपोहतु ॥
नागपाशधरो देवः सदा मकरवाहनः ।
स जलाधिपतिश्चन्द्रो ग्रहपीडां व्यपोहतु ॥
प्राणरूपेण यो लोकान् पाति कृष्णमृगप्रियः ।
वायुश्चन्द्रोपरागोत्थां पीडामत्र व्यपोहतु ॥
योऽसौ निधिपतिर्देवः खड्गशूलगदाधरः ।
चन्द्रोपरागकलुषं धनदोऽत्र व्यपोहतु ॥
योऽसाविन्दुयुतः पूतः पिनाकी वृषवाहनः ।
चन्द्रोपरागपापानि मे नाशयतु शंकरः ॥
त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ।
ब्रह्मविष्ण्वर्कयुक्तानि तानि पापानि हन्तु वै ॥
एवमामन्त्र्य कुम्भैस्तैरभिषिक्तो गुणान्वितैः ।
ऋग्यजुःसाममन्त्रैश्च शुक्लमाल्यानुलेपनैः ॥

पूजयेद् वस्त्रगोदानैर्ब्राह्मणानिष्टदैवतान् ।
एतानेव ततो मन्त्रान् विलिख्य कनकान्वितान् ॥
वस्त्रपट्टेऽथवा पट्टे पञ्चरत्नसमन्वितान् ।
यजमानस्य शिरसि निदध्युस्ते द्विजोत्तमाः ॥
ततोऽतिवाहयेद् वेलामुपरागान्तगामिनीम् ।
प्राङ्मुखः पूजयन्तस्ते सम्यक् तस्येष्टदेवताः ॥
चन्द्रग्रहे निवृत्ते तु कृतगोदानमङ्गलः ।
कृतस्नानाय तं पट्टं ब्राह्मणाय निवेदयेत् ॥
अनेन विधिना यस्तु ग्रहस्नानं समाचरेत् ।
न तस्य ग्रहपीड़ा स्यान्न च बन्धुवनक्षयः ॥
परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ।
सूर्यग्रहे सूर्यनाम सदा मन्त्रेषु कीर्तयेत् ॥

विष्णुधर्मोत्तरे— यन्नक्षत्रगतो राहुर्ग्रसते चन्द्रभास्करौ ।
तज्जातानां भवेत् पीड़ा यदि ते शान्तिवर्जिताः ॥

पराशरः— [1]जन्मर्क्षे उपरागश्चेत् वृषभस्य [2]शकृन्मूत्रे तद्वर्णायाश्च गोः पयः कुशांश्चोदकुम्भे निधायाभिषेचनं कुर्यात् ।

स्मृतिः— सप्ताहं ग्रहणेऽतीते तथैवानागतेऽपि वा ।
वर्जयेच्छुभकर्माणि [3]ऋक्षे पापात्मिके तथा ॥

राजमार्तण्डे—[4]ग्रहे रवीन्दो[5]रवनिप्रकम्पे केतूद्गमोल्कापतनादिदोषैः ।
वर्ज्यं दशाहानि वदन्ति तज्ज्ञास्त्रयोदशाहानि वदन्ति केचित् ॥

---

(1) जन्मर्क्षे उपरागश्चेत्— जन्मदिने ग्रहणं भवति चेत् ।
(2) शकृत्—मलः ।
(3) ऋक्षे पापात्मिके—दुष्टनक्षत्रे ।
(4) ग्रहे—ग्रहणे ।
(5) अवनिप्रकम्पे—भूमिकम्पने ।

उद्वाहमाहुः शुभमङ्गलानामेकाहमेव [1]व्रतबन्धनञ्च ।
त्र्यहं विहाय ग्रहणे नराणां सदैव सप्ताहमपि [2]प्रयाणे ॥

इति ग्रहणनिरूपणम् ।

अथ संक्रान्तिनिरूपणम्

तत्र [3]ज्योतिःशास्त्रे—

अयने द्वे विषुवे द्वे चतस्रः षडशीतयः ।
चतस्रो विष्णुपद्यश्च संक्रान्त्यो द्वादश स्मृताः ॥
मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने ।
विषुवतीतुलामेषौ गोलमध्ये तथाऽपराः ॥

मृगो—मकरः । अयनशब्दस्य प्रत्येकमभिसम्बध्यते । तेनोदगयनं दक्षिणायनञ्च । तुलामेषसंक्रान्ती विषुवतीत्यर्थः । गोलो राशिचक्रम् ।

[4]तथा— धनुर्मिथुनकन्यासु मीने च षडशीतयः ।
वृषवृश्चिककुम्भेषु सिंहे विष्णुपदी स्मृता ॥

[5]देवीपुराणे— स्वस्थे नरे सुखासीने यावत् स्पन्दति लोचनम् ।
तस्य त्रिंशत्तमो भागस्तत्परः परिकीर्त्तितः ॥
तत्पराच्छतभागस्तु त्रुटिरित्यभिधीयते ।
त्रुटेः सहस्रभागो यः सकालो रविसंक्रमे ॥

एवं विधस्य संक्रान्तिकालस्यातिसूक्ष्मत्वात् कथमुपवासादिविधानमुपपद्यतामित्याकाङ्क्षायामाह – [6]देवलः—

संक्रान्तिसमयः सूक्ष्मो दुर्लक्ष्यः पिशितेक्षणैः ।
तद्योगश्चाप्यधश्चोर्ध्वं त्रिंशन्नाड्यः प्रकीर्त्तिताः ॥

---

(1) व्रतबन्धनं—मौञ्जीबन्धनम्, उपनयनसंस्कार इत्यर्थः ।

(2) प्रयाणे—यात्रायाम् ।

(3) रा. मा. (पृ–130) ।

(4) रा. मा. (पृ–130), कृत्यकल्प. नियत. (पृ–362) ।

(5) देवी. पु. (24–24/25) ।

(6) रा. मा. (पृ–129) ।

एतेन निरामिषभोजनमैथुनवर्जनदानोपवासादिकं प्रति संक्रान्तिसमयोपलक्षिताहोरात्रसम्बन्धिन्यः षष्टिनाड्यः पर्वकाल इत्युक्तम् । स्नानदानादिकं प्रति दिनभागे संक्रान्तेः पुण्यतमकालो दर्शितः ।

[1]वसिष्ठः— अह्निसंक्रमणे पुण्यमहः कृत्स्नः प्रकीर्त्तितम् ।।

अनेन द्वादशस्वपि दिनसम्बन्धिसंक्रांतिषु समस्तदिवसस्य पुण्यमत्र प्राप्तौ विशेषमाहतुर्देवल[2]शातातपौ—

त्रिंशत् कर्कटके नाड्यो मकरे विंशतिः स्मृताः ।
वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश ।।
षडशीत्यामतीतायामष्टिभुक्तास्तु नाडिका ।
पुण्यायां विष्णुपद्याञ्च प्राक् पश्चादपि षोड़श ।।

वर्त्तमान इति प्रत्येकमभिसम्बन्धनीयम् । तेन रवौ कर्कटके वर्तमाने रवौ मकरे वर्त्तमाने च त्रिंशद् विंशतिरिति यथाक्रमं पूर्वापरा इति ज्ञेयम् ।

त्रिंशत् कर्कटके पूर्वा मकरे विंशतिः पराः ।

इति [3]स्मृत्यन्तरात् । [4]उभयत इति तुलामेषयोरित्यर्थो न तु पार्श्वद्वये ।

अतीतानागते पुण्ये द्वे तूदग्दक्षिणायने ।
उपरागे तु तत्कालमतीते विषुवद्वये ।।

इति वसिष्ठवचनात् । अष्टिः षोडश । एवं सति—

अर्वाक् षोडशनाड्यस्तु परस्मादपि षोडश ।
पुण्यकालेऽर्कसंक्रान्तौ धर्मविद्भिरुदाहृता ।।

इति शातातपवचनं दिनसम्बन्धिविष्णुपदीमात्रेऽवतिष्ठते ।

ननूक्तसंख्यानाडीनामप्राप्तौ पूज्यता कथं, वचनस्य संख्यावच्छिन्नकालविषयत्वात् ।

---

(1) वृद्धवसिष्ठ इति का. सा. (पृ–449)।

(2) का. वि. (पृ–383), नित्याचा. प. (पृ–120)।

(4) वसिष्ठ इति का. सा (पृ–447) ।

(5) वाक्यमिदं कालसारे यथा— उभयतेति तुलामेषयोरित्यर्थः; न तु पार्श्वद्वययोरिति कृत्यकौमुदीकाराः । का. सा. (पृ–448) ।

सत्यम् । अवधिदर्शनार्थं एव संख्याशब्दोपादानं न तु व्यवच्छेदार्थम् । तथा च तदर्थमेव संख्याविशेषानपेक्षं [1]देवीपुराणवचनमुक्तम् ।

षड़शीतिमुखेऽतीते वृत्ते च विषुवद्वयोः ।
भविष्यत्ययने पुण्यमतीते चोत्तरायणे ॥

वृत्तेऽतीते । चकारो व्यतिक्रमे विषुवद्वयेऽपि वृत्त इति ।

रात्रिसंक्रमणे विशेषमाह—

[2]**वसिष्ठः—** अर्धरात्रादधस्तस्मिन्मध्याह्नस्योपरिक्रिया ।
ऊर्ध्वं संक्रमणे चोर्ध्वमुदयात् प्रहरद्वयम् ॥

परदिनसम्बन्धिमध्याह्नस्योपरि इत्युक्ते रात्रावपि कुतो न स्यात् । तथा मध्याह्नः परदिनसम्बन्धी । उदयानन्तरं प्रहरद्वयश्च पूर्वदिनसम्बन्धि कुतो न स्यादित्याकाङ्क्षायां सोपपत्तिकमुक्तम् । [3]स्मृत्यन्तरे—

रात्रौ संक्रमणे भानोर्दिवा कुर्यात्तु तद् क्रियाम् ।
पूर्वस्मात् परतो वाऽपि प्रत्यासत्तेस्तु तत्फलम् ॥

पूर्वाह्णेन रात्रिव्युदासः । अर्धरात्रादूर्ध्वं संक्रमणे पूर्वस्माद् दिनात् परदिनप्रत्यासन्नत्वात् । परदिन सम्बन्धिन एव उदयादूर्ध्वं प्रहरद्वयम् । तत्फलम्—स्नानदानादिक्रियाफलम् । तथार्धरात्रादधःसंक्रान्तौ परस्माद्दिनात् पूर्वदिनस्य प्रत्यासन्नत्वात् । पूर्वदिनसम्बन्धिन एव मध्याह्नस्योपरि तत्फलमित्यर्थः ।

देवलः— आसन्नसंक्रमः पुण्यं दिनार्धं स्नानदानयोः ।

आसन्नसंक्रम इति हेतुः ।

[4]आसन्नसंक्रमो यस्य दिनार्धस्य ततस्तथा ।
पूर्वोत्तरगतं रात्रौ भानोः संक्रमणं भवेत् ॥
पूर्वाह्णे पञ्चनाड्यश्च पुण्याः प्रोक्ता मनीषिभिः ।
अपराह्णे तु पंचैव दैवे पित्र्ये च कर्मणि ॥

---

(1) देवीपु. (24-16) । (2) रा. मा. (पृ-129) ।
(3) का. वि. (पृ-382), रा. मा. (पृ-130) ।
(4) स. म. (पृ-140) ।

रात्रावुत्तरभागे च रविसंक्रमणं चेत्तदोत्तरदिनसूर्योदयसन्निहिताः पञ्चनाड्यः पुण्यतमाः । पूर्वभागे तदा पूर्वदिनस्यान्तिमपञ्चनाड्यः पुण्यतमा इत्यर्थः । मध्याह्नस्योपरिक्रिया उदयात् प्रहरद्वयमित्यनेन यः पुण्यकालः प्रोक्तस्ततोऽप्ययं पुण्यतम इति तात्पर्यार्थः ।

[1]अतएव— "याः याः सन्निहिताः नाड्यः तास्ताः पुण्यतमाः स्मृताः" इत्युपपन्नम् । [2]देवीपुराणे—

मानार्धं भास्करे पुण्यमपूर्णे शर्वरीदले ।
सम्पूर्णे तूभयोर्देयमतिरेकेऽपरेऽहनि ॥

भास्करे—भास्करोपलक्षिते काले । मानार्धम्—दिनार्धम् ।

[3]वसिष्ठः— सम्पूर्णे चेदर्धरात्रे रविसंक्रमणं भवेत् ।
प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ ॥
त्रिंशत् कर्कटके पुण्यं मकरे विंशतिस्तथा ।
भविष्यद्दक्षिणे पुण्यमतीते चोत्तरायणे ॥

दिनद्वयम्—दिनार्धद्वयम् ।

निशार्धे चलिते भानौ निरंशञ्च दिनद्वयम् ।
पूर्वेऽहनि च कर्त्तव्यं स्नानदानजपादिकम् ॥

[4]इति राजमार्तण्डवचनमप्येतद् विषयं मन्तव्यम् । दक्षिणे—दक्षिणायने । भविष्यत् संक्रमणं पुण्यं तेन पूर्वदिनसम्बन्धिन्यस्त्रिशन्नाड्यः पुण्याः ।

मिथुनात् कर्कसंक्रान्तिर्यदा स्यादंशुमालिनः ।
प्रभाते वा निशीथे वा कुर्यादहनि पूर्वतः ॥

[5]इति भविष्योत्तरवचनम् ।

---

(1) का. वि. (पृ–387) ।
(2) देवीपु. (24–14), कृ. र. (पृ–616) ।
(3) का. वि. (पृ–383), नित्याचा. प. (पृ–120) ।
(4) रा. मा. (पृ–130) ।
(5) भविष्ये इति का. सा. (पृ–448) ।

अर्धरात्रे तदूर्ध्वं वा संक्रान्तौ दक्षिणायने ।
पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः ॥

[1]इति वृद्धगार्ग्यवचनश्च । सुव्यक्तोऽयमर्थः । उत्तरायणेऽतीते सति परदिनसम्बन्धिन्यो विंशतिनाड्यः पुण्याः इत्यर्थः । [2]ज्योतिःशास्त्रे—

अस्तं गते यदा सूर्ये झषं याति दिवाकरः ।
उदये चार्धरात्रे वा तदा पुण्यं दिनान्तरम् ॥

झषो मकरः । उदये सूर्योदयसमये रात्रेरुत्तरभागे । दिनान्तरम्—परदिनम् ।

तथा— कार्मुकन्तु परित्यज्य झषं संक्रमते रविः ।
प्रदोषे चार्धरात्रे वा स्नानदाने परेऽहनि ॥

[3]वृद्धगार्ग्यः— यद्यस्तमनवेलायां मकरं याति भास्करः ।
प्रदोषे चार्धरात्रे वा स्नानदाने परेऽहनि ॥

राजमार्तण्डे— सम्पूर्णे चार्धरात्रे वा भानुः संक्रमते यदा ।
पुण्यकालः प्रयत्नेन प्रभाते मनुरब्रवीत् ॥

[4]देवीपुराणे— अयनेषु विकल्पो यस्तन्मे निगदतः शृणु ।
यावद् विंशकला मुक्तास्तत्पुण्यं चोत्तरायणे ॥
निरंशे भास्करे दृष्टे दिनान्ते दक्षिणायने ।
अर्धरात्रे त्वसम्पूर्णे दिवा पुण्यमनागतम् ॥
सम्पूर्णे चार्धरात्रे च उदयेऽस्तमयेऽपि वा ।
असम्पूर्णे सम्पूर्णे वाऽर्धरात्रे च भास्करे ॥

निरंशे दृष्टे । संक्रान्तिसमये भास्करोऽशंकशून्यो भवतीति संक्रान्तेः ज्ञाने विंशतिकलाः संक्रान्तिक्षणादूर्ध्वं यावत् ।

भाविनी तावदुत्तरायणे पुण्यां दक्षिणायने तु दिवान्ते दिनपर्यन्तेन यावती कलाभुक्ता भवति । तत्पुण्यं त्रिंशन्नाड्यः पुण्या इत्यर्थः । रात्रौ तूभयोर्दक्षिणायनोत्तरायणयोर्यथाक्रमं पूर्वोत्तरनाडीनां पुण्यत्वं भवद्रात्रिसम्बन्धिनीनामपि प्राप्नोति

---

(1) नित्याचा. प. (पृ–120) ।
(2) का. वि. (पृ-383) ।
(3) नित्याचा. प. (पृ–120) ।
(4) देवी. पु. (24–12/14) ।

इत्याशङ्क्योक्तम् । दिवापुण्यमनागतमिति । अनागतं रात्रिसम्बन्धिसंक्रमणं पुण्यं । यत्तु दिवा पूर्वंदिने परत्र चेत्याशङ्कायामुक्तम्— उदयेऽस्तमयेऽपि चेति । उत्तरायणे परदिनस्योदयोपक्रान्तविंशतिनाडीषु दक्षिणायने च संक्रान्तिक्षणादर्वागस्तमयान्ते दिवाभागे संक्रान्तिकृत्यं कर्त्तव्यमित्यर्थः ।

[1]तथा— आदौ पुण्यं विजानीयाद् यद्यभिन्नातिथिर्भवेत् ।
अर्धरात्रे व्यतीते तु विज्ञेयं चापरेऽहनि ॥

अर्धरात्रौ संक्रान्तौ तिथिर्यद्यभिन्ना, पूर्वंदिने संक्रान्तिक्षणे च एकैव, तदादौ पूर्वंदिने पुण्यं विजानीयात् । एतेन सम्पूर्णे तूभयोर्देयमिति भिन्नतिथिविषयत्वमित्युक्तम् । तत्रापीच्छया पूर्वत्र परत्र दिने संक्रान्तिकृत्यं कर्त्तव्यम् । न तूभय इति केचित् । केचित्त्वभिन्नतिथित्वे पूर्वत्र, भिन्नतिथित्वे परत्रेति व्यवस्थामाहुः । अर्धरात्रे व्यतीते तु तिथिर्यद्यभिन्ना तदा परेऽहन्येव पुण्यं विज्ञेयम् ।

यत्तु[2]— राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु ।
स्नानदानादिकं कुर्युर्निशिकाम्यव्रतेषु च ॥ इति

देवलवचनं न रात्रिसंक्रमपरम् । किन्तु दिवाऽन्तिमक्षणभूतदक्षिणायनेतरसंक्रान्तिविषयम् । सूर्योदयानन्तरक्षणप्रवृत्तदक्षिणायनपरञ्च ।

[3]तथा— द्वादशैव [4]समाख्याता समासंक्रान्तिकल्पना ।
सप्तधा सा तु बोद्धव्या एकैकैव यथा शृणु ॥
मन्दा मन्दाकिनी ध्वांक्षी घोरा चैव महोदरी ।
राक्षसीमिश्रिता चैव संक्रान्तिः सप्तधा नृप ॥

---

(1) देवीपु. (24–16/17) ।

(2) कृ. र. (पृ–616), व.क्रि.कौ. (पृ–210) ।

(3) देवीपु. (24-2/6), कृ. र, (पृ-614/614), कृत्यकल्प. नियत. (पृ-360) ।

(4) द्वादशसंक्रान्तयः कालसारे (पृ–446) यथा—

मेषो वृषश्च मिथुनं कर्कटं सिंहहरितः ।
कन्या तुला वृश्चिकश्च धनुर्मकरकुम्भकः ।
मीनश्चेति द्वादशैवं रविसंक्रान्तयो मताः ॥

मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी तथा ।
क्षिप्रे ध्वांक्षी विजानीयादुग्रे घोरा प्रकीर्त्तिता ।।
चरैर्महोदरी ज्ञेया क्रूरैर्ऋक्षैस्तु राक्षसी ।
मिश्रिता चैव विज्ञेया मिश्रितर्क्षैस्तु संक्रमे ।।
त्रिचतुःपञ्चसप्ताष्टनवद्वादश एव च ।
क्रमेण घटिका ह्येतास्तत् पुण्यं पारमार्थिकम् ।।

यद्यपि मलमासेन सह कदाचित् त्रयोदशमासा भवन्ति तथापि संक्रान्तयोद्वादश, पुनस्त्रयोदशेत्येव कारणेन सूचितः । समा तुल्या संक्रान्तिमात्ररूपतया मन्दादिनामधेयतया इष्टानिष्टफलसमानजनकतया च । ध्रुवाणिस्थिराणि त्रीण्युत्तराणि रोहिणी च । मृदूनि अनुराधाचित्रारेवतीमृगशीर्षाणि । क्षिप्रा लघवः हस्ताश्विनीपुष्याः । उग्राः पूर्वत्रयं भरणीमघा च । चराः पुनर्वसुश्रवणधनिष्ठास्वातीशतभिषाः । क्रूराः आर्द्रा ऋक्षास्तीक्ष्णामूलाज्येष्ठाऽश्लेषाः । मिश्रा कृत्तिका विशाखा च । क्रमेण मन्दाप्रभृतिषु यथासंख्येन पारमार्थिकं मुख्यम् ।

सूक्ष्मसंक्रान्तिकाले च सौरादियोगानुष्ठानजन्यं तत्पुण्यं तदेतास्वपि नाडिकास्वित्यर्थः ।

[1]तथा— नृपाः पीड्यन्ति पूर्वाह्णे मध्याह्ने तु द्विजोत्तमाः ।
अपराह्णे तथा वैश्याः शूद्राश्चास्तमये रवौ ।।
पिशाचाश्च प्रदोषे स्युरर्धरात्रे तु राक्षसाः ।
अर्धरात्रे व्यतीते तु पीड्यन्ते नटनर्त्तकाः ।।
उषःकाले तु संक्रान्तौ हन्ति स्वस्वामिनो जनान् ।
हन्ति प्रव्रजितान् सर्वान् सन्ध्याकाले न संशयः ।।

[2]तथा— रविसंक्रमणे पुण्ये न स्नायाद्यस्तु मानवः ।
सप्त जन्मातिरोगी स्यान्निर्धनश्चापि जायते ।।

---

(1) कृ. र. (पृ–618) ।

(2) रा. मा. (पृ–129), का. वि. (पृ–381) ।

[1]शातातपः— संक्रान्तौ यानि दत्तानि हव्यकव्यानि दातृभिः ।
तानि तेषां ददात्यर्कः पुनर्जन्मनि जन्मनि ॥

[2]ज्योतिःशास्त्रे—अयने कोटिगुणित लक्षं विष्णुपदी फलम् ।
[3]षड़शीति सहस्रन्तु षड़शीत्यां स्मृतं बुधैः ॥
शतमिन्दुक्षये दानं सहस्रं तु दिनक्षये ।
विषुवे शतसाहस्रमाकामावैष्वनन्तकम् ॥

[4]विष्णुपुराणे— विशाखायां यदा सूर्यश्चरत्यंशं तृतीयकम् ।
तदा चन्द्रं विजानीयात् कृत्तिकाशिरसि स्थितम् ॥
कृत्तिकायां यदा सूर्यः प्रथमांशं तु गच्छति ।
विशाखायां तदा ज्ञेयस्तृतीयांशे दिवाकरः ॥
तदैव विषुवाख्योऽयं कालः पुण्यो विधीयते ।
तदा दानानि देयानि दीनेभ्यः प्रयतात्मभिः ।
पितृनुद्दिश्य विप्रेभ्यस्तत्रानन्तफलं स्मृतम् ॥

अनेन विषुवद्वयस्योक्तयोगलाभे वैशिष्ट्यमिति दर्शितम् । अतएवानन्तफलमित्युक्तम् ।

[5]आपस्तम्बः— अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः ।
अहोरात्रोषितः स्नातः सर्वपापैः प्रमुच्यते ॥
उपोष्यैव तु संक्रान्त्यां स्नात्वा योऽर्च्चयेद् रविम् ।
प्रातः पञ्चोपचारेण स काम्यं फलमाप्नुयात् ॥
अयने विषुवे चैव त्रिरात्रोपोषितो नरः ।

---

(1) का. वि. (पृ–381), रा. मा. (पृ–129) ।

(2) रा. मा. (पृ–130), का वि. (पृ–381) ।

(3) षडशीतिदानफलं कालमाधवे (पृ–282) भरद्वाजः—
षडशीत्यां तु यद्दानं यद्दानं विषुवद्वये ।
दृश्यते सागरस्यान्तस्तस्यान्तो नैव दृश्यते ॥

(4) वि. पु. (2-3/78-79) ।

(5) का. वि. (पृ–388), रा. मा. (पृ-108) ।

स्नात्वा यः पूजयेद्देवं स कांम्यं फलमाप्नुयात् ।।
संक्रान्तौ रविवारेण ग्रहणे चन्द्रसूर्ययोः ।
पारणं चोपवासञ्च न कुर्यात् पुत्रवान् गृही ।।

निषेधोऽयमयनविषुवेतरसंक्रान्तिविषयः । [1]स्मृतिमीमांसायाम्—

आदित्येऽह्नि संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
उपवासो न कर्त्तव्यो गृहिणा पुत्रिणा तथा ।।
तन्निमित्तोपवासस्य निषेधोऽयमुदाहृतः ।
नानुषङ्गकृतो ग्राह्यो यतो नित्यमुपोषणम् ।।
तन्निमित्तस्य रविवारादिनिमित्तस्यानुषङ्गकृतः ।
त्रिरात्रषष्ठकालादि व्रतप्रसङ्गपतितः ।।

विष्णुधर्मोत्तरे[2]—मेषसंक्रमणे भानोर्मेषदानं महाफलम् ।
वृषसंक्रमणे दानं गवां प्रोक्तं तथैव च ।।
शयनासनदानञ्च मिथुनोपगते रवौ ।
कर्कप्रवेशे सक्तूनां सितया च तथैव च ।।
गुडफाणितखण्डानां सितायाश्च तथा द्विजाः ।
लवणाज्यफलानाञ्च तथा हरीतकस्य च ।।
तत्रैव चोदकुम्भानां दानं ज्ञेयं महाफलम् ।
सिंहप्रवेशे पात्राणां तैजसानां तथैव च ।।
कन्याप्रवेशे वस्त्राणां सुरभीणां तथैव च ।
तुलाप्रवेशे धान्यानां बीजानामपि चोत्तमे ।।
[3]कीटप्रवेशे वस्त्राणां वेश्मनां दानमेव च ।
धनुः प्रवेशे वस्त्राणां यानानाञ्च महाफलम् ।।
[4]मृगप्रवेशे दारूणां दानमग्नेस्तथैव च ।।

---

(1) का. वि. (पृ-389) । (2) विष्णुधर्मोत्त. (3-319/38-44) ।

(3) कीटः—वृश्चिकः । (4) मृगः—मकरः ।

कुम्भप्रवेशे दानन्तु गवामर्थे तृणस्य च ।
मीनप्रवेशे स्नानानां माल्यानामपि चोत्तमम् ॥

गवां—वृषभाणाम् । फाणितं—हरितपत्रशाकम् । सुरभीणां—धूपितानाम् । अग्नेः शीतापनोदार्थम् । काष्ठेषु ज्वालितेषु चेति । स्नानानां—सुगन्धामलकादीनाम् ।

इति संक्रान्तिनिरूपणम् ।

अथ युगादिनिरूपणम

तत्र [1]भविष्यपुराणे—

वैशाखशुक्लस्य तु या तृतीया, नवम्यसौ कार्त्तिकशुक्लपक्षे ।
नभस्यमासस्य तमिस्रपक्षे त्रयोदशी पञ्चदशी च माघे ॥
[2]एताः युगाद्याः कथिता पुराणे अनन्तपुण्यास्तिथयश्चतस्रः ।
पानीयमप्यत्रतिलैर्विमिश्रं दत्त्वा पितृभ्यः प्रयतो मनुष्यः ॥
श्राद्धं कृतं तेन समाः सहस्रं रहस्यमेतत् पितरो वदन्ति ॥

पञ्चदशी च माघ इत्यत्रापि तमिस्रपक्ष इति सम्बन्धनीयम् । तेन पञ्चदशी अमावास्या । तथा च तत्रैव—

नवम्यां शुक्लपक्षस्य कार्त्तिके च तथा कृतम् ।
त्रेता सिततृतीयायां वैशाखे समपद्यत ॥

---

(1) वि. पु. (3–14/12, 13, 15) ।

(2) युगाद्याः यथा सौरपुराणे (51-29/30)—

माघे पञ्चदशी कृष्णा नभस्ये च त्रयोदशी ।
तृतीया माधवे शुक्ला नवमी कार्त्तिके सिता ।
एताः युगादयः प्रोक्ता सर्वाश्चाक्षयकारकाः ॥

वराहपुराणे (13-40/41)—

शुक्ले तृतीया वैशाखे प्रेतपक्षे त्रयोदशी ।
कार्त्तिके नवमी शुक्ला माघे दर्शश्च पूर्णिमा ।
एताः युगादयः प्रोक्ताः दत्तस्याक्षयकारकाः ॥

दर्शे तु माघमासस्य प्रवृत्तं द्वापरं युगम् ।
कलिः कृष्णत्रयोदश्यां नभस्ये मासि निर्गतः ॥
युगादयः स्मृता ह्येता दत्तस्याक्षयकारकाः ॥

ननु पौर्णमासीशव्देनापि श्रुतिरस्ति, का गतिर्भवतु भवताम् । तथा च [1]ब्रह्मपुराणे–

वैशाखे शुक्लपक्षे तु तृतीयायां कृतं युगम् ।
कार्त्तिके शुक्लपक्षे च त्रेतायां नवमे दिने ॥
तथा भाद्रपदे कृष्णे त्रयोदश्यां तु द्वापरम् ।
माघे मासि पौर्णमास्यां घोरं कलियुगं तथा ।
युगारम्भास्तु तिथयो युगाद्यास्तेन विश्रुताः ॥

तत्र भविष्यपुराणादन्यरीत्या युगोत्पत्तिकथनं तत्र कल्पान्तराभिप्रायेण संवन्धनीयम् । सत्यम्, पूर्णमासो यस्यामिति व्युत्पत्त्याऽमावास्या वक्तव्या । अमावास्यायां हि मासः सम्पूर्णो भवति "चैत्रशुक्लादिका मासा" इति न्यायात् । तर्हि "अमावास्या, तिस्रोऽन्वष्टका, माघी प्रौष्ठपद्यूर्ध्वं कृष्णात्रयोदशी व्रीहियवपाकौ चेति" [2]विष्णुवचनेन माघीशव्देन युगाद्यभिधानमिति केषाञ्चिद् व्याख्याने सति कथममावास्या गृह्यताम् । यतो मघया चन्द्रयुक्तया रात्रिरिति व्युत्पत्त्या माघीति सिद्धम् । न चामावास्यायां मघायोगः कदाचिदपि सम्भवति । मैवम् । तद्वचनं माघपूर्णिमायां श्राद्धविधायकत्वेनोपपन्नम् । कथं युगादिश्राद्धविधायकमिति निश्चेतव्यम् । [3]तथा—

आषाढ्यामथ कार्त्तिक्यां माघ्यां त्रीन् पञ्च वा द्विजान् ।
तर्पयेत् पितृपूर्वं तु तदस्याक्षयमुच्यते ॥ इति

यमवचनेन माघपौर्णमास्यां श्राद्धविधानं विद्यते ।

किञ्च— प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम् ।
प्राप्य श्राद्धं प्रकुर्वीत मधुना पायसेन च ॥ इति

---

(1) कृ. र. (पृ–542), कृत्यकल्प. नियत. (पृ–372) ।

(2) विष्णु. स्मृ. (76–1/2) ।

(3) कृत्यकल्प. श्राद्ध. (पृ–15), का. वि. (पृ–320) ।

(4) का. वि. (पृ–319) ।

वचनान्मघायुक्तेत्यर्थे माघीतिपदं त्रयोदश्याः विशेषण इति धवलः । युगादयश्चन्द्रमस एव मासे प्रतिमन्तव्याः । पितृकार्यप्रधानत्वात् ।

[1]तदुक्तम्— आब्दिके पितृकार्ये च मासश्चान्द्रमसः स्मृतः ।
चान्द्रमसो मासो द्विविधो दर्शान्तः पौर्णमास्यन्तश्च ॥

उक्तञ्च— सौरः संक्रान्तिविच्छिन्नः सावनस्त्रिशता दिनैः ।
नाक्षत्रमाने स भान्तश्चान्द्रो दर्शविधिर्भवेत् ॥

विष्णुधर्मोत्तरे— दर्शान्तमासमुक्त्वा प्रतिपादितम् ।
स्यात्सर्वकालक्षयपूरणाभ्यां चान्द्रेण मानेन युगश्च राहोः ।
क्षीयमाणापूर्यमाणपक्षाभ्यां चान्द्रेण मानेन च सर्वकालः ॥

इति । अत्र पक्षे कृष्णप्रतिपदादिः पौर्णमास्यन्तश्चान्द्रो भवति । सम्वत्सरमधिकृत्य श्रुतिरपि तद् वै फाल्गुन्यामेषाह सम्वत्सरस्य प्रथमा रात्रिर्यत् फाल्गुनी पौर्णमासी चोत्तरा सोत्तमा । या पूर्वा साम्मुख्यत एव त्रिः त्रिः सम्वत्सरमारभत इति ।

अत्र पौर्णमास्यन्त एव । विष्णुरहस्यादिषु क्रमविधानवाक्येषु जयन्त्यष्टमी श्रवणद्वादशीमध्ये कृष्णत्रयोदश्यां युगादिव्रतविधानात् । एवं सति—

तथा सिंहे त्रयोदश्यां युगादौ श्राद्धकृन्नरः ।
गयायां पिण्डदानेन सद्यः फलमवाप्नुयात् ॥

इत्यत्र सिंहशब्दश्चान्द्रभाद्रपरः प्रतिपत्तव्यो न तु सौरपरः । किञ्च वैशाखादयः शब्दा चान्द्रे मासि मुख्याः । नक्षत्रेण युक्ते काले या साऽश्विनी पौर्णमासीति संज्ञायामिति पाणिनिस्मरणात् । चन्द्रयुक्तेन विशाखानक्षत्रेण युक्तः कालः इत्यर्थे तद्धितमुत्पाद्य वैशाखीति समाधत्ते । यतः स वैशाखी पौर्णमासी इत्यर्थे तद्धितोत्पत्तौ वैशाखशब्दस्य व्युत्पादितत्वात् । चान्द्रमसवाचकत्वमेव मुख्यं वैशाखादिशब्दानामिति सिद्धम् ।

सौरे तु वैशाखादिशब्दो गौण एव, तत्कथं मुख्यमर्थं विहाय गौणपरिग्रहः स्यादिति । तिथिद्वैधे कुत्र युगादि कार्यमित्याकाङ्क्षायामाह— [2]नारदीयपुराणे—

द्वे शुक्ले च तथा कृष्णे युगादिः कवयो विदुः ।
शुक्ले पूर्वाह्णिके ग्राह्ये कृष्णे ग्राह्येऽपराह्णिके ॥

---

(1) का. वि. (पृ–7) ।

(2) ए. च. (अ. 11, पृ–95) ।

पूर्वाह्णे द्विधाविभक्तदिनस्य पूर्वाह्णव्यापिन्यौ । एतेन शुक्लद्वये कुतपकालप्राधान्यम् । कृष्णद्वये चापराह्णः प्राधान्यमिति दर्शितम् । उभयत्र श्राद्धकालप्राप्तौ कुत्र स्यादित्याशङ्क्योक्तम् भविष्यपुराणे—

षडशीति राकामा वै युगादि वृद्धिगामिनी ।
मध्याह्नव्यापिनी पूज्या हानौ पूज्या ततोऽन्यथा ॥

वृद्धिगामिनीतिथिः दिनद्वये मध्याह्नव्यापिनी चेत्तदा वृद्धिगामिनी द्वितीया पूज्या । हानौ तिथिह्रासे त्वन्यथा पूर्वा पूज्येत्यर्थः । "खर्वदर्पौ नरौ ग्राह्यौ" इत्यस्य प्रकीर्णनिर्देशः । अथवा उत्तरत्र हानाविति वचनात् परिशेषयोः पूर्वग्रहणम् । तेन वृद्धिमती च यदि दिनद्वये मध्याह्नदिनव्यापिनी तदा वृद्धिगामिनी पूज्येत्यर्थः । मध्याह्नो कुतपोऽपराह्णश्च मलमासपाते विशेष उक्तः । [1]परिशिष्टे—

दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ।
उपाकर्मणि चोत्सर्गे माध्यां चैव विशेषतः ॥

उत्कर्ष शुद्धकृष्णपक्षादूर्ध्वं मलिम्लुचे करणं युगादौ नास्तीत्यर्थः ।

वैशाखस्य तृतीयायां नवम्यां कार्त्तिकस्य तु ।
श्राद्धं कार्यन्तु शुक्लायां संक्रान्तिविधिना नरैः ॥
त्रयोदश्यां भाद्रपदे माघे चन्द्रक्षयेऽहनि ।
श्राद्धं कार्यं प्रयत्नेन दक्षिणायनवच्च तत् ॥

संक्रान्तिविधिना–पिण्डरहितमिति । दक्षिणायनवदिति । दक्षिणायनविहित श्राद्धमिव पायसादि प्रचुरं कर्त्तव्यमित्यर्थः । तथा [3]तत्रैव—

दद्याच्छ्राद्धं त्रयोदश्यां मघासु च यथाविधि ।
मधुसर्पिःसमायुक्तं पायसं दक्षिणायने ॥

मार्कण्डेयः— युगादौ षड़शीत्याञ्च ग्रहाच्छादन एव च ।
नित्यश्राद्धे च संक्रान्त्यामपिण्डं श्राद्धमिष्यते ॥

इति युगादिनिरूपणम् ।

---

(1) का. वि. (पृ–145), रा. मा. (पृ–203) ।

(2) ब्रह्मपु. (220–54/55) । (5) ब्रह्मपु. (220–56) ।

अथाष्टकानिरूपणम्

[1]तत्र गोभिलः—आग्रहायण्या ऊर्ध्वं तिस्रोऽष्टकाः ।

[2]स्मृतिः— संक्रान्ते भास्करे कन्यां कृष्णपक्षे विशिष्यते ।
अष्टम्यामष्टका कार्या शाकेनापि महीपते ॥

[3]कार्ष्णाजिनिः—अष्टकाश्चापि तत्रैव पक्षे वै पञ्चमे स्मृताः ।
अनुक्रमेण सम्पूज्या अष्टकादेवताः सदा ॥

[4]वायुपुराणे— या चाप्यन्या चतुर्थी स्यात्तां च कुर्याद् विशेषतः ।

अष्टकाकथनानन्तरं [5]वायुपुराणे—

तासु श्राद्धं बुधः कुर्यात् सर्वस्वेनापि नित्यशः ।
क्षिप्रं प्राप्नोति श्रेयांसि परत्रेह च मोदते ॥
पितरः पर्वकालेषु तिथिकालेषु देवताः ।
सर्वे गृहस्थमायान्ति [6]निपानमिव धेनवः ॥
मासान्ते प्रतिगच्छेयुरष्टकासु ह्यपूजिताः ।
मोघास्तस्य भवन्त्याशाः परत्रेह च नित्यशः ॥

अष्टकायाः तिथिपर्वोभयरूपत्वादेव पितृपूजाऽवश्यं कर्त्तव्या ।

इत्यष्टकानिरूपणम् ।

अथान्वष्टका

तत्र गोभिलः— [7]श्वस्ततोऽन्वष्टका परश्वो वा । अपरश्वो वेति । अष्टका श्राद्धदिनात् तृतीयदिने वेत्यर्थः । एतत्तिथिवृद्धिविषयम् ।

---

(1) का. वि. (पृ-353) ।
(2) का. वि. (पृ–353) ।
(3) का. वि. (पृ–354) ।
(4) का. सा. (पृ–356) ।
(5) ब्रह्माण्डपु. (2-3-16-5/7), कृत्यकल्प. श्राद्ध. (पृ–17) ।
(6) निपानं—कूपसमीपरचितजलाधारः इति धर्मशास्त्रशब्दकोषे ।
(7) श्राद्धदीपे अन्वष्टकाकालः यथा—
प्राञ्चस्तु अष्टकाश्राद्धात् परदिनेऽन्वष्टकाश्राद्धम् । "श्वोऽन्वष्टकासु" इति पारस्करसूत्राच्च नवमीतिथिनिर्णतः । श्राद्धदी. (पृ–62)

वायुपुराणे— अन्वष्टकासु वृद्धौ च गयायां मृतवासरे।
अत्र मातुः पृथक् श्राद्धमन्यत्र पतिना सह ॥

शाट्यायनिः— वृद्धिश्राद्धे च मात्रादि गयायां पितृपूर्वकम्।
पिता पितामहश्चैव तथैव प्रपितामहः ॥
माता पितामही चैव तथैव प्रपितामही।
मातामह प्रमातामह वृद्धप्रमातामहाः।
तेषां पिण्डं मया दत्तं ह्यक्षय्यमुपतिष्ठताम् ॥
इत्यन्वष्टका।

अथापरपक्षः

तत्र वैशम्पायनः—
[1]कृष्णपक्षे श्राद्धं कुर्वीत अन्नं संस्कृत्य पक्त्वा।

एतेनात्र श्राद्धस्यावश्यकर्त्तव्यता प्राप्ता कथिता।

[2]कात्यायनः— श्राद्धान्वितः श्राद्धं कुर्वीत। शाकेनापि। नापरपक्षमतिक्रामेद्।
मासि मासि वोऽशनमिति श्रुतेः।

ब्रह्मपुराणे — पयोमूलफलैः शाकैः कृष्णपक्षे च सर्वदा।
पराधीनः प्रवासी च निर्धनो वाऽपि मानवः ॥
मनसा भावशुद्धेन श्राद्धं दद्यात्तिलोदकम्।
नाश्नन्ति पितरश्चेति कृत्वा हृत्कमले च यः ॥
न तर्पयति तान् भक्त्या देहात्तद्रुधिरं च ते।
पिवन्ति सर्वनाशञ्च कुर्वन्त्यथ पदे पदे ॥
तस्माद् भयेन च पितॄन् तर्पयेत् सततं बुधः।

निगमः—अपरपक्षे यदहः सम्पद्यते। तत्र श्राद्धं चिकीर्षेतेति वक्ष्यमाणेन सम्बन्धः।

---

(1) कृत्यकल्प. श्राद्ध. (पृ–14)।
(2) कृत्यकल्प. श्राद्ध. (पृ–14)।
(3) कृत्यकल्प. श्राद्ध. (पृ–15)।

पञ्चमीप्रभृति चापरपक्षस्य पञ्चमीप्रभृतीति फलविशेषार्थं, नत्वन्यश्राद्धाभावार्थम् । अन्यतिथौ श्राद्धस्य वायुपुराणादिवचनेन पञ्चमीप्रभृतिकालस्य प्रशस्ततायां भविष्यपुराणादि वक्ष्यमाणेन वचनेन वक्ष्यमाणत्वात् ।

हंसे वर्षासु कन्यास्थे शाकेनापि गृहे वसन् ।
पञ्चम्यामुत्तरे दद्यादुभयोर्वंशयोः ऋणम् ॥

[1]इति भविष्यपुराणवचनमपि वैशिष्ट्यपरम् ।

हंसे सूर्ये, उभयोर्वंशयोरिति पितृकुलमातृकुलयोरित्यर्थः । अपरपक्षः—पञ्चमपक्षः । तथा च [2]कार्ष्णाजिनिः—

शक्रध्वजनिपाताङ्गो यः स्यात् पक्षस्तु पञ्चमः ।
सविज्ञेयोऽपरपक्षः श्राद्धं तत्र विधीयते ॥
पुत्रानायुर्धनं धान्यमारोग्यं भूतिमेव च ।
प्राप्नोति पञ्चमे दत्त्वा श्राद्धकामांस्तथापरान् ॥
एतानेव हि हिंसन्ति पञ्चमं यो व्यतिक्रमेत् ।
तस्मान्नातिक्रमेत् विद्वान् पञ्चमे पैतृकं विधिम् ॥

ननु पञ्चमशब्दः कस्मात् पञ्चम इत्यवधिमपेक्षते । अवधिश्चाषाढपौर्णमास्येव ।

आषाढीमवधिं कृत्वा यः स्यात् पक्षस्तु पञ्चमः ।
सविज्ञेयोऽपरपक्षः कन्यां गच्छतु वा न वा ॥ [3]इति

जातूकर्ण्यवचनात् । अतश्चाषाढेऽधिमासपाते प्रथमाषाढ्याः मलिम्लुचत्वात् द्वितीयाषाढ्येवावधिरिति न किंचिद्दूषणम् । किन्तु श्रावणेऽधिकमासपाते सिंहेऽर्के श्राद्धं प्रसज्येत । भाद्रे चाधिकमासपाते मलमासे श्राद्धं न स्यात । न त्वेवंभूते को कोष इति वाच्यम् ।

सूर्ये कन्यास्थिते श्राद्धं यो न कुर्याद् गृहाश्रमी ।
धनं पुत्रः कुतस्तस्य पितुः निःश्वासपीड़नाद् ॥

---

(1) का. वि. (पृ–301) ।
(2) का. वि. (पृ–305), रा. मा. (पृ–119/120) ।
(3) रा. मा. (पृ–119) ।

[1]इति भविष्यपुराणवचनेन कन्यागत एव श्राद्धविधानात् । सत्यम् । शुद्धकालापेक्षयैव पञ्चमपक्षे श्राद्धम् । न तु मलमासापेक्षया । तस्य विकालत्वात् । अतः सिंहार्के मलमासे च श्राद्धं न प्रसङ्गि । किञ्च शक्रध्वजनिपाताङ्ग इति कार्ष्णाजिनिवचनात् । अप्ययमर्थः सुव्यक्तोऽन्यथा शक्रध्वजनिपाताङ्गता न स्यात्ततश्च शक्रध्वजनिपाताङ्ग इति विशेषणमप्यनर्थकं स्यात् ।

अपि च— प्रौष्ठपद्याः परःपक्षः तत्रापि न विशिष्यते ।
पञ्चपूर्वञ्च तत्रापि दशपूर्वं ततोऽपीति ॥

भविष्यपुराणवचनेन प्रौष्ठपद्यूर्ध्वपक्ष एव श्राद्धस्य विषयत्वात् । कथं पूर्वत्र प्रसङ्गः । अत्राधिकमासमधिकृत्य स्मृत्यन्तरेऽस्ति ।

यथा— [2]सिनीवालीमतिक्रम्य यदा कन्यागतिर्भवेत् ।
तदा कालस्य वृद्धित्वादतीत्यैव पितृक्रिया ॥

शुद्धाऽशुद्धं त्रिमिश्रितं पक्षपञ्चकमतिक्रम्येत्यर्थः । तर्हि आश्विनेऽधिमासपाते प्रौष्ठपद्यूर्ध्वपक्षस्य सिंहत्वात् कुत्र श्राद्धं क्रियतां, किं कन्यागते मलमासेऽन्यत्र वेत्याकाङ्क्षायामाह—

[3]पितामहः— मासि कन्यागते भानावसंक्रान्तो भवेद् यदि ।
दैवं पित्र्यं तदा कर्म तुलास्थे कर्त्तुरक्षयम् ॥

[4]स्मृतिः— यातुधानप्रियो मासः कन्यार्के जायते यदि ।
दैवं पित्र्यं तदा कर्म तुलार्के मासि जायते ॥

[5]ब्रह्माण्डपुराणे—कन्यां गते सवितरि यान्यहानि तु षोडश ।
क्रतुभिस्तानि तुल्यानि तेषु दत्तमथाक्षयम् ॥

कन्यां गते सवितरीति वचनात् षोडशतिथिसमुदायो यदि कन्याऽर्के स्यात् तदैव एतत् श्राद्धं कर्त्तव्यम् । न तु कतिपयतिथीनां कन्यागते सम्बन्धे सतीति केचित् । तदयुक्तम् । तथा च शाट्यायनिः—

---

(1) का. वि. (पृ–302) । (2) षट्त्रिंशन्मतमिति का. वि. (पृ–310) ।

(3) का. वि. (पृ–310) । (4) का. वि. (पृ–310) ।

(5) ब्रह्मपुराणमिति अपरार्कः (पृ–424), का. वि. (पृ-303) ।

नभस्यस्यापरे पक्षे तिथिषोडशकं तु यत् ।
कन्यागतान्वितं चेत् स्यात् स कालः श्राद्धकर्मसु ॥
अन्ते वा यदि वा मध्ये यत्र कन्यां रविर्व्रजेत् ।
स पक्षः सकलः पुण्यस्तत्र श्राद्धं विधीयते ॥

[1]भविष्यपुराणे—पुण्यः कन्यागतः सूर्यः पुण्यः पक्षस्तु पञ्चमः ।
कन्यागतः पञ्चमश्चेदत्यन्तं पुण्य उच्यते ॥

पुण्यं कन्यागतमिति । पञ्चमपक्षसम्वन्धिनः कस्यचिदपि दिनस्य कन्यासम्वन्धे सति सकल एव पक्षः पुण्य इत्यर्थः । पञ्चमपक्षः कन्यासम्बन्धिसहितप्रौष्ठपद्यूर्ध्वं शक्रध्वजनिपाताङ्गपक्षमात्रमित्यर्थः । अयमर्थः- कन्यां गच्छतु वा नवेति जातूकर्ण्यवचनेन सूचितः । शाट्यायनिवचनेन तिथिषोडशकमित्युक्तत्वात् । पक्षत्रिभागहीनपक्षपक्षार्ध द्वितीयतृतीयभागकर्त्तव्ये श्राद्धेष्वेवेदं बोद्धव्यम् । एकदिनश्राद्धन्तु कन्यागत एव इति धवलव्याख्यानमेतदेव ।

उपगते रवौ कन्यां श्राद्धं कुर्वीत यत्नतः ।
आषाढ्याः पञ्चमः पक्षः प्रशस्तः पितृकर्म्मसु ॥

इति जावालिवचनस्य कन्यां गच्छतु वा नवेति वचनस्य सामान्यविषयत्वात् । उपलक्षणञ्च तेनाप्युक्तम् । षोडशसंख्या च पौर्णमासीमुपक्रम्य [2]वायुपुराणे—

पुष्टिः प्रजाः स्मृतिर्मेधापुत्रानैश्वर्यमेव च ।
कुर्वाणः पौर्णमास्याञ्च सम्पूर्णं फलमश्नुते ॥
प्रतिपद्धनलाभाय बलं चास्य न नश्यति ।
द्वितीयायां च यः कुर्याद् द्विपदाधिपतिर्भवेत् ॥
वरार्थिनी तृतीयायां शत्रुघ्नी पापनाशिनी ।
श्राद्धं चतुर्थ्यां कुर्वाणः शत्रोच्छिद्राणि पश्यति ॥
पञ्चम्याञ्च प्रकुर्वाणः प्राप्नोति महतीं श्रियम् ।
षष्ठ्यां श्राद्धानि कुर्वाणं द्विजास्तं पूजयन्त्यतः ॥

---

(1) का. वि. (पृ–316) ।

(2) ब्रह्माण्डपु. (2-3–17/9-20) ।

कुरुते यस्तु सप्तम्यां श्राद्धानि सततं नरः ।
स हि शक्रमवाप्नोति गणानां चाधिपो भवेत् ॥
सम्पूर्णं वृद्धिमाप्नोत्यष्टम्यां यः कुरुते नरः ।
श्राद्धं नवम्यां कर्त्तव्यमैश्वर्यं स्त्रीश्च काङ्क्षता ॥
कुर्वन् दशम्यां तु नरो ब्राह्मीं श्रियमवाप्नुयात् ।
एकादश्यां तु यः श्राद्धं कुरुते सततं नरः ॥
वेदांश्चैवाप्नुयात् सर्वान् विप्राणां सम्मतं तथा ।
द्वादश्यां जयलाभश्च राज्यमायुर्वसूनि च ॥
प्रजावृद्धिं पशून् मेधां स्वातन्त्र्यं पुष्टिमुत्तमाम् ।
दीर्घमायुरथैश्वर्यं कुर्वाणस्तु त्रयोदशीम् ॥
युवानश्च गृहे यस्य मृतास्तेभ्यः प्रदापयेत् ।
शस्त्रेण वा हता ये च तेषां दद्याच्चतुर्दशीम् ॥
अमावास्यां प्रयत्नेन श्राद्धं यच्छति यः सदा ।
सर्वान् कामानवाप्नोति स्वर्ग्यं चानन्त्यमश्नुते ॥

एतत् फललिप्सुना तु प्रतिदिनं संकल्पः कर्त्तव्यः । प्रतिवासरं भिन्नफलश्रवणात् ।
पुराणे— [1]नान्दीमुखानां प्रत्यब्दं कन्याराशिगते रवौ ।
पौर्णमास्यां तु कर्त्तव्यं वराहवचनं यथा ॥

यदा तु तिथिक्षयादिवशात् षोडशदिनानि न लभ्यन्ते, सूतकादिवशात् पौर्णमास्यां न श्राद्धं सम्पद्यते तदाऽपि पक्षश्राद्धं कर्त्तव्यमेव । तथा च मत्स्यपुराणे—

[2]कन्यां गते सवितरि दिनानि दश पञ्च च ।
पार्वणेन विधानेन तत्र श्राद्धं विधीयते ॥

यान्यहानि तु षोडशेत्युक्त्वा ब्रह्माण्डपुराणे पुनः पक्षमात्रे श्राद्धविधानाच्च । तथा—

[3]अश्वयुक् कृष्णपक्षे तु श्राद्धं कार्यं दिने दिने ।

दिने दिने—प्रतिदिनं, सकल एव पक्ष इत्यर्थः ।

---

(1) नान्दीमुखानाम्—आभ्युदयिकश्राद्धानाम् ।

(2) का. वि. (पृ–304) । (3) का. सा. (पृ–362) ।

स्मृतिः — [1]अग्नीहोत्री जितक्रोधः स्नातकव्रतचारिणः ।
पक्षश्राद्धं प्रकुर्वन्ति नेतरे तु कदाचन ॥

पक्षश्राद्धेऽसमर्थमनधिकारिणं प्रति च ब्रह्माण्डपुराणे—

[2]त्रिभागहीनं पक्षं वा त्रिभाग त्वर्द्धमेव वा ।
श्यामाकैश्च विशेषेण प्रसिद्धैश्च पितृप्रियैः ॥

त्रिभागहीनमिति पञ्चमीमारभ्य । अर्धमष्टमीप्रभृति । त्रिभागमित्यत्र विशेषमाह—

कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् ।
श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः ॥

इति [3]मनूक्तम् । यदि कुतश्चिन्निमित्तात् कन्यागतापरपक्षे श्राद्धं न सम्पद्यते, तदा तुलागतापरपक्षे कर्त्तव्यम् ।

ब्रह्माण्डपुराणे— [4]यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः ।
तावच्च श्राद्धकालः स्याच्छून्यं प्रेतपुरं तदा ॥

भविष्यपुराणे— [5]कन्यां गते सवितरि पितृराजानुशासनात् ।
तावत् प्रेतपुरी शून्या यावद् वृश्चिकदर्शनम् ॥
ततो वृश्चिकमायाते निराशा पितरो नृप ।
पुनः स्वभवनं यान्ति शापं दत्त्वा सुदारुणम् ॥

तथा— [6]येयं दीपान्विता राजन् ख्याता पञ्चदशी भुवि ।
तस्यां दद्यान्न चेच्छ्राद्धं पितृणां वै महालये ॥

महालये—कन्यागतापरपक्षे । एतच्च कार्त्तिकामावास्याप्रशंसामात्रपरं न त्वन्यतिथिनिषेधपरम् । "यावद् वृश्चिकदर्शनमि"ति भविष्यपुराणवचनेनैव तुलागतापरपक्षसमुदायस्य श्राद्धकालत्वप्रतिपादनात् ।

---

(1) का. सा. (पृ-362) ।
(2) कृत्यकल्प. श्राद्ध. (पृ-16) ।
(3) मनु. (3-276) ।
(4) कृत्यकल्प. श्राद्ध. (पृ-16) ।
(5) का. वि. (पृ-300) ।
(6) कृत्यकल्प. श्राद्ध. (पृ-17) ।

[1]आश्विनस्यापरे पक्षे प्रथमे कार्त्तिकस्य च ।
यस्तु श्राद्धं प्रकुर्वीत सोऽश्वमेधफलं लभेत् ॥

इति मार्कण्डेयवचनात् ।

कार्त्तिकं सकलं वाऽपि प्राक्छाये कुञ्जरस्य च ।

इति [2]विष्णुवचनात् । कार्त्तिकस्यायं कार्त्तिक इत्यश्प्रत्ययेन पक्षोऽभिहितः । कुञ्जरस्य प्राक् छायेऽमावास्यायां चेत्यर्थः ।

[3]आकाङ्क्षन्ते च पितरः पञ्चमपक्षमाश्रिताः ।
ततस्तत्रैव दातव्यं दत्तमन्यत्र निष्फलम् ॥

इति शाट्यायनिवचनं निमित्तं विनाऽन्यत्रदाने व्यवस्थापनीयम् । स्मृतिः—

[4]पार्वणेन विधानेन कुर्यादपरपक्षकम् ।
विश्वेदेवाः परं चात्र विज्ञेयौ धूरिरोचनौ ॥

वृद्धगार्ग्यः— [5]प्राजापत्ये च पौष्णे च पित्र्यर्क्षे भार्गवे तथा ।
यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यति ॥

प्राजापत्यं—रोहिणी । पौष्णम्—रेवती । पित्र्यर्क्षम्—मघा ।

महाभारते— [6]नक्षत्रेण न कुर्वीत यस्मिन् जातो भवेन्नरः ।
न प्रौष्ठपदयोः कार्यं तथाग्नेये च भारत ।
दारुणेपु च सर्येषु शुक्रवारे विवर्जयेत् ॥

आग्नेये—कृत्तिकायाम् । दारुणानि यथा ज्योतिःशास्त्रे—

दारुणं चौरगं रौद्रमैन्द्रं नैर्ऋतमेव च ।

औरगमश्लेषा । रौद्रमार्द्रा । ऐन्द्रं ज्येष्ठा । नैर्ऋतं—मूला ।

स्मृतिसमुच्चये— नन्दायां [7]भार्गवदिने त्रयोदश्यां [8]त्रिजन्मनि ।
मघायां पिण्डदानेन ज्येष्ठपुत्रो विनश्यति ॥

---

(1) का. सा. (पृ–366) ।
(2) विष्णु. स्मृ. (89-4) ।
(3) का. वि. (पृ–306) ।
(4) का. वि. (पृ–319) ।
(5) का. सा. (पृ–364) ।
(6) का. सा. (पृ–364) ।
(7) भार्गवदिने—शुक्रवारे ।
(8) त्रिजन्मनि—जन्मनक्षत्रे जन्मराशौ च ।

प्रतिपत्षष्ठ्येकादशीति नन्दा । त्रिजन्मनि–जन्मनक्षत्रं जन्मतिथिर्जन्मचन्द्र इति ।

त्रिजन्मनि [1]त्रिपादेषु कविनन्दामघासु च ।
काम्यं श्राद्धं न कुर्वीत व्यतीपाते दिनक्षये ॥
संक्रान्त्यामुपवासेन पारणेन च भारत ।
मघायां पिण्डदानेन ज्येष्ठपुत्रो विनश्यति ॥

पक्षश्राद्धसंकल्पिनं प्रति नायं निषधः । तथा च मार्कण्डेयः—

पक्षश्राद्धे त्रयोदश्यामपिण्डं श्राद्धमिष्यते ।
संकल्पस्य वशादेव मघायां चैव तत्तथा ॥
संकल्पनाशं कुर्वीत संकल्पाद् यदि शक्तिमान् ।
पितृभिर्नरकान् यायादेकविंशतिमेव सः ॥

ब्रह्मपुराणे— योगो मघात्रयोदश्यां कुञ्जरछायसंज्ञितः ।
भवेन्मघायां संस्थे च शशिन्यर्के करे स्थिते ॥
[2]आश्वयुज्याश्च कृष्णायां त्रयोदश्यां मघासु च ।
प्रावृड्ऋतौ यमः प्रेतान् पितॄनथ यमालयात् ॥
विसर्जयति मानुष्ये कृत्वा शून्यं स्वकं पुरम् ।
क्षुधार्त्ताः कीर्त्तयन्तश्च दुष्कृतञ्च स्वकं कृतम् ॥
काङ्क्षन्तः पुत्रपौत्रेभ्यः पायसं मधुसंयुतम् ।
तस्मात्तांस्तत्र विधिना तर्पयेत् पायसेन तु ॥
मध्वाज्यतिलमिश्रेण तथा शीतेन चाम्भसा ।
ग्रासमात्रं परगृहाद् भक्तं यः प्राप्नुयान्नरः ॥
भिक्षामात्रेण यः प्राणान् संधारयति वा स्वयम् ।
यो वा संधारयेद् देहं प्रत्यहं स्वात्मविक्रयात् ॥
श्राद्धं तेनापि कर्त्तव्यं तैस्तैः द्रव्यैः सुसञ्चितैः ।
त्रयोदश्यां प्रयत्नेन वर्षासु च मघासु च ॥

---

(1) त्रिपादेषु—कृत्तिकापुनर्वसूत्तरफाल्गुनीविशाखोत्तराषाढापूर्वभाद्रपदासु ।

(2) ब्र. क्रि. कौ. (पृ–358) ।

नास्मात् परतरः कालः श्राद्धेष्वन्यत्र विद्यते ।
यत्र साक्षात्तु पितरो गृह्णन्त्यमृतमक्षयम् ॥

करे—हस्तानक्षत्रे । एष विशेषः कन्यासंक्रान्तेर्दर्शनानन्तरं मघात्रयोदशीयोगे सति भवति । अस्य योगस्याप्राप्तावपि कर्त्तव्यमित्याह । अत्र चकारद्वयाद् वाक्यद्वयम् । तेनाश्विनकृष्णपक्षसम्वन्धिन्यां त्रयोदश्यां मघायुक्तायाश्च त्रयोदश्यामित्यर्थः ।

[1]मनुरपि— यत् किञ्चिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम् ।
तदप्यक्षयमेव स्याद् वर्षासु च मघासु च ॥

वर्षाशब्दोऽत्र पञ्चमपक्षपरः । [2]याज्ञवल्क्यः—

यद्ददाति गयास्थश्च सर्वमानन्त्यमश्नुते ।
तथा वर्षात्रयोदश्यां मघासु च विशेषतः ॥

एवं सति मघात्रयोदशीयोगाप्राप्तौ केवलायामपि त्रयोदश्यां श्राद्धं कार्यम् । न तु केवलायां मघायामिति स्थितिः । [3]विष्णुनाऽपि केवलत्रयोदश्यां श्राद्धमावश्यकमित्युक्तम् ।

यथा— अमावास्याः तिस्रोऽष्टकास्तिस्रोऽन्वष्टका मघाप्रौष्ठपद्यूर्ध्वं कृष्णत्रयोदशी व्रीहियवपाकी च ।

एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः ।
श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते ॥

एवं सति मघात्रयोदशीयोगाप्राप्तौ केवलायामप्याश्विनकृष्णत्रयोदश्यां श्राद्धं कार्यं, न तु केवलायां मघायामिति केचित् ।

अन्ये तु— मघायां कुर्वन् श्राद्धानि सर्वान् कामानवाप्नुयात् ॥

इति वायुपुराणवचनेन केवलायामपि मघायां कर्त्तव्यमित्याचक्षते ।

[4]कृष्णपक्षे त्रयोदश्यां यः श्राद्धं कुरुते नरः ।
पञ्चत्वं तस्य जानीयाज्ज्येष्ठपुत्रस्य निश्चितम् ॥

---

(1) मनु. (3–273) ।
(2) याज्ञ. (1–261)
(3) विष्णु. स्मृ. (76–1/2) ।
(4) का. वि. (पृ–398) ।

मघायां कुर्वतः श्राद्धं ज्येष्ठपुत्रो विनश्यति ।
संक्रान्त्यामुपवासे च चन्द्रसूर्यग्रहे तथा ।।

इति वचनाभ्यां श्राद्धं निषिद्धं किन्तु पिण्डदानमेव । तथा च वायुपुराणे—

[1]मघासु कुर्वन् श्राद्धानि सर्वान् कामानवाप्नुयात् ।
प्रत्यक्षमर्चितास्तेन भवन्ति पितरस्तथा ।।
प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम् ।
प्राप्य श्राद्धं प्रकुर्वीत मधुना पायसेन च ।।

कन्यागतापरपक्षाधिकारे देवीपुराणे—

[2]तत्रापि महती पूजा कर्त्तव्या पितृदैवते ।
ऋक्षे पिण्डप्रदानेन ज्येष्ठपुत्रो विनश्यति ।।

किञ्च— पिण्डमात्रं प्रदातव्यमभावे द्रव्यविप्रयोः ।
श्राद्धाहनि तु सम्प्राप्ते भवेन्निरशनोऽपि वा ।।

इति स्मृतिसमुच्चयवचनेन पिण्डदानमात्ररूपं श्राद्धं विहितं तन्निषिद्धम् । आहिताग्नेः पित्रर्च्चनं पिण्डैरेव "ब्राह्मणानपि भोजयेदि"ति कात्यायनवचनादाहिताग्नेः पिण्डं विना श्राद्धं नास्तीति यदुच्यते तत् पिण्डपितृयज्ञविषयम् । अन्यत्र मघायुक्तादिप्रवृत्तौ च वचनबलादस्त्येव पिण्डाभावे श्राद्धमिति स्थितम् ।

मत्स्यपुराणे— [3]भरणी पितृपक्षे च महती परिकीर्त्तिता ।
तस्यां श्राद्धं कृतं येन स गयाश्राद्धकृद् भवेत् ।।

पितृपक्षे—महालये । यमः—

यदेन्दुः पितृदैवत्ये हंसश्चैव करे स्थितः ।
याम्या तिथिर्भवेत् सा हि गजछाया प्रकीर्त्तिता ।।
आषाढ्याः पञ्चमे पक्षे गयामध्याष्टमी स्मृता ।
त्रयोदशी गजछाया गयातुल्ये तु पैतृके ।।

---

(1) का. सा. (पृ–368) ।
(3) का. सा. (पृ–369) ।
(2) कृत्यकल्प. श्राद्ध. (पृ–20) ।

पितृदैवत्यं—मघा । करो—हस्तानक्षत्रम् । हंसः–सूर्यः । याम्या तिथिः–त्रयोदशी । पैतृके श्राद्धे भरणी त्रयोदशी मध्याष्टमीषु श्राद्धं गयासममित्यर्थः ।

वायुपुराणे— [1]संन्यासिनोऽप्याब्दिकादि पुत्रः कुर्याद् यथाविधि ।
महालये तु यच्छ्राद्धं द्वादश्यां पार्वणेन तत् ॥

पार्वणेन विधिना । स्मृतिः—

[2]मघाश्राद्धं न कुर्वीत अकृत्वा शस्त्रघातिने ।
कृत्वा तु विधिवत्तस्मै शेषं दर्शे समापयेत् ॥

शस्त्रहतानां चतुर्दश्यामिति वचनात् । अन्यत्राप्राप्तौ वचनमिदम् । शस्त्रघातिनेऽकृत्वा मघाश्राद्धं न कुर्वीत । अपि तु शस्त्रघातिने कृत्वैव कुर्वीत । शस्त्रघातिप्रभृति षट्-पुरुषेभ्यः कुर्यादिति यावत् । विधिवदिति । चतुर्दश्यामेकोद्दिष्टविधिना श्राद्धं कृत्वा दर्शे षाट्पुरुषिकं कुर्यादित्यर्थः ।

तथा— [3]अशस्त्रेण हताः केचित् पशुशस्त्रैर्निपातिताः ।
तेभ्यः पिण्डत्रयं देयं कर्त्तव्यमपरेऽहनि ॥

मातामहवर्गस्यापि पिण्डत्रयमित्यर्थः । [4]याज्ञवल्क्यः—

प्रतिपत् प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम् ।
शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदापयेत् ॥

ब्रह्मपुराणे— [5]तर्पणीयाश्चतुर्दश्यां लुप्तपिण्डोदकक्रियाः ।
शस्त्रेण निहता ये वै तेषां तत्र प्रदीयते ॥

वायुपुराणे— युवानश्च गृहे यस्य मृतास्तेषां तु दापयेत् ।
शस्त्रेण निहता ये वै तेषां दद्याच्चतुर्दशीम् ॥

भगवतीपुराणे— [6]पक्षिमत्स्यमृगैर्ये तु शृङ्गिदंष्ट्रिनरैर्हताः ।
पतनानशनप्रायैर्वज्राग्निविषबन्धनैः ॥
मृता जलप्रवेशेन ते वै शस्त्रहताः स्मृताः ॥

---

(1) का. सा. (पृ–367) ।
(2) का. सा. (पृ–370) ।
(3) का. सा. (पृ–370) ।
(4) याज्ञ. (1–264) ।
(5) का. सा. (पृ–369) ।
(6) का. वि. (पृ–320) ।

वृहन्मनुः— [1]शस्त्रैर्हता रणे व्याघ्रैः कुम्भीरैश्च गजैर्वृषैः ।
उत्पातेन च वज्रैश्च तेषां दद्याच्चतुर्दशीम् ।।

मरीचिः— विषः श्वश्वापदाहितिर्यग्ब्राह्मणघातिनाम् ।
चतुर्दश्यां क्रियाः कार्या अन्येषान्तु विगर्हिताः ।।

गार्ग्यः— चतुर्दश्यां तु यः श्राद्धं सपिण्डीकरणे कृते ।
तदेकोद्दिष्टविधिना कर्त्तव्यं शस्त्रघातिने ।।

देवीपुराणे— आहवेषु विपन्नानां जलाग्निभृगुपातिनाम् ।
चतुर्दश्यां भवेत् पूजाऽमावास्यायां तु कामिकी ।।

कामिकीपूजा च षाट्पुरुषिकमपरपक्षश्राद्धम् ।

अन्येषान्तु विगर्हिता इति मरीचिवचनादेकदिनकर्त्तव्यस्य श्राद्धस्य निषेधो न तु पक्षसमुदायसंकलितस्य षोड़शतिथीनामेव पुण्यत्वाभिधानात् । अस्ति चतुर्दश्यामपि काम्यफलम् । तथा च मनुः—

ज्ञातिश्रैष्ठ्यं त्रयोदश्यां चतुर्दश्यां वहुप्रजाः ।
प्रीयन्ते पितरश्चात्र ये च शस्त्रे हता रणे ।।

अत्र चकारादुभयविषयत्वं सुव्यक्तमेव ।

हारीतः— चतुर्दश्यां भूतिकामः ।

[2]**आपस्तम्बः—** चतुर्दश्यामायुधे विवृद्धिः ।

इत्यपरपक्षः ।।

अथाधिमासनिरूपणम्

[3]तत्र ज्योतिःशास्त्रे—

गतेऽब्दद्वितये सार्धे पञ्चपक्षे दिनद्वये ।
दिवसस्याष्टमे भागे पतत्येकोऽधिमासकः ।।

---

(1) का. सा. (पृ–370) ।

(2) आप. धर्म. (2–7/16–21) ।

(3) रा. मा. (पृ–101) ।

प्रायिकमेतत् । तदुक्तं [1]महाभारते—

पञ्चमे पञ्चमे वर्षे द्वौ [2]मासौ भवतः पुनः ।

एतेन सार्धे वर्षद्वयेऽप्यधिमासो दर्शितः । [3]हारीतः—

इन्द्राग्नी यत्र हूयेते मासादिः स प्रकीर्त्तितः ।
अग्निषोमौ स्मृतौ मध्ये समासौ पितृषोमकौ ॥
तमतिक्रम्य तु यदा रविर्गच्छेत् कदाचन ।
आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्राकृतः स्मृतः ॥

शुक्लप्रतिपदि इन्द्राग्नीयः पक्षादिचरुः । कृष्णप्रतिपदि अग्निषोमीयः । अमावास्यायां पार्वणश्राद्धेऽग्नौकरणहोमे पितृषोमकौ । एतेन दर्शान्तश्चान्द्रमासो दर्शितः । तमतिक्रम्य दर्शान्तमासमतिक्रम्यामावास्यानन्तरप्रतिपत्प्रवृत्तावित्यर्थः । आद्य इत्युक्तम् । तदुपरि शुक्लपक्षस्य विद्यमानत्वात् । वस्तुतस्तु शुक्लपक्षयोर्मध्यगतो मासो मलिम्लुच इत्यर्थः । द्वितीय इति । आद्यकृष्णपक्षसहितो द्वितीयोऽन्तिमशुक्लपक्ष इत्यर्थः । ननु कथमेतत् यावता क्रमत्वादाद्यं कृष्णशुक्लपक्षद्वयं मलिम्लुच द्वितीयञ्च क्रमप्राप्तं कृष्णशुक्लपक्षद्वयं शुद्धमित्येवं स्यादित्याकाङ्क्षायामाह —

[4]परिशिष्टे— तस्यार्को दर्शकश्चैकराशौ दर्शद्वयातिगः ।
मलिम्लुचः स विज्ञेयः कर्मणां फलनाशकृत् ॥

एकस्मिन् राशौ स्थितः सूर्यो दर्शद्वयमतिक्रम्य गच्छन् अधिमासस्य दर्शको भवतीत्यर्थः । एतेन दर्शद्वयक्रोडीकृतमासो मलिम्लुच इति दर्शितम् । एवं तर्हि दर्शशब्दोऽत्र समुदायवचन एकदेशवचनश्च ।

[5]राजमार्तण्डे— द्वेऽमावास्ये स्पृशति दिनकृद् यावदिन्दोश्च गेहे,
मास्येकस्मिन् भवति च तदा तत्र मासोऽधि पूर्वः ।

---

(1) महाभा. विराट. (52–3) ।
(2) "सावुपजायत" इति महाभा. पाठः ।
(3) लघुहारीत इति कृ. र. (पृ–536) ।
(4) का. वि. (पृ–126) ।
(5) रा. मा. (पृ–102) ।

[1]तत्राषाढ़द्वयमधिगतं तन्त्रसिद्धान्तविद्भि-
स्तत्पर्यन्तं भवति शशिनः पौर्णमासीद्वयेन ॥

शुद्धमासस्यादावन्ते पौर्णमासी । अतश्चन्द्रस्य पौर्णमासीद्वयेन तत्राषाढद्वयपर्यन्तं भवति । अत्र श्लोके स्पृशतिवचनाद् दर्शशब्द एकदेशवचनः । ततोऽमावास्यायां यत्र तत्र प्रहरे संक्रान्तौ मलमासः ।

[2]तथा— सिनीवालीमतिक्रम्य यदा संक्रमते रविः ।
भुक्तशेषस्तदा मासः कालस्तत्रामयः स्मृतः ।

परिशिष्टे तथा—अमावास्यापरिच्छिन्नं सूर्यसंक्रान्तिवर्जितम् ।
अधिमासं विजानीयाद् गर्हितं सर्वकर्मसु ॥

अमावास्यापरिच्छिन्नममावास्याभ्यां परिच्छिन्नम् ।

तथा— यस्माद् वृद्धिक्षये चान्द्रे जायते च त्रयोदश ।
असुराणाञ्च मासोऽसौ सर्वकर्मसु सन्त्यजेत् ॥

वृद्धिक्षये चान्द्रे इति । वृद्ध्युपक्रान्त चन्द्रक्षये समाप्ते सति । एतेन प्रथमावास्यायाः पर्युदासः । पराशरः—

एकत्र मास द्वितयं यदि स्याद् वर्षेऽधिकं तत्र परोऽधिमासः ।
त्रयोदशो वत्सर एव दृष्टश्चतुर्दशो क्वापि च नास्ति दृष्टः ॥

अधिकम्—अधिकमासलक्षणम् । ज्योतिः [3]पराशरः—

अग्न्याधेयं प्रतिष्ठाञ्च यज्ञदानव्रतानि च ।
देवव्रतवृषोत्सर्गचूडाकरणमेखलाः ॥
मङ्गलमभिषेकञ्च मलमासे विवर्जयेत् ।
वापीकूपतडागानि प्रतिष्ठा यज्ञकर्म च ॥

---

(1) द्विराषाढनिर्णयश्च कालविवेके (पृ–117)—
वैशाखादि तुलान्तेषु यदि पूर्णद्वयं भवेत् ।
द्विराषाढः स विज्ञेयः शयनावर्त्तनादिषु ॥

(2) रा. मा. (पृ–102) ।

(3) का वि. (पृ–129, 130, 132), कृ. र. (पृ–538, 539) ।

न कुर्यान्मलमासे तु महादानव्रतानि च ।
अनादिदेवतां दृष्ट्वा शुचः स्युर्नृभार्गवे ।
मलिम्लुचेऽप्यनावृत्तं[4] तीर्थस्नानमपि त्यजेत् ॥

अपि शब्दादनादिदेवतादर्शनमपि योजनीयम् । ननु मलमासे व्रतनिषेधात् कथमारब्धव्रतसम्बन्ध्युपवासादिकं सद्भिरनुष्ठीयते । सत्यम् । आरम्भप्रतिष्ठयोरेव निषेधात् । तथा च शिवरहस्ये—

मासे मलिम्लुचेऽप्येवं यजेद्देवीं सशङ्कराम् ।
किन्तु नोद्यापनं कुर्यादित्याह भगवांच्छिवः ॥

[2]गृह्यपरिशिष्टे—उत्कर्षः कालवृद्धौ स्यादुपाकर्मादिकर्मणाम् ।
अभिषेकाब्दवृद्धीनां न तूत्कर्षो युगादिषु ॥

उत्कर्षः–शुद्धभूतपक्षादुत्तरमलिम्लुचे करणम् । आदिशब्दार्थस्तु वाक्यान्तरेणोक्तम् ।

[3]यथा— उपाकर्म तथोत्सर्गः प्रसवाहोऽष्टकादयः ।
मलिम्लुचेऽपि कर्त्तव्याः शेषमन्यद् विवर्जयेत् ॥

छन्दोगानामेतत् । अन्येषान्तु कर्त्तव्यमुक्तम् । [4]गृह्यपरिशिष्टे—

उपाकर्म तथोत्सर्गः प्रसवाहोऽष्टकादयः ।
मासवृद्धौ पराः कार्या वर्जयित्वा तु पैतृकम् ॥

मलं वदन्ति मासस्य कालं कालविदो जनाः ।
नेहेतात्र विशेषेज्यामन्यत्र च द्विधेरिता ॥

अनेन दर्शपौर्णमासेष्टिप्रकाराणामभ्यनुज्ञा ।

[5]तथा— अवषट्कारहोमाग्निपर्व चाग्रयणाष्टकाः ।
मलिम्लुचेऽपि कर्त्तव्याः काम्या इष्टीर्विवर्जयेत् ॥

अवषट्कारहोमः—केवलस्वाहाकारप्रदानहोमः । पर्व—अमावास्या । आग्रयणं—नवान्नेष्टिः । अन्यत्रावश्यकाद्विधेरिता । अस्यैव किञ्चिदुपवर्णनमिदम् । अष्टकानां

---

(1) अनावृत्तं—प्रत्यावर्त्तनरहितम्, मोक्षोद्देशकतीर्थस्नानम् ।

(2) रा. मा. (पृ–103) ।   (3) का. वि. (पृ—144) ।

(4) का. वि. (पृ–144, 129) ।   (5) कृत्यतत्त्वा. (पृ–45) ।

मलमासे विधिनिषेधयोरेकत्रविरोधाद् व्यवस्था ऋष्यश्रृङ्गवचनानुसारेण वेदितव्या ।

[1]तथा— तिस्रोऽष्टकास्तु कर्त्तव्या न चतुर्थी तु कारयेत् ।
अधिमासे ह्यासुरी स्यात् पित्र्यं तत्र न कारयेत् ।।

अधिमासे क्रमभाविन्यस्तिस्रोऽष्टकाः कर्त्तव्याः पञ्चमपक्षगता चतुर्थी न कर्त्तव्या । यस्मात् मलमासगता चतुर्थी आसुरी स्यात् तस्माद् तत्र पित्र्यं न कुर्यादित्यर्थः ।

[2]आश्वलायनोऽपि—

हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः ।

अत्र चतुर्णामपि वचनात् मलमासगतकृष्णपक्षाष्टम्यामष्टकाकार्येत्यवगतम् ।।

न च— यां तिथिं समनुप्राप्य तुलां गच्छति भास्करः ।
तथैव सर्वसंक्रान्तिर्यावन्मेषं न गच्छति ।।

[3]इति वचनात् कथं हेमन्तशिशिरयोरधिमासपात इति वाच्यम् । वक्रातिचाराभ्यामन्यतिथावपि संक्रान्तिसम्भवात् ।

तथा च ज्योतिःशास्त्रे—

द्विराषाढे द्विराज्यं स्यात् प्रौष्ठे शस्यविवर्धनम् ।
लोकस्य फाल्गुने दृष्ट्वा राज्ञो विजयमादिशेत् ।।

[4]वृहस्पतिः— नित्यनैमित्तिके कुर्यात् प्रयतः सन्मलिम्लुचे ।
तीर्थस्नानं गजच्छायां प्रेतश्राद्धं तथैव च ।।
प्रतिसम्वत्सरं श्राद्धे नाधिमासे विवर्जयेत् ।।

नैमित्तिकं— पुत्रजन्मप्रभृतिनिमित्तवृद्धिश्राद्धम् । मलमासमृतसाम्वत्सरिकम् । तत्कालपतितप्रायश्चित्तादि । तीर्थस्नानं—पूर्वक्तम् । गजछायाममावास्याम् । एतदेव व्याख्यातं परिशिष्टे—

पुत्रजन्म नित्यश्राद्धं दर्शश्राद्धं तथैव च ।
प्रतिसम्वत्सरञ्चैव पूर्वभागेऽपि तत्स्मृतम् ।।

---

(1) का. वि. (पृ-353) । (2) का. वि. (पृ-352) ।
(3) रा. मा. (पृ-102) ।
(4) का. वि. (पृ-140), कृ. र. (पृ-538), रा. मा. (पृ-103) ।

पुत्रजन्मनित्यश्राद्धम् इति विलम्बासहसीमन्तोन्नयनादिवृद्धिश्राद्धोपलक्षणम् ।

तस्मिंस्तु प्रकृते मासि कुर्याच्छ्राद्धं यथाविधि ।
तथैवाभ्युदयं सर्वं नित्यमेव हि सर्वदा ॥

इति [1]हारीतवचनात् । शुद्धमासेऽभ्युदयश्राद्धविधानं तु विलम्बसह विवाहादिपरम् ।

प्रेतश्राद्धं व्याकरोति [2]कुथुमिः—

अब्दमम्बुघटं दद्यादन्नं चापि सुसञ्चितम् ।
सम्वत्सरे विवृद्धेऽपि प्रतिमासञ्च मासिकम् ॥

[3]सत्यव्रतः— वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि ।
मलिम्लुचेऽपि कर्त्तव्यं व्याघ्रस्य वचनं तथा ॥

एतन्मलमासे साम्वत्सरिकश्राद्धविधानं मलमासमृतस्यैव मन्तव्यम् ।

तथा च व्यासः—मलिम्लुचेऽपि सम्प्राप्ते ब्राह्मणो म्रियते यदि ।
अनभिधेयो मासोऽसौ कथं कुर्याद् तथाब्दिकम् ॥
यस्मिन् राशिगते सूर्ये विपत्तिः स्याद् द्विजन्मनः ।
तस्मिन्नेव प्रकुर्वीत पिण्डदानोदकक्रियाः ॥

अन्यत्— आब्दिकं नाम यच्छ्राद्धं मलमासे तदिष्यते ।
मलमासप्रमीतानामन्येषामुत्तरत्र तु ॥

मलमासमृतेतरस्य श्राद्धन्तु मलमासे निषिद्धमप्यस्ति । तथा च स्मृतिः—

अधिमासे तु यः कुर्यात् प्रति सम्वत्सरं द्विजः ।
आसुरं तद् भवेच्छ्राद्धं पितॄणां नोपतिष्ठते ॥

ऋष्यशृङ्गोऽपि—सम्वत्सरातिरेको वै मासश्चैव त्रयोदशः ।
तस्मिंस्त्रयोदशे श्राद्धं न कुर्यान्नोपतिष्ठते ॥

---

(1) कृ. र. (पृ–537), सत्यव्रत इति मद. पारि. (पृ–549) ।

(2) मद. पारि. (पृ–548) ।

(3) रा. मा. (पृ–103) ।

(4) का. वि. (पृ–165), कृ. र. (पृ–538) ।

[1]हारीतश्च— सपिण्डीकरणादूर्ध्वं यत् किञ्चदाब्दिकं भवेत् ।
इष्टं वा यदि वा पूर्त्तं तन्न कूर्यान्मलिम्लुचे ॥

सपिण्डीकरणादूर्ध्वमित्युक्तम् । सपिण्डीकरणस्य मलिम्लुचेऽपि कर्त्तव्यत्वात् । तथा च [2]स एव— प्रत्यब्दं द्वादशे मासि कार्या पिण्ड़क्रिया बुधैः ।
क्वचित् त्रयोदशेऽपि स्यादाद्यं मुक्त्वा तु वत्सरम् ॥

आद्यं मुक्त्वा तु वत्सरमिति । अधिमासपाते त्रयोदशमासानुज्ञानम् आद्ये वत्सरे न कर्त्तव्यमित्यर्थः । तर्हि कुत्र मासे कर्त्तव्यमित्याकाङ्क्षायामाह—

[3]स एव— असंक्रान्तेऽपि कर्त्तव्यमाब्दिकं प्रथमं बुधैः ।
तथैव मासिकं श्राद्धं सपिण्डीकरणं तथा ॥

प्रथमाब्दिकम्—मलसाम्वत्सरिकम् । [4]शुक्लपक्षे मृतस्यैतत् ।

व्यासोऽपि— आब्दिकं प्रथमं यत् स्यात् तत्कुर्वीत मलिम्लुचे ।
त्रयोदशे तु सम्प्राप्ते कुर्वीत पुनराब्दिकम् ॥

त्रयोदशे मलिम्लुचे पुनराब्दिकं सपिण्ड़ीकरणम् ।

यत्तु— सम्वत्सराभ्यन्तरे यद्यधिकमासो भवेत्
मासिकाब्दं दिनमेकं वर्धयेदि'ति ।

[5]विष्णुवचनं तद्वत्सरसमापकमासात् पूर्वंत्राधिकमासपाते सति मन्तव्यम् ।

[6]कात्यायनः— यत्र वा तत्र वा मासि षष्ठे षाण्मासिकं भवेत् ।
त्रैपक्षिकं त्रिपक्षे स्यात् पूर्णे स्यात्तदनन्तरम् ॥

यत्र वा तत्र वा इति । मलिम्लुचे शुद्धेऽपि वा । तदनन्तरं षट्चत्वारिंशेह्नि चेत्यर्थः ।

---

(1) का. वि. (पृ–320), कृ. र. (पृ–537) ।

(2) कृ. र. (पृ–537) । (3) कृ. र. (पृ–537) ।

(4) पूर्णिमान्तमासपक्षे शुद्धकृष्णपक्षमृतानां वर्षान्तरे अधिमासपातेपि मलमासस्य शुद्धकृष्णपक्षोत्तरभावित्वेन साम्वत्सरिकानुष्ठाने शङ्का नास्त्येव । शुद्धशुक्लपक्षमृतानां तु मलशुक्लपक्षे एव साम्वत्सरिकपातात् तत्रैव प्रथमाब्दिकं विधेयमिति निष्कर्षः ।

(5) विष्णु. स्मृ. (21–21) । (6) का. सा. (पृ–331) ।

कृष्णपक्ष इति क्वचित् पाठः । अमावास्यायां मृतस्य विशेषमाह—

[1]कुथुमिः— सम्वत्सरातिरेको वै मासो यः स्यात् त्रयोदशः ।
तस्मिन् त्रयोदशे श्राद्धं न कुर्यादिन्दुसंक्षये ॥

इन्दुसंक्षये—कृष्णपक्षे इति क्वचित् पाठः । अमावास्यायां मृतस्य तस्मिन् सम्वत्सरातिरेके मलमासे त्रयोदशश्राद्धं सपिण्डीकरणं श्राद्धं न कुर्यात् । किन्तु शुद्ध एव मासि सपिण्डीकरणं कुर्यादित्यर्थः ।

[2]व्यासोऽपि— आब्दिकं प्रथमं यत् स्यात् तत् कुर्वीत मलिम्लुचे ।
त्रयोदशे तु सम्प्राप्ते कुर्वीत पुनराब्दिकम् ॥

अत्र त्रयोदशशब्दः शुद्धमासपरः । गणनाक्रमेण तस्य त्रयोदशत्वात् । पूर्वत्र तु मलमासपर एव सम्वत्सरातिरेक इति विशेषणत्वात् । आब्दिकं मूलसाम्वत्सरिकम् । पुनराब्दिकं सपिण्डीकरणम् । तथा च छन्दोगपरिशिष्टे—

[3]कात्यायनः— एकाहेन तु षण्मासाद् भवेयुरथवा त्रिभिः ।
न्यूनाः सम्वत्सरस्यैव स्यातां षण्मासिकाब्दिके ॥

तथा च [4]शंखः—पूर्वेद्युराब्दिकं श्राद्धं परेद्युः पुनराब्दिकम् ॥

इत्यधिमासनिरूपणम् ।

अथ देवशयनपार्श्वपरिवर्त्तनोत्थापनकालाः

तत्र नारदीयपुराणे—

[5]मैत्राद्यपादे स्वपितीह विष्णुः वैष्णव्यमध्ये परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता प्रबुध्यते मासचतुष्टयेन ॥
आभाकासितपक्षे च मैत्रश्रवणरेवती ।
आदिमध्यावसानेषु शयनावर्त्तनोत्सवाः ॥
निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ।
पादयोगादन्यतिथौ द्वादश्यामृक्षयोगतः ॥

---

(1) मद. पारि. (पृ–546) ।
(2) का. सा. (पृ–338) ।
(3) कात्यायन. (24–9) ।
(4) का. सा. (पृ–331) ।
(5) रा. मा. (पृ–109) ।

मैत्रम् अनुराधा । अन्यतिथौ चेत्तदाऽनुराधाऽऽद्यपादयोगे न, तत्राऽऽद्यपादयोगे सत्येव । द्वादश्यां त्वनुराधादिनक्षत्रमात्रयोगे न तत्राद्यपादाद्यादरः स्यात् । यदा द्वादश्यां नक्षत्रयोगोऽन्यतिथावपि पादयोगस्तदा कुत्र स्यादित्याशङ्कयोक्तम्

[1]ज्योतिःशास्त्रे—विष्णुर्दिवा न स्वपिति न च रात्रौ प्रबुध्यते ।
द्वादशी ऋक्षसंयोगे पादयोगो न कारणम् ॥

अन्यतिथिगतपादयोगे शयनादिकं कर्त्तव्यमित्यर्थः ।

[2]स्मृतिः— निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ।
अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत् ॥
अप्राप्ते द्वादशीमृक्षे उत्थानशयने हरेः ।
पादयोगे न कर्त्तव्यं नाहोरात्रं विचिन्तयेत् ॥

यदा एकादश्यां न पादयोगो, द्वादश्यामपि न नक्षत्रसम्भवस्तदा किं स्यादित्याकाङ्क्षायाम्— [3]पौष्णशेषे यदा नाह्नि मैत्राद्यमपि नो निशि ।
द्वादश्यामेव तत् कुर्यादुत्थान शयने हरेः ॥

वराहपुराणे— [4]द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे ।
आभाकासितपक्षेषु शयनावर्त्तनादिकम् ॥

भविष्योत्तरे— [5]मिथुनस्थे सहस्रांशौ स्वापयेन्मधुसूदनम् ।
तुलाराशिगते भानौ पुनरुत्थापयेच्च तम् ॥
अधिमासेऽपि पतिते एष एव विधिः स्मृतः ।
नान्यथा स्वापयेद्देवं न चैवोत्थापयेद्धरिम् ॥

अधिमासेऽपि पतित इति विषुवतोऽनन्तर इत्यर्थः । मेषादिषट्केऽधिमासपाते कर्कट एव हरिशयनस्याग्रे वक्ष्यमाणत्वात् । मिथुनेऽधिमाससंपाते विशेषमाह—

---

(1) रा. मा. (पृ–109) । (2) का. वि. (पृ–176) ।
(3) का. वि. (पृ–184) ।
(4) का. वि. (पृ–183) ।
(5) का. वि. (पृ–194), ए. च. (अ–12, पृ–97) ।

अत्रिः— [1]मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत् ।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥

स्पृशेदिति वचनात् समग्रामावास्याद्वयस्पर्शे अमावास्याद्वयैकस्पर्शेऽपि द्विराषाढो भवत्यन्यथाऽतिक्रामेत् । प्राप्नुयादिति ब्रूयात् । अतएवोक्तं स्मृत्यन्तरे—

[2]अमावास्याद्वयं यत्र रविसंक्रान्तिवर्जितम् ।
द्विराषाढः स विज्ञेयः शेते च श्रावणेऽच्युतः ॥
अप्राप्ताषाढमासे तु सिनीवालीद्वयं यदा ।
द्विराषाढः स विज्ञेयः पतिते चाधिमासके ॥

विरिञ्चिः— दक्षिणाशामुखे भानौ स्वपेद् यदि हरिस्तदा ।
कन्यावृश्चिकयोरेव विवर्त्तननिबोधने ॥
कर्कटेऽर्के हरौ सुप्ते शक्रध्वजक्रियाऽश्विने ।
तुलायां बोधयेद्देवीं वृश्चिके तु जनार्दनम् ॥

सत्यतपाः— शक्रध्वजोत्थापनञ्च विष्णोश्च परिवर्त्तनम् ।
मासद्वयेन निर्दिष्टं शयनादेव कोविदैः ॥
दुर्गायाश्च त्रिभिर्मासैरधिमासं विनैव तु ।
अधिमासनिपाते तु क्रमादिन्द्राम्बिकाहरीन् ॥
कन्यातुलावृश्चिकेषु नृप उत्थापयेद् ध्रुवम् ।

परिशिष्टे— द्विराषाढे समुत्पन्ने कर्कटे शयिते हरौ ।
आखण्डलस्तु कन्यायां तुलायां पार्वती तथा ।
अनन्तो वृश्चिके चैव कुम्भे चैव हुताशनः ।

अत्राकरणे दोषः प्रोक्तो ब्रह्माण्डपुराणे—

द्विराषाढेन कन्यायां शक्रमुत्थापयेद् यदि ।
राज्ञो राज्यं विनश्येत्तु प्रजा चैव प्रलापयेत् ॥
काले तूत्थापिते शक्रे चिरं जीवति पार्थिवः ।

---

(1) का. वि. (पृ–54) । (2) का. वि. (पृ–173, 170) ।

(3) का. वि. (पृ–223), रा. मा. (पृ–104) ।

प्रजा निरुग् भवेदेव भवेच्छस्यवती क्षितिः ॥
द्विराषाढे तु कन्यायामुत्थानं [1]भवयोषितः ।
कुर्वतो हीयते राज्यं प्रजा च विकलायते ॥

मुख्यं द्विराषाढमभिधाय पारिभाषिकं द्विराषाढमुक्तवान् । परिशिष्टकारः—

[2]माधवाद्येषु षट्स्वेकमासि दर्शद्वयं यदा ।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥

स्मृत्यन्तरेऽपि— [3]दर्शद्वयं यदैकस्मिन् भवेद् वै विषुवान्तरे ।
द्विराषाढस्तदा कार्यः कर्कटेऽर्के हरिः स्वपेत् ॥

सत्योऽपि— वृषं त्यक्त्वा चतुर्थ्यन्ते षडशीतिः सिते यदा ।
तदा दैवविदा चिन्त्यं द्विराषाढप्रकल्पनम् ॥

षडशीतिः—मिथुनसंक्रान्तिः । शुक्लचतुर्थ्यूर्ध्वं मिथुनसंक्रान्तौ सत्यां श्रावणादिमासत्रयान्यतमे मासि पतितेऽवश्यमधिमासपातो भवति । तदा चाषाढस्य द्वित्वं विनाऽपि द्विराषाढत्वं कल्पनीयमित्यर्थः । एतदेवाह ऋष्यशृङ्गः—

[4]प्रथमेऽह्नि द्वितीये वा शुक्ले मेषमियाद्रविः ।
द्विराषाढमृते विष्णुः परं कर्कटके स्वपेत् ॥

कर्कटे दर्शद्वये तस्य मलिम्लुचत्वान्मिथुनार्क एव हरिशयनं द्विराषाढतायाश्च फलं पार्श्वपरिवर्त्तनावस्त्येवेति केचित् । तदयुक्तम् । माधवाद्येष्वित्यादिवाक्येन कर्कट एव हरिशयनस्य विधानत्वात् । मलिम्लुचत्वं हरिशयनादन्यत्रकाम्यव्रतादिषु चरितार्थम् । किञ्चादपि मलमासे हरिशयनप्रसङ्गे तदा किमर्थं मुख्ये द्विराषाढे च तद् हरिशयनं विदधाति, पूर्वत्वान्मलिम्लुचत्वादेव हरिशयनाप्राप्तेः । अस्ति चैतदनुग्राहकवाक्यम् ।

श्रावणे यदि वाऽऽषाढे अमावास्याद्वयं भवेत् ।
आषाढ एव मलिनः श्रावणे केशवः स्वपेत् ॥

---

(1) भवयोषितः—दुर्गायाः ।
(2) का. वि. (पृ–240) ।
(3) का. वि. (पृ–115) ।
(4) का. वि. (पृ–199) ।

अत्र श्रावणे दर्शद्वयमाषाढस्य मलिनत्ववचनमत्र हरिशयनशंकानिरासार्थम्। न तु विवाहादिनिषेधार्थमपि श्रावणे केशवः स्वपेदित्युत्तरवचनानुरोधात्।

किञ्च— प्रबुध्यते मास चतुष्टयेनेत्यपि भज्येत।

न च षष्टिभिर्दिवसैर्मासः कथितो बादरायणै"रिति[1] वचनात् षष्टिदिवसात्मक एव मासो भवतीति चत्वार एव मासा भवन्तीति न वाच्यम्। तस्य काम्यादि विशिष्टविषयत्वात्। एवं सत्येव "त्रयोदशमासाः सम्वत्सर" इति श्रुतिरपि सावकाशा भवति। पञ्चममास हरिशयने दोषोऽपि नरसिंहपुराणे प्रतिपादितः—

पञ्चमासान् हरौ सुप्ते देशे तत्र भयं भवेत्।
ब्रह्महा च भवेद्राजा संग्रामे भयमाप्नुयात्॥
स्वपेन्नारायणो देवश्चतुर्थे मासि संख्यया।
न वर्धयेत् स्वापदिनं तदा लोकः सुखी भवेत्॥

कर्कटादिमासत्रयान्यतमेऽधिमासे पतिते तस्मिन् वर्षे यथा कर्कटे हरिशयनं तथा आगामिन्यपि। तदुक्तं [3]राजमार्तण्डे—

सिंहकन्यागते भानौ भवेद् दर्शद्वयं यदा।
आगामिके तदा काले द्विराषाढस्य सम्भवः॥

[4]सत्यतपाः— सिंहे कन्ये च पक्षौ चेत् शुक्रे हर्यब्दसंयुतौ।
सिंहे परे शक्रमहः कन्यायां त्विन्द्रदुर्गयोः॥

हर्यब्दसंयुतौ—हरिश्रवणेन सिंहे संयुतौ। कन्ये हरेः श्रवणस्याद्यैः मूलप्रभृतिभिः निर्वर्त्तिश्रवणपर्यन्तैः संयुता इत्यर्थः। कन्यायां त्विन्द्रदुर्गयोरिति शब्देन पर इति निर्वर्त्तितम्। तेन पूर्वं चान्द्राश्विने इन्द्रोत्सवः। परचान्द्राश्विने दुर्गोत्सव इति यथासंख्यतम् सम्बन्धः। एवं सति शक्रोत्सवो मलिम्लुचे स्यादिति चेत्तत्स्यादेव।

द्विराषाढविकल्पोऽयं वैकुण्ठशयनं प्रति।
ध्वजस्तु [5]शतयज्ञस्य सिंह एवावतिष्ठते॥

---

(1) रा. मा. (पृ–103)।
(2) का. सा. (पृ–124)।
(3) रा. मा (पृ–102)।
(4) रा. मा. (पृ–104), शक्रमहः—इन्द्रोत्सवः।
(5) शतयज्ञस्य—इन्द्रस्य।

ननु द्विश्रावणे यथा मलिम्लुचे हरिशयनं तथोपाकर्मादि प्रसज्यते इत्याशङ्क्याह—

कर्कटे तु हरौ सुप्ते सिंहे गोपतिरुत्थितः ।
तत्रैव श्रवणाकर्म शक्रोत्थानमतः परम् ॥

गोपतिर्वलभद्रः । तत्रैवेति ।

उपाकर्म च कर्त्तव्यं कर्कटस्थे दिवाकरे ॥

[1]इति वचनात् मलिम्लुचे श्रवणाकर्म कर्त्तव्यमित्येव शब्दार्थः ।

विष्णोश्च शयनादूर्ध्वं मासेनान्तरितं द्विजाः ।
उपाकर्म सदा कुर्युः शयनानन्तरं न तु ॥

इति देवशयनपार्श्वपरिवर्त्तनोत्थापनकालाः ।

अथ व्रतादौ निषिद्धकालनिरूपणम्

मलमासनिषेधस्याधिमासनिरूपणप्रकरणे एव दर्शितत्वात् तदितरकाला एव दर्शयिष्यते । तत्र [2]ज्योतिःशास्त्रे—

[3]बाले वा यदि वा वृद्धे शुक्रे चास्तमुपागते ।
मलमासेषु चैतानि वर्जयेद्देवदर्शनम् ॥

उदग्गते [4]भास्वति चैत्रवर्ज्यं नास्तं गते [5]देवगुरौ [6]भृगौ च ।
सध्यां गते नैव शिशौ न वृद्धे कुर्वीत कन्याकरसम्प्रयोगम् ॥

अस्तमिते भृगुतनये कन्या म्रियते वृहस्पतौ पुरुषः ।
उभयोरपि मरणं स्यात् केतौ पाणिग्रहेऽभ्युदिते ॥

गर्गः— विवाहं देवयात्राञ्च गृहकर्मप्रवेशनम् ।
चूडोपनयनं चैव नष्टे शुक्रे न कारयेत् ॥
बाले वेश्यापदं याति योषिदुद्वाहिताद् भृगौ ।

---

(1) रा. मा. (पृ–111) । (2) रा. मा. (पृ–100-101) ।

(3) बालवृद्धादीनां स्वरूपं ब्रह्मसिद्धान्ते यथा- हे. व्रत. (1–246)—

रविणासक्तिरन्येषां ग्रहाणामस्त उच्यते ।
ततोर्वाग् वार्धकं विद्यादूर्ध्वं बाल्यं प्रकीर्त्तितम् ॥

(4) भास्वति–सूर्ये । (5) देवगुरौ–वृहस्पतौ । भृगौ–शुक्रे ।

वृद्धे च क्षयमाप्नोति नष्टे शुक्रेऽथ वैधवम् ।
अनादिदेवतां दृष्ट्वा शुचः स्युर्नष्टभार्गवे ।
मलिम्लुचेऽप्यनावृत्तं तीर्थस्नानमपि त्यजेत् ॥

वालवृद्धकाल उक्तो राजमार्त्तण्डे[1]—

[2]वालो दशाहाऽभ्युदितो परेण, पूर्वेण वालो दिवसत्रयं स्यात् ।
वृद्धस्तु पूर्वेण सपक्षमेकम्, पश्चात् स्थितं पञ्चदिनानि शुक्रः ॥
[3]भवेत् सन्ध्यागतः पश्चादस्तगोऽपि दिनत्रयम् ।
दिनानि पञ्चपूर्वेण तत्कृतं कर्म वर्जयेत् ॥
वाले वृद्धौ च सन्ध्यांशे चतुः पञ्च त्रिवासरान् ।
जीवे च भार्गवे चैव विवाहादिषु वर्जयेत् ॥
क्षैण्यं भृगोर्द्वादशवासराणि, पूर्वं दिनं वदति विष्णुगुप्तः ।
पश्चात् पुनः क्षीणतनुर्दशाहं वाल्ये विपर्यस्तमिदं दिशोः स्यात् ॥
उदक्क्षिप्तो भृगुर्वक्री न वृद्धो न च वालकः ।
याम्यक्षिप्तो दिनान्यष्टौ वालवृद्धत्वमेति सः ॥
गुरुशुक्रवुधार्काणां फलं वक्रातिचारगम् ।
वृहस्पतेस्तु तन्नास्ति पूर्वराशिगतं फलम् ॥

[4]यवनः— यात्रां क्षौरविवाहादौ व्रतकरणं कर्णवेधमथ विद्याम् ।
कुर्यान्न जन्ममासे त्वस्तमिते भृगौ शशाङ्के च ॥

---

(1) रा. मा. (पृ–101) ।

(2) वालवृद्धकालावधिर्यथा ज्योतिः:शास्त्रे (हे. व्रत 1–246)—

वालः शुक्रो दिवसदशकं पञ्चकं चैव वृद्धः ।
पश्चादह्नस्त्रितयमुदितः पक्षमौढ्यः क्रमेण ।
जीवो वृद्धः शिशुरपि सदा पक्षमन्यैः शिशू तौ ।
वृद्धौ प्रोक्तौ दिवसदशकश्चापरैः सप्तरात्रम् ॥

(3) रा. मा. (पृ–101) ।   (4) का. वि. (पृ–137) ।

[1]केशरिगे [2]सुरसचिवे व्रतमुद्वाहञ्च वर्जयेत् प्राज्ञः ।
व्रतकरणे व्रतभङ्गः स्यादुद्वाहे च योषितां मरणम् ।।

भगवतीपुराणे— सिंहस्थं गुरुशुक्रन्तु सर्वारम्भेषु वर्जयेत् ।
प्रारब्धं न च सिध्येत महाभयकरं भवेत् ।।

अत्रारम्भशब्दोपादानाद् आरम्भस्यैव प्रतिषेधो न त्वारब्धस्य, नाप्युद्यापनस्य ।

तथा च वायुपुराणे—

आदिमध्यावसानेषु कालशुद्धिर्यदा भवेत् ।
नियमो नास्त्यतो राजन् प्रतिष्ठाकरणं प्रति ।।

[3]यत्तु— ऋक्षैकमन्दिरगतौ यदि [4]जीवभानू शुक्रोऽस्तगः सुरवरैक गुरुश्च सिंहे ।
नारभ्यते व्रतविवाहगृहप्रतिष्ठा क्षौरादिकर्मगमनागमनञ्च धीरैः ।। इति

काश्यपवचने प्रतिष्ठाशब्दोपादानं तद्देवकुलदेवप्रतिमाप्रतिष्ठापरमेव ।

तथा च [5]माण्डव्यः—

[6]श्रुति[7]वेध[8]व्रत[9]वनितानवगतिदेवालयप्रतिष्ठाद्याः ।
रविभवनस्थे जीवे कार्या नार्यैर्विवाहश्च ।।

[10]अङ्गिरा— प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् ।
न तेन तद्व्रतं तासामुपहन्यात् कदाचन ।।
स्वभाव एष नारीणां ज्ञेयो मूत्रपुरीषवत् ।
अतोऽर्थान्न प्रदुष्यन्ति चरेयुश्चैव तद्व्रतम् ।।

गरुडपुराणे— प्रारब्धतपसां स्त्रीणां रजो हन्याद् व्रतं नहि ।
अन्यैर्दानादिकं कार्यं कायिकं स्वयमेव तु ।।

---

(1) केशरिगे—सिंहे ।
(2) सुरसचिवे—बृहस्पतौ ।
(3) का. वि. (पृ–138) ।
(4) जीघभानू—बृहस्पतिसूर्यौ ।
(5) का. सा. (पृ–211) ।
(6) श्रुतिः—उपाकर्म
(7) वेधः—कर्णवेधः ।
(8) व्रतम्—उपनयनसंस्कारः ।
(9) वनितानवगतिः—नववधूगमनम् ।
(10) स्मृ. स. (अङ्गिरा. श्लो. 24–25) ।

लिङ्गपुराणे— प्रारब्धे तु व्रते पश्चादशौचं यदि जायते ।
शरीरनियमः कार्यः पूजादानविवर्जितः ॥
अशौचान्ते ततः स्नात्वा पञ्चगव्यकृताशनः ।
देवं पूजोक्तविधिना दक्षिणां दापयेत्तदा ॥
भवेद्रजस्वला नारी यद्येवं व्रतवासरे ।
भवितव्यं तथाप्येवं शरीरक्लेशयुक्तया ।
यस्मिन् दिने भवेच्छुद्धा विधिं तस्य समारभेत् ।
व्रतस्य राजशार्दूलः नैव खण्डव्रतं भवेत् ॥

[1]हारीतः— नियमस्था व्रतस्था वा रजः पश्येत् कथञ्चन ।
त्रिरात्रन्तु क्षिपेदूर्ध्वं व्रतशेषं समाचरेत् ॥

[2]अङ्गिराः— नियमस्था यदा नारी प्रपश्येदन्तरा रजः ।
उपोष्यैव तदा रात्रौ शेषं स्नात्वा व्रतं चरेत् ॥

यमः— पूर्वव्रते तु निर्दिष्टैः सूतकं तु भवेद् यदि ।
चीर्णे व्रते तु सम्पूर्णे त्रिरात्रमशुचिः भवेत् ॥

भविष्योत्तरे— सुप्ते मयि जगन्नाथे केशवे गरुडध्वजे ।
निवर्त्तन्ते क्रियाः सर्वाश्चतुर्वर्ण्यस्य भारत ॥
विवाहव्रतबन्धादि [3]चूडासंस्कार[4]दीक्षणम् ।
यज्ञो गृहप्रवेशादिगोदानार्चाप्रतिष्ठनम् ॥
पुण्यानि यानि कर्माणि वर्जयेद्दक्षिणायने ॥

अर्चाप्रतिष्ठनमिति । अर्चा—देवप्रतिमा । अश्रुतारम्भादिकालानां निषेधोऽयम् ।

गर्गः— ग्रहोपरागे संक्रान्तौ ग्रहयुद्धे समागमे ।
उदयास्तमने प्राप्ते त्वधिमासेऽयने तथा ॥

---

(1) स्मृ. स. (लघुहारीत. श्लो. 6) ।

(2) स्मृ. स. (अङ्गिरा. श्लो. 50) ।

(3) चूडासंस्कारः—मुण्ड़नाख्यसंस्कारविशेषः ।

(4) दीक्षणम्—दीक्षाग्रहणम् ।

शयनोत्थापने चैव देवानां पितृकर्मणि ।
अन्योत्सवदिने चैव शुभकर्त्ता विनश्यति ॥
जातं दिनं दूषयते वसिष्ठस्त्वष्टौ च गार्ग्यश्च्यवनो दशाहम् ।
जन्मर्क्षमासं किल भागुरिश्च व्रते विवाहे [1]क्षुरकर्णवेधे ॥
न ज्येष्ठमासे न [2]तथाग्रमासे, ज्येष्ठस्य कल्याणविधिः शुभाय ।
न [3]युग्ममासेन निरंशसूर्ये नास्तं गते सूर्यशशाङ्कजीवे ॥ इति

इति कृतिबृहस्पति कृतायां कृत्यकौमुद्यां
कालविवेकप्रकरणं
समाप्तम् ।

—*—

---

(1) क्षुरः—मुण्डनकर्म ।

(2) अग्रमासे—मार्गशिरे ।

(3) युग्ममासे—अधिमासे ।

अथ प्रायश्चित्तप्रकरणम्

[क]

अथ जलजपविधिः

यजुर्विधाने याज्ञवल्क्यः— देवं वर्षयितु काम उदुम्वरविल्ववेतस[1]चरणादीन् दधिमधुघृताक्तान् अयुतं जुहुयान्महावृष्टिं करोति ।

व्यन्तुवय इति आवहशब्दः प्लुतः कार्यः ॥

[2]व्यन्तुवय इति मन्त्रस्य । प्रजापति ऋषिः । अनुष्टुप् छन्दः । सूर्याधिष्ठित मरुद्देवता । वरुणो वीजम् । आपः शक्तिः । एतां दिशमभिव्याप्य वृष्टौ विनियोगः । मनज्योतिरिति हृदयम् । अबोध्यग्निरिति शिरसि । मूर्धानं दिव इति शिखा । मर्म्माणि ते कवचम् । य एतावन्त इति नेत्रम् । प्रमुञ्च धन्वनः इति अस्त्रविन्यासः ।

अयं षडङ्गन्यासो न युक्तो, विध्यङ्गानामित्युपक्रमोक्तत्वादिति केचित् । विध्यङ्गानि तथैवोक्तानि । यथा [3]शिवसकल्पो हृदयम् । [4]पुरुषसूक्तं शिरः । [5]उत्तरनारायणं शिखा । [6]अप्रतिरथः कवचम् । [7]शतरुद्रियमस्त्रमिति ।

---

(1) चरणः— वृक्षस्य मूलभागः ।

(2) व्यन्तुवयो क्तथ्ठंरिहाणामरुताम्पृषतीर्गच्छ वशापृश्निर्भूत्वा दिवङ्गच्छ ततो नो वृष्टिमावह । चक्षुष्पाऽ अग्नेसि चक्षुर्म्मे पाहि । शु. यजु. (2–16)

(3) शिवसंकल्पः— यज्जाग्रतो दूरमुदैति दैवमित्यादि ।

(4) पुरुषसूक्तं—सहस्रशीर्षा पुरुषः इत्यादि ।

(5) उत्तरनारायणम्—अद्भ्यः सम्भूत इत्यादि ।

(6) अप्रतिरथसूक्तम्—आशुः शिशानो वृषभो न इत्यादि ।

(7) शतरुद्रियं—नमस्ते रुद्रमन्यव इत्यादि ।

(क) विषयोऽयं खड्ग नास्ति ।

[1]त्रातारमिन्द्र । [2]त्वन्नोऽग्ने । [3]सुगन्नु पन्था । [4]असुन्वन्तम् । [5]तत्त्वायामि । [6]आनो नियुद्भिः । [7]वयं सोम । [8]तमीशान । मन्मेरुद्रा । [9]स्योना पृथिवी ।

एतत् संपुटमैन्द्रादिषु दिक्षु विन्यसेत् । एतैर्जपकाले संपुटं कुर्यादिति स्थानान्तरे तत्रैवोक्तम् । अथ ध्यानम्—

ऐरावतारूढमनन्तमूर्त्ति त्रैलोक्यनाथं सुरनायकं विभुम् ।
प्रभुं भजे सर्वभयापहारिणं, सहस्रनेत्रं किल वज्रपाणिनम् ॥
पुष्करावर्त्तकैर्मेघैः प्लावयन्तं वसुन्धराम् ।
विद्युद्गर्जितसन्नद्धं तोयात्मानं नमाम्यहम् ॥
यस्य केशेषु जीमूतानन्दः सर्वाङ्गसन्धिषु ।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः ॥

तत्रैव– विश्वमूर्धेति देवं वर्षयितुं काम उदके प्रविश्य जपेत् । देवं वर्षयेत् ॥

इति जलजपविधिः ।

अथ प्रायश्चित्तानि

प्रायश्चित्तार्थं परिषदुपस्थानम्

तत्र याज्ञवल्क्यः[10]—

विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥
तस्मात्तेनेह कर्त्तव्यं प्रायश्चित्तं विशुद्धये ।

---

(1) त्रातारमिन्द्रमवितारमिन्द्र ꣳ हवे हवे सुहव ꣳ शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहुतमिन्द्र ꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥

(2) शु. यजु. (21-3) ।

(3) पार. गृह्य. (1-5-11) ।

(4) शु. यजु. (12-62) ।

(5) शु. यजु. (18-49) ।

(6) शु. यजु. (27-28) ।

(7) शु. यजु. (3-56) ।

(8) शु. यजु. (25-18) ।

(9) शु. यजु. (35-21) ।

(10) याज्ञ. स्मृ. (3-219/220) ।

[1]अङ्गिराः— कृते निःसंशये पापे न भुञ्जीतानुपस्थितः ।
भुञ्जानो वर्धयेत्पापमसत्यं संसदि ब्रुवन् ॥
संशयेऽपि न भोक्तव्यं यावत्कार्यस्य[2] निष्कृतिः ।
[3]प्रमादश्च न कर्त्तव्यो यथैवासंशये तथा ॥
कृत्वा पापं न गूहेत गूहमानस्य वर्द्धते ।
[4]वहु वा चाल्पकं वाऽपि धर्मविद्भ्यो निवेदयेत् ॥
ते हि पापकृतां वैद्याः हर्तारश्चैव पाप्मनाम् ।
व्याधितस्य यथा वैद्याः बुद्धिमन्तो रुजापहाः ॥

कार्यस्य निष्कृतिः पापनिश्चयः । तथा—

मोहाद्विरुद्धमासेव्य प्रत्यागत्य तु मानवः ।
प्रायश्चित्तं विमार्गेत शृणु तत्रापि यो विधिः ॥

प्रत्यागत्य—ततः पापाचरणान्निवृत्य । विमार्गेत—प्रार्थयेत् ।

[5]तथा— अत ऊर्ध्वं प्रवक्ष्यामि चोपस्थानस्य लक्षणम् ।
उपतिष्ठंस्तु न्यायेन व्रतादेशनमर्हति ॥

न्यायेनेति यदुक्तं, तदाह [6]स एव—

प्रायश्चित्ते समुत्पन्ने ह्रीमान् सत्यपरायणः ।
मृदुरार्जवसम्पन्नः शुद्धिं याचेत मानवः ॥
सचेलं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः ।
क्षत्रियो वाऽपि वैश्यो वा [7]पर्षदं ह्युपतिष्ठते ॥

---

(1) उ.आङ्गि. स्मृ. (अ 2–2/5), परा. स्मृ. (8–4/7) ।
(2) "विनिश्चयः" इति उ.आङ्गि., परा. स्मृ. पाठः ।
(3) "प्रमाणेनैव कर्त्तव्यं यावदाशासनं तथा" इति उ.आङ्गि. परा. स्मृ. पाठः ।
(4) "स्वल्पं वाऽथ प्रभूतं वा" इति उ.आङ्गि., परा. स्मृ. पाठः ।
(5) उ.आङ्गि. (2–1), परा. स्मृ. (8–3) ।
(6) उ.आङ्गि. (अ 6–6/10), परा. स्मृ. (8–8/10) ।
(7) "ततः परिषदं व्रजेत्" इति उ.आङ्गि., परा. स्मृ. पाठः ।

उपस्थाय ततः शीघ्रमार्त्तिमान् धरणीं व्रजेत् ।
गात्रैश्च शिरसा चैव न च किञ्चिदुदाहरेत् ।।
ततस्ते प्रणिपातेन दृष्ट्वा तं समुपस्थितम् ।
वृद्धाः पृच्छन्ति किं कार्यमुपविश्याग्रतः[1] स्थिताः ।।
किं ते कार्यं [2]वदास्माभिः किं वा मृगयसे द्विज ।
तत्त्वतो ब्रूहि तत्सर्वं सत्यं हि गतिरात्मनः ।।

क्षत्रियो वाऽथ वैश्यो वेति नरमात्रोपलक्षणम् ।

[3]तथा— [4]तेषां निवेदिते कार्येऽपसार्यो यस्तु कार्यवान् ।
तस्मिन्नुत्सारिते [5]विप्रे यथावद् धर्मपाठकाः ।।
ते तथा तत्र कल्पेयु [6]विमृष्यन्तः परस्परम् ।।

तथा— विचारस्तादृशः कार्यो यथा सर्वे सभासदः ।
[7]एकवाक्यतया ब्रूयुस्तथा श्रेयोऽधिगच्छति ।।
सर्वेषां निश्चितं यत् स्यात् यच्च प्राणान्न भीषयेत् ।
आहूय श्रावयेदेको पर्षदा यो नियोजितः ।।
शृणुष्व भो इदं विप्र यत्त आदिश्यते व्रतम् ।
तत्तद् यत्नेन कर्त्तव्यमन्यथा तद् वृथा भवेत् ।।

---

(1) 'सने शुभे" इति उ. आङ्गि., परा. स्मृ. पाठः ।

(2) "किमर्थं वा" इति उ.आङ्गि., परा. स्मृ. पाठः ।

(3) उ आङ्गि. (3-5/6) ।

(4) "तस्मिन्" इति उ.आङ्गि. पाठः ।

(5) "पापे" इति उ.आङ्गि. पाठः ।

(6) विमृष्यन्तः—विचारयन्तः ।

(7) निखिलश्रुतिभागस्यापौरुषेयत्वेन प्रामाण्यस्वीकारे नानाकोटिकमतोपस्थापनायां सत्यां समेषां वचनानां स्वप्रामाण्यप्रदर्शनपुरःसरमेकाधारकत्वं नाम एकवाक्यत्वं यथा तद्वत् "अविरोधे सदा कार्यं स्मार्तं वैदिकवत् सदा" इति जाबालि–वचनेन धर्मशास्त्रवचनानामपि प्रमाणत्वेन तदनुरोधेन समुचिताचारवतां पर्षदुपगतानां ब्रह्मणानां वचःसु वैभिन्ने लक्षितेऽपि कार्येतिकर्त्तव्यतादशायां संवादः एकवाक्यतया भावनीय इति सारः ।

यच्चान्यदशुभं किञ्चित् कृतं यद्वा करिष्यति ।
पृथग् भवेत्तदेकस्मात् शुद्धिर्यत्ते निवेदितम् ॥
यदा त्वया भवेच्चीर्णं व्रतं शुद्धिकरं महत् ।
तदा कुर्याः प्रयत्नेन शक्त्या विप्रादिभोजनम् ॥

एतस्माच्छुद्धिरिति । एतस्माद् व्रतात् । निवेद्धितस्य पापस्य शुद्धिर्न पुनरन्यस्यापीत्यर्थः । पर्षदा यो नियोजितः श्रावयेदित्युक्तम् । पर्षदा कीदृशो नियोजनीय इत्याकाङ्क्षायामाह [1]स एव—

ब्राह्मणो ब्राह्मणानान्तु क्षत्रियाणां पुरोहितः ।
वैश्यानां याजकश्चैव प्रायश्चित्तं समादिशेत् ॥
अगुरुः क्षत्रियाणां तु वैश्यानां चाऽप्ययाजकः ।
प्रायश्चित्तं समादिश्य तत्कृच्छ्रं समाचरेत् ॥

एवमुत्कृष्टवर्णेषु ब्राह्मणेषु प्रदर्शितम् ।
निकृष्टानान्तु वक्ष्यामि प्रायश्चित्तमतः परम् ॥
[2]न्यायतो मार्गमाणस्य [3]क्षत्रियादेः प्रणामिनः ।
अन्तरा ब्राह्मणं कृत्वा [4]व्रतमेतत् समादिशेत् ॥
तथा शूद्रं समासाद्य [5]महाधनपुरःसरम् ।
प्रायश्चित्तं प्रदातव्यं वेदमन्त्रविवर्जितम् ॥

ब्राह्मण इत्युदासीनः । एवमुत्कृष्टवर्णेष्वित्यादि । उत्कृष्टवर्णेषु वृत्तवत्सु वर्णेषु वर्णशब्दस्यानेकार्थत्वात् । ब्राह्मणेष्वित्युक्तम् । ब्राह्मणादिष्वित्यर्थः । निकृष्टानां व्रतहीनानां क्षत्रियादेरित्यत्र वृत्त्या क्षत्रियादेः ब्राह्मणस्येत्यादि व्याख्येयम् । उत्कृष्टनिकृष्टशब्दयोरेकविषयत्वस्यैव युक्तत्वात् । अन्तरा ब्राह्मणमिति स एव विधायक इति

---

(1) उ.आङ्गि. (अ 5–8/10, 12-13) ।

(2) 'अपि वा' इति उ.आङ्गि. पाठः ।

(3) "क्षत्रधर्मेषु तिष्ठतः" इति उ.आङ्गि. पाठः ।

(4) "ततोऽस्य व्रतमादिशेत्" इति उ. आङ्गि. पाठः ।

(5) "तथा धर्मपदे स्थितः" इति उ.आङ्गि. पाठः ।

प्रसिद्धिः । तथा शूद्रमिति पूर्ववद् ब्राह्मणानन्तरा कृत्वेत्यर्थः ।

पर्षदानुमतस्तत्त्वं सर्वं विज्ञापयेन्नरः ।
व्रतमादाय भूयोऽपि तथा स्नात्वा व्रतं चरेत् ॥

द्वासप्ततिमाढपरिमितसुवर्णदानं सर्वप्रायश्चित्तमिति प्रसिद्धिः । तत्र प्रमाणमुशनसो वचनं यथा— यत्रोक्तं यत्र वा नोक्तमिह पातकनाशनम् ।
प्राजापत्येन कृच्छ्रेण शोधयेन्नात्र संशयः ॥

[1]वसिष्ठाङ्गिरसोर्वचनं यथा—

दुरितानां दुरिष्टानां पापानां महतां तथा ।
कृच्छ्रं चान्द्रायणं चैव सर्वपापप्रणाशनम् ॥

अत्र महतां पापानामिति वचनात् । महापातकस्यापि प्रायश्चित्तमित्यवगम्यते । कियन्ति प्राजापत्यानि कर्त्तव्यानीति विशेषानिर्देशे "गुरूणि गुरुणि लघूनि लघुनी"ति [2]गौतमवचनात् । बहूनीति प्राप्तम् । द्वादशवर्षातिरिक्तस्य प्रायश्चित्तविधानश्रुतत्वात् । द्वादशवर्षाण्येव प्राजापत्यमाचरतां प्राजापत्यस्य च द्वादशदिनसाध्यत्वाद् द्वादशदिनान्येकं प्राजापत्यमिति परिगणनया प्राजापत्यानां षष्ट्यधिकशतत्रयमनुष्ठेयम् । तदनुष्ठानाशक्तौ तावत्यो धेनवो दातव्याः । तदसम्भवे तावदेव धेनुमूल्यं देयम् । तथा च [3]हारीतः— प्राजापत्यक्रियाशक्तौ धेनुं दद्याद् विचक्षणः ।
धेनोरभावे दातव्यं तुल्यमूल्यं न संशयः ॥
निष्कं निष्कार्धपादं वा पञ्चकार्षापणानि वा ।
त्रिकार्षापणान्यथवा शक्तितो मूल्यकल्पना ॥

तत्राप्यशक्तौ ब्राह्मणभोजनदानेन व्रतं समापयेद् । तथा च [4]स्मृत्यन्तरे—

कृच्छ्रे पञ्चातिकृच्छ्रे त्रिगुणमहरहस्त्रिंशदेकं तृतीये,
चत्वारिंशच्च तप्ते [5]त्रिगुणनगुणिता विंशतिः स्यात् पराके ।

---

(1) वसि. धर्म. (27-20) ।
(2) गौ. धर्म. (3-9-19) ।
(3) मिता. (पृ-524) ।
(4) मिता. (या. स्मृ. 3-326) ।
(5) "त्रिगुणितगुणिता" इति मिताक्षरापाठः ।

कृच्छ्रे सान्तापनाख्ये भवति षडधिका विंशतिः सैव हीना
द्वाभ्यां चान्द्रायणे स्यात्तपसि कृशबलो भोजयेद् विप्रमुख्यान् ॥

अहरह इति सर्वत्र सम्बन्धनीयम् । कृच्छ्रेषु उपवासप्रकल्पना । तेन प्रत्युपवासं पञ्चभोजनानि इति व्यवस्थया त्रिंशद् भोजनानि त्रिंशदुपवासाः प्राजापत्ये भवन्तीति शताधिकदशसहस्राणि भोजनानि दद्यात् । यत्तु [1]चतुर्विंशतिमतेऽभिहितम्—

विप्रा द्वादश वा भोज्याः पावकेष्टिस्तथैव च ।
अन्या वा पावनी काचित् समान्याहुर्मनीषिणः ॥

इति द्वादशविप्रभोजनं प्राजापत्यसममिति तन्निर्धनविषयमिति [2]विज्ञानेश्वरः । इदं प्रायश्चित्तमकामकृतस्यैव । तथा च [3]मनुः—

इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजः ।
कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते ॥

एतत्तु क्षत्रियादीनामेव । तथा च भविष्यपुराणे—

गुणान्वितं च यो विप्रं गुणहीनस्तु क्षत्रियः ।
क्षिणोति बुद्धिपूर्वञ्च न भवेत्तस्य निष्कृतिः ॥
कृत्वा पर्षद्विधानन्तु प्रायश्चित्तं मनीषिणः ।
न प्रयच्छन्ति वै तस्य हनतः कामतो द्विजम् ॥
यस्मात् कृतेऽपि न शुद्धिर्भवति सुरसत्तम ।
शूद्राणान्तु विशेषेण हनतां कामतो द्विजम् ॥
एतेन निष्कृतिस्तेषां यद् गदन्ति निराशिषः ।

विप्रस्य तु [4]प्राणपरिक्षयादेव शुद्धिः । तथा च व्यासः—

कामतो ब्राह्मणवधे जीवतो नास्ति निष्कृतिः ।
यस्तु सर्वं परित्यज्य यावद्जीवं चरेत् व्रतम् ॥
सर्वशुद्धः शुभान् लोकान् विप्रो गच्छेन्न संशयः ।

---

(1) मिता. (या. स्मृ. 3–326) । (2) मिता. (या. स्मृ. 3–326) ।

(3) मनु. (11–89) ।

(4) ब्राह्मणः कामतो गुणवद् ब्राह्मणमारणे यावज्जीवं ब्रह्महत्याव्रतं चरेदित्यर्थः ।

भविष्यपुराणे— पैष्ट्याः पाने कामतस्तु मरणान्तिकमादिशेत् ।
स्मृत्यन्तराणां वचनात्तद्वाक्यं गदतः शृणु ॥
गौडीमाध्व्योस्तथा पाने प्राणान्तिकमुदाहृतम् ।
श्रेष्ठविप्रसुवर्णन्तु प्रभूतमपहृत्य च ॥
सविशिष्टानुबन्धश्च ब्राह्मणो द्यूतवल्लभः ।
प्रायश्चित्तमिदं कुर्यान्निबोध गदतो मम ॥
लोमहीनो घृताक्तश्च आत्मानं पावके हुनेत् ।
क्षत्रियादिर्यदा हर्ता द्यूताद्येव प्रयोजनम् ॥
[1]सानुबन्धापहारश्च तदेवं शुद्धिमाचरेत् ।

निष्कालको वा घृताक्तो गोमयाग्निना पद्भ्यां प्रभृत्यात्मानं दहेत् । मरणात् पूतो भवतीति विज्ञायते । निष्कालकः केशलोमविवर्जितः ।

यमः— गुरुदाराभिगमनं कृत्वा मोहेन वै द्विजः ।
ज्वलन्तीमायसीं शय्यां संविशेद् गुरुतल्पगः ॥
[2]सूर्मीं ज्वलन्तीमाश्लिष्य मृत्युतः स विशुद्ध्यति ।
अथवा शिश्नवृषणावुत्कृत्य प्रतिगृह्य च ॥
गुरोरभिमुखस्तिष्ठेत् पूतो भवति किल्विषात् ।
नैर्ऋतं वा दिशं गच्छेदानिपातादजिह्मगः ॥
प्राणत्यागाद् विशुध्येत्तु मनुः स्वायम्भुवोऽब्रवीत् ।

छागलेयः— ज्ञात्वा करोति यः सङ्गं निष्कृतिर्न विधीयते ।
प्रायश्चित्तमकामानां कामावाप्तौ न विद्यते ॥

हारीतः— अतिपातकिनस्त्वेते प्रविशेयुर्हुताशनम् ।
नान्येह निष्कृतिस्तेषां विद्यते हि कथञ्चन ॥

तस्माद् घनसाध्यमिदं प्रायश्चित्तं कामकृतमहापातकातिपातकानां न भवत्येव ।

---

(1) सानुबन्धः—क्रमबद्धः ।

(2) सूर्मीं—धातुनिर्मितप्रतिमाम् ।

अथानुष्ठानक्रमः

पर्षदा यो नियोजितः सामाजिकः श्रेष्ठः पर्षदनुमतिं गृहीत्वा विधायकं प्रत्याह—"किमर्थमागतोऽसीति ब्रूहि" । विधायकेन पृष्टः पापी प्रत्याह—"ममैतज्जन्मप्रभृति कामकृतब्राह्मणवध-गुरुतल्पगमन-महापातकिसंसर्गातिपातक-पैष्टीपानासकृद्-गौडीमाध्वीपानश्रेष्ठ-ब्राह्मणसुवर्णस्याविशिष्टानुबन्धद्यूतहेतूद्धरणव्यतिरिक्तं ज्ञानाज्ञानसकृदभ्यासात्यन्ताभ्यासकृतसमस्तपापक्षयार्थं प्रायश्चित्तं कर्त्तुम् । पुनः सामाजिकेन पृष्टो विधायकः ब्रूते । अस्यैतज्जन्मप्रभृतीत्यारभ्य समस्तपापक्षयार्थमित्यन्तमुक्त्वा द्वादशवार्षिकप्राजापत्यप्रायश्चित्तं कर्त्तव्यतया प्राप्तं, तदनुष्ठानाशक्तौ तत् प्रतिनिधित्वेन प्रति प्राजापत्यमेकैकधेनुव्यवस्थया षष्ट्यधिकशतत्रयधेनवो दातव्यत्वेन प्राप्तास्तासामिदानीमसम्भवे तन्मूल्यं प्रतिधेनु निष्कपादव्यवस्थया द्वासप्ततिमाढपरिमितं सुवर्णं यथासम्भवनामगोत्रेभ्यो ब्राह्मणेभ्यो दत्त्वा शुद्धो भव इति पर्षदा निर्णीतम् । तत्कृत्वा शुद्धो भव इति ब्रूहि । ततस्तद्वाक्यं श्रुत्वाऽभिधायकः तवैतज्जन्मप्रभृति इत्यादि तत् कृत्वा शुद्धो भवेति पर्यन्तं वाक्यं प्रायश्चित्तिनं प्रत्याह । ततः प्रायश्चित्ती वाक्यं श्रुत्वा पुनः स्नात्वा उत्तीर्य परिवर्त्तितवासाः पर्षत्समीपमागत्य पर्षदे दक्षिणामुत्सृजेत् । दक्षिणा च धेनुमूल्याधिका ।

पापं विख्याप्य तत्पापी दत्त्वा धेनुं तथा वृषम् ।

इति पराशरवचनमुपपातकविषयम् ।

तस्माद् द्विजः प्राप्तन्यायः सकृदाप्लुत्य वारिणि ।
विख्याप्य पापं वक्तृभ्यः किञ्चिद्दत्त्वा व्रतं चरेद् ॥

इति स्मृत्यन्तरवाक्यं प्रकीर्णविषयम् । महापातकादिष्वधिकं कल्प्यमिति विज्ञानेश्वरवचनात् ।

अथ द्वादशवार्षिकप्रायश्चित्तम्[क]

ॐ अद्येहेत्यादि देशकालवाक्यमुच्चार्य यथासम्भवनामगोत्रेभ्यो यथावेदशाखाशाखैकदेशाध्यायिभ्यो ब्राह्मणेभ्योऽमुकसगोत्रस्यामुकशर्मणो ममैतज्जन्मप्रभृति

(क) विषयोऽयं घङच नास्ति ।

कामकृतब्राह्मणवध-गुरुतल्पगमन-महापातकिसंसर्गातिपातक-पैष्टीपानाभ्यस्तगौडीमाध्वीपानश्रेष्ठ-ब्राह्मणसुवर्णसविशिष्टानुबन्धद्यूतहेतुहरणव्यतिरिक्त-ज्ञानाज्ञानसकृदभ्यासात्यन्ताभ्यासकृतसमस्तपापक्षयार्थं द्वादशवार्षिकप्राजापत्यानुष्ठानप्रायश्चित्तस्य कर्त्तव्यतया प्राप्तस्यानुष्ठानाशक्तौ तत्प्रतिनिधित्वेन प्रतिप्राजापत्यमेकैकधेनुव्यवस्थया दातव्यत्वेन प्राप्तानां षष्ट्यधिकशतत्रयधेनूनामिदानीं साक्षादसम्भवे तन्मूल्यं प्रतिधेनुनिष्कपादव्यवस्थया द्वासप्ततिमाढपरिमितं सुवर्णमग्निदैवतं दातुमहमुत्सृजे । दक्षिणा नास्ति । दानस्य प्रायश्चित्तरूपत्वात् ।

क

अथ षड्वार्षिकप्रायश्चित्तम्

तत्र चतुर्विंशतिमते—

जन्मप्रभृतिपापानि वहूनि विविधानि च ।
कृत्वाऽर्वाक् ब्रह्महत्यायाः षड़व्दं कृच्छ्रमाचरेत् ॥
प्रत्याम्नाये गवां दद्यात् साशीति धनिना शतम् ।

धनिना—वत्सयुक्तानां धेनूनामिति यावत् । सर्वं पूर्ववत् । विशेषस्त्वेवम् । जन्मप्रभृति-ज्ञानाज्ञानसकृदभ्यासात्यन्ताभ्यासकृतब्राह्मणहत्यादि-महापातकव्यतिरिक्त-बहुविधपापक्षयार्थं षडब्दकृच्छ्राचरणप्रायश्चित्तस्य कर्त्तव्यतयाप्राप्तस्यानुष्ठानाशक्तौ तत्प्रत्याम्नायत्वेन प्रतिप्राजापत्यमेकैकधेनुव्यवस्थया साशीतिशतधेनूनां दातव्यत्वेन प्राप्तानामिदानीं तासां साक्षादसम्भवे प्रतिधेनु निष्कपादव्यवस्थया षट्त्रिंशन्माढकपरिमितं काञ्चनमिति ।

ख

अथ त्रैवार्षिकप्रायश्चित्तम्

तत्र [1]शंखः—

त्रैवार्षिकं भ्रूणहत्यायामुदक्यागमने तथा ।
गोवधे च तथा कुर्यात् परस्त्रीगमने तथा ॥

---

(1) स्मृ. स. (शंख. 17–9) ।

(क) विषयोऽयं घङ्च नास्ति । (ग) विषयोऽयं घङ्च नास्ति ।

सर्वं पूर्ववत् । विशेषस्तु । एतज्जन्मप्रभृतिज्ञानाज्ञानसकृदभ्यासात्यन्ताभ्यासकृत भ्रूणहत्योदक्यागमनगोवधपरस्त्रीगमनजनितपापक्षयार्थं शंखोक्त त्रैवार्षिकप्राजापत्याचरणप्रायश्चित्तस्य कर्त्तव्यतया प्राप्तस्यानुष्ठानाशक्तौ तत्प्रतिनिधित्वेन प्रतिप्राजापत्यमेकैकधेनुव्यवस्थया नवतिधेनूनां दातव्यत्वेन प्राप्तानामिदानीं साक्षादसम्भवे प्रतिधेनु निष्कपादव्यवस्थया अष्टादशमाढपरिमितं काञ्चनमिति ।

क

अथ द्वैवार्षिकप्रायश्चित्तम्

तत्र वृहस्पतिः—

जन्मप्रभृति यत् किञ्चित् पातकं तूपपातकम् ।
तावदावर्त्तयेत् कृच्छ्रं यावत् षष्टिगुणं भवेत् ।।

सर्वं पूर्ववत् । एतज्जन्मप्रभृतिज्ञानाज्ञानसकृदभ्यासकृतपातकोपपातकक्षयार्थं षष्टिकृच्छ्राणां कर्त्तव्यतया प्राप्तानामनुष्ठानाशक्तौ तत्प्रतिनिधित्वेन प्रतिप्राजापत्यमेकैकधेनुव्यवस्थया षष्टिधेनूनां दातव्यत्वेन प्राप्तानामिदानीं साक्षादसम्भवे तन्मूल्यं प्रतिधेनु निष्कपादव्यवस्थया द्वादशमाढपरिमितं काञ्चनमिति विशेषः ।

ख

अथ वार्षिकप्रायश्चित्तम्

तत्र सुमन्तुः—

यदप्यसकृदभ्यस्तं बुद्धिपूर्वमघं महत् ।
तच्छुध्यतेऽब्दकृच्छ्रेण महतः पातकादृते ।।

एतदुपपातकाद्यावृत्तिविषयमिति [1]विज्ञानेश्वरः । बुद्धिपूर्वादसकृदभ्यासकृतमहापातकव्यतिरिक्तोपपातकादिपापक्षयार्थं सुमन्तूक्तानां कृच्छ्राणां कर्त्तव्यत्वेन प्राप्तानामनुष्ठानाशक्तौ तत्प्रतिनिधित्वेन प्रतिप्राजापत्यमेकैकधेनुव्यवस्थया त्रिंशद्धेनवो दातव्यत्वेन प्राप्तास्तासामिदानीं साक्षादसम्भवे तन्मूल्यं प्रतिधेनु निष्कपादव्यवस्थया षण्माढपरिमितं काञ्चनमिति विशेषः ।

---

(1) मिता. (पृ-490) ।

(क) विषयोऽयं घङ्च नास्ति ।
(ख) विषयोऽयं घङ्च नास्ति ।

[1]गौतमः— कृच्छ्रातिकृच्छ्रौ चान्द्रायणमिति सर्वप्रायश्चित्तमिति ।

तत्र भिन्नविभक्तिनिर्देशाद् वाक्यभेदः । तेनायमर्थः—कृच्छ्रातिकृच्छ्रौ सर्वपापप्रायश्चित्तं चान्द्रायणं सर्वपापप्रायश्चित्तम्, इति शब्दसमुचितानि कृच्छ्रातिकृच्छ्रचान्द्रायणानि सर्वपापप्रायश्चित्तम् । अयमर्थश्च स्मृत्यन्तरे सुव्यक्त एव । तथा च [2]याज्ञवल्क्यः—

अनादिष्टेषु पापेषु शुद्धिश्चान्द्रायणेन तु ।

आदिश्यत इति आदिष्टं प्रायश्चित्तम् । तन्न विद्यते येषु पापेषु तेषु पापेषु चान्द्रायणेन शुद्धिरित्यर्थः । षट्त्रिंशन्मते [3]चोक्तम्—

यानि कानि च पापानि [4]गुरु गुरुतराणि च ।
कृच्छ्रातिकृच्छ्रचान्द्रैश्च शोध्यन्ते मनुरब्रवीत् ।।

गुरुतराणीति । गुरुतमानीति अनभिधानान्महापातकातिपातकयोर्व्युदासः ।

दुरितानां दुरिष्टानां पापानां महतां तथा ।
कृच्छ्रं चान्द्रायणं चैव सर्वपापप्रणाशनम् ।। [5]इति उशनसोक्तम् ।

सर्वपापप्रणाशनमिति सर्वग्रहणाद् ज्ञानाज्ञानकृत पापक्षयप्रायश्चित्तमित्यर्थः सिद्धः । तन्मूलं कृच्छ्रचान्द्रायणोभयसंज्ञं प्रायश्चित्तम् । ममैतज्जन्मप्रभृति ज्ञानाज्ञानसकृदभ्यासात्यन्ताभ्यासकृतमहापातकातिपातकव्यतिरिक्तसमस्तपापक्षयार्थं कृच्छ्रातिकृच्छ्रचान्द्रायणापनोद्यपापक्षयार्थम् अमुकपापक्षयार्थं वा गौतमोक्तस्य कृच्छ्रातिकृच्छ्रचान्द्रायणात्मकप्रायश्चित्तस्य कर्त्तव्यतया प्राप्तानां कृच्छ्रातिकृच्छ्रचान्द्रायणानामनुष्ठानाशक्तौ कृच्छ्रे एका धेनुरतिकृच्छ्रे धेनुद्वयं चान्द्रायणे धेनुचतुष्टयमिति व्यवस्थया सप्तधेनूनां दातव्यत्वेन प्राप्तानामिदानीं साक्षादसम्भवे प्रतिधेनु निष्कपादव्यवस्थया चतुर्दश[6]चिह्नकपरिमितं काञ्चनमिति विशेषः ।

मध्यमाङ्गिराः— गवां सहस्रं विधिवत् पात्रेभ्यः प्रतिपादयेत् ।
ब्रह्महा विप्रमुच्येत सर्वपापेभ्य एव च ।।

अकामकृतब्रह्मवधपापक्षयार्थं गोसहस्रं रुद्रदैवतं ब्राह्मणाय ब्राह्मणेभ्यो वा दद्यात् ।

---

(1) गौ. धर्म. (3-1-20) । (2) या. स्मृ. (3–326) ।
(3) मिता. (या. स्मृ. 3–326) । (4) 'गुरोर्गुरुतराणि च' इति मिता. पाठः ।
(5) मिता. (या. स्मृ. 3–326) ।
(6) चिह्नकम् उत्कलभाषायां चिना इति, तत् तोलकस्य विंशतिभागैकभागः ।

अथ गोवधप्रायश्चित्तम्

तत्र [1]पराशरः—[2]गवां बन्धनयोक्त्रेण भवेन्मृत्युरकामतः ।
अकामतः कृतं पापं ब्राह्मणेभ्यो निवेदयेत् ॥
वेदवेदाङ्गविद्विप्रो धर्मशास्त्रबहुश्रुतः ।
अकामकृतपापस्य प्रायश्चित्तं विनिर्दिशेत् ॥
धुर्येषु वहमानेषु दण्डेनाऽपि हतेषु च ।
काष्ठेन लोष्ठकेनाऽपि पाषाणेनाऽपि ताडितः ॥
[3]मूर्च्छितः पतितो वाऽपि दण्डेनाऽभिहतः स तु ।
एवं गवाश्व धुर्याणां प्रवक्ष्यामि यथाविधि ॥
उत्थितस्तु पदान् गच्छेत् पञ्च सप्तदशापि वा ।
ग्रासं वा यदि [4]गृह्णाति तोयं पिबति वा स्वयम् ॥
[5]पूर्वव्याधिविनष्टानां प्रायश्चित्तं न विद्यते ।
विरोधने चरेत् पादं बन्धने अर्धमेव तु ॥
योजने पादहीनं स्यात् प्राजापत्यं तु घातने ।

[6]व्यासः— शीतानलहता चैव उद्बन्धनमृतापि वा ।
शून्यागाराद्युपेक्षायां प्राजापत्यं विनिर्दिशेत् ॥

बन्धनयोक्त्रेणेति निरोधनघातनयोरप्युपलक्षणम् । प्रायश्चित्तं न विद्यते इति वध-

---

(1) परा. स्मृ. (8-1/2) ।

(2) गोशब्देन वृषभादीनपि निर्दिशति ब्रह्मस्मृतिकारः—

गोशब्देन वृषभादीन् योजनीयं विधावपि ।
ब्राह्मणान्यर्च्चनं सद्भिर्विध्यन्ते सर्वदा तथा ॥
ब्रह्म.स्मृ. (पृ–34)

(3) परा. स्मृ. (9–11/12) ।

(4) "गृह्णीयात् तोयं वापि पिबेद्यदि" इति परा. स्मृ. पाठः ।

(5) "व्याध्युपसृष्टश्चे" इति परा. स्मृ. पाठः ।

(6) परा माध. (भागः-3, पृ–225) ।

प्रायश्चित्तं नास्तीत्यर्थः। ताडनादिनिमित्तन्तु प्रायश्चित्तं विद्यत एवेति लक्ष्मीधरः। घातन इति दण्डादिनेत्यर्थः।

यमः—

काष्ठलोष्ठाश्मभिश्चैव शस्त्रैर्वा निहता यदि।
प्रायश्चित्तं कथं तत्र शस्त्रे शस्त्रे विधीयते॥
काष्ठे सान्तपनं कुर्यात् प्राजापत्यं तु लोष्टके।
तप्तकृच्छ्रं तु पाषाणे शस्त्रे चैवातिकृच्छ्रकम्॥
प्रायश्चित्ते ततश्चीर्णे कुर्याद् ब्राह्मणभोजनम्।
त्रिंशद्गा वृषभं चैकं दद्यात्तेभ्यश्च दक्षिणाम्॥

इदं कामचारविषयम्। आपस्तम्बः—

[1]पाषाणैर्लगुडैर्वाऽपि शस्त्रेणान्येन वा बलात्।
निपातयन्ति ये गास्तु कृच्छ्रं कुर्याद् व्रतं हि ते॥
तथैव बाहुजंघोरुपार्श्वग्रीवादिमोटनैः॥

एतच्च पाषाणादिप्रहारसमनन्तरमविलम्वितमरणैः साक्षात् कर्तुरेव वेदितव्यम्। पराशरवचनन्तु व्यवहितव्यापारिणो निमित्तकर्तुरेवेति [2]विज्ञानेश्वरः। कृच्छ्रव्रतमपि विशेषयति बृहस्पतिः—

शस्त्रादिना तु हत्वा गां मानवः कृच्छ्रमाचरेत्।
रोधादिना चाङ्गिरसमापस्तम्वोक्तमेव वा॥
पादं चरेद्रोधवधे कृच्छ्रार्धं बन्धघातने।
अतिवाहे च पादोनं कृच्छ्रमज्ञातताडने॥
[3]गर्भिणीं कपिलां दोग्ध्रीं होमधेनुं च सुव्रताम्।
रोधादिना घातयित्वा द्विगुणं व्रतमाचरेत्॥
अतिवृद्धामतिकृशामतिबालां च रोगिणीम्।
हत्वा पूर्वविधानेन चरेदर्धव्रतं द्विजः॥
ब्राह्मणान् भोजयेच्छक्त्या दद्याद्धेमतिलांस्तथा।

---

(1) स्मृ. समु. आप. (1-18/19) प्राप्यते।

(2) मिता. (या. स्मृ. 3-264)। (3) व्यव. म. (पृ. 17)।

कामकृते रोधनादिना गोवधे चाङ्गिरसमापस्तम्बीयं प्रायश्चित्तमिति लक्ष्मीधरः ।

रोधने बन्धने वाऽपि योजने वा गवामृजा ।
उत्पन्ने मरणे वाऽपि निमित्ती तत्र लिप्यते ॥
पादमेकं चरेद्रोधे द्वौ पादौ बन्धने चरेद् ।
योजने हीनपादं स्याच्चरेत्सर्वं निपातने ॥

इदमाङ्गिरसदृष्ट त्रैमासिकगोवधव्रतस्य पादादिकं कामकृतं रोधादिजनितप्रायश्चित्तमित्यर्थः । सम्वर्तापस्तम्बौ[2]—

व्यापन्नानां बहूनां तु बन्धने रोधनेऽपि वा ।
भिषङ्मिथ्योपचारेण द्विगुणं गोव्रतं चरेद् ॥

[3]अङ्गिराः— सायं संगोपनार्थञ्च न दुष्येद्रोधबन्धयोः ॥

सम्वर्तः— निशिबन्धनरोधेषु व्याघ्रसर्पहतेषु च ।
अग्निविद्युन्निपातेषु प्रायश्चित्तं न विद्यते ॥

[4]पराशरोऽपि— ग्रामघाते शरौघेण वेश्मभङ्गनिपातने ।
अतिवृष्टिहतानाञ्च प्रायश्चित्तं न विद्यते ।
कूपे खाते च धर्मार्थे गृहदाहे च या मृता ।
ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते ॥

इदन्तु बन्धनरहितस्यैव पशोः कथञ्चित् गृहादिदाहे मृतविषयम् ।

कान्तारेषु च दुर्गेषु गृहदाहे खलेषु च ।
यदि तत्र विपत्तिः स्यात् पाद एको विधीयते ॥

इत्यापस्तम्बवचनादिति [5]विज्ञानेश्वरः । तथा चापरमपि वचनमस्यार्थस्योपपादकम् ।

तथा च पराशरः—

शीतानलहता चैव उद्बन्धनमृताऽपि वा ।
शून्यागाराद्युपेक्षायां प्राजापत्यञ्च निर्दिशेत् ॥

---

(1) उ.आङ्गि. (10-3/4) ।
(2) स्मृ. समु. (आप. 1-26/27) ।
(3) उ. आङ्गि. (10-12) ।
(4) परा. स्मृ. (9-43/44) ।
(5) मिता. (पृ-422) ।

शून्यागारादिष्वपेक्षायां शीतानलोद्वन्धनादिना मृता चेत्तत्र प्रायश्चित्तं प्राजापत्यमित्यर्थः । तथा—

अपालनात् प्रणश्येत्तु गौश्चरन्ती कथञ्चन ।
जलौघपल्वले मग्ना मेघविद्युद्धताऽपि वा ॥
श्वभ्रे वा पतिताऽकस्मात् श्वापदैर्वाऽपि भक्षिता ।
प्राजापत्यं चरेत् कृच्छ्रं गोस्वामिव्रतमुत्तमम् ॥

इदन्तु कार्यान्तरविरहेऽप्युपेक्षायां वेदितव्यम् । कार्यान्तरव्यग्रतयोपेक्षायान्तु प्राजापत्यार्धमेव । तथा च विष्णुः—

पल्वलौघमृगव्याघ्रश्वापदाहिनिपातने ।
श्वभ्रप्रपातसर्पाद्यैर्मृते कृच्छ्रार्धमाचरेत् ॥

[1]अङ्गिराः— शृङ्गभंगेऽस्थिभङ्गे वा चर्मनिर्मोचनेऽपि वा ।
दशरात्रं पिवेद् बभ्रं स्वस्था सा यदि गौर्भवेत् ॥
अन्यत्राङ्कनलक्ष्माभ्यां वाहने मोचनेऽपि वा ।

अङ्कनं—त्रिशूलादिस्थिरचिह्नकरणम् । लक्ष्म-व्याध्यादिनिवृत्त्यर्थं कर्णकर्त्तनादि । इदमशक्तविषयमापस्तम्बेन विशेषविधानादिति [2]विज्ञानेश्वरः । तथा चापस्तम्वः—

अस्थिभङ्गं गवां कृत्वा लाङ्गूलच्छेदनं तथा ।
पाटनं दन्तशृङ्गाणां मासार्धं तु यवान् पिवेत् ॥

बृहत्प्रचेताः— एकवर्षे हते वत्से कृच्छ्रपादो विधीयते ।
अबुद्धिपूर्वे पुंसः स्याद् द्विपादस्तु द्विहायने ॥
त्रिहायने त्रिपादः स्यात् प्राजापत्यमतः परम् ।

षट्त्रिंशन्मते[3]—पाद उत्पन्नमात्रे तु द्वौ पादौ दृढतां गते ।
पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनम् ॥

---

(1) उ. आङ्गि. (10–11/12) ।

(2) मिता. (पृ–423) ।

(3) यमवचनमिति स्मृ. समु. (यमः, श्लो 43–44) ।

अङ्गप्रत्यङ्गसम्पूर्णे गर्भे चेतः समन्विते ।
द्विगुणं [1]गोव्रतं कुर्याद् एषा गोघ्नस्य निष्कृतिः ॥

इति गोवधप्रायश्चित्तम् ।

अथ विप्राय दण्डोद्यमनादौ प्रायश्चित्तम्

तत्र [2]वृहस्पतिः—

काष्ठादीना ताडयित्वा त्वग्भेदे कृच्छ्रमाचरेत् ।
अस्थिभेदेऽतिकृच्छ्रं स्यात् पराकत्वङ्गकर्तने ॥
विप्रदण्डोद्यमे कृच्छ्रमतिकृच्छ्रं निपातने ।
कृच्छ्रातिकृच्छ्रेऽसृक्पाते कृच्छ्रोऽभ्यन्तरशोणिते ॥ इति ।

अथास्पृश्यस्पर्शनप्रायश्चित्तम्

[3]तत्राङ्गिराः— स्पर्शनं चैव कुर्वीत ब्राह्मणो ब्राह्मणैः सह ।
आहतुः शङ्खलिखितौ विण्मूत्रोच्चारभोजने ॥

[4]ब्रह्मपुराणे— उच्छिष्टेनाथ विप्रेण विप्रस्पृष्टस्तु तादृशः ।
उभौ स्नानं प्रकुरुत सद्य एव समाहितौ ॥

एतदकामतः स्पर्शनविषयम् । प्रमादादित्यनुवर्त्तमानात् । क्षत्रियवैश्ययोरप्येवं ज्ञेयम् ।

---

(1) गोवधे व्रतचतुष्टयं यथा मदनपारिजाते-गोवधे व्रतचतुष्टयं विहितम् । आहारान्तरनिरपेक्षेण पञ्चगव्यं पिबन् रात्रौ गोशालायां शयानः प्रातस्ता एव वनं गच्छन्तीरनुगच्छन्ननुतिष्ठन्तीरनुतिष्ठन् अन्यैरपि नियमैर्युक्तो मासमासीत । ततो मासान्ते ब्राह्मणाय गां दत्त्वा शुद्ध्यतीत्येकं व्रतम् । पञ्चगव्याहारव्यतिरेकेण पूर्वोक्त धर्मयुक्तो मासं प्राजापत्यं कृच्छ्रं चरेदिति द्वितीयम् । तथैव प्राजापत्यस्थानेऽतिकृच्छ्रं मासं चरेदिति तृतीयम् । त्रिरात्रोपवासं कृत्वा एकवृषभं दश गाश्च दद्यादिति चतुर्थम् । अत्रेयं व्यवस्थाऽज्ञानतो । मद. पारि. (पृ–817) ।

(2) मिता. (पृ–498) ।

(3) स्मु. स. (श्लो 15) ।

(4) प्राय. वि. (पृ–477) ।

तथा [1]चापस्तम्वः—

उच्छिष्टोच्छिष्टसंस्पृष्टः कदाचिदुपजायते ।
सवर्णेन तदोत्थाय उपस्पृश्य शुचिर्भवेत् ॥

सवर्णेन उच्छिष्टेन उच्छिष्टः संस्पृष्ट इति सम्बन्धः । उपस्पृश्य स्नात्वा कामतः स्पर्शे तु उच्छिष्टोच्छिष्टसंस्पृष्ट इत्यनुवृत्तौ वृहस्पतिः—

वैश्यस्तु शूद्रसंस्पर्शे कुर्यान्नक्तं घृताशनम् ।
विप्रो विप्रेण संस्पृष्टस्त्वेतदेव व्रतं चरेद् ॥

कामादुच्छिष्टस्पर्शे तु क्षत्रवैश्ययोरपि नक्तं घृताशनम् । तत्समानन्यायत्वात् ।

[2]तथा— उच्छिष्टोच्छिष्टसंस्पर्शो द्विजातीनां यदा भवेत् ।
कुर्यान्नक्तोपवासञ्च क्षत्रविट्स्पर्शने द्विजः ॥

उच्छिष्टस्य ब्राह्मणस्य उच्छिष्टयोः क्षत्रवैश्ययोः स्पर्शे नक्तमुपवासश्च यथाक्रमं प्रायश्चित्तमित्यर्थः । [3]ब्रह्मपुराणे—

उच्छिष्टेनाथ शूद्रेण विप्रः स्पृष्टस्तु तादृशः ।
उपवासेन शुद्धिः स्यात् शुना संस्पृष्ट एव वा ॥

उपवासेन पञ्चगव्यसहितेनेत्यर्थः । तथा च [4]शातातपः—

उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा द्विजः ।
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ॥

एतदकामतः स्पर्शे, कामतः स्पर्शे तु वृहस्पतिः—

उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा द्विजः ।
कृतोपवासो नक्तेन पञ्चगव्येन शुध्यति ॥

तथा— क्षत्रविट्शूद्रसंसर्गे प्रायश्चित्तमिदं चरेत् ।
नक्तं तथोपवासञ्च प्रकुर्वीतानुपूर्वशः ॥

---

(1) स्मृ. स. (9-33) ।

(2) वृहस्पतिवचनमिति प्राय. वि. (पृ-477) ।

(3) प्राय. वि. (पृ-477) ।

(4) प्राय. वि. (पृ-477), वृद्धयमः (3-44) इति स्मृ. समु. ।

ब्रह्मपुराणे— मातापित्रोरथोच्छिष्टं बालो भुञ्जन् भवेत्सुखी ।
उच्छिष्टोच्छिष्टसंस्पृष्टः प्रमादान्नैव दुष्यति ॥

बुद्धिपूर्वस्पर्शे तु स्वजातिस्पर्शशुद्धिः बोद्धव्या । इति ।

अथोच्छिष्टस्य ब्राह्मणस्याबुद्धिपूर्वब्राह्मणस्पर्शे प्रायश्चित्तम्

तत्र [1]याज्ञवल्क्यः—

गोब्राह्मण[2]नलानिजानुच्छिष्टोऽथ यदा स्पृशेत् ।
स्पृष्ट्वै तानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत ॥
गात्राणि चैव सर्वाणि नाभि पाणितलेन तु । इति ।

अथोच्छिष्टब्राह्मणस्यानुच्छिष्टशूद्रादिस्पर्शे प्रायश्चित्तम्

[3]तत्रापस्तम्बः— उच्छिष्टः स्पृशते विप्रो यदि कश्चिदकामतः ।
शुनः कुक्कुटशूद्रांश्च मद्यभाण्डं तथैव च ॥
पक्षिणा विष्ठितं यच्च यद्यमेध्यं कथञ्चन ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥
वैश्येन तु यदा स्पृष्ट उच्छिष्टेन कथञ्चन ।
स्नानं जप्यश्च त्रैकाल्यं दिनस्यान्ते घृतं पिबेत् ॥
क्षत्रियेण यदा स्पृष्ट उच्छिष्टस्तु कथञ्चन ।
स्नानं जप्यश्च त्रैकाल्यं दिनस्यान्ते विशुद्ध्यति ॥

पराशरः— उच्छिष्टा ब्राह्मणी या तु श्वानं शूद्रं स्पृशेद् यदि ।
शुद्धा भवति सा नारी यावद् दृश्येत चन्द्रमाः ॥
क्षीणपक्षेण रात्रौ च क्षीणचन्द्रो न दृश्यते ।
यां दिशमुदये सोमस्तां दिशमवलोकयेत् ॥ इति ।

अथोच्छिष्टस्य ब्राह्मणस्य चाण्डालादिस्पर्शे प्रायश्चित्तम्

[4]आपस्तम्बः— भुक्त्वोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा ।
प्रमादात् स्पर्शनं गच्छेत् तस्य कुर्याद् विरोधनम् ॥

---

(1) या. स्मृ. (3–155) ।   (3) स्मृ. समु. (5-11/14) ।

(2) 'नलान्नानि नोच्छिष्टो न पदा' इति या. स्मृ. पाठः ।

(1) स्मृ. स. (4–2/3) ।

[1]गायत्र्यष्टसहस्रञ्च [2]द्रुपदां वा शतं जपेद् ।
जपंस्त्रिरात्रमनश्नन् पञ्चगव्येन शुध्यति ॥

इदमकामतः स्पर्शे । प्रमादादित्युक्तत्वात् । तथा—

चाण्डालेन तु संस्पृष्टो विण्मूत्रे च द्विजोत्तमः ।
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ॥

इदमकामतो विण्मूत्रोच्छिष्टविषयम् । कामतः स्पर्शे तु [3]वृद्धशातातपः—

चाण्डालैः श्वपचैः स्पृष्टो विण्मूत्रे च कृते द्विजः ।
त्रिरात्रं तत्र कुर्वीत भुक्त्वोच्छिष्टं षडाचरेत् ॥
अनुच्छिष्टे तु संस्पर्शे स्नानं तत्र विधीयते ।
उच्छिष्टस्तेन संस्पृष्टः प्राजापत्यं समाचरेत् ॥

इति हारीतप्रोक्तं प्राजापत्यमपि कामत उच्छिष्टे भुक्त्वोच्छिष्टविषयम् ।

[4]तथा— येन केनचिदभ्यङ्गं चण्डालं स्पृशते यदि ।
अहोरात्रोषितः स्नात्वा पञ्चगव्येन शुद्ध्यति ॥

छागलेयः— चाण्डालं पतितं स्पृष्ट्वा सचेलोदकमाविशेत् ।
एवं तत् स्पृष्टिनं चैव चैत्यसूतिं रजस्वलाम् ॥

[5]वृद्धशातातपः—चाण्डालं पतितं व्यङ्गमुन्मत्तं शवमन्त्यजम् ।
सूतिकां सूयिकां नारीं रजसा च परिप्लुताम् ॥
श्वकुक्कुटवराहांश्च ग्राम्यान् संस्पृश्य मानवः ।
सचेलं सशिरः स्नात्वा तदानीमेव शुध्यति ॥
अशुद्धः स्वयमप्येतान् शुद्धश्च संस्पृशेद् यदि ।
विशुध्यत्युपवासेन त्रिरात्रेऽन्तरः शुचिः ॥

---

(1) शु. यजु. (3–35) । (2) शु. यजु. (20–20) ।

(3) स्मृ. समु. (श्लो–17), प्राय. वि. (पृ–471) ।

(4) आप स्मृ. (4–11/12) इति स्मृ. समु. ।

(5) प्राय. वि. (पृ–468), स्मृ. समु. (श्लो 22–24) ।

सूयिकां या प्रसवं कारयति । त्रिरात्रेणान्तरः शुचिरिति निमित्तगौरवशङ्कायामिदमन्तिमं न हि ततोऽधिकमस्तीति लक्ष्मीधरः । अथवोच्छिष्टविषयमिदम् । तेन पतितादिस्पर्शे तु "भुक्त्वोच्छिष्टः षडाचरेदि"ति वृद्धशातातपवचनस्यादरणीयमिति तात्पर्यः । अभ्यासे [1]आपस्तम्बः—

उच्छिष्टस्तु यदा विप्रः स्पृशेन्मद्यं रजस्वलाम् ।
मद्यं स्पृष्ट्वा चरेत् कृच्छ्रं कृच्छ्रार्धन्तु रजस्वलाम् ॥
उदक्यां सूतिकां विप्रः उच्छिष्टः स्पृशते यदि ।
कृच्छ्रार्धं तु चरेद्विप्रः प्रायश्चित्तं विशोधनम् ॥

देवलः— श्वपाकं पतितं व्यङ्गमुन्मत्तं शवहारकम् ।
सूतिकां सूयिकां नारीं रजसा च परिप्लुताम् ॥
श्वकुक्कुटवराहांश्च ग्राम्यान् संस्पृश्य मानवः ।
सचेलं सशिरः स्नात्वा तदानीमेव शुध्यति ॥
अशुद्धान् स्वयमप्येतान् शुद्धश्च यदि वा स्पृशेत् ।
विशुध्यत्युपवासेन पुनः कृच्छ्रेण वा पुनः ।

इदं कृच्छ्राभिधानमत्यन्ताभ्यासविषयम् । पुनः पुनरिति द्विरभिधानात् ।

हारीतः— ऊर्ध्वोच्छिष्टस्तु संस्पृश्य द्विजः सान्तपनं चरेत् ।
[2]अधोच्छिष्टो यदा तु स्यात् प्रायश्चित्तं भवेदिदम् ॥
त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुध्यति ॥

[3]अङ्गिराः— कृते मूत्रे पुरीषे वा भुक्त्वोच्छिष्टेऽथवा द्विजः ।
श्वादीन् स्पृष्ट्वा जपेत् स्नात्वा गायत्र्यास्त्वयुतद्वयम् ॥

इदं कामकृताभ्यासविषयम् । [4]वृद्धशातातपः—

येन केनचिदुच्छिष्टस्त्वमेध्यं स्पृशते यदि ।
अहोरात्रोषितः स्नात्वा पञ्चगव्येन शुध्यति ॥

---

(1) स्मृ. समु. (7-17/18) ।
(2) अधोच्छिष्ट—मूत्रोत्सर्गेणाशुद्धम् इति आ. द. (पृ–16) ।
(3) स्मृ. समु. (श्लो–10) । (4) आपस्तम्ब इति स्मृ. समु. (4-11/12) ।

एतेन कदलीफलादीना चोच्छिष्टत्रिरात्रेण ततः शुद्धिरिति नास्तीति सूचितम् ।

आपस्तम्बः— चर्मकारश्च रजकं धीवरं नटमेव च ।
एतान् स्पृष्ट्वा द्विजो मोहादाचामेत् प्रयतोऽपि सन् ॥
एतैः स्पृष्टस्तु उच्छिष्टः एकरात्रं पयः पिबेत् ।
तैरुच्छिष्टं त्रिरात्रं स्याद् घृतं प्राश्य विशुध्यति ॥

तथा— सर्वेषामन्त्यजातीनां स्पर्शे चाचमनं विदुः ।
येषां च ब्राह्मणो नास्ति तेषां स्नानं विधीयते ॥

अन्त्यजातीयानामेवोक्ता । [1]यथा—

रजकश्चर्मकारश्च नटो बरुड एव च ।
कैवर्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः ॥

[2]**अङ्गिराः**— शवोदक्यादिभिः स्पृष्टो यदा स्यादातुरो नरः ।
अनातुरः सप्तवारं स्पृष्ट्वा स्नानं समाचरेत् ॥

[3]**हारीतः**— श्वविष्ठां काकविष्ठां वा कङ्कगृध्रनरस्य च ।
अधोच्छिष्टस्तु संस्पृष्टः सचेलो जलमाविशेत् ॥
ऊर्ध्वोच्छिष्टस्तु संस्पृशेद् प्रायश्चित्तं विनिर्दिशेत् ।
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ॥

[4]**आपस्तम्बः**— यद्वेष्टितं काकबलाकयोर्वा, अमेध्यलिप्तन्तु भवेच्छरीरम् ।
श्रोत्रे मुखे न प्रविशेच्च सम्यक्, स्नानेन लेपोपहतस्य शुद्धिः ॥
ऊर्ध्वं नाभे करौ मुक्त्वा यदङ्गमुपहन्यते ।
ऊर्ध्वं स्नानमधः शौचं तन्मात्रेणैव शुध्यति ॥

काकबलाकयोरिति । विष्ठा विष्ठाभिरिति शेषः । तथा च यमः—

---

(1) यम. (श्लो 33) वचनमिति स्मृ. समु. ।

(2) स्मृ. समु. अङ्गि. (श्लो–21) ।

(3) लघु. हा. (श्लो 2–3) इति स्मृ. समु. ।

(4) स्मृ. समु. आप. (9–10/11) ।

यद्वेष्टृतं काकवलाकविष्ठाभिरमेध्यलिप्तश्च भवेच्छरीरम् ।
श्रोत्रे मुखे च प्रविशेच्च सम्यक्, स्नानेन लेपोपहतस्य शुद्धिः ॥

उपानहावमेध्यं वा यस्य संविशते मुखम् ।
मृत्तिकाशोधनं स्नानं पञ्चगव्येन शुध्यति ॥
जान्वधः स्नानमात्रं स्यान्नाभेरेकं तु रात्रकम् ।
नाभेरूर्ध्वं त्रिरात्रं स्यान्मदिरास्पर्शने विधिः ॥

मद्यं स्पृष्ट्वा चरेत् कृच्छ्रमित्यापस्तम्बवचनं त्वभ्यासविषयम् ।

संस्पर्शं तु यदा गच्छेच्छवोदक्यान्त्यजैः सह ।
[1]एतैरेव यदा स्पृष्टः प्रायश्चित्तं कथं भवेत् ॥
भोजने तु त्रिरात्रं स्यात्पानेऽपि त्र्यहमेव च ।
मैथुने पादकृच्छ्रं स्यात् तथा मूत्रपुरीषयोः ॥
दिनमेकं तथा मूत्रे पुरीषे तु दिनत्रयम् ।
एकाहस्तत्रनिर्दिष्टो दन्तधावनभक्षणे ॥

अज्ञानाच्चाण्डालादिकं स्पृष्ट्वा तैरेव वा स्पृष्टो भोजनादिकं यः करोति तद्विषयमिति देवलः । एतदकामतो ज्ञेयम् । कामकृते तु [2]स एवाह—

चाण्डालेन यदा स्पृष्टो द्विजो वर्णः कथञ्चन ।
अनभ्युक्ष्य पिबेत्तोयं प्रायश्चित्तं कथं भवेत् ॥
ब्राह्मणस्तु त्रिरात्रेण पञ्चगव्येन शुध्यति ।
क्षत्रियस्तु द्विरात्रेण पञ्चगव्येन शुध्यति ॥
चतुर्थस्य च वर्णस्य प्रायश्चित्तं कथं भवेत् ।
व्रतं नास्ति तपो नास्ति होमो नैव च विद्यते ॥
पञ्चगव्यन्तु दातव्यं तस्य मन्त्रविवर्जितम् ।
स्थापयित्वा द्विजानान्तु शूद्रो दानेन शुध्यति ॥

अनभ्युक्ष्य—अस्नात्वा, पिबेदिति भोजनस्याप्युपलक्षणम् । अकामकृते तु क्षत्रियादीनामेतदेव पञ्चगव्यरहितं बोद्धव्यम् ।

---

(1) आप. स्मृ. वचनमिति स्मृ. समु. (4-6/9) पाठः ।
(2) आप. स्मृ. (5-1/5) ।

दक्षः— पाने मैथुनसंसर्गे तथा मूत्रपुरीषयोः ।
संस्पर्शं यदि गच्छेत्तु शवोदक्यान्त्यजैः सह ।
दिनमेकं चरेन्मूत्रे पुरीषे तु दिनद्वयम् ।
दिनत्रयं मैथुने स्यात्पाने तु स्याच्चतुष्टयम् ॥

पानमिति भोजनस्याप्युपलक्षणम् । [1]वृद्धशातातपः—

उदक्या सूतिका वाऽपि अन्त्यजा स्पृशते यदि ।
त्रिरात्रेणैव शुध्येत इति शातातपोऽब्रवीत् ॥ इति ।

अथ पारम्परिकस्पर्शे प्रायश्चित्तम्

[2]एकशाखां समारूढश्चाण्डालो वा रजस्वला ।
ब्राह्मणश्च समं तत्र सवासाः स्नानमाचरेत् ॥

पराशरः— बहूनामेकलग्नानां यद्येको दोषवान् भवेत् ।
तस्य जातस्य तच्छौचं नेतरेषां कथञ्चन ॥

[3]**शातातपः—** अशुचिं स्पृशते यस्तु एक एव स दुष्यति ।
तं स्पृष्ट्वाऽन्यो न दुष्येत सर्ववर्णेष्वयं विधिः ॥

कूर्मपुराणे— चाण्डालसूतकशवांस्तथा नारीं रजस्वलाम् ।
स्पृष्ट्वा स्नायाद्विशुद्ध्यर्थं तत्स्पृष्टं पतितं तथा ॥
चाण्डालसूतकशवैः संस्पृष्टः स्पृशते यदि ।
प्रमादात्तत्र चाचम्य जपं कुर्यात् समाहितः ॥
उच्छिष्टस्पर्शनं स्पृष्ट्वा बुद्धिपूर्वं द्विजोत्तमः ।
आचामेत्तु विशुद्ध्यर्थं प्राह देवः पितामहः ॥

ब्रह्मपुराणे— विप्रश्चाण्डालसहितो यत्रैकत्र वनस्पतौ ।
अज्ञानात् तत्फलं भुङ्क्ते जपेत्तत्राघमर्षणम् ॥

---

(1) स्मृ. समु. वृद्ध. शातातप (श्लो–18) ।
(2) आप. स्मृ. (9–14) वचनमिति स्मृ समु. ।
(3) स्मृ. स. शाता. (श्लो–15) ।

नाचारविषयमाहापस्तम्बः[1]—

वृक्षारूढस्तु चाण्डालो द्विजस्तत्रैव तिष्ठति ।
फलादि भक्षयेद् यस्तु कथं शुद्धि विनिर्दिशेत् ॥
ब्राह्मणान् समनुज्ञाप्य सवासाः स्नानमाचरेद् ।
एकरात्रोपितो भूत्वा पञ्चगव्येन शुध्यति ॥ इति ।

अथ रजस्वलायाः रजस्वलान्तरस्पर्शे प्रायश्चित्तम्

तत्र वृद्धवसिष्ठः—स्पृष्टे रजस्वलेऽन्योन्यं सगोत्रे त्वेकभर्तृके ।
कामतोऽकामतो वाऽपि सद्यः स्नानेन शुध्यति ॥

अन्योन्यमिति । स्वयं स्पृशतु तां चान्या स्पृशतु परस्परस्पर्शो वा ।

[2]यमः— स्पृष्ट्वा रजस्वलाऽन्योन्यं सगोत्रा चान्यभर्तृका ।
कामतोऽकामतो वाऽपि त्रिरात्राच्छुद्धिरिष्यते ॥

मार्कण्डेयः— उदक्या तु सवर्णा या स्पृष्टा चेत्स्यादुदक्यया ।
तस्मिन्नेवाहनि स्नात्वा शुद्धिमाप्नोत्यसंशयः ॥

इदमकामतः स्पर्शे । [3]काश्यपः—

रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि ।
एकरात्रं निराहारा पञ्चगव्येन शुध्यति ॥
रजस्वला तु संस्पृष्टा राजन्या ब्राह्मणी च या ।
त्रिरात्रेण विशुद्धिः स्याद् व्याघ्रस्य वचनं यथा ॥
रजस्वला तु संस्पृष्टा वैश्यया ब्राह्मणी च या । ।
पञ्चरात्रं निराहारा पञ्चगव्येन शुध्यति ॥
रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी च या ।
षड्रात्रेण विशुद्धिः स्याद् ब्राह्मण्याः कामचारतः ॥
अज्ञानतश्चरेदर्घं ब्राह्मणी सर्वदर्शने ।

ब्राह्मण्याः रजस्वलायाः रजस्वलान्तस्पर्शे दोषाभावाच्छूद्रादिरजस्वलां यदि ब्राह्मणी

---

(1) स्मृ. स. (आप. 4–10/12) । (2) स्मृ. स. (यम. 3-65) ।
(3) प्राय. वि. (पृ–486) ।

रजस्वला स्पृशति तत्र ब्राह्मण्याः प्रायश्चित्तमाह [1]आपस्तम्बः—

उदक्या ब्राह्मणी शूद्रामुदक्यां स्पृशते यदि ।
अहोरात्रोषिता भूत्वा पञ्चगव्येन शुध्यति ।।
एवं चेत् क्षत्रियां वैश्यां ब्राह्मणी चेद्रजस्वला ।
सचैलं प्लवनं कृत्वा दिनस्यान्ते घृतं पिवेत् ।।

एवमित्युदक्यामित्यर्थः । एतदकामतः स्पर्शे । कामतः स्पर्शे तु [2]वृहद्विष्णुः—

रजस्वला हीनवर्णां स्पृष्ट्वा न तावदश्नीयात्, यावन्न शुद्धा स्यात् । क्षत्रियावैश्ययोः रजस्वलयोः सवर्णासवर्णरजस्वलास्पर्शे प्रायश्चित्तम् । [3]वृद्धशातातपः—

रजस्वले तु ये नार्यावन्योन्यं स्पृशते यदि ।
सवर्णे पञ्चगव्यन्तु ब्रह्मकूर्च्चमतः परम् ।।

पञ्चगव्यमुपवासपूर्वकमेव । "एकरात्रं निराहारा पञ्चगव्येन शुध्यति" इति काश्यपवचने सवर्णविषये तथा दर्शनात् । अतः परमित्यव्यवहितसूचना । क्षत्रिया वैश्यास्पर्शे एव ब्रह्मकूर्च्चं न तु शूद्रास्पर्शे । शूद्रास्पर्शे तर्हि किं स्यादित्याकाङ्क्षायामाहाऽऽङ्गिराः— रजस्वले यदा नार्यावन्योऽन्यं स्पृशतः क्वचित् ।
सवर्णे पञ्चगव्यन्तु त्रिरात्रमसवर्णके ।।

इदं सोपवासपञ्चगव्यविधानं कामतः स्पर्शे । अकामतः स्पर्शे तु—

'उदक्या तु सवर्णा या' इत्यादि मार्कण्डेयवचनं दातव्यम् । एकभर्तृकायाः सगोत्रायाश्च क्षत्रियादेः स्पर्शे "स्पृष्टे रजस्वलेऽन्योन्यम्" इति वृद्धवसिष्ठवचनं मन्तव्यम् । भिन्नभर्तृकायाः स्पर्शे 'स्पृष्ट्वा रजस्वलाऽन्योन्यमिति" [4]यमवचनं ज्ञेयम् । एतत्सर्वं शूद्रायाः शूद्रास्पर्शेऽपि वेदितव्यम् । सामान्याभिधानात् । उत्तमाऽसवर्णास्पर्शे तु वृहद्विष्णुः— अधिकवर्णां रजस्वलां स्पृष्ट्वा स्नात्वाऽश्नीयात् ।

परस्परस्पर्शे तु वृहद्वसिष्ठः—

[5]स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी शूद्रजाऽपि वा ।

---

(1) स्मृ. स. (आप. 7–20/21) । (2) विष्णु. स्मृ. (22–73) ।
(3) स्मृ. स. वृ. शाता. (श्लो–20) । (4) स्मृ. स. (यम. 3–65) ।
(5) परा. स्मृ. (7–16) इति धर्म. सं. (पृ–379) ।

कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानेन शुध्यति ॥
स्पृष्ट्वा रजस्वलाऽन्योन्यं वैश्याशूद्रे तथैव च ।
त्रिरात्राच्छुध्यते पूर्वा उत्तरा तु दिनद्वयात् ॥
सवर्णां कामतः स्पर्शे शुद्धिरेषा सनातनी ।

दानेनेति कृच्छ्रपादप्रतिनिधिसंकल्पितमूल्यदानेनेत्यर्थः ।

मार्कण्ड़ेयः— द्विजान् कथञ्चिदुच्छिष्टान् रजसा स्त्री स्पृशेद् यदि ।
गात्रोच्छिष्टो त्वहोरात्रं मूत्रोच्छिष्टे त्र्यहं क्षिपेत् ॥

द्विजान्—ब्राह्मणक्षत्रियवैश्यान् । इदं मूत्रावोच्छिष्टे वुद्धिपूर्वविषयम् । अवुद्धिपूर्वे

[1]**त्वापस्तम्बः—** उच्छिष्टेन तु संस्पृष्टा कदाचित् स्त्री रजस्वला ।
[2]कृच्छ्रपादेन शुध्येत शूद्रा स्नानेन शुध्यति ॥

वृद्धवसिष्ठः— [3]शूद्रस्योच्छिष्टया स्पृष्टा शूद्रा तु द्व्यहमाचरेत् ।
अहोरात्रं तृतीयेऽह्नि परतो नक्तमाचरेत् ॥

द्व्यहमिति द्वितीयदिनस्पर्शविषयमेतत् । प्रथमदिने त्रिरात्रमर्थात् परत इति । चतुर्थदिने शुद्धिस्नानात् पूर्वमित्यर्थः । द्विजानिति शूद्रयेति च लिङ्गमत्राविवक्षितम् ।

वौधायनः— [4]रजस्वला तु संस्पृष्टा चाण्डालान्त्यश्ववायसैः ।
तावत्तिष्ठेन्निराहारा यावत् काले न शुध्यति ॥

[5]**यमः—** रजस्वला तु संस्पृष्टा श्वानजम्वुकवायसैः ।
निराहारा भवेत्तावद् यावत् काले न शुध्यति ॥

[6]**आपस्तम्बः—** रजस्वलायाः संस्पर्शः कथञ्चिज्जायते शुना ।
रजो दिनानि यावन्ति तान्युपोष्य विशुध्यति ॥
अशक्ता चोपवासे च स्नानं पश्चात् समाचरेत् ।
तत्राप्यशक्तादेकेन पञ्चगव्येन शुध्यति ॥

---

(1) स्मृ. स. (आप. 7–11), मिता. (पृ–481) ।

(2) "कृच्छ्रेण शुध्यते विप्रा" इति स्मृ. स. पाठः ।

(3) मिता. (पृ–481) ।

(4) मिता. (पृ–481) ।

(5) स्मृ. स. (यम. श्लो 11) ।

(6) स्मृ. स. (आप. 7–16/17) ।

उपवासाचरणे स्नानाचरणे च पञ्चगव्यं ज्ञेयम् । तृतीयवाक्ये एकेनेति विशेषणवचनात् । पश्चादिति—भोजनस्येति शेषः । भोजनं तु निराहारादिनैव ।

तथा [1]चाङ्गिराः—

चाण्डालः पतितो वाऽपि यद्यात्रेयीं स्त्रियं स्पृशेद् ।
अफालकृष्टैर्वर्त्तेत पञ्चगव्येन शुध्यति ॥

[2]वौधायनः— रजस्वला तु सस्पृष्टा ग्रामकुक्कुटवायसैः ।
श्वभिः स्नात्वा क्षिपेत्तावद् यावचन्द्रस्य दर्शनम् ॥

इदं श्ववायसस्पर्शे चन्द्रदर्शनावधि शुद्धिविधानं चतुर्थदिनस्पर्शविषयम् । तत्रैव आपस्तम्बेन चन्द्रदर्शनविधानात् ।

[3]तथा— रजस्वलान्त्यजैः स्पृष्टा शुना वा श्वपचेन वा ।
त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुध्यति ॥
प्रथमेऽह्नि षड्रात्रं द्वितीये तु त्र्यहस्तथा ।
तृतीये चोपवासः स्याचतुर्थे चन्द्रदर्शनात् ॥

कामतः श्वकाकस्पर्शे [4]हारीतः—

रजस्वला तु या नारी श्वानं काकमथ स्पृशेत् ।
प्रायश्चित्तं कथं तस्या येन शुद्धिमवाप्नुयात् ॥
अतिक्रान्ते त्रिरात्रे तु स्नानं कृत्वाऽऽर्द्रवाससा ।
त्रिरात्रं तु क्षिपेदूर्ध्वमेकाहं चाप्यधः क्षिपेत् ॥

ऊर्ध्वं प्रथमेऽह्नि । अधस्तृतीयेऽह्नि । वसिष्ठबृहस्पती—

[5]पतितान्त्यश्वपाकेन संस्पृष्टा चेद्रजस्वला ।
तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत् ॥
प्रथमेऽह्नि त्रिरात्रन्तु द्वितीये द्व्यहमेव च ।
अहोरात्रं तृतीयेऽह्नि चतुर्थे नक्तमाचरेत् ॥

---

(1) स्मृ. स. (अङ्गिरा. श्लो 46) (2) लघुहा. (श्लो 17) इति स्मृ. स. ।

(3) स्मृ. स. (आप. 7-7/8) । (4) स्मृ. स. (लघुहा. श्लो 4-5) ।

(5 मिता. (पृ-481) ।

[1]लघुहारीतः— रजस्वला तु संस्पृष्टा ग्रामकुक्कुटसूकरैः ।
स्नानं कृत्वा क्षिपेत्तावद् यावच्चन्द्रस्य दर्शनम् ।।

यमः— [2]रजस्वला तु भुञ्जानामन्त्यजातीन् स्पृशेद् यदि ।
गोमूत्रयावकाहारा षड्रात्रेण विशुध्यति ।।
अशक्ता काञ्चनं दद्याद्विप्रेभ्यो वाऽपि भोजनम् ।
भुञ्जानेन तु विप्रेण स्पृष्टा चैव रजस्वला ।।
प्राजापत्येन शुध्येत प्राणायामशतेन च ।।

[3]अङ्गिराः— उच्छिष्टोच्छिष्टसंस्पृष्टा कदाचित् स्त्री रजस्वला ।
पूर्वाः कृच्छ्रं प्रकुर्वीरन् शूद्रा दानेन शुध्यति ।।

उच्छिष्टा रजस्वला यद्युच्छिष्टसंस्पृष्टा तदा पूर्वा ब्राह्मणी क्षत्रिया वैश्या च कृच्छ्रं कुर्यादित्यर्थः ।

यमः— रात्रौ दर्शनसम्प्राप्तौ नारी ऋतुमती भवेत् ।
चतुर्थेऽहनि वस्त्रादीन् सर्वांस्त्यक्त्वा च या शुचिः ।।

शङ्खः— शुद्धा भर्त्तुश्चतुर्थेऽह्नि स्नाता नारी रजस्वला ।
दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुध्यति ।।
इति रजस्वलायाः स्पर्शप्रायश्चित्तम् ।।

अथ स्पर्शप्रायश्चित्तम्

तत्र [4]वृद्धशातातपः—
श्वकुक्कुटवराहांश्च ग्राम्यान् संस्पृश्य मानवः ।
सचेलं सशिरः स्नात्वा तदानीमेव शुध्यति ।।

अङ्गिराः— ऊर्ध्वं नाभेः करौ मुक्त्वा यदङ्गमुपहन्यते ।
तत्र स्नानमधस्ताच्च शुद्धिः प्रक्षालनेन तु ।। इति ।

---

(1) स्मृ. स. (लघुहा. श्लो. 17) ।

(2) मिता. (पृ–481) । मन्त्यजादीन्, अशक्तौ इति मिताक्षरापाठः ।

(3) स्मृ. स. (अङ्गि. श्लो 49) । (4) स्मृ. स. (वृ. शाता. श्लो 13) ।

अथ श्वकाकमुखस्पृष्टतन्नखलिखितयोः प्रायश्चित्तम्

तत्र पराशरः— काकश्वानोपलीढं यन्नखैर्विलिखितं च यत् ।
अद्भिः प्रक्षालनञ्चैव अग्निनाऽपि प्रतापयेत् ॥ इति ।

अथ श्वदष्टप्रायश्चित्तम्

तत्र ब्रह्मचर्याधिकारे पैठीनसिः—

शुना दष्टस्य त्रिरात्रमुपवासो विप्रगृहे वासश्च ।

उपवासासमर्थं प्रति ब्रह्मचर्याधिकारे हारीतः—

शुना दष्टस्त्र्यहमेकाहारः । समुद्रगां नदीं गत्वा प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति ॥ इति ।

अथ गृहस्थस्य

देवलः— श्वदष्टः सागरगायां नद्यां स्नात्वा निराहारः प्राणायामशतं वर्त्तयन् त्रिरात्रादविहतपाप्मा भवति ।

बौधायनः— शुना दष्टश्च यो विप्रो नदीं गत्वा समुद्रगाम् ।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति ॥

[1]विष्णुः— श्वशृगालविड्वराहखरवानरवायसपुंश्चलीभिर्दष्टः स्रवन्तीमासाद्य षोडश प्राणायामान् कुर्यात् ।

[2]पराशरः— ब्राह्मणस्तु शुना दष्टो जम्बुकेन वृकेण वा ।
उदितं ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत् ॥

एतद् वाक्यचतुष्टयमुत्तमाङ्गबाहुमध्यनाभ्यधोदेशे दष्टस्य यथाक्रमं व्यवस्थापनीयम् ।

पुंश्चलीवायसखरैर्दष्टः श्वोष्ट्रादिवानरैः ।
प्राणायामं जले कृत्वा घृतं प्राश्य विशुध्यति ॥

[3]इति याज्ञवल्क्यवचनं तु बौधायनवचनेन समानार्थतया समर्थनीयं प्रसक्तविषयतया वा । समुद्रगा या नदी । नदीमात्रस्य वाऽलाभे वैदिककर्मानुष्ठानप्राप्तौ च शुना दष्ट इत्यनु-

---

(1) विष्णु. स्मृ. (54–12) ।
(2) प्राय. वि. (पृ–448) ।
(3) मुद्रित याज्ञवल्क्यस्मृतौ तु वायसवानरपदयोर्व्यत्यासः । याज्ञ. (3–277) ।

वृत्तौ बौधायनः—सुवर्णरजताभ्यां वा गवां [1]शृङ्गोदकेन वा ।
नवैश्च कलशैः स्नात्वा सद्य एव शुचिर्भवेत् ॥

सुवर्णरजताभ्यामिति सुवर्णरजतविशिष्टेनोदकेन । कलशैरिति चतुर्भिरित्यर्थः । [2]पैठीनसिः– ब्राह्मणस्तु शुना दष्टो गायत्र्यष्टसहस्राभिमन्त्रितं कृत्वा दष्टस्थानमुल्मुकेन दहेत् । चतुर्भिर्वा कलशैः स्नातः शुध्यति । नदीसङ्गमे वा ।

अभिमन्त्रितं कृत्वेति दंशस्थानमिति शेषः । ब्राह्मणग्रामगतस्य विशेषमाह पराशरः—

अब्राह्मणे यदा ग्रामे शुना दष्टस्तु ब्राह्मणः ।
वृषं प्रदक्षिणं कृत्वा सद्यः स्नानेन शुध्यति ॥

स्नातकस्य

बौधायनः— वेदविद्याव्रतस्नातः शुना दष्टस्तु ब्राह्मणः ।
शतपर्यायमावर्त्य गायत्रीं शुद्धिमाप्नुयात् ॥

गायत्रीजपस्तु स्नानपूर्वक एव ।

वृकैः श्वभिः शृगालैश्च यदि दष्टस्तु ब्राह्मणः ।
स्नात्वा जपेत गायत्रीं पवित्रां वेदमातरम् ॥

इति पराशरवचनानुसारात् ।

शातातपः— वेदविद्याव्रतस्नातः शुना दष्टस्तु यो द्विजः ।
हिरण्योदकसम्मिश्रं घृतं प्राश्य विशुध्यति ॥

ऊर्ध्वाधोऽङ्गयोर्दष्टस्येष्टं वाक्यद्वयं यथाक्रमं बोद्धव्यम् । अधोऽङ्गदंशे व्रतस्य विशेषो नास्तीत्याह स एव—

---

(1) शृङ्गोदकं यथा नित्याचारपद्धतौ (पृ–131) ब्रह्मपुराणवचनम्—

युद्धे भग्नञ्च यच्छृङ्गं दक्षिणं पतितं भुवि ।
निर्मांसं प्राप्य विधिवत् पूरयित्वा जलेन च ॥
स्नानं कृतं तु मुनिभिर्देवैः सिद्धैस्तु सर्वदा ।
अलक्ष्मीनाशनं धन्यं सर्वसौभाग्यवर्धनम् ॥

(2) प्राय. वि. (पृ–448) ।

अव्रतः सव्रतो वाऽपि शुना दष्टस्तु ब्राह्मणः ।
हिरण्योदकमिश्रं तु घृतं प्राश्य विशुध्यति ।। इति ।

सव्रतस्य

[1]**वौधायनः—** व्रतस्थस्तु शुना दष्टस्त्रिरात्रमुपवासयेत् ।
सघृतं यावकं पीत्वा व्रतशेषं समापयेत् ।।

[2]अङ्गिरास्तु सव्यवस्थं प्रकारान्तरमाह—

ब्रह्मचारी शुना दष्टस्त्र्यहं सायं पयः पिबेत् ।
गृहस्थो वै त्रिरात्रन्तु एकाहं योऽग्निहोत्रवान् ।।
नाभेरूर्ध्वन्तु दष्टस्य तदेव द्विगुणं भवेत् ।
स्यादेतत् त्रिगुणं बाह्वोर्मूर्ध्नि स्यात्तु चतुर्गुणम् ।।
अव्रती सव्रती वाऽपि शुना दष्टो द्विजोत्तमः ।
अग्नीन् दृष्ट्वा हूयमानान् सद्य एव शुचिर्भवेत् ।।

द्विजोत्तमः—षडङ्गसहितः समग्रवेदाध्यायी । एवंविधस्याग्निहोत्रवतो हूयमानाग्नित्रयदर्शनमेव नत्वव्रतस्यैवाहःपयःपानं सव्रतस्योपवासत्रयमिति भावः । इति ।

ब्राह्मण्याः

वौधायनः— ब्राह्मणी तु शुना दष्टा सोमे दृष्टिं निपातयेत् ।
समुद्रदर्शनाद् वाऽपि शुना दष्टा शुचिर्भवेत् ।।

[3]**पराशरः—** कृष्णपक्षे यदा सोमो न दृश्येत कदाचन ।
यां दिशं व्रजते सोमस्तां दिशं त्ववलोकयेत् ।।

पुलस्त्यः— रजस्वला यदा दष्टा शुना जम्बुकवायसैः ।
पञ्चरात्रं निराहारा पञ्चगव्येन शुध्यति ।।
ऊर्ध्वं तु द्विगुणं नाभेर्वक्त्रे तु त्रिगुणं भवेत् ।
चतुर्गुणं स्मृतं मूर्ध्नि दष्टेऽन्यत्रापि पूर्ववत् ।।

---

(1) प्रा. वि. (पृ–448) ।
(2) उ. आङ्गि. (9/11-12, 14), प्राय. वि. (पृ–448) ।
(3) प्राय. वि. (पृ–448) ।

अन्यत्र रजस्वलायां प्रायश्चित्तविशेषप्रवृत्तायाम् ।

॥ अशक्तादेः ॥

सुमन्तुः—श्वशृगालमृगमहिषीगजाविकाकखरकरभनकुलमार्जारमूषिकप्लव[1]स्वपुरुषदष्टानां स्नानमापोहिष्ठाभिः प्राणायामत्रयश्च ।

बौधायनः— ब्राह्मणस्तु शुना दष्टः प्रायश्चित्तार्थमागतः ।
प्रणिपाताद् भवेत् पूतो विप्रैश्चक्षुर्निरीक्षितः ॥

पैठीनसिः— बालकस्याज्ञस्य वाऽशक्तस्य तत्र पिताऽस्यानुध्यायन्मनसा सर्वंकार्यं कुर्वीत । पितुरभावे सत्याचार्यः ।

॥ इति श्वदष्टप्रायश्चित्तम् ॥

अथ व्रणे कृम्युत्पत्तिप्रायश्चित्तम्

तत्र [2]भविष्यपुराणे—

ब्राह्मणस्य व्रणद्वारे पूयशोणितसम्भवे ।
कृमिरुत्पद्यते यस्य निष्कृतिः कल्प्यतेऽस्य तु ॥
गवां मूत्र पुरीषेण त्रिसन्ध्यं स्नानमाचरेत् ।
दधिक्षीरघृतं पास्य कृमिदष्टो विशुध्यति ॥
अधो नाभ्याः प्रदष्टस्य प्रमादाद् विनतात्मज ।
एतद् विनिर्दिशेत् प्राज्ञः प्रायश्चित्तं खगाधिप ॥
नाभिकण्ठान्तरे वीर यदा चोत्पद्यते कृमिः ।
षड्रात्रं तु तदा प्रोक्तं प्रायश्चित्तं मनीषिभिः ॥
यदा दंशन्ति शिरसि कृमयो विनतात्मज ।
कृच्छ्रं तदा चरेत् प्राज्ञः शुद्धये कश्यपात्मज ॥

गवां मूत्रपुरीषेणेति दधिक्षीरघृतं प्राश्येति पञ्चगव्योपलक्षणम् ।

गोमूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकम् ।
त्र्यहं स्नात्वा च पीत्वा च कृमिदष्टः शुचिर्भवेत् ॥

---

(1) स्वपुरुषः— प्रेष्य इति व्यवहारचिन्तामणौ । अयञ्च साध्यपालनामा शूद्र एवेति व्यव. प्र. (पृ-31) इति धर्मशास्त्रशब्दकोषे ।

(2) प्राय. वि. (पृ-447) ।

इति [1]शातातपवचनानुसारात् । कालविशेषानिर्देशेऽपि त्रिरात्रमित्यवगन्तव्यम् ।

गवां मूत्रपुरीषेण त्रिसन्ध्यं स्नानमाचरेत् ।
त्रिरात्रं पञ्चगव्याशी त्वघोनाभ्या विशुध्यति ॥

इति मनुवचनात् । षड्रात्रमिति । कृच्छ्रार्धमित्यर्थः । प्रायश्चित्तानन्तरं दक्षिणाऽपि दातव्या । [2]अथाहाङ्गिराः—

कृमिभिर्व्रणसम्पन्ने मक्षिकाभिश्च पातिते ।
कृच्छ्रार्धं सम्प्रकुर्वीत शक्त्या दद्याच्च दक्षिणाम् ॥
प्रायश्चित्तं तु कृत्वाऽथ भोजयित्वा द्विजोत्तमान् ।
सुवर्णमाषकं दद्यात्ततः शुद्धिर्विधीयते ॥

कृच्छ्राचरणेऽपि दक्षिणा देया । तथा च यमः—

ब्राह्मणस्य व्रणद्वारे कृमिरुत्पद्यते यदा ।
कृच्छ्रमेकं प्रकुर्वीत शक्त्या दद्याच्च दक्षिणाम् ॥

च्यवनः— कृमिदर्शने सान्तपनं, वृषभो दक्षिणा ।

एतच्चाभ्यधः कृमिदर्शनविषयम् ।

"स्नानमापोहिष्ठाभिः प्राणायामत्रयञ्च" इत्युक्त्वा

सुमन्तुः— कृमिदष्टभिषक् क्षीराचारदूषितानामप्येतदेव ।

अशक्तविषयमेतत् । यमः—

क्षत्रियस्य व्रणद्वारे कृमिरुत्पद्यते यदि ।
पादहीनं प्रकुर्वीत हेमं दद्याच्च दक्षिणाम् ॥
वैश्यस्य च व्रणद्वारे कृमिरुत्पद्यते यदि ।
अर्धकृच्छ्रं प्रकुर्वीत वस्त्रं दद्याच्च दक्षिणाम् ॥
शूद्रस्य च व्रणद्वारे कृमिरुत्पद्यते यदि ।
पादकृच्छ्रं प्रकुर्वीत गां प्रदद्याच्च दक्षिणाम् ॥

पादहीनमिति कृच्छ्रमित्यर्थः । एतच्च शिरः कृम्युत्पत्तिविषयम् ।

---

(1) बौधायन इति प्राय. वि. (पृ-447) ।

(2) स्मृ. स. (यम. श्लो 62-63) ।

तथा— अहोरात्रं प्रकुर्वीत कृमिशोधमतत्परः ।
¹गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
त्र्यहं स्नात्वा च पीत्वा च कृमिदष्टो विशुध्यति ॥

एतद् क्षत्रियवैश्ययोः शिरोव्यतिरिक्ताङ्गकृम्युत्पत्तिविषयम् । पराशरः—

परोपजीविभृत्यानां शूद्राणामनुयायिनाम् ।
कृमिरुत्पद्यते यत्र गोमूत्रं स्नानमेव च ॥

यमः— अव्रणकृमिदष्टस्य प्रायश्चित्तं कथं भवेत् ।
एकरात्रोपवासेन पञ्चगव्येन शुध्यति ॥

कृमिदर्शनमात्रे च स एव—

कृमिं पश्यति यः कश्चिद् सवासाः स्नानमाचरेद् ।

इति व्रणे कृम्युत्पत्तिप्रायश्चित्तम् ।

अथाभक्ष्यभक्षणप्रायश्चित्तम्

केशकीटनखान् प्राश्य मत्स्यखट्वाकमेव च ।
हेमतप्तं घृतं पीत्वा तत्क्षणादेव शुध्यति ॥

खट्वाकः— पक्षिविशेषः । मुखप्रवेशविषयमिदम् । अकामतः सकृत्प्राशने तु—

प्रचेताः— नखकेशमृल्लोष्टभक्षणेऽहोरात्रमभोजनेन शुद्धिः ।

सुमन्तुः— नखकेशप्राशने रुधिरञ्च सद्यः स्नानं हिरण्योदकप्राशनञ्च । अकामतोऽनभ्यास एतदिति लक्ष्मीधरः । उपवासात् परदिने कार्यमिदम् । कामकृताभ्यासविषयमाहतुः शंखलिखितौ—

केशमक्षिकारुधिरप्राशने आममांस भूमिभक्षणे रुधिरच्छर्दने
रजस्वला वध्वभिगमने त्रिरात्रोपवासं घृतप्राशनञ्च ।

देवलः— विशुद्धमपि चाहारं मक्षिकाकृमिजन्तुभिः ।
केशरोमनखैर्वाऽपि दूषितं परिवर्जयेत् ॥

प्रचेताः— अन्ने भोजनकाले तु मक्षिकाकेशदूषिते ।
अनन्तरं स्पृशेदापः तच्चान्नं भस्मना स्पृशेत् ॥

---

(1) श्लोकोऽयं प्राय. वि. (पृ–447) ।

[1]सम्वर्त्तः— केशकीटावपन्नानां नीलीलाक्षोपसूचितम्।
स्नायवस्थिचर्मसंसृष्टं भुक्त्वा तूपवसेदहः।।

[2]शातातपः— केशकीटावपन्नञ्चरुधिरमांसोपसृष्टभ्रूणघ्नावेक्षितपतत्र्यवलीढ श्वसूकरगवाघ्रातशुक्तपर्युषितवृथापक्वदेवान्नहविषां भोजने तूपवासः पञ्चगव्याशनञ्च।।

शुक्तं— द्रव्यान्तरयोगेनाम्लीकृतम्।

"दधिभक्ष्यञ्च शुक्तेषु सर्वञ्च दधिसम्भवम्" इत्यत्रापि विशेषः।

वृथापक्वं— देवपित्राद्युद्देशं विना केवलात्मार्थं पक्वम्।

[3]याज्ञवल्क्यः— मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत्।

[4]पराशरः— अस्थिकण्टकशम्बुकशंखशुक्तिकपर्दकान्।
पीत्वा नवोदकं चैव पञ्चगव्येन शुध्यति।।

पञ्चगव्येनोपवासपूर्वकेनेत्यर्थः। तथा च भगवतीपुराणे—

मत्स्यकण्टकशम्बुकं भुक्त्वा नखकपर्दकम्।
पीत्वा नवाम्बु चोपोष्य पञ्चगव्येन शुध्यति।

स्मृतिः— मत्स्यकण्टकशम्बूकशंखशुक्तिकपर्दकान्।
मुखे प्राप्ते त्वहोरात्रं पात्रे स्नानं विधीयते।।

हारीतः— कृमिकीटपिपीलिकाजलौकापतङ्गास्थिप्राशने।
गोमूत्रगोमयाहारैः त्रिरात्रं पूतो भवति।

शंखः— दूषितं केशकीटैर्वा मार्जारैर्मूषिकैस्तथा।
मक्षिकामशकैर्वाऽपि त्रिरात्रं तु व्रती भवेत्।।

[5]आपस्तम्बः— ब्राह्मणस्य यदोच्छिष्टमश्नात्यज्ञानतो द्विजः।
अहोरात्रन्तु गायत्र्या जपं कृत्वा विशुध्यति।।

हीनतरब्राह्मणोच्छिष्टभक्षणविषयकमिदमिति भवदेवः।

शंखलिखितौ— ब्राह्मणोच्छिष्टभोजने महाव्याहृतिभिरभिमन्त्र्यापः पिबेत्।

---

(1) मिता. (पृ–490।
(2) मिता. (पृ–490)।
(3) या. स्मृ. (3/175)।
(4) प्राय. मनो. (पृ–48)।
(5) स्मृ. स. (आर. 5-5/6)।

क्षत्रियोच्छिष्टभोजने ब्राह्मीरसविपक्वेन त्र्यहं क्षीरेण वर्त्तयेत् ।
वैश्योच्छिष्टभोजने त्रिरात्रोपोषितो ब्रह्मसुवर्च्चलां पिबेत् ।
शूद्रोच्छिष्टभोजने सुराभाण्डोदकपाने वा षड्रात्रमभोजनं
चान्द्रायणं वा पयः पिबेदिति ।

तस्मिन् जलपानं समन्नम् । शूद्रोच्छिष्टभोजने षड्रात्रभोमजनम् । सुराभाण्डोदकपाने वा चान्द्रायणमिति व्यवस्थाविकल्पः ।

[1]आपस्तम्बः— उच्छिष्टं वैश्यजातीनां भुङ्क्ते त्वज्ञानतो द्विजः ।
शंखपुष्पीपयः पीत्वा त्रिरात्रेणैव शुध्यति ॥

प्रायश्चित्तान्तरमाह बृहद्विष्णुः—

ब्राह्मणः शूद्रोच्छिष्टाशने सप्तरात्रं पञ्चगव्यं पिबेत् ।
वैश्योच्छिष्टाशने पञ्चरात्रं राजन्योच्छिष्टाशने त्वहोरात्रम् ।

पञ्चरात्रमित्यादावपि पञ्चगव्यं पिबेदिति सम्बन्धनीयम् । लघ्वापस्तम्बः—

अज्ञानाद् यस्तु भुञ्जीत शूद्रोच्छिष्टं द्विजोत्तमः ।
त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुध्यति ॥

भुक्तोऽन्तरितविषयमेतत् । तथा च शातातपः—

शूद्रोच्छिष्टभोजने छर्दिस्त्रिरात्रञ्च, आमश्राद्धाशने त्रिरात्रं पयसा वर्त्तेत । ब्राह्मणः शूद्रोच्छिष्टाशने आचमनं कृत्वा सप्तरात्रं, वैश्योच्छिष्टाशने पञ्चरात्रं, राजन्योच्छिष्टाशने त्रिरात्रम् । राजन्यः शूद्रोच्छिष्टाशने पञ्चरात्रं, वैश्योच्छिष्टाशने त्रिरात्रम् । वैश्यः शूद्रोच्छिष्टाशी च सप्तरात्रम् । इत्यादौ पयसा वर्त्तेतेति सम्बन्धनीयम् । ज्ञानपूर्वकभोजने विषयमाह शंखः—

शूद्रोच्छिष्टाशने मासं पक्षमेकं तथा विशः ।
क्षत्रियस्य तु सप्ताहं ब्राह्मणस्य तदा दिनम् ॥

मासमिति महापातकप्रायश्चित्तप्रोक्तं व्रतं कुर्यादित्यर्थः । तस्यैव पूर्वमुक्तत्वात् ।

तद् यथा— नित्यं त्रिषवणस्नायी कृत्वा पर्णकुटीं वने ।
अधःशायी जटाधारी पर्णमूलफलाशनः ॥

---

(1) स्मृ. स. आप. (5-6/7) ।

ग्रामं प्रविशेद् भिक्षार्थी स्वकर्म परिकीर्तयन् ।
एककालं समश्नीयाद् वर्षे तु द्वादशे गते ॥
रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः ।
व्रतेनैतेन शुध्यन्ति महापातकिनस्त्विमे ।

इति शङ्खेनैव प्रागुक्तम् । यमः—

भुक्त्वा सह ब्राह्मणेन प्राजापत्येन शुध्यति ।
मुभृता सह भुञ्जानस्तप्तकृच्छ्रेण शुध्यति ॥
शूद्रेण सह भुक्त्वान्नं चान्द्रायणमथाचरेत् ॥

इदमेकभोजनविषयम् । शूद्रेण सहेत्यभिधानात् । कामतोऽभ्यासविषयमिति [1]विज्ञानेश्वरः । एतच्च पित्रादिव्यतिरेकेण[2] ज्ञेयम् । तथा चापस्तम्बः —

पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यम् ।

यत्तु बृहद् व्यासवचनम्—

माता वा भगिनी वाऽपि भार्या चान्याश्च योषितः ।
नैताभिः सह भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत् ॥

इति तद् सहभोजनविषयम् । उच्छिष्टभोजने तु—

"शूद्रोच्छिष्टभोजने सप्तरात्रमभोजनम् । स्त्रीणाञ्च" इत्यापस्तम्बः ।
ब्राह्मण्या सह योऽश्नीयादुच्छिष्टं वा कदाचन ।
न तत्र दोषं मन्यन्ते सर्वे एव मनीषिणः ॥

इत्यङ्गिरोवचनं विवाहभोजनविषयम् । [3]मनुः—

विडालकाकाद्युच्छिष्टं जग्ध्वा श्वनकुलस्य च ॥
केशकीटावपन्नञ्च पिबेद् ब्राह्मीं सुवर्च्चलाम् ॥

अकामकृतविषयोऽयम् । कामकृते त्वापस्तम्बः—

---

(1) मिता. (पृ–458) ।

(2) वस्तुतस्तु शिष्टैः उपनयनानन्तरं पित्रा भ्रात्रा अन्येन वा सह न भुज्यते, उच्छिष्टप्राशनस्य कथापि नास्ति इति उत्कलदेशसदाचारः ।

(3) मनुः (11-159) ।

श्वकाकगवामुच्छिष्टभक्षणे तु त्र्यहं पिबेत् ।

अपरमापस्तम्बवचनन्तु कामकृताऽभ्यासविषयम् । [1]यथा—

विण्मूत्रभक्षणे विप्रस्तप्तकृच्छ्रं समाचरेत् ।
श्वकाकोच्छिष्टभोगे च प्राजापत्यविधिः स्मृतः ॥

पराशरः— मण्डूकं मशकं भुक्त्वा मूषिकमांसमेव च ।
ज्ञात्वा विप्रस्त्वहोरात्रं सद्यो वान्तेन शुध्यति ॥

आपस्तम्बः— शूद्रस्यान्नमथर्वान्नं शुष्कमांसमकामतः ।
भुक्त्वा कृच्छ्रं चरेद्विप्रो ज्ञानात् कृच्छ्रत्रयं चरेत् ॥

जाबालिः— श्वोदक्या शूद्रसंस्पृष्टं पञ्चगव्येन शुध्यति ।

खादन्नित्यनुवर्त्तते । एकाहं पञ्चगव्यपानमात्रेण वर्त्तेतेत्यर्थः । आपस्तम्बः—

विण्मूत्रभक्षणे विप्रः प्राजापत्यं समाचरेत् ।
श्वकाकगवामृच्छिष्टभक्षणे तु त्र्यहं क्षिपेत् ॥

इदमकामकृतविण्मूत्रभक्षणे । कामकृते तप्तकृच्छ्रम् । प्राजापत्याशक्तस्योक्तम् ।

[2]यथा— ॐकाराभिष्टुतं सोमसलिलं पावनं पिबेत् ।
कृत्वा तु रेतोविण्मूत्रप्राशनं तु द्विजोत्तमः ॥

अभिष्टुतं—मन्त्रितम् । सोमसलिलं—सोमलतारसम् ।

[3]**विष्णुः—** विण्मूत्रदूषितान् प्राश्य कृच्छ्रपादं समाचरेत् ॥
सन्निपातेऽर्धमेव स्यात् कृच्छ्रस्याशुचिशोधनम् ॥

अल्पसंसर्गे—कृच्छ्रपादः । बहुसंसर्गे कृच्छ्रार्धमिति व्यवस्था ।

इत्यभक्ष्यभक्षणप्रायश्चित्तम् ॥

---

(1) स्मृ. स. (आप. 5–10/11) ।
(2) या. स्मृ. (3–306) ।
(3) मिता. (पृ–490) ।

अथ प्रेतश्राद्धभोजनप्रायश्चित्तम्

तत्र [1]भरद्वाजः—भुक्तं चेत् पार्वणे श्राद्धे प्राणायामान् षडाचरेत् ।
उपवासस्त्रिमासादि वत्सरान्तं प्रकीर्त्तितः ।।
प्राणायामत्रयं वृद्धावहोरात्रं सपिण्डने ।।

[2]विष्णुः— प्राजापत्यं नवश्राद्धे पादोनमथ मासिके ।
त्रैपक्षिके तथार्धं तु पञ्चगव्यं द्विमासिके ।।

नवश्राद्धे—एकादशाहश्राद्धे । पञ्चगव्यमिति कृच्छ्रपादानन्तरमित्यर्थः ।

त्रैपक्षिके तदूर्ध्वन्तु पादौ द्वैमासिके तथा ।।

इति षट्त्रिंशन्मताभिधानात् । ऊनषण्मासोनसाम्वत्सरिकयोः षट्त्रिंशन्मतम्—

[3]पादोनं कृच्छ्रमुद्दिष्टं षण्मासे च तथाब्दिके ।
चान्द्रायणं नवश्राद्धे पराको मासिके मतः ।।
पक्षत्रयेऽतिकृच्छ्रः स्यात् षण्मासे कृच्छ्र एव च ।
आब्दिके पादकृच्छ्रः स्यादेकाहः पुनराब्दिके ।।
अत ऊर्ध्वं न दोषः स्याच्छंखस्य वचनं यथा ।।

तत्सर्पादिहतसम्बन्धिश्राद्धविषयम् । ये स्तेनपतिताः क्लीवास्तच्छ्राद्धविषयं वा । तत्रैव भारद्वाजेन गुरुप्रायश्चित्तस्याभिधानात् । [4]यथा—

चाण्डालादुदकात् सर्पाद् ब्राह्मणाद् वैद्युतादपि ।
दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मिणाम् ।।
पतनानाशकैश्चैव विषशस्त्रोदकैस्तथा ।
भुक्त्वैषां षोडशश्राद्धे कुर्यादिन्दुव्रतं द्विजः ।।

इन्दुव्रतं—चान्द्रायणम् ।

---

(1) मिता. (पृ–459) । अत्र वृद्धौ—वृद्धिश्राद्धे ।

(2) मिता. (पृ–459) ।

(3) अग्निपु. (175–35/36), मिता. (पृ–459) ।

(4) मिता. (पृ–459) ।

भरद्वाजः— [1]अपाङ्क्तेयो यमुद्दिश्य श्राद्धमेकादशेऽहनि ।
ब्राह्मणस्तत्र भुक्त्वान्नं शिशुचान्द्रायणं चरेत् ॥
आमश्राद्धे तथा भुक्त्वा तप्तकृच्छ्रेण शुध्यति ॥

इदं निन्दितश्राद्धविषयम् । अनिन्दिते तु शातातपः—

आमश्राद्धाशने त्रिरात्रं पयसा निवर्त्तेत ।

यत्तूशनसोक्तम्—दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः ।
ततः सन्ध्यामुपासीत शुध्येत तदनन्तरम् ॥ इति ।

तदनुप्रायश्चित्तविषयम् ।

इति प्रेतश्राद्धभोजनप्रायश्चित्तम् ।

अथ संस्काराङ्गश्राद्धभोजने प्रायश्चित्तम्

[2]**व्यासः—** निवृत्ते चूडहोमे तु प्राङ्नामकरणात्तथा ।
चरेत् सान्तपनं भुक्त्वा जातकर्मणि चैव हि ॥
अतोऽन्येषु च भुक्त्वान्नं संस्कारेषु द्विजोत्तमः ।
नियोगादुपवासेन शुध्यते नित्यभोजने ॥

[3]**धौम्यः—** ब्रह्मौदने सोमे च सीमन्तोन्नयने तथा ।
जातश्राद्धे नवश्राद्धे द्विजश्चान्द्रायणं चरेत् ॥

ब्रह्मौदनमत्राधानाङ्गभूतं सोमसाहचर्यात् । सोमन्तोन्नयने सीमन्तोन्नयनानन्तरमित्यर्थः ।

तथा चाभोज्यभोजनशङ्कायां [4]वसिष्ठः—

शङ्कास्थाने समुत्पन्ने अभोज्यभक्ष्यसंज्ञिते ।
आहारशुद्धिं वक्ष्यामि तां मे निगदतः शृणु ॥
अक्षारलवणां पक्वां पिबेद् ब्राह्मीं सुवर्च्चलाम् ।
त्रिरात्रं शंङ्खपुष्पीं वा ब्राह्मणः पयसा सह ॥
पलाशबिल्वपत्राणि कुशान् पद्ममुदुम्बरम् ।
पयः पिबेत् क्वाथयित्वा त्रिरात्रेणैव शुध्यति ॥

---

(1) आपाक्तेयान्यदुद्दिश्य'' इति मिता. (पृ–459) ।
(2) प्राय. वि. (पृ–312) । (3) आपस्तम्ब इति प्राय. वि. (पृ–311) ।
(4) वसि. धर्म. (27–10/12) ।

इति संस्काराङ्गश्राद्धभोजने प्रायश्चित्तम् ।।

अथ यज्ञोपवीतं विना भोजनादिकरणे प्रायश्चित्तम्

तत्र [1]स्मृतिः— विना यज्ञोपवीतेन यदोच्छिष्टो भवेद् द्विजः ।
प्रायश्चित्तमहोरात्रं गायत्र्याष्टशतं तु वा ।।

कामादूर्ध्वोच्छिष्टे उपवासः । अध उच्छिष्टश्चेत् पानीयपानमात्रे च गायत्रीजपव्यवस्था । अकामतस्तु—

पिबतो मेहतश्चैव भुञ्जतोऽनुपवीतिनः ।
प्राणायामत्रयं षट्कं नक्तञ्च त्रितयं क्रमात् ।
ब्रह्मसूत्रं विना भुङ्क्ते विण्मूत्रं कुरुते विना ।
गायत्र्यष्टसहस्रेण प्राणायामेन शुध्यति ।।

इति [2]मरीचिवचनं ब्रह्मचारिविषयम् । इति ।।

अथ नित्याकृत्याकरणप्रायश्चित्तम्

तत्र [3]मनुः— वेदोदितानां नित्यानां कर्मणां समतिक्रमे ।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ।।

श्रौतेषु दर्शपौर्णमासादिषु कर्मसु । स्मार्त्तेषु-नित्यहोमादिषु । प्रतिपादोक्तेष्च्छ्रादिप्रायश्चित्तैरुपवासस्य समुच्चय इति [4]विज्ञानेश्वरः ।

बृहस्पतिः— अनिर्वर्त्य महायज्ञान् यो भुङ्क्ते प्रत्यहं गृही ।
अनातुरः सति धने कृच्छ्रार्धेन स शुध्यति ।।

हारीतः— वहन् कमण्डलुं रिक्तमस्नातोऽश्नंश्च भोजनम् ।
अहोरात्रेण शुद्धिः स्याद् विना जप्येन चैव हि ।।

इति कृति बृहस्पतिविरचितायां कृत्यकौमुद्यां प्रायश्चित्तप्रकरणं समाप्तम् ।।

---

(1) स्मृ. स. (लघुहा. श्लो. 21) । (2) मिता. (पृ-499) ।
(3) मनु. (11/203) । (4) मिता. (पृ-499) ।
(5) मिता. (पृ-499) । (6) मिता. (पृ-499) ।

[क]

अथ दानप्रकरणम्

अथ ग्रहपूजाविधिः

तत्राग्नेयपुराणे—[1]श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ।
वृष्ट्यायुः पुष्टिकामो वा तथैवाभिचरन् पुनः ॥

मत्स्यपुराणे— प्रागुदक्प्रवणां भूमिं कारयेद् यत्नतो बुधः ।
प्रागुत्तरं समासाद्य प्रदेशं मण्डपस्य तु ॥
शोभनं कारयेत् कुण्डं हस्तमात्रं प्रशस्यते ।
चतुरस्रं समन्ताच्च योनिवक्त्रं समेखलाम् ॥
चतुरङ्गुलविस्तारा मेखला तद्वदुच्छ्रिता ।
प्रागुदक् प्रवणा कार्या गर्त्तस्य समविस्तृता ॥
गर्त्तस्योत्तरपूर्वेण वितस्तित्रयविस्तृता ।
हस्तद्वयायतां भूमिं वितस्तिद्वयसम्मिताम् ॥
संस्थापनाय देवानां चतुरस्रामुदक्प्लवाम् ।
अग्निप्रणयनं कृत्वा तस्यामावाहयेत् सुरान् ॥
तत्र स्थाप्या च देवानां विंशतिः द्वादशाधिका ।
त्रीणि प्रादेशमात्राणि ग्रहस्थानानि कारयेत् ॥
मध्ये तु भास्करं विद्यात् पूर्वदक्षिणतः शशी ।
दक्षिणे [2]भूमिपुत्रञ्च बुधं पूर्वोत्तरेण तु ॥
उत्तरेण गुरुं विद्यात् पूर्वेणैव तु [3]भार्गवम् ।
पश्चिमे च शनिं विद्याद् राहुं पश्चिमदक्षिणे ॥
पश्चिमोत्तरतः केतुं स्थापयेच्छुक्लतण्डुलैः ।

---

(1) या. स्मृ. (1-295) ।
(2) भूमिपुत्रं—मङ्गलम् ।
(2) भार्गवं—शुक्रम् ।

(क) प्रकरणोऽयं घङच प्रतिलिपिषु नास्ति ।

वर्त्तुलं भास्करं विद्यादर्धचन्द्रं [1]निशाकरम् ॥
त्रिकोणं मङ्गलं विद्याद् बुधञ्च धनुराकृतिम् ।
पद्माकृतिं गुरुं विद्याच्चतुःकोणञ्च भार्गवम् ॥
खड्गाकृतिं शनिं विद्याद् राहुं च मकराकृतिम् ।
सर्पाकृतिं तथा केतुमिति ज्ञेया ग्रहाकृतिः ॥
भास्कराङ्गारकौ[2] रक्तौ शुक्लौ शुक्रनिशाकरौ ।
[3]सोमपुत्रो गुरुश्चैव द्वावेतौ पीतकौ स्मृतौ ॥
कृष्णं शनैश्चरं विद्याद् राहुकेतू च धूम्रकौ ॥
[4]पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ।
सप्ताश्वः सप्तरज्जुश्च द्विभुजः स्यात् सदा रविः ॥
श्वेतः श्वेताम्बरधरो दशाश्वो श्वेतभूषणः ।
गदापाणिर्द्विवाहुश्च कर्त्तव्यो वरदः शशी ॥
रक्तमाल्याम्बरधरः [6]खड्गशक्तिर्गदाधरः ।
चतुर्भुजो मेषगमो वरदः स्याद् धरासुतः ॥
पीतमाल्याम्बरधरः कर्णिकारसमद्युतिः ।
खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ॥
देवदैत्यगुरू तदवत् पीतश्वेतौ चतुर्भुजौ ।
दण्डिनौ वरदौ कार्यौ साक्षसूत्रकमण्डलू ॥
इन्द्रनीलद्युतिः शूली वरदो गृध्रवाहनः ।
बाणवाणासनधरः कर्त्तव्योऽर्कसुतः सदा ॥
करालवदनः खड्गचर्मशूली वरप्रदः ।
नीलः सिंहासनस्थश्च राहुरत्र प्रशस्यते ॥

---

(1) निशाकरं—चन्द्रम् ।
(2) भास्कराङ्गारकौ—सूर्यमङ्गलौ ।
(3) सोमपुत्रः—बुधः ।
(4) "पद्मासनः……… स्युर्वरप्रदाः" इत्यन्तोभागः मात्स्ये (94–1/8) ।
(5) "रथसंस्थश्च" इति मात्स्ये ।
(6) "शक्तिशूल" इति मात्स्ये ।

धूम्राद्विबाहवः सर्वे गदिनो विकृताननाः ।
गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः ॥
अर्कशुक्रौ पूर्वमुखौ शनीन्दू दक्षिणामुखौ ।
गुरुबुधावुत्तरास्यौ शेषास्तु पश्चिमामुखाः ॥
आदित्यस्येश्वरं विद्यादुमां चैव निशाकरे ।
स्कन्दमङ्गारके विद्याद् बुधस्य विष्णुमेव च ॥
बृहस्पतेश्च ब्रह्माणं शुक्रस्य शक्रमेव च ।
शनैश्चरे यमं विद्याद् राहोः कालं तथैव च ॥
केतोश्च चित्रगुप्तञ्च [1]ग्रहाधिदेवतास्विमाः ।
अग्निरापः क्षितिर्विष्णुरिन्द्र इन्द्राण्यतः परम् ॥
प्रजापतिश्च सर्पश्च ब्रह्मा प्रत्यधिदेवताः ।
विनायकं तथा दुर्गां वायुमाकाशमेव च ॥
आवाहयेद् व्याहृतिभिस्तथैवाश्विकुमारकौ ।
आदित्याभिमुखाः सर्वे साधिप्रत्यधिदैवताः ॥
स्थापनीया मुनिश्रेष्ठः नोत्तरेण पराङ्मुखाः ॥

स्थापितासु लिखितासु वा ग्रहादिप्रतिमासु जीवाऽऽवाहनं कृत्वैव ग्रहाद्यावाहनं कार्यम् । तदुक्तं [2]विष्णुधर्मोत्तरे—

आवाहयाम्यहं देवं जीवं सर्वगतं विभुम् ॥
पञ्चधावस्थितं देहं पञ्चधावस्थितं पुनः ।
पञ्चधावस्थितं भूयः पञ्चधावस्थितं ततः ॥
वायव्येन तु भावेन पञ्चधात्रस्थितस्सदा ।
आग्नेयेन तु भावेन पञ्चधावस्थितस्तथा ॥
भूतात्मकेन तु तथा पञ्चधावस्थितं प्रभुम् ।
वारुणेन च भावेन पञ्चधावस्थितं सदा ॥

---

(1) ग्रहदेवताः शान्तिमयूखे (पृ–16)ऽपि स्कन्दपुराणानुसारं लिखिताः ।

(2) विष्णुधर्मोत्तरे—(1–93/12–17) ।

मण्डलेऽस्मिन्नदृश्यस्त्वं प्रविश्याद्य नमोऽस्तु ते ।
जीवस्यावाहनं कृत्वा यथावत् पार्थिवोत्तम ॥
वक्ष्याम्यावाहनाध्यायात्[1] सूर्यस्यावाहनं भवेत् ।

व्याहृतिमुच्चार्य यथाऽऽवाहनं कार्यम् । तदुक्तम्—

कलिङ्गदेशसम्भूत दाडिमीकुसुमप्रभ ।
काश्यपान्वयमार्त्तण्ड मण्डलेऽत्रागतो भव ॥
हिण्डीरपण्डसंकाश यमुनातीरसम्भव ।
आत्रेयगोत्रशीतांशो मण्डलेऽत्रागतो भव ॥
सुरेन्द्रगोपवर्णाभ अवन्तीदेशसम्भव ।
भारद्वाजमहीपुत्र मण्डलेऽत्रागतो भव ॥
विशुद्धकाञ्चनाभास मगधोद्भवसोमज ।
आत्रेयगोत्र सर्वज्ञ मण्डलेऽत्रागतो भव ॥
गुरो गोरचनाभास सिन्धुदेश समुद्भव ।
अङ्गिरोन्वयसम्भूत मण्डलेऽत्रागतो भव ॥
माहिष्यक्षीरवर्णाभ भृगो न्यग्रोधसम्भव ।
भार्गवान्वयदैत्येन्द्र मण्डलेऽत्रागतो भव ॥
भिन्नाञ्जनचयाभास सौराष्ट्रदेशसम्भव ।
काश्यपान्वयसञ्जात मण्डलेऽत्रागतो भव ॥
कृष्णाम्बुधरसंकाश मलयाचलसम्भव ।
पाठीनगोत्रसोमारे मण्डलेऽत्रागतो भव ॥
पलालधूमवर्णाभ कुशद्वीपसमुद्भव ।
जैमिन्यन्वयसम्भूत मण्डलेऽत्रागतो भव ॥

आग्नेयपुराणे—

रं रविं सों सोमं वुं वुधं वृं वृहस्पतिं भां भार्गवं यजेत् । दले पूर्वादिकेंऽन्याद्यौ भौं भौमं शं शनैश्चरं रां राहुं कें केतुं चैव गन्धाद्यैश्च खगोल्किना ।

---

(1) " नृपूज्यस्या" इति विष्णुधर्मो. ।

[1] विष्णुधर्मोत्तरे—

[2] तद् विष्णोः परमित्येवमर्घ्यो देयो नराधिप ।
[3] ध्रुवाद्यौरिति मन्त्रेण आसनं विनिवेदयेत् ॥
[4] आपोहिष्ठेति तिसृभिः पाद्यञ्च विनिवेदयेत् ।
अर्घ्योदकादाचमनं गायत्र्या विनिवेदयेत् ॥
दधिक्षौद्रं घृतञ्चैव मधुपर्कं निवेदयेत् ।
तत्र मन्त्रत्रयं ज्ञेयं [5] दधिक्राव्णेति पार्थिव ॥
[6] तेजोसि शुक्रमित्येव [7] मधुवाता ऋतायते ।
मधुपर्किकपश्चथं ततो मात्रां निवेदयेत् ॥
सहिरण्यं जीवपात्रं द्रविणेन सदैव तु ।
पशुः कलौ न कर्त्तव्य इत्याह भगवान् भृगुः ॥
[8] अश्वक्रान्तेति मन्त्रेण दातव्यमनुलेपनम् ।
विभूषणञ्च तेनैव ततः परतरं नृप ॥
यज्ञोपवीतं तु नवं तथा प्रतिसरं शुभम् ।
वस्त्रं पताकाञ्च तथा सावित्रेण निवेदयेत् ॥
पुष्पं [9] पुष्पवतीत्येवं धूपं [10] धूरसि चाप्यथ ।

---

(1) विष्णुधर्मो. (1-93/17-30) ।
(2) शु. यजु. (6–5) ।
(3) शु. यजु. (13–16) ।
(4) शु. यजु. (11–50/52) ।
(5) शु. यजु. (23–32) ।
(6) शु. यजु. (22-1) ।
(7) शु. यजु. (13–27) ।
(8) ॐ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ।
उद्धृताऽसि वराहेण कृष्णेन शतबाहुना ॥
मृत्तिके ब्रह्मपूताऽसि कश्यपेनाभिवन्दिता ।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ॥
इति मन्त्रेण मृदनुलेपनम् ।
(9) शु. यजु. (12-77) ।
(10) शु. यजु. (1–8) ।

धूपमन्त्रमिदं चान्यं निबोध गदतो मम ।।
वनस्पतिरसो दिव्यो गन्धाढ्यो गन्ध उत्तमः ।
आह्वानं सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।।
[1]तेजोसि शुक्रमित्येवं दीपं दद्यान्महीपते ।
[2]हिरण्यगर्भेत्यृचं ज्ञेयमन्ननिवेदने ।
निबोध गदतो मन्त्रमन्नपाननिवेदने ।।
तुष्टि पुष्टिकरं हृद्यमाहारं सर्वदेहिनाम् ।
गृहाण वरदा चिन्त्य पानं भक्त्यामयोद्यतम् ।।
पानेनानेन परमा तृप्तिरस्तु तवानघ ।
तृप्तस्तर्पय कामैस्तु यजमानं नमोऽस्तु ते ।।
अनुक्तमन्त्रं श्रुत्वाऽथ ग्रहेभ्यो यः प्रयच्छति ।
सावित्रं तस्य निर्दिष्टं मन्त्रं पार्थिवसत्तम ।।
ततश्च पूजयेदेतान् श्रुतिमन्त्रैर्यथाक्रमम् ।
[3]आकृष्णेन सहस्रांशुमिमं[4] देवा निशापतिम् ।।
[5]अग्निमूर्धेति भूपुत्रमुद्[6]बुध्यस्वेति सोमजम् ।
[7]बृहस्पते [क]सुराराध्यमन्त्रा[8]दैतेयपूजितम् ।।
शं [9]नो देवी रवेः पुत्रं [10]काण्डात् स्वर्भानुदानवम् ।
[11]केतुं कृण्वन् केतुग्रहमधिदेवान् स्वकैस्तथा ।।

---

(1) शु. यजु. (22-1) ।
(2) शु. यजु. (13-4) ।
(3) शु. यजु. (33-43) ।
(4) शु. यजु. (10-18) ।
(5) शु. यजु. (3-12) ।
(6) शु. यजु. (15-54) ।
(7) ऋ. (2-23-15) ।
(8) शु. यजु. (19-75) ।
(9) शु. यजु. (36-12) ।
(10) शु. यजु. (13-20) ।
(11) शु. यजु. (29-37) ।

(क) "सुराध्यक्ष" इति ख पाठः ।

[1]त्र्यम्बकमितीशानश्च [2]श्रीश्चत इति मां यजेत् ।
[3]यदक्रन्दार्च्च येत्स्कन्दमिदं[4] विष्णुरुपेन्द्रकम् ।
[5]आ ब्रह्मन्निति धातारं सजोषा[6] इन्द्रवासवम् ॥
[7]यमेनेति कृतान्तन्तु [8]कार्षिरसीति कालकम् ।
चित्रावसोश्चित्रगुप्तमित्यधिदेवता यजेत् ॥

[9]अग्निदूतमित्यग्न्याख्यमप्स्व[10]न्तरित्यपो यजेत् ।
[11]स्यो ना पृथिवि नः पृथ्वीमिदं[12] विष्णुर्जनार्दनम् ॥
[13]त्रातारमिति देवेन्द्रमिन्द्रं[14] दैवी शचीं यजेत् ।
[15]प्रजापते प्रजापतिं [16]नमोऽस्त्विति भुजङ्गमम् ॥
[17]ब्रह्मजज्ञेति ब्रह्माणं सूर्यादिग्रहगोचरे ।
अधिप्रत्यधिदेवांश्च पूजयेदनुपूर्वशः ॥

[18]गणानां त्वेति विघ्नेशं [19]दृंहस्वेति शिवां यजेत् ।
[20]वातो वेति जगत् प्राणं [21]तमीशानं नरो यजेत् ॥
[22]विश्वा आसेति नासत्या वाग्नेयादि प्रकोणगान् ।
नासत्यौ पूर्वतश्चैव द्वात्रिंशद्देवतार्च्चनम् ॥

---

(1) शु. यजु. (3-60) ।
(2) शु. यजु. (31–22) ।
(3) शु. यजु. (29–12) ।
(4) शु. यजु. (5–15) ।
(5) शु. यजु. (22–22) ।
(6) शु. यजु. (7–37) ।
(7) शु. यजु. (29–13) ।
(8) शु. यजु. (6–28) ।
(9) शु. यजु. (22–17) ।
(10) शु. यजु. (9–6) ।
(11) शु. यजु. (36–13) ।
(12) शु. यजु. (5–15) ।
(13) शु. यजु. (20-50) ।
(14) शु. यजु. (17–86) ।
(15) शु. यजु. (10–20) ।
(16) शु. यजु. (13–6) ।
(17) शु. यजु. (13-3) ।
(18) शु. यजु. (23–19) ।
(19) शु. यजु. (11–69) ।
(20) शु. यजु. (9–7) ।
(21) शु. यजु. (25–18 ।
(22) शु. यजु. (38-10) ।

त्र्यम्वकमिति । प्रजापतिऋषिः । अमुष्टुब्छन्दः । ईश्वरो देवता ।।

श्रीश्चत इति । सिन्धुद्वीप ऋषिः । त्रिष्टुब्छन्दः । रमा देवतां ।।

यदक्रन्द इति । मेधातिथि ऋषिः । त्रिष्टुब्छन्दः । स्कन्दो देवता ।।

इदं विष्णुरिति । मेधातिथिऋषिः । गायत्रीछन्दः । विष्णुर्देवता ।।

आब्रह्मन्निति । अग्निर्ऋषिः । वृहती छन्दः । ब्रह्मा देवता ।।

सजोषा इन्द्रेति । ब्रह्मा ऋषिः । त्रिष्टुब्छन्दः । इन्द्रो देवता ।

यमेन दत्तमिति । अग्निर्ऋषिः । त्रिष्टुब्छन्दः । यमो देवता ।।

कार्षिरसीति । ब्रह्माऋषिः । अनुष्टुब्छन्दः । कालो देवता ।।

चित्रावसोरिति । अग्निर्ऋषिः । अनुष्टुब्छन्दः । चित्रगुप्तो देवता ॥

अग्निं दूतमिति । प्रजापतिऋषिः । गायत्रीछन्दः । अग्निर्देवता ।।

अप्स्वन्तरिति । शुनःशेफऋषिः । अनुष्टुब्छन्दः । आपो देवता ।।

स्योना पृथिवीति । ब्रह्माऋषिः । गायत्री छन्दः । क्षितिर्देवता ।।

इदं विष्णुरिति ।मेधातिथिःऋषिः । गायत्रीछन्दः । क्षितिर्देवता ।।

त्रातारमिन्द्रमिति । प्रजापतिर्ऋषिः । त्रिष्टुब्छन्दः । इन्द्रो देवता ।।

इन्द्रं दैवीरिति । प्रजापतिर्ऋषिः । अत्युष्णिग् छन्दः । ऐन्द्री देवता ।।

प्रजापते न त्वेति । हिरण्यऋषिः । त्रिष्टुब्छन्दः । प्रजापतिर्देवता ।

नमोऽस्तु सर्पेभ्य इति । ब्रह्मा ऋषिः । उष्णिग्छन्दः । सर्पो देवता ।

ब्रह्मजज्ञानमिति । ब्रह्मा ऋषिः । त्रिष्टुब्छन्दः । ब्रह्मा देवता ।।

गणानां त्वेति । भार्गव ऋषिः । जगतीछन्दः ।गणपतिर्देवता ।।

रक्तचन्दनमर्कस्य[1] श्वेतञ्च शशिनस्तथा ।
भौमाय[2] कुङ्कुमं दद्यात् सरलं सोम[3]सूनवे ।।
गुरोश्चतुःसमं दद्याच्छुक्राय श्वेतचन्दनम् ।
शनैश्चराय कस्तूरीं राहवे गन्धमुत्तमम् ।।
केतूनामिति सर्वेषां पद्मकं गन्ध उच्यते ।।

---

(1) अर्कस्य—सूर्यस्य । (2) भौमाय—मङ्गलाय ।

(3) सोमसूनवे—बुधाय ।

रक्तकरवीरपुष्पमादित्याय प्रकीर्त्तितम् ।
शशाङ्के श्वेतपुष्पं स्याद् भौमाय रक्तमुच्यते ।।
पीतञ्च बुधजीवाभ्यां शुक्राय शुक्लमुच्यते ।
सूर्यपुत्राय वै कृष्णं राहवे चोत्पलं तथा ।।
केतूनामिति सर्वेषां पुष्पाणि विविधानि च ।
गुग्गुलञ्च रवेर्दद्यात् सोमाय सरलं तथा ।।
देवदारुञ्च भौमाय बुधाय घृतमिश्रितम् ।
दशाङ्गं गुरवे दद्यादगुरुं दैत्यमन्त्रिणे ।।
कृष्णागुरुं सूर्यसुते राहवे गुडमेव च ।
धूपं दद्याच्च सर्वेषां केतूनां मधुमिश्रितम् ।।
ग्रहादीनाञ्च सर्वेषां प्रदीपानथ दापयेत् ।
ग्रहवर्णानि देयानि वासांसि कुसुमानि च ।।
धूपामोदोऽत्र सुरभिरुपरिष्टाद्वितानकम् ।
शोभनं स्थापयेत् प्राज्ञः फलपुष्पसमन्वितम् ।।
गुडौदनं रवेर्दद्यात् सोमाय घृतपायसम् ।
मङ्गलाय मसूरान्नं क्षीरौदनं बुधाय च ।।
दध्यन्नं गुरवे दद्यात् शुक्राय तु घृतौदनम् ।
शनैश्चराय कृशरं मार्गमांसं च राहवे ।।
चित्रौदनञ्च केतूभ्यः सर्वान् [1]भक्ष्यैस्तथार्चयेत् ।।
अजाक्षीरेण संस्विन्नयवाश्च तिलतण्डुलाः ।
अजाकर्णस्य रक्तेन रक्ताश्चित्रान्नसंज्ञिताः ।।
आदित्ये लड्डुकं दद्यात् सोमाय पर्पटीं तथा ।
आरिषां भूमिपुत्राय बुधाय अञ्जलीं तथा ।।
वटकं गुरवे दद्याच्छुक्राय गुडमण्डकम् ।
शनैश्चराय माषान्नं राहवे गुडविण्ड़रीम् ।।

---

(1) ग्रहाणां भोजनानि स्कन्दपुराणानुसारं शान्तिमयूखे (पृ–17)ऽपि लिखितानि

चित्रौदनश्च केतुभ्य इत्येते ग्रहपिण्डकाः ।
भक्त्या तेभ्यो निवेद्यैनं दद्यादाचमनीयकम् ॥
करघृष्टं सकर्पूरताम्वूलचूर्णवर्जितम् ।
श्रौतमन्त्रांस्तु पूर्वोक्तान् पठन् स्तोत्रमुदीरयेत् ॥
दाडिमीपुष्पसंकाशं काश्यपेयं कलिङ्गजम् ।
धनिष्ठातारकं देवं [1]मार्त्तण्डं प्रणमाम्यहम् ॥
यमुनाजलसञ्जातमात्रेयं क्षीरसन्निभम् ।
रोहिणीतारकं देवं [2]सुधांशुं प्रणमाम्यहम् ॥
अवन्तीदेशसम्भूतं भारद्वाजस्य गोत्रजम् ।
लोहितं स्वातिनक्षत्रं भू[3]सुतं प्रणमाम्यहम् ॥
शुद्धकाञ्चनसंकाशमात्रेयं मगधोद्भवम् ।
विशाखातारकं देवं [4]सोमजं प्रणमाम्यहम् ॥
आङ्गिरसगोत्रकं तमुत्तराफाल्गुनीयकम् ।
सिन्धुदेशोद्भवं पीतं [5]गीष्पतिं प्रणमाम्यहम् ॥
भोगभोटे समुद्भूतं भार्गवेयं शिताङ्गकम् ।
पुष्पतारोदयं देवं [6]दैत्येज्यं प्रणमाम्यहम् ॥
सौराष्ट्रदेशजननं कृष्णं काश्यपगोत्रजम् ।
कृत्तिकातारकं देवं सौरिं तं प्रणमाम्यहम् ॥
मलयाद्रिसमुद्भूतं पाठीनान्वयसम्भवम् ।
भरणीतारकं कृष्णं स्वर्भानुं प्रणमाम्यहम् ॥
जैमिनिकुलसम्भूतं कुशद्वीपसमुद्भवम् ।
अश्लेषातारकं धूम्रं तं केतुं प्रणमाम्यहम् ॥
एवं स्तुत्वा सम्यग् भुक्त्वा प्रणमेद्दण्डवत्क्षितौ ।

---

(1) मार्त्तण्डं—सूर्यम् ।
(2) सुधांशुं—चन्द्रम् ।
(3) भूसुतं—मङ्गलम् ।
(4) सोमजं—बुधम् ।
(5) गीष्पतिं—बृहस्पतिम् ।
(6) दैत्येज्यं—शुक्रम् ।

वेद्याः पूर्वोत्तरे भागे दध्यक्षतविभूषितम् ॥
चूतपल्लवसंछन्नं फलवस्त्रयुगान्वितम् ।
वज्रमौक्तिकवैडुर्यपुष्परागेन्द्रनीलकम् ॥
पञ्चरत्नमिति प्रोक्तं नारदेन महर्षिणा ॥
पञ्चरत्न समायुक्तं पञ्चभङ्गदलान्वितम् ।
स्थापयेदव्रणं[1] कुम्भं वरुणं तत्र विन्यसेत् ॥
गङ्गाद्याः सरितः सर्वास्समुद्राश्च सरांसि च ।
सर्वे समुद्राः सरितः सरांसि च नदा ह्रदाः ॥
आयान्तु यजमानस्य दुरितक्षयकारकाः ।
गजाश्वरथ्यावल्मीकसङ्गमह्रदगोकुलात् ॥
मृदमानीय सर्वस्मात् सर्वौषधि समन्विताम् ।
स्नानार्थं विन्यसेत्तत्र यजमानस्य धर्मवित् ॥
होमं समाचरेत् सर्पिर्यवव्रीहितिलादिना ।
अर्कः पलाशः खदिरोऽपामार्गोऽश्वत्थ एव च ॥
औदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ।
एकैकस्याष्टशतकमष्टाविंशतिरेव वा ॥
होतव्या मधुसर्पिभ्यां दध्ना चैव समन्विताः ।
प्रादेशमात्राः सशिखाः [2]सशल्का अपलाशिनीः ॥
समिधः कल्पयेत् प्राज्ञः सर्वकर्मसु सर्वदा ।
विशीर्णा विदला ह्रस्वा वक्राः स्थूला द्विधा कुशाः ॥
कृमिदष्टाश्च दीर्घाश्च न होतव्याः कदाचन ।
होमेनानेन सर्वेषां विधिज्ञः परमार्थवित् ॥
स्वेन स्वेनैव मन्त्रेण जुहुयात् समिधः पृथक् ।
देवानामेव सर्वेषामुपांशु परमार्थवित् ॥
प्राङ्मुखा उदङ्मुखा वा कुर्युर्ब्राह्मणपुङ्गवाः ।

---

(1) अव्रणम्—अक्षतम् ।   (2) सशल्काः—सत्वचाः ।

मन्त्रविद्भिश्च कर्त्तव्याश्चरवः प्रतिदैवतम् ॥
वहुदैवतमेकं वा ततो होमं समारभेत् ।
अर्को विनाशयेद् व्याधिं पालाशं सर्वकामदम् ॥
खदिरं बन्धुलाभाय अपामार्गे बहुप्रजाः ।
अश्वत्थाच्च लभेद्रूपं सौभाग्यौदुम्बरी तथा ॥
शमी शमयते पापं दूर्वा आयुर्विवर्धिनी ।
ब्रह्मवृद्धि कुशो दद्यादेतत् समिधो लक्षणम् ॥

[1]याज्ञवल्क्यः— [2]आकृष्णेन [3]इमं देवा [4]अग्निमूर्धादिवः ककुत् ।
[5]उद्बुध्यस्वेति च ऋचो यथासंख्यं प्रकीर्त्तिताः ॥
[6]बृहस्पतेतियदर्यस्तथैवान्नात्[7] परिस्रुतः ।
[8]शन्नो देवीस्तथा [9]काण्डात् [10]केतुं कृण्वन्निमांस्तथा ॥

आकृष्णेन इत्यस्य । हिरण्यस्तूप ऋषिः । त्रिष्टुब्च्छन्दः । सविता देवता ।
इमं देवा इत्यस्य । गौतम ऋषिः । उष्णिक् च्छन्दः । सोमो देवता ।
अग्निमूर्धा इत्यस्य । विरूप आङ्गिरस ऋषिः । गायत्री च्छन्दः । अङ्गारको देवता ।
उद्बुध्यस्वेति अस्य । विश्वेदेवा ऋषयः । उष्णिक् च्छन्दः । बुधो देवता ।
बृहस्पते इत्यस्य । जमदग्निः ऋषिः । उष्णिक् छन्दः । बृहस्पतिर्देवता ।
अन्नात् परिस्रुत इत्यस्य । याज्ञवल्क्य ऋषिः । विराड् च्छन्दः । शुक्रो देवता ।
शन्नो देवीरित्यस्य । सिन्धुद्वीप ऋषिः । गायत्री च्छन्दः । शनैश्चरो देवता ।
काण्डात् काण्डादित्यस्य । विश्वामित्र ऋषिः । अनुष्टुब् छन्दः । राहुर्देवता ।
केतुं कृण्वन्नित्यस्य । मधुछन्दा ऋषिः । गायत्रीछन्दः । केतुर्देवता ।

---

(1) याज्ञ. (1–300/301) ।
(2) शु. यजु. (33–43) ।
(3) शु. यजु. (10-8) ।
(4) शु. यजु. (3–12) ।
(5) शु. यजु. (15–54) ।
(6) ऋग्. (2–13–15) ।
(7) शु. यजु. (19-75) ।
(8) शु. यजु. (36–12) ।
(9) शु. यजु. (13-20) ।
(10) शु. यजु. (29–37) ।

कपिलः पिङ्गलश्चैव धूम्रो जठर एव च ।
शिखी च हाटकश्चैव महातेजाः प्रकीर्त्तिताः ॥
हुताशनश्च रौद्रश्च वह्नयः परिकीर्त्तिताः ।
पूर्वतो यागपीठस्य विजयाग्नि समाचरेत् ॥
दक्षिणेन तु शान्त्यर्थं श्रीकामः पश्चिमेन तु ।
उत्तरेण तु पुष्ट्यर्थं धनलाभार्थमेव च ॥
ऐशान्यां ज्ञानकामश्च योगसंसिद्धिरेव च ।
आग्नेये सर्वकामश्च आत्मनो विजयाय च ॥
उच्चाटो नाम नैर्ऋत्यां शत्रुपक्षस्य कारयेत् ।
कुलवंशोद्भवं कुर्याद् वायव्यां दिशि संस्थितः ॥
स्वशक्त्या समिधो हुत्वा समित्संख्या[1] घृताहुतीः ।
तावद् भक्त्याहुतीर्हुत्वा ग्रहेभ्यः स्वस्वमन्त्रकैः ॥
जुहुयादधिदेवभ्यः घृतेनैकैकमाहुतिम् ।
एवं प्रत्यधिदेवेभ्यो ग्रहादिभ्यः स्वमन्त्रकैः ॥

घृतेनेति चरुसमिधोपलक्षणम् । समिधश्च पालाश एव । विशेषादधिदेवतादिभ्यस्तु पूर्वत्र प्रतिपादितैः पूजामन्त्रैरेव यजुर्वेदिनो जुह्वतीति समाचारः ।

ऋग्वेदादीनामुच्यते । [2]मत्स्यपुराणे—

[3]आवो राजेति रुद्रस्य वलिहोमं समाचरेत् ।
[4]आपोहिष्ठेत्यमायास्तु [5]स्योनेति स्वामिनस्तथा ॥
[6]विष्णोरिदं विष्णुरिति [7]त्वमित्सेति स्वयंभुवः ।
[8]इन्द्रमिद्देवता तय इन्द्राय जुहुयात् पुनः ॥

---

(1) ग्रहाणां होमसंख्या देवीपुराणवचनानुसारं द्वैतपरिशिष्टे (पृ–62) विद्यते ।

(2) मत्स्य. पु. (93–38/47) । (3) ऋग् (4–3–1) ।

(4) ऋग्. (10–9–1) । (5) ऋग्. (1–22–15) ।

(6) ऋग्. (1-22-17) । (7) ऋग्. (8–60-5) ।

(8) ऋग्. (8–3–5) ।

तथा यमस्य [1]चायं गौरिति होमः प्रकीर्त्तितः ।
कालस्य [2]ब्रह्मजज्ञानमिति मन्त्रः प्रशस्यते ॥
चित्रगुप्तस्या[3]नाज्ञातमिति वेदविदो विदुः ।
[4]अग्निं दूतं वृणीमहे इति वह्नेरुदाहृतः ॥
[5]उदुत्तमं वरुण इत्यपां मन्त्रः प्रकीर्त्तितः ।
भूमेः पृथिव्यन्तरिक्ष[6]मिति वेदेषु पठ्यते ॥
[7]सहस्रशीर्षा पुरुष इति विष्णोरुदाहृतः ।
[8]इन्द्रायेन्दो मरुत्वत इति शक्रस्य शस्यते ॥
[9]उत्तानपर्णे सुभगे इति शच्या. समाचरेत् ।
प्रजापतेः पुनर्होमः [10]प्रजापत इति स्मृतः ॥
[11]नमोऽस्तु सर्पेभ्य इति सर्पाणां मन्त्र उच्यते ।
[12]एष ब्रह्मा च ऋत्विजेति ब्रह्मण्युदाहृतः ॥
विनायकस्य [13]चातू न इति मन्त्रो बुधैः स्मृतः ।
[14]जातवेदसे सुनवाम दुर्गा मन्त्रोऽत्र उच्यते ॥
[15]प्राणाशिशुर्महीनां घृतव्यद् वायोः प्रकीर्त्तितः ।
[16]आदित् प्रत्यस्य रेतस् आकाशस्य प्रकीर्त्तितः ॥
[17]एषो उषा अपूर्व्येति अश्विनोर्मन्त्र उच्यते ।

---

(1) ऋग्. (10–189-1) । (2) शु. यजु. (13-3) ।
(3) तैत्ति. ब्रा. (3-7-11-5) । (4) ऋग्. (1-12-1) ।
(5) ऋग्. (1-24-15) । (6) शु. यजु. (22–19)
(7) ऋग्. (10-90-1) । (8) ऋग्. (5-64-22) ।
(9) ऋग्. (10-145-2) । (10) ऋग्. (10-121-10) ।
(11) शु. यजु. (13-6) । (12) आश्व. श्रौ. (6-2-6) ।
(13) ऋग्. (8-81-1) । (14) ऋग्. (1-99-1) ।
(15) प्राणाशिशुः महीनां त्वन्यनृतस्य दीधितिम् । विश्वा परिप्रिया भुवदधद्विता ।
(16) ऋग्. (8-6–30) । (17) ऋग्. (6-7-1) ।

पूर्णाहुतिश्च मूर्धानं दिव इत्यभिपातयेत् ।।

आवो राजानमित्यस्य । वामदेवऋषिः । त्रिष्टुब् छन्दः । रुद्रो देवता ।

आपोहिष्ठे इत्यस्य । सिन्धुद्वीप ऋषिः । गायत्री छन्दः । आपो देवता ।

स्योना पृथिवी इत्यस्य । मेधातिथिर्ऋषिः । गायत्री छन्दः । स्कन्दो देवता ।

इदं विष्णुरित्यस्य । मेधातिथिऋषिः । गायत्री छन्दः । विष्णुर्देवता ।

त्वमित्सप्रथा इत्यस्य । भार्गव ऋषिः । ब्रहती छन्दः । इन्द्रो देवता ।

आयं गौरित्यस्य । सार्पराज्ञीऋषिः । गायत्री छन्दः । यमो देवता ।

ब्रह्मजज्ञानमित्यस्य । अग्निर्ऋषिः । त्रिष्टुब्छन्दः । कालो देवता ।

अनाज्ञातमित्यस्य । ब्रह्मा ऋषिः । अनुष्टुब्च्छन्दः । चित्रगुप्तो देवता ।

अग्निं दूतमित्यस्य । मेधातिथिर्ऋषिः । गायत्रीछन्दः । अग्निर्देवता ।

उदुत्तममित्यस्य । शुनःशेफ ऋषिः । त्रिष्टुब्छन्दः । आपो देवता ।

पृथिव्यन्तरिक्षमित्यस्य । ब्रह्मा ऋषिः । उष्णिक् छन्दः । भूमिर्देवता ।

सहस्रशीर्षेत्यस्य । नारायण ऋषिः । अनुष्टुब् छन्दः । विष्णुर्देवता ।

इन्द्रोयेन्द्रो मरुत्वत इत्यस्य । काश्यप ऋषिः । गायत्रीछन्दः । शक्रो देवता ।

आतू न इत्यस्य । कुसीद ऋषिः । गायत्रीछन्दः । गणपतिर्देवता ।

जातवेदस इत्यस्य । कश्यपऋषिः । त्रिष्टुब्छन्दः । दुर्गा देवता ।

प्राणाशिशुर्महीनामित्यस्य । अत्रिर्ऋषिः । अनुष्टुब्छन्दः । वायुर्देवता ।

आदि प्रत्न इत्यस्य । वत्सऋषिः । गायत्री छन्दः । आकाशो देवता ।

एषो उषा अपूर्व्या इत्यस्य । प्रस्कण्वऋषिः । गायत्री छन्दः । अश्विनीकुमारकौ देवते ।

मूर्धानं दिवो अरतिम् इत्यस्य । भरद्वाजऋषिः । त्रिष्टुब् छन्दः । वैश्वानरो देवता ।

अथाभिषेकमन्त्रेण वाद्यमङ्गलगीतकैः ।
तेनैव पूर्णकुम्भेन होमान्ते प्रागुदङ्मुखैः ।।
अव्यङ्गावयवैः शुद्धैर्हेमस्रग्दामभूषितैः ।
यजमानस्य चतुर्भिः कलशैः स्नपनं द्विजैः ।।

---

(14) ऋग्. (1-46-1) ।

मन्त्रो यथा— [1]सहस्राक्षं शतधारमृषिभिः पावनं कृतम् ।
तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते ॥
भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः ।
भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो विदुः ॥
यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि ।
ललाटे कर्णयोरक्ष्णो रापस्ते घ्नन्तु ते सदा ॥
सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा संकर्षणः प्रभुः ॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ॥
वरुणः पवनश्चैव [2]धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहिताः शेषाः दिक्पालाः पान्तु सर्वदा ॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ॥
एतास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ॥
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ।
ऋषयो मुनयो गावो वेदमातर एव च ॥
देवपत्न्यो ध्रुवो नागा दैत्याश्चाप्सरसां गणाः ।
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥
औषधानि च रत्नानि कालस्यावयवाश्च ये ।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥
एतास्त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ।
सर्वौषधैः सर्वगन्धैः पुनस्ते द्विजपुङ्गवाः ॥
सपत्नीकं यजमानं स्नापयेयुः समाहिताः ।

---

(1) "सहस्राक्षं .....ते सदा" इत्यन्तोभागः या. स्मृ (1–281/283) ।

(2) धनाध्यक्षः—कुबेरः ।

ततः शुक्लाम्वरधरः शुक्लमाल्यानुलेपनः ।।
ग्रहान् सम्पूज्य विविना साधिप्रत्यधिदैवतान् ।
कुण्डस्थांश्च समभ्यर्च्य सम्प्राश्य हुतशेषकम् ।।
अभिषेके निवृत्ते तु दक्षिणाभिः प्रयत्नतः ।
ऋत्विजः पूजयेत्तत्र वित्तशाठ्यविवर्जितः ।।
सूर्याय कपिलां धेनुं दद्याच्छंखं तथेन्दवे ।
रक्तं धुरन्धरं दद्याद् भौमाय ककुदन्वितम् ।।
बुधाय जातरूपन्तु गुरवे पीतवाससी ।
श्वेताश्वं [1]दैत्यगुरवे कृष्णां [2]गामर्कसूनवे ।।
आयसं राहवे दद्यात् केतुभ्यश्छागमुत्तमम् ।
सुवर्णेन समा कार्या यजमानेन दक्षिणा ।।
सर्वेषामथवा गावो देया हेमविभूषिताः ।
सुवर्णमथवा दद्याद् गुरुर्वा येन तुष्यति ।।
स्वमन्त्रेण प्रदातव्याः सदा सर्वत्र दक्षिणा ।
कपिले सर्वदेवानां पूजनीयासि रोहिणी ।।
तीर्थवेदमयी यस्मादतः शान्ति प्रयच्छ मे ।।
पुण्यस्त्वं शंखः पुण्यानां मङ्गलानाञ्च मङ्गलम् ।
विष्णुना विधृतो नित्यमतः शान्ति प्रयच्छ मे ।।
धर्मत्वं वृषरूपेण जगदानन्दकारकः ।
[3]अष्टमूर्त्तेरधिष्ठानमतः शान्ति प्रयच्छ मे ।।
हिरण्य[4]गर्भ गर्भत्वं होमबीजं विभावसो ।
अनंन्तफलदं यस्मादतः शान्ति प्रयच्छ मे ।।
पीतवस्त्रयुगं यस्माद् वासुदेवस्य वल्लभः ।
प्रदानात् तस्य वै विष्णुरतः शान्ति प्रयच्छ मे ।।

---

(1) दैत्यगुरवे—शुक्राय । (2) अर्कसूनवे—शनैश्चराय ।
(3) अष्टमूर्त्तेः—शिवस्य । (4) हिरण्यगर्भः—अग्निः ।

विष्णुस्त्वमश्वरूपेण यस्मादमृतसम्भव ।
चन्द्रार्कवाहनो नित्यमतः शान्ति प्रयच्छ मे ॥
यस्मात्त्वं पृथिवी सर्वा धेनुः केशवसम्भवा ।
सर्वपापहरा नित्यमतः शान्ति प्रयच्छ मे ॥
यस्मादायसकर्माणि तवाधीनानि सर्वदा ।
लाङ्गलाद्यायुधादीनि तस्माच्छान्ति प्रयच्छ मे ॥
यस्मात्त्वं सर्वयज्ञानामङ्गत्वेन व्यवस्थितः ।
यानं [1]विभावसोर्नित्यमतः शान्ति प्रयच्छ मे ॥

[2]विष्णुधर्मोत्तरे—ततोऽग्निहवनं कृत्वा दत्त्वा राजेन्द्र दक्षिणाम् ।
सावित्रेण तु मन्त्रेण ततः कार्यं विसर्जनम् ॥
इमां पूजां समादाय मया भक्त्या निवेदिताम् ।
पुनरागमनायेह व्रजध्वं [3]नाकमुत्तमम् ॥
आधयो व्याधयश्चैव प्रशमं यान्तु सर्वशः ।
रक्षा चास्तु शिवं चास्तु यजमानस्य सर्वशः ॥
सर्वं शिवं चास्तु तथा द्विजानां राज्ञां शिवं चास्तु तथा प्रजानाम् ।
आतङ्कहीनं जगदस्तु सर्वं दोषाः प्रणाशं सफलाः प्रयान्तु ॥
[4]हुताशनस्य कर्त्तव्यं ततो राजन् विसर्जनम् ।
हव्यभुक् त्वं वरेण्यस्त्वं प्रणतार्त्तिविनाशन ॥
व्रजस्व पूजामादाय पुनरागमनाय च ।
शान्त्यर्थं यजमानस्य राष्ट्रस्य च विवृद्धये ॥
गोब्राह्मणहितार्थाय विजयाय महीपतेः ॥

[5]याज्ञवल्क्यः— यस्य यश्च यदा [6]दुष्टः स तं यत्नेन पूजयेत् ।
ब्रह्मणैषां वरो दत्तः पूजिताः पूजयिष्यथ ॥

---

(1) विभावसोः—सूर्यस्य ।
(2) विष्णुधर्मोत्त. (1-93/31-34) ।
(3) नाकं—स्वर्गम् ।
(4) हुताशनस्य—अग्नेः ।
(5) या. स्मृ. (1-307) ।
(6) 'दुःस्थ' इति या. स्मृ. पाठः ।

ग्रहा गावो नरेन्द्राश्च व्राह्मणाश्च विशेषतः ।
पूजिताः पूजयन्त्येव निर्दहन्त्यवमानिताः ।
तस्मादनेन विधिना ग्रहयज्ञं समाचरेत् ।
सर्वान् कामानवाप्नोति स्वर्गलोके महीयते ॥
यश्च पीडाकरो नित्यमल्पवित्तस्य चाग्रतः ।
तं तु यत्नेन सम्पूज्य शेषानभ्यर्च्चयेन्नरः ॥
नवग्रहमखे विप्राश्चत्वारो वेदवादिनः ।
अथवा ऋत्विजौ शान्तौ द्वावेव श्रुतिकोविदौ ॥

पीडाकर ग्रहमात्रपूजापक्षे तु—

एकमभ्यर्च्चयेद् भक्त्या व्राह्मणं वेदपारगम् ।
दक्षिणाभिः प्रयत्नेन न बहूनल्पवित्तवान् ॥

पूजितग्रहसम्वन्धिन्यैव दक्षिणयाऽर्च्चयेन्न तु सर्वग्रहसम्वन्धिनीभिर्दक्षिणाभिरित्यर्थः ।

एकैकस्यार्च्चनपक्षे विशेषं कथयाम्यहम् ।
मुनीन्द्ररसवाणेश रन्ध्राष्टतिथिदर्शकाः ॥
तिथयोऽर्कादितः शस्ता वारो दुष्टग्रहस्य वा ।
प्रातर्यजेत् कुजादित्यौ पूर्वाह्णे सोमगोष्पती ॥
मध्याह्ने बुधदैत्येशावपराह्णे तमो शनिः ।
पूर्वाह्णे वाऽथ सर्वेषामर्च्चनं समुदाहृतम् ॥
श्रुतिस्मृत्युदितं विप्रमेकञ्च वृणुयाद् गुरुम् ।
एकञ्च स्थापयेत् कुण्डं लिखित्वाष्टदलाम्वुजम् ॥
एकं ग्रहञ्च संस्थाप्य पूर्वोक्तलक्षणान्वितम् ।
कुम्भे च मण्डले वह्नौ साधिप्रत्यधिदैवतम् ॥
पूर्वोक्तैरेवमन्त्रैश्च पूर्वोक्तकुसुमादिभिः ।
यजेच्च जुहुयाद् वह्नौ पूर्वोक्तसमिदादिभिः ॥
विशेषमुदपात्रन्तु द्रव्यन्यासं पृथक् पृथक् ।
यथावत् कथयिष्यामि ग्रहपीड़ाविनाशनम् ॥

[1]मञ्जिष्ठां मातुलुंगश्च कुङ्कुमं रक्तचन्दनम् ।
ताम्रकुम्भे न्यसेदेतत् सूर्यपीडाविनाशनम् ।।
पद्मकाष्ठं शिरीषञ्च उशीरं सितचन्दनम् ।
शंखपात्रे न्यसेदेतत् सोमपीडाविनाशनम् ।।
खदिरं देवदारुञ्च तिलानामलकानि च ।
पूर्णकुम्भे कृतं रौक्मे भौमपीडाविनाशनम् ।।
नदीसंगमतोयानि तन्मृदासहितानि च ।
न्यस्तानि [2]कुम्भमाहेये बुधपीडाविनाशनम् ।।
उदुम्बरं तथा बिल्वं बटमामलकं तथा ।
न्यसेत् कुम्भे तु सौवर्णे जीवपीडाविनाशनम् ।।
गोरोचना नागमदं शतपुष्पा शतावरी ।
विन्यसेद् राजते कुम्भे शुक्रपीडाविनाशनम् ।।
तिलान् माषान् प्रियंगुं च गन्धपत्रं तथैव च ।
न्यसेत् कार्ष्णायसे कुम्भे [3]सौरिपीडाविनाशनम् ।।
गुग्गुलं हिंतुलं तालं शुभां चैव मनःशिलाम् ।
शृङ्गे तु माहिषे न्यसेत् राहुपीड़ाविनाशनम् ।।
वराहखनितां राजन् पर्वताग्रमृदं तथा ।
छागक्षीरं खड्गपात्रे केतुपीडाविनाशनम् ।।
एतद् द्रव्योदपात्रैश्च यजमानं शुभान्वितम् ।
अभिषेचनिकैर्मन्त्रैः स्नापयेच गुरुः स्वयम् ।।
स्नातः पूजितदेवाग्निः सम्प्राश्य च चरूत्तमम् ।
ग्रहोक्तदक्षिणां दद्याद् ग्रहान् वै भोजयेद् द्विजान् ।।
विधिनानेन यः कुर्याद् ग्रहाणान्तु द्विजोत्तमः ।

---

(1) 'मञ्जिष्ठां ..केतुपीड़ाविनाशनम्' इत्यन्तोभागः विष्णुधर्मोत्त. (2-91/2-9) ।

(2) कुम्भमाहेये—मृत्तिकावटितकलशे ।

(3) सौरिः—शनिः ।

पारगः श्रुतिशास्त्राणां भूत्वाऽऽचार्यत्वमाप्नुयात् ।।
संग्रामविजयं भूपो वैश्यो बहुपशून् धनम् ।
शूद्रोऽपि सौख्यमतुलं प्रमदा सुतमुत्तमम् ।।
वन्ध्याऽपि च सुतं श्रेष्ठं मृतवत्सा चिरायुषम् ।
सुरूपं सत्पतिं कन्या समृद्धिं चेतरे जनाः ।।
नष्टश्रीश्च श्रियं पूर्णामारोग्यं रोगवान् जनः ।
महोत्पातसमुद्भूतान् दोषान् जयति तत्क्षणात् ।।
अपमृत्युं महाघोरं राजोद्भवमुपद्रवम् ।
वैनायकीं महापीडां ग्रहपीडाञ्च दारुणाम् ।।
एवं कृत्वा कृती सम्यक् सर्वस्मिन् शुभकर्मणि ।
आदौ ग्रहान् समभ्यर्च्य प्रकुर्यात् कौशलक्रियाम् ।।
किमत्र वहुनोक्तेन यद् यत् कामयते नरः ।
तत्तत्फलमवाप्नोति पूजितेषु ग्रहेषु च ।।

इति ग्रहपूजाविधिः समाप्तः ।।

अथ महाव्याहृतिहोमः[क]

षट्त्रिंशन्मते— महाव्याहृतिभिर्होमस्तिलैः कार्यो द्विजन्मना ।
उपपातकशुध्यर्थं सहस्रपरिसंख्यया ।।
महापातकसंयुक्तो लक्षहोमेन शुध्यति ।।

विष्णुधर्मोत्तरे— ॐकारपूर्विका राम महाव्याहृतयो मताः ।
सर्वकल्मषनाशिन्यः सर्वकामप्रदास्तथा ।।
आज्याहुतिसहस्रेण देवानाराधयेद् द्विजः ।
मनसः काङ्क्षितं राम मनसेप्सितकामदम् ।।
शान्तिकामो यवैः कुर्यात्तिलैः पापापनुत्तये ।

(क) विषयोऽयं घङच पु. नास्ति ।

धान्यैः [1]सिद्धार्थकैश्चैव सर्वकामकरैस्तथा ।।

[2]याज्ञवल्क्यः— यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमो गायत्र्या [3]जप एव च ।।

दशजप्ता तु सा देवीत्यादिवचनैः पापविशेषेपूक्तसंख्यानुरोधेन तिलहोमो गायत्र्या कर्त्तव्य इत्यर्थः ।।

[इति महाव्याहृतिहोमः ।

क

अथ व्रतनिरूपणम्

तत्र [2]**मनुः**— त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् ।
त्र्यहं परञ्च नाश्नीयात् प्राजापत्यं चरन् द्विजः ।।

अत्र प्रातःसायं शब्दौ दिनरात्रिमात्रपरौ ।

"त्र्यहं दिवा भुङ्क्ते नक्तमिति च त्र्यहं
त्र्यहमद्यादयाचितव्रतं त्र्यहं न भुङ्क्ते"

इति [3]वसिष्ठवाक्ये दिननक्तशब्ददर्शनात् । [4]**वसिष्ठाङ्गिरोशनसः**—
हविष्यान् प्रातराशांस्त्रीन् सायमाशांस्तथैव च ।
अयाचितं तथैवाद्यादुपवासस्त्र्यहं भवेत् ।।

पराशरः— सायन्तु द्वादशग्रासाः प्रातः पञ्चदश स्मृताः ।
चतुर्विंशतिरयाच्या परं निरशनं स्मृतम् ।।

आपस्तम्बः— सायं द्वाविंशतिग्रासाः प्रातः षड्विंशतिः स्मृता ।
अयाचिते चतुर्विंश परं चानशनं स्मृतम् ।।
कुक्कुटाण्डप्रमाणन्तु यावान् वा प्रविशेन्मुखे ।

---

(1) सिद्धार्थकैः—श्वेतसर्षपैः । (2) मनु. (11-211) ।
(3) वसि. धर्म. (21-20) । (4) वसि. धर्म. (27-16) ।

(क) विषयोऽयं घङच पुस्तकेषु नास्ति ।

एवं [1]ग्रासं विजानीयाच्छुद्ध्यर्थं कायशोधनम् ॥

वैशम्पायनः— स्नानं द्विकालमेव स्यात् त्रिकालं वा द्विजन्मनः ।

द्विकालमित्यशक्तविषयम् । गार्ग्यः—

एकवासाश्चरेद् भैक्षं स्नात्वा वासो न पीड़येद् ।

शङ्खः— एकवासाऽऽर्द्रवासा वा लघ्वाशी स्थण्डिलेशयः ।

[2]याज्ञवल्क्यः— कुर्यात् त्रिषवणस्नायी कृच्छ्रं चान्द्रायणं तथा ।
पवित्राणि जपेत् पिण्डान् गायत्र्या चाभिमन्त्रयेत् ॥

[3]तथा— एकभक्तेन नक्तेन तथैवायाचितेन च ।
[4]उपवासेन चैकेन पादकृच्छ्रः प्रकीर्त्तितः ॥
यथा कथञ्चित् त्रिगुणः प्राजापत्योऽयमुच्यते ।
अयमेवाऽतिकृच्छ्रः स्यात् पाणिपूरान्नभोजनः ॥

यथाकथञ्चित् त्रिगुण इति । त्र्यहं प्रातस्त्र्यहं सायमित्यनेन क्रमेण । त्र्यहं सायं त्र्यहं प्रातरिति क्रमेण शिशुकृच्छ्रोक्तक्रमेण वा ।

यस्माच्छूद्रं समासाद्य सम्यग् धर्मपथे स्थितम् ।
प्रायश्चित्तं प्रदातव्यं जपहोमादिवर्जितम् ॥

इत्यङ्गिरोवचनात् । जपादिरहितश्च द्वादशदिनसाध्य प्राजापत्य इत्यर्थः । अयमेव प्राजापत्य आद्यत्र्यहत्रये पाणिपूरान्नभोजनः सन्नतिकृच्छ्र उच्यत इत्यर्थः ।

---

(1) ग्रासप्रमाणं हिरण्यकेश्याह्निकमाचारभूषणे (पृ–267) यथा व्याघ्रः—
चतुरङ्गुलमुत्सेधं चतुरङ्गुलमायतम् ।
एतद् ग्रासप्रमाणन्तु व्याघ्रेण परिभाषितम् ॥

(2) या. स्मृ. (3–325) । (3) या. स्मृ. (3–318/319) ।

(4) उपवासं चतुर्विधं यथा आचारेन्दौ (पृ–284) भविष्यपुराणवचनम्—
सताम्बूलमताम्बूलं सभोजनमभोजनम् ।
साहारं च निराहारं चतुर्विधमुपोषणम् ॥
परन्तु अत्र उपवासपदेन निराहारसंज्ञकोपवासः ।

यमः— एकैकं पिण्डमश्नीयात् त्र्यहं [1]कल्यं त्र्यहं निशि ।
अयाचितं त्र्यहं पिण्डं वायुभक्षः परं त्र्यहम् ॥
अतिकृच्छ्रं तदेव स्यात् पवित्रं पापनाशनम् ॥

[2]मनुश्च— एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्ववत् ।
त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन् द्विजः ॥

शक्तविषयमिदम् । पाणिपूरान्नाद् ग्रासस्याल्पत्वादिति [3]विज्ञानेश्वरः ।

[4]मनुः— यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् ।
पराको नाम कृच्छ्रोऽयं सर्वपापप्रणाशनम् ॥

बृहस्पतिः— जपहोमरतः कुर्याद् द्वादशाहमभोजनः ।
पराक एष आख्यातः सर्वपापप्रणाशनः ॥

ब्रह्मपुराणे— मुन्यन्नेन पवित्रेण प्राजापत्यव्रतं चरेत् ।
कुक्कुटाण्डोपमान् ग्रासान् सायं षड्विंशतिं चरेत् ॥
अयाचितांस्तु मध्याह्ने चतुर्विंशति शुद्धये ।
त्र्यहाणि त्रीणि शेषाणि निराहारो भवेच्छुचिः ॥
एकैकं वर्धयेद् ग्रासं कालेष्वेतेषु संयतः ।
अतिकृच्छ्रव्रतं कुर्वन् द्वादशाहं जितेन्द्रियः ॥
चरेत् कृच्छ्रातिकृच्छ्रञ्च पिबेत्तोयञ्च शीतलम् ।
एकविंशतिरात्रन्तु कालेष्वेतेषु संयतः ॥
प्रथमेऽहनि नक्ताशी द्वितीये मारुताशनः ।
तृतीयेऽहन्युपवसेत् कृच्छ्रपादव्रतं चरेत् ॥
शिखाभ्रूनेत्रलोमानि वर्जयित्वा तु मुण्डितः ।
विनिकृत्तनखः स्नात्वा प्राजापत्यव्रतं चरेत् ॥
गोचर्मशाणचीराणि कुतपं मृगचर्म वा ।
विभ्रच्छीतविघातार्थं तथा दण्डकमण्डलू ॥

---

(1) कल्यं—प्रातः ।
(2) मनु. (11-213) ।
(3) मिता. (पृ—482) ।
(4) मनु. (11-215) ।

स्त्रीशूद्रान् पतितान् दूरे कुर्वन् स्नानमनुव्रतः ।
मधुमांसञ्च लवणं स्त्रियं श्राद्धं विवर्जयेत् ॥
उत्थितो दिवसे तिष्ठेदुपविष्टो निशासु च ।
गृहभित्तिं समासाद्य निद्राविष्टो वसेत्क्षणम् ॥
[1]आपोहिष्ठेति तिसृभिः स्नायात् त्रिषवणं सदा ।
[2]हिरण्यवर्णाः शुचय ऋचो जप्त्वा त्वतन्द्रितः ॥
[3]नमो हमाय मोहमायमहमाय धन्वने ।

तापसाय पुनर्वसवे नमो मौञ्ज्याय श्रौम्र्याय वसुविन्दाय सर्वविदाय नमः । पाराय सुपाराय-महापाराय-पारदाय-परपाराय-पारयिष्णवे नमः । रुद्राय पशुपतये महते देवाय त्र्यम्बकायैकचरायाधिपतये हराय शर्वायेशानायोग्राय वज्रिणे घृणिने कपर्दिने नमः सूर्यायादित्याय नमः । नीलग्रीवाय शितिकण्ठाय नमः । कृष्णाय पिङ्गलाय नमः । ज्येष्ठाय श्रेष्ठाय वृद्धायेन्द्राय हरिकेशायोर्ध्वरेतसे नमः । सत्याय पावकाय पावकवर्णायैकवर्णाय कामाय कामरूपिणे नमः । दीप्ताय दीप्तरूपिणे नमः । तीक्ष्णाय तीक्ष्णरूपिणे नमः । सौम्याय सुपुरुषाय महापुरुषाय मध्यमपुरुषायोत्तमपुरुषाय ब्रह्मचारिणे नमः । चन्द्रललाटाय कृत्तिवाससे नमः ।

कुर्यादनेन मन्त्रेण सदैवानलतर्पणम् ।
उपस्थानञ्च सूर्यस्य प्रत्यहञ्च यथाक्रमम् ॥
आद्ये त्र्यहे वसून् रुद्रान् तर्पयेदुदकेन च ।
आत्मग्रह इति द्वाभ्यां स्थाने प्राधानिके तथा ॥
आज्याहुती द्वे जुहुयाद् वसुभ्यश्च यथाक्रमम् ।
[4]वायुरग्रेति मन्त्रेण दद्यात् स्विष्टकृतं तथा ॥
त्र्यहे द्वितीये रुद्रांश्च तर्पयेदुदकेन च ।

---

(1) शु. यजु. (11–50/52) । "आपोहिष्ठे...कृत्तिवाससे नमः" इत्यन्तोभागः मिता. (पृ–518) । (2) अथर्व. (1–6-33) ।

(3) "नमो...कृत्तिवाससे नमः" इत्यन्तोभागः गौ० धर्म (3–8–12) ।

(4) शु. यजु. (27–31) ।

[1]असंख्यातेति दशभिरन्नाहुतिभिरेव च ।।
त्रिभिस्तथान्नाहुतिभिः सूर्यान् संतर्पयेत्तथा ।
वायुरग्रेति तत्रापि दद्यात् स्विष्टकृतं तथा ।।
चतुर्थेऽपि त्र्यहे देवान् सकृदङ्गिरसस्तथा ।
तर्पयेदुदकेनाथ वपन् सन्ते पया इति ।।
अन्नस्याहुतिभिः षड्भिस्तर्पयेच्च मरुद्गणान् ।
[2]धामन्ते इति मन्त्रेण तथाङ्गिरस एव हि ।।
अन्नाहुत्या च संतर्प्य दद्यात् स्विष्टकृतं ततः ।
जपेद् द्वादशरात्रं तु रौरवे सेति सामनी ।।
व्रते समाप्ते जुहुयात् स्थाने प्राधानिके तथा ।
अष्टावथाज्याहुतयस्त्वन्नस्याहुतयस्तथा ।।
अग्नये वाऽथ सोमाय जुहुयाद् विधिना तथा ।
अग्नीषोमाभ्याञ्च तथा क्रमादिन्द्राय वै तथा ।।
विश्वेभ्यश्चाथ देवेभ्यो ब्रह्मणे च महात्मने ।
प्रजापतय एवाथ सप्तैवान्नाहुतीस्तथा ।।
अग्नये स्विष्टकृते स्वाहेत्यष्टम्याहुतीर्मता ।
पश्चाच्च गोवृषौ दद्याद् ब्राह्मणेभ्यश्च दक्षिणाम् ।।
अयमेव विधिः कार्यः सर्वकृच्छ्रेषु सर्वदा ।

[3]हिरण्यवर्णा इति चतस्र ऋचश्च जप्त्वा स्नायादित्यर्थः । रौरवे सेति सामनी इति । [4]पुनान सोमधारयेत्येनस्यामृचि गीतं सामद्वयम् । विधिनेति चरुं श्रपयित्वा । द्वादशरात्रस्यान्ते चरुं श्रपयित्वा जुहुयाद् । अग्नये स्वाहा । सोमाय स्वाहा । अग्नीषोमाभ्यां स्वाहा । इन्द्राय स्वाहा । विश्वेभ्यो देवेभ्यः स्वाहा । ब्रह्मणे स्वाहा । प्रजापतये स्वाहा । स्विष्टकृते स्वाहा ।

अथ ब्राह्मणतर्पणमिति [5]गौतमवचनात् ।

---

(1) शु. यजु. (16–54)
(2) शु. यजु. (17–99) ।
(3) अथर्व. (1–9–33) ।
(4) साम. (1–6-1–3-1) ।
(5) गौ. धर्म. (3–8-17) ।

[क] अथ प्राजापत्यसमानि

तत्र [1]वसिष्ठाङ्गिरसौ—

अथ चेत् त्वरते कर्त्तुं दिवसं मारुताशनः ।
रात्रौ [2]स्थितो जले व्युष्टः प्राजापत्येन तद् समम् ॥
[3]गायत्र्यष्टसहस्रन्तु जपं कृत्वोत्थिते रवौ ।
मुच्यते पातकैः सर्वैः यदि न [4]भ्रूणहा भवेद् ॥

स्थित उत्थित दिवस इत्यनेन सम्बन्धः । रात्रौ जले व्युष्टः आसीनः । अष्टसहस्रम् अष्टाधिकसहस्रं वा ।

कृच्छ्रोऽयुतं तु गायत्र्या उदवासस्तथैव च ।
धेनुप्रदानं विज्ञाय सममेतच्चतुष्टयम् ॥

अत्रि[5]वसिष्ठोशनसः—

सर्वेषामेव पापानां [6]शोधने समुपस्थिते ।
अभ्यासो दशसाहस्रः गायत्र्याः शोधनं महद् ॥

[7]याज्ञवल्क्यः— वायुभक्षो दिवा तिष्ठेद्रात्रीं नीत्वाऽप्सु सूर्यदृक् ।
जप्त्वा सहस्रं गायत्र्याः शुध्येद् ब्रह्मवधादृते ॥

[8]अभ्यासकृतोपपातकविषयमुपपातकाद्यनेकदोषसमुच्चयविषयं वेति विज्ञानेश्वरः । इति ।

अथ कृच्छ्रपादकृच्छ्रार्धपादोनकृच्छ्राः

[9]तत्रापस्तम्बः—प्रातः सायं त्वहोरात्रं पादं कृच्छ्रस्य तं विदुः ।
सायं प्रातस्तथैवैकं दिनद्वयमयाचितम् ॥

---

(1) वसि. धर्म. (27–17/18) । (2) "जलाशये" इति वसि.धर्म. पाठः ।
(3) "सावित्र्यष्ट" इति वसि.धर्म. पाठ । (4) "ब्रह्महा" इति वसि.धर्म. पाठः ।
(5) वसि. धर्म. (25–12) । (6) "सङ्करे" इति वसि. धर्म पाठः ।
(7) या. स्मृ. (3–311) । (8) मिता. (पृ–477) ।
(9) स्मृ. स. (आप. 9-42/43) ।

(क) विषयोऽयं घङ्च नास्ति ।

दिनद्वये च नाश्नीयात् कृच्छ्रार्धं तद्विधीयते ॥

तथा— सायं प्रातर्दिनार्धं स्यात् पादोनं नक्तवर्जितम् ।

सायं प्रातस्त्र्यहं द्वयं विना कृच्छ्रार्धं स्यात् । तथा नक्तभोजनत्र्यहं विना पादोनं कृच्छ्रं स्यादित्यर्थः । इति ।

अथ ब्रह्मकूर्च्चः

[1]तत्र जाबालिः—अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः ।
पञ्चगव्यं पिबेत् प्रातर्ब्रह्मकूर्च्चविधिः स्मृतः ॥

पराशरः— उपवासमहोरात्रं ब्रह्मकूर्च्चं विनिर्दिशेत् ।
पञ्चगव्यञ्च वर्णेभ्यो विहितं दिव्यचक्षुषा ॥
पवित्रं त्रिषु लोकेषु देवताभिरधिष्ठितम् ।
वरुणश्चैव गोमूत्रे गोमये हव्य[2]वाहनः ॥
दध्नि वायुः समुद्दिष्टः सोमः क्षीरे घृते रविः ।
पयः काञ्चनवर्णायाः श्वेतायाश्चैव गोमयम् ॥
गोमूत्रं च सवर्णायाः नीलायाश्च तथा घृतम् ।
दधि च कृष्णवर्णाया इत्येतत् पञ्चगव्यकम् ॥
गोमूत्र[3]माषकास्त्वष्टौ गोमयस्य तु षोडश ।
क्षीरस्य द्वादश प्रोक्ता दध्नश्च दश कीर्त्तिताः ॥
गोमूत्रवद् घृतं प्रोक्तं तदर्धेन कुशोदकम् ।
एतद्द्रव्यपरिमाणं पवित्रं कायशोधनम् ॥
गायत्र्यादाय गोमूत्रं [4]गन्धद्वारेति गोमयम् ।

---

(1) प्राय. वि. (पृ-515) । (2) हव्यवाहनः—अग्निः ।

(3) माषकपरिमाणं यथाअस्तिना–(स्मृ. सा. पृ-7) ।

यवः स्यात्सर्षपैः षड्भिर्गुञ्जा च स्यात् त्रिभिर्यवैः ।
गुञ्जाभिः पञ्चभिश्चैको माषकः परिकीर्त्तितः ॥

(4) गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

[1]आप्यायस्वेति च क्षीरं [2]दधिक्राव्णस्तथा दधि ॥
[3]तेजोऽसि शुक्रमित्याज्यं [4]देवस्य त्वा कुशोदकम् ॥

[5]**शातातपः**— गोमूत्रैकपलं दद्यादङ्गुष्ठेन च गोमयम् ।
क्षीरं सप्तपलं दद्याद् दध्नस्त्रिपलमुच्यते ॥
आज्यमेकपलं दद्यात् पलमेकं कुशोदकम् ।
पलकं चैवाङ्गुष्ठेन समं घृतं निवेदयेत् ॥
पलमानं विजानीयात् पञ्चगव्यादिके विधौ ॥

[6]**वृद्धशातातपः**—सप्तपत्राः शुभा दर्भा अछिन्नाग्राः समायताः ।
तैः समुद्धृत्य होतव्यं देवताभ्यो यथाविधि ॥

अग्नये स्वाहा । सोमाय स्वाहा । इदं विष्णुर्विचक्रमे ।
अनुवाकेन सावित्र्या प्राजापत्येन चैव हि ।
देवतानामिदं हुत्वा हुतशेषं स्वयं पिबेत् ॥

[7]**शातातपः**— अग्नये स्वाहा । सोमाय स्वाहा । वीरावती इदं विष्णुर्मानस्तोके
गायत्रीं जुहुयात् प्राजापत्येन त्वेदेतद् इति ।

पराशरः— आपोहिष्ठेति चालोड्य प्रणवेन ततः पिबेत् ।
अश्वत्थेन पलाशेन पद्मपत्रेण वा पिबेत् ॥
अथवा ताम्रपात्रेण ब्रह्मपात्राणि तानि वै ।
[8]यत्त्वगस्थिगतं पापं देहे तिष्ठति देहिनाम् ।
ब्रह्मकूर्चो दहेत् सर्वं शुष्कमग्निरिवेन्धनम् ॥

[9]**वृद्धशातातपः**—आलोड्य प्रणवेनैव निर्मन्थ्य प्रणवेन च ।
उद्धृत्य प्रणवेनैव पिबेत्तु प्रणवेन तु ॥

---

(1) शु. यजु. (12–112) । (2) शु. यजु. (23-32) ।
(3) शु. यजु. (22-9) । (4) शु. यजु. (22–1) ।
(5) स्मृ. स. (वृद्धशा. श्लो 6–8) । (6) स्मृ. स. (वृद्धशा. श्लो. 8) ।
(7) स्मृ. स. (वृद्धशा. श्लो. 9) । (8) स्मृ. स. (वृद्धशा. श्लो. 12) ।
(9) स्मृ. स. (वृद्धशा, श्लो 10–11) ।

पौर्णमास्यां कृतस्नानः सुगुप्ते सरितां तटे ।
पुंश्चलीशूद्रपतितान् दूरे परिहरन् सदा ॥
देवेभ्यश्च पितृभ्यश्च सम्यक् दत्त्वा तिलोदकम् ।
आयातु भगवान् ब्रह्म स [1]मुनिर्हंसवाहनः ॥
तपो यज्ञव्रतानान्तु भर्ता देवश्चतुर्मुखः ।
आहूय [2]पद्मयोनिन्तु मन्त्रेणानेन तत्र च ॥
देवस्य त्वेति मन्त्रेण श्रद्धया तं समर्च्चयेत् ।
अर्घ्यैर्धूपैःपवित्रैश्च मालया कुसुमैः फलैः ॥
मूलैर्बल्युपहारैश्च नैवेद्यैर्विविधैरपि ।
दीपदानैर्यथाशक्त्या जपैश्च स्तुतिमङ्गलैः ।
तदग्रे पञ्चगव्यं तु कुर्वीत सुसमाहितः ।

तथा— उदङ्मुखस्त्रिराचम्य ततो गच्छेच्च तद् गृहम् ।
तत्राग्निहोत्रं प्राग्घुतं कृत्वा दद्याच्च दक्षिणाम् ॥
ब्राह्मणेभ्यः यथाशक्त्या भोजनञ्च मनोहरम् ।
ब्रह्माणं विश्वजननं प्रीणयन्ति जगद्गुरुम् ॥
सर्ववाधिकृताः सन्ति ततस्ते वैदिके विधौ ।
गवां वर्णास्तु सुलभाः सन्ति देशेषु यत्र च ॥
तत्र वर्णविभागेन पञ्चगव्यानि चाहरेत् ।
वर्णालाभे न दोषोऽस्ति मात्राहीनं विवर्जयेत् ॥

यमः— अलाभे सर्ववर्णानां ग्राह्यमेकं तु कापिलम् ॥ इति ।

क

अथ चान्द्रायणम्

तत्र जाबालिः—एकैकं वर्धयेद् ग्रासं शुक्ले कृष्णे च ह्रासयेत् ।
अमावास्यां न भुञ्जीत यवमध्यञ्चरन् द्विजः ॥

---

(1) हंसवाहनः—ब्रह्मा । (2) पद्मयोनिः—ब्रह्मा ।

(क) विषयोऽयं घङन्त्र नास्ति ।

एकैकं ह्रासयेत् कृष्णे शुक्ले चैव तु वर्धयेत् ।
पौर्णमास्यां न भुञ्जीत पिपीलतनुमध्यमम् ॥

एकैकं वर्धयेदिति । शुक्लप्रतिपदि ग्रासमेकमासाद्य द्वितीयादौ द्वित्रिग्रासक्रमेण पौर्णमास्यां पञ्चदशग्रासाः सम्पद्यन्ते । कृष्णपक्षे प्रतिपदादौ चतुर्दश त्रयोदशेत्येवं ह्रासेनामावास्यायां ह्रासस्याभावाद् उपवासो भवतीत्यर्थः । एकैकं ह्रासयेदिति । कृष्णप्रतिपदि चतुर्दशग्रासानारभ्य ह्रासक्रमेणामावास्यायामुपवासः । शुक्लप्रतिपदि च एको ग्रासो इत्येवं वृद्धिक्रमेण पौर्णमास्यां पञ्चदशग्रासाः सम्पद्यन्ते इति पिपीलकतनुमध्यमं चान्द्रायणमित्यर्थः । एतदपि प्रकारान्तरेणाह

[1]वसिष्ठः— अथ चान्द्रायणविधिः ।

मासस्य कृष्णपक्षादौ ग्रासानद्याच्चतुर्दश ।
ग्रासापचयभोजी सन् पक्षशेषं समापयेत् ॥
तथैव शुक्लपक्षादौ [2]ग्रासं भुञ्जीत चापरम् ।
ग्रासोपचयभोजी सन् पक्षशेषं समापयेत् ॥
इन्द्रशुद्धा ऋचश्चापः प्रविश्य मनसा जपन् ।
अत्रैव गायेत् सामानि अपि वा व्याहृतीर्जपेत् ॥

इन्द्रशुद्धपदवत्य 'एतो न्विन्द्र', तवामशुद्धमित्याद्याः । कृष्णपक्षादाविति । पौर्णमास्यां पञ्चदशग्रासान् भुक्त्वा पक्षशेषं समापयेत् । पौर्णमास्यामुपोष्येत्यर्थः । तथा च [3]गौतमः— पौर्णमास्यां पञ्चदशग्रासान् भुक्त्वा एकैकापचयेनापरपक्षमश्नीयात् । अमावास्यायामुपोष्यैकोपचयेन पूर्वपक्षम् ।

शङ्खलिखितौ—अमावास्यायां पञ्चदशपिण्डान् अश्नीयात् । कुक्कुटाण्डप्रमाणानङ्गुल्यग्रेषु व्यवस्थितानेकैकं गायत्र्याऽभिमन्त्र्य भूयो भूयः प्राश्नीयाद् ।

एकवासाश्चरेद् भिक्षां स्नात्वा वासो न पीडयेत् ।
गायत्र्या दशसाहस्रमाह्निक सर्वपापेषु ॥

---

(1) वसि. धर्म. (23-45/46), मिता. (पृ-520) ।

(2) "ग्रासमेकं तु भक्षयेत्" इति मुद्रित वसि. धर्म. पाठः ।

(3) गौ. धर्म. (3-9-12) ।

एतच्चान्द्रायणं न्यायतश्चरेत् ।
भूयो भूयो प्राश्नीयादिति । प्राणाय त्वेत्यादि मन्त्रैरित्यर्थः । तथा च [1]बौधायनः—

अथातश्चान्द्रायणकल्पं व्याख्यास्यामः । शुक्लचतुर्दशीमुपवसेत् । कृष्णचतुर्दशीं वा । केशश्मश्रूणि नखलोमानि वापयित्वा, अपि वा श्मश्रूलो वा, अहते वाससी वसानः सत्यं ब्रूवन् आवसथमभ्युपेयात् । तस्मिस्तस्य सकृत् प्रणीतोऽग्निरारणेयो निर्मन्थ्यो वा । ब्रह्मचारी सुहृत् प्रैषार्थोपकल्पी स्यात् । हविष्यश्च व्रतोपायनम् । अग्निमुपसमाधाय सपरिस्तीर्याग्निमुखान् कृत्वा पक्वान्नं जुहोति । अग्नये या तिथिः स्यान्नक्षत्राय च सदेवतायात्र गोरमतेति चान्द्रमसीं पञ्चमीम् । द्यावापृथिवीभ्यां षष्ठीमहोरात्राभ्यां सप्तमीं रौद्रीमष्टमीं सौरीं नवमीं वारुणीं दशमीम् । ऐन्द्रामेकादशीं वैश्वदेवीं द्वादशीमित्यथापराः समामनन्ति । दिग्भ्यश्च सदेवताभ्योऽन्तरिक्षाय सदेवताय नवो नवो भवति जायमान इति ।

सौविष्टकृतीं हुत्वाऽथैतद् हविरुच्छिष्टं कांस्ये वा चमसेनोद्धृत्य हविष्यैर्व्यञ्जनैरुपसिच्य पञ्चदशपिण्डान् प्रकृतिस्थान् प्राश्नाति । प्राणाय त्वेति प्रथमम्, अपानाय त्वेति द्वितीयं, व्यानाय त्वेति तृतीयम्, उदानाय त्वेति चतुर्थं, समानाय त्वेति पञ्चमम् । यदा चत्वारो द्वाभ्यां पूर्वं यदा त्रयो द्वाभ्यां पूर्वं । यदा द्वौ त्रिभिः पूर्वं द्वाभ्यामेवोत्तरमेकम् । सर्वैः समस्तैर्निग्राभ्यास्थेत्यपः पीत्वाऽऽज्यस्य जुहोति । प्राणापान व्यानोदानसमाना मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूत्यासंस्वाहा । वाङ्मनश्चक्षुः श्रोत्रजिह्वाघ्राणरेतोबुद्धयाकूतिसंकल्पा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूत्यासंस्वाहा । त्वक्चर्ममांसरुधिरस्नायुमेदोमज्जास्थीनि मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूत्यासंस्वाहा । शिरः पाणिपादपार्श्वपृष्ठोदरजंघाशिश्नोपस्थाय वो मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूत्यासंस्वाहा । इति सप्तभिरनुवाकैः । जयाप्रभृतिसिद्धमाधेनुवरप्रदानात् । सौरीभिरादित्यमुपतिष्ठेत चान्द्रमसीति चन्द्रमसम् । अग्ने त्वं सुजागृहीति संविशन् यजति । त्वमग्ने व्रतपा असीति प्रबुद्धः । स्त्रीशूद्रं नाभिभाषेत । मूत्रपुरीषौ नोद्वीक्षेत । अमेध्यं दृष्ट्वा जपत्यबद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मां मा हासीरिति । प्रथमायापरपक्षस्य

---

(1) स्मृ. स. (बौधा. स्मृ. तृतीयप्रश्नेः अष्टमेऽध्याये) ।

चतुर्दश ग्रासान् । एवमेकापचयेनामावास्यायां ग्रासो न विद्यते । प्रथमायां शुक्लप्रतिपदि पूर्वपक्षस्यैको द्वौ द्वितीयस्यामेवमेकापचयेन पौर्णमास्यां पञ्चदशग्रासाः । पौर्णमास्यां स्थालीपाकस्य जुहोतीत्यग्नये या तिथिः स्यान्नक्षत्रेभ्यः सदैवतेभ्य पुरस्ताद् स श्रवणादभिजितः सदैवतस्य हुत्वा गां ब्राह्मणेभ्यो दद्यात् । तदेतच्चान्द्रायणं पिपीलिकामध्यं विपरीतं यवमध्यम् । अहते नूतने । सकृत् प्रणीतः । कुतश्चिल्लौकिकोऽग्निरानीय पञ्चभूसंस्कारान् कृत्वा स्थापितः । आरणेयो निर्मन्थ्यो वेति । अरणिद्वयेन निर्मन्थ्य वा स्थापितः । ब्रह्मचारी सुहृत् प्रैषार्थोपकल्पी स्यादिति । ब्रह्मचारी स्त्रियमृतावप्यगच्छन् । सुहृत् प्रैषार्थोपकल्पः प्रयोजनकरो यस्य चान्द्रायणकर्त्तुरिति विग्रहः । व्रतोपायनं भोजनसाधनम् । अग्निमुखान् कृत्वा । आङ् अभिविध्यौ मन्त्रसाध्या द्वादशाहुतयः । अग्निमुखास्तत्पर्यन्तं कृत्वा । पक्वान्नं स्थालीपाकादवदायेति शेषः । या तिथिः सा क्रमप्राप्ता या तिथिर्भवेत्तस्यै । तस्यां तिथौ च यन्नक्षत्रं तस्मै । तथा तन्नक्षत्राधिदेवतायै जुहोतीत्यनुषङ्गः । अत्राह गोरमतातेति मन्त्रेण चन्द्रदैवत्यां पञ्चमीमाहुतीं जुहोतीत्यन्वयः । अपरा आहुतीः अन्तरिक्षदेवता वायुरात्मा वा । उच्छिष्टं हुतशिष्टम् । प्रकृतिस्थान्–भावदोषकृताधिक्यरहितान् । यदा चत्वार इति । यस्मिन् दिने चत्वारो ग्रासाः भवन्ति तदा प्रथमं ग्रासं द्वाभ्यां मन्त्राभ्यां प्राणायापानाय त्वा इत्याभ्यां प्राश्नाति । इतरत्रयमवशिष्टमन्त्रत्रयेण । यदा त्रय इति । यदा त्रयो ग्रासाः तदा द्वाभ्यां द्वाभ्यां प्रथमद्वितीयौ तृतीयन्तु समानायत्वेत्येकेन मन्त्रेण । यदा द्वाविति । यस्मिन् दिने द्वौ ग्रासौ तदा प्रथमं ग्रासं त्रिभिर्मन्त्रैर्द्वाभ्यां चोत्तरं ग्रासं प्राश्नाति यदैको ग्रास एकं सर्वैः समस्तैरिति । यदा एको ग्रासस्तदा तं प्राणाय त्वाऽपानाय त्वा व्यानाय त्वोदानाय त्वा समानाय त्वा इति सर्वमन्त्रैः प्राश्नातीत्यन्वयः । निग्राभ्याः स्थेति । निग्राभ्यां स्थदेव श्रुति आयु मे तर्पयत्यनेन । जया प्रभृतीत्यादि । जया होमाश्चित्तं च चित्तिश्चेत्यादिसाध्याः । अभ्यात्तानहोमाः । तथा ऋताऽषाडित्यादि मन्त्रसाध्या राष्ट्रभृद् होमा उच्यन्ते । तेन यद् धेनुरूपवरप्रदानपर्यन्तं जपादिसिद्धं तदनु कर्त्तव्यमिति लक्ष्मीधरः । सौरीभिरुद्वयं तमसस्परीत्यादिभिरित्यर्थः । चान्द्रमसीभिर्नवो नवो भवति जायमान इत्येवं प्रकाराभिः । प्रथमायां प्रतिपत्तिथौ या तिथिः स्यादिति पौर्णमास्येन ।

अयमर्थ—अग्नये पौर्णमास्यै तिथये । श्रवणानक्षत्राय पूर्वेभ्यः सर्वनक्षत्रेभ्यः । तद्देवताभ्यः । अभिजिन्नक्षत्राय तद्देवतायै च स्थालीपाकेन होमं कृत्वा ब्राह्मणेभ्यो गां दद्यादिति । अग्निमुपसमाधाय परिस्तीर्याग्निमुखान् कृत्वा पक्वान्नं जुहोतीत्यादि होमविधिश्च अन्नभोजनपक्षे चरुव्यतिरिक्तहविष्यभोजनपक्षेऽपिबोद्धव्यः । एतच्च यमवचनेन व्यक्तीभविष्यति । भोजनञ्च "रात्रावेव तृतीये सवने चान्द्रमसं स्थालीपाकं श्रपयित्वा युक्तेऽग्नौ जुहोतीत्यादि हारीतवचनात् ।

यमः— सर्वशुद्धस्य मेध्यस्य पातने पावनस्य च ।
चान्द्रायणपवित्रस्य विधानं वै यमोऽब्रवीत् ॥
चान्द्रायणविधिं श्रुत्वा तपोऽभ्याससमन्विताः ।
अशीतिसम्मिता एते मुनयः शंसितव्रताः ॥
पौर्णमास्यामुपेतश्च ब्राह्मणः सुसमाहितः ।
केशश्मश्रूणि लोमानि कक्षोपस्थश्च वापयेत् ॥
वपनं विधिवत् कृत्वा गृह्णीयाद् व्रतमादितः ।
मधु मांसञ्च लवणं शुक्तञ्च परिवर्जयेत् ॥
स्त्रीशूद्रं नाभिभाषेत नक्तमासीत संयतः ।
पालाशं धारयेद्दण्डं शुचिं मौञ्जीञ्च मेखलाम् ॥
यज्ञोपवीतकरणं धारयेन्नियतः शुचिः ।
शाणीचीरञ्च कुतपं मार्गं वा वास उच्यते ॥
सर्वाण्यहानि संतिष्ठेद् स्थानासनवृतव्रतः ।
स्थानासनाभ्यां विहरेद् ब्रह्मान्तरिक्षमाश्रयः ॥

गोमयेन गोचर्ममात्रं स्थण्डिलमुपलिप्योल्लिख्याभ्युक्ष्याग्निं प्रतिष्ठाप्य ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य प्रागग्रोदगग्रान् दर्भानास्तीर्याघारावाज्यभागौ हुत्वा महाव्याहृतिभिराज्यं जुहुयात् । व्रतपतये ऋतं सत्यं प्रजापतिमिन्द्रमग्नीषोमौ बृहस्पतिञ्च जपेत् ।

एतानेवमर्चयित्वा महाव्याहृतिभिस्तथा ।
ॐकारपूर्वा विख्यातास्ततः पूर्वा पृथक् पृथक् ॥

ऋतश्च सत्यश्चाभीद्धात् पूर्वोक्तं पापनाशनम् ।
ऋतश्च सत्यं गायत्रीमित्येतानि सदा जपेत् ॥
दशसाहस्रकं वाऽपि गायत्रीमाह्निकं जपेत् ।
तत्रैव गायेत् सामानि अथवा व्याहृतीर्जपेत् ॥
गायत्र्या चाक्षमालायां दशसाहस्रमाह्निकम् ।
ब्रह्मणो हृदयश्चैव कल्मषाणां प्रमोचनम् ॥
वृक्षमूलनिकेतः स्याद्रात्रौ वीरासनो भवेत् ।
आर्द्रवासाश्चरेद् भैक्ष्यं स्नात्वा वस्त्रं न पीडयेत् ॥
चरुं वा श्रपयेन्नित्यं गोभ्यो निष्क्रान्तपावकैः ।
पायसं शाकमन्नं वा भैक्षं वा वाग्यतश्चरेत् ॥
आयसं तैजसं पात्रं [1]चक्रोत्पन्नं विवर्जयेत् ।
असुराणां हि तत् पात्रं देवपात्रमचक्रजम् ॥
तथैवार्यकृतालाभे पुटं कुर्वीत वैदिकम् ।
यज्ञियानान्तु वृक्षाणां तेषां पत्रैः स्वतश्च्युतैः ॥
न हसेन्न निरीक्षेत नाभिभागे परस्त्रियम् ।
गोदोहमात्रं तिष्ठेच समानां परमं व्रजेत् ॥
तद्विधेषु चरेद् भिक्षां नियतेषु द्विजन्मसु ।
अग्नयो यत्र हूयन्ते ब्रह्म वा यत्र पठ्यते ॥
उपादाय ततो भिक्षां निक्षिप्य च समाहितः ।
प्रयतः कृतशौचस्तु भैक्ष्यमभ्युक्षयेत्ततः ॥
आदित्याऽभिमुखो भूत्वा गुरवे सन्निवेदयेत् ।
अनुज्ञातस्तु तत्कुर्यादेवं च गुरुपूजनम् ॥
शाकं वा यदि वा पत्रं मूलं वा यदि वा फलम् ।
संकल्पयेद् यदाहारस्तेनाग्निं जुहुयात् सदा ॥
आहारार्थं द्विजे दत्त्वा त्रिविधे नियमाश्रिते ।

---

(1) चक्रोत्पन्नं—कुम्भकारचक्रनिर्मितं पात्रम् ।

ग्रासं शेषेण कुर्वीत यो ग्रासः प्रविशेन्मुखे ।।
कुक्कुटाण्डप्रमाणन्तु ग्रासं कुर्यात् समाहितः ।
अङ्गुल्याग्रस्थितं ग्रासं गायत्र्या चाभिमन्त्रयेत् ।।
प्राशयित्वा चोपस्पृश्य पुनरेवाभिमन्त्रयेत् ।
न च विख्यापयेत् पिण्डं रसं नास्वादयेद् बुधः ।।
न निन्द्यान्न प्रशंसीत स्वाद्वस्वादु च भक्षयेत् ।।
प्राङ्मुखो नित्यमश्नीयाद् वाग्यतोऽन्नमकुत्सयन् ।।

शाणी— शणसूत्रनिर्मिता शाटी । चीरं— तरुत्वक् । कुतपो— नेपालकम्बलः । मार्गं—मृगचर्म ।

इति चान्द्रायणविधिः ।

अथ व्रतप्रतिनिधिः[क]

तत्र [1]विष्णुः— पक्षिवधे नक्ताशी स्याद्रूप्य[2]माषकं वा दद्यात् । रूप्यमाषकदानवचनं नक्तभोजनस्य प्रतिनिधिरित्यवगन्तव्यम् । रूप्यमाषो रूप्यरत्तिकाद्वयात्मकः । यदाह [3]याज्ञवल्क्यः—

द्वे कृष्णले [4]समधृते विज्ञेयो रूप्यमाषकः ।
जालसूर्यमरीचिस्थं त्रसरेणूरजः स्मृतम् ।।
तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते ।
गौरस्तु ते त्रयः षट् ते यवो मध्यश्च ते त्रयः ।।
कृष्णलः पञ्च ते माषस्ते सुवर्णस्तु षोडश ।।

हारीतः— उपवासक्रियाऽशक्तौ षट्त्रिंशद् भोजयेद् द्विजान् ।
दद्याद् धेनुं क्रियाऽशक्तौ श्रुतिरेषा सनातनी ।।

---

(1) वि. स्मृ. (50–43/44) (2) माषमिति विष्णुस्मृ. ।

(3) या. स्मृ. (1–362/364) ।

(4) रूप्यमाषो धरणं षोडशैव ते इति या. स्मृ. पाठः ।

(क) विषयोऽयं घङच नास्ति ।

प्राजापत्यक्रियाऽशक्तौ धेनुं दद्याद् विचक्षणः ।
धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः ॥
निष्कं निष्कार्धपादं वा पञ्चकार्षापणानि वा ।
त्रिकार्षापणान्यथवा शक्तितो मूल्यकल्पना ॥
महासान्तपने तिस्रो धेनुः सान्तपने तथा ।
पञ्च चान्द्रायणे प्रोक्ताश्चतस्रो वाऽपि धेनवः ॥
पराके द्वे तु निर्दिष्टे तप्तकृच्छ्रे तथैव च ।
द्वेऽतिकृच्छ्रे समाख्याते धेनुः पञ्चपुराणिका ॥

निष्कं—दीनारः । विष्णुगुप्तः—

दीनारो रूप्यकैरष्टाविंशत्या परिकीर्त्तितः ।
सुवर्णस्य सप्ततितमो भागो रूप्यक इतीष्यते ।

अष्टचिह्नकं निष्कमिति दर्शितम् । पञ्चेति ऋषिचान्द्रायणविषयम् । तत्राहाराल्पत्वेन क्लेशगौरवात् । तथा च [1]वृहद्विष्णुः—

त्रीन् त्रीन् पिण्डान् समश्नीयान्नियतात्मा दृढव्रतः ।
हविष्यान्नस्य वै मासमृषिचान्द्रायणं चरन् ॥
चान्द्रायणं त्रिभिः कृच्छ्रैः पराकं तु द्वयेन तु ॥

इति कृच्छ्रत्रयविधानं यतिचान्द्रायणशिशुचान्द्रायणविषयम् । तत्रोपवासाभावे क्लेशाल्पत्वात् । तथा च [2]विष्णुः—

अष्टौ ग्रासान् प्रतिदिवसं मासमश्नीयात् स यतिचान्द्रायणः ।

[3]मनुः— चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः ।
चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं चरन्[4] ।

इति व्रतप्रतिनिधिः ।

---

(1) यम. इति (मिता. पृ-521) ।

(2) विष्णु स्मृ. (47-7) ।

(3) मनु. (11-219) ।

(4) स्मृतमिति मुद्रितमनुस्मृतौ ।

[क]

अथ दानप्रतिग्रहे कर्त्तव्यतानिर्णयः

[1]तत्राग्नेयपुराणे—अब्दसोमार्कग्रहणसंक्रान्त्यादौ सुकालके ।
गङ्गागयाप्रयागादौ तीर्थदेशे महागुणे ॥
तथा चामुकगोत्राय तथा चामुकशर्मणे ।
वेदवेदाङ्गयुक्ताय पात्राय सुमहात्मने ॥
यथा नाम दद्याद्द्रव्यं विष्णुरुद्रादिदैवतम् ।
पुत्रपौत्रधनैश्वर्यपत्नीधर्माभिवृद्धये ॥
कीर्त्तिविद्यामहाकामसौभाग्यारोग्यवृद्धये ।
सर्वपापोपशान्त्यर्थं स्वर्गार्थं भुक्तिमुक्तये ॥
एतत् तुभ्यं सम्प्रददे प्रीयतां मे हरिः शिवः ।
दिव्यान्तरिक्षभौमस्य उत्पातादिविघातकृत् ॥
धर्मार्थकाममोक्षाद्यैर्ब्रह्मलोकप्रदोऽस्तु मे ॥

अनेन देशकाल देशकालगोत्रवेदादियुक्तसम्प्रदान-नामकीर्त्तन-फलाभिसन्धानस्य देवताद्रव्योच्चारणपूर्वकं तुभ्यमहं सम्प्रददे इत्युक्त्वा दातव्यमिति सिद्धम् ।

बृहद्वसिष्ठः— [2]नामगोत्रे समुच्चार्य सम्प्रदानस्य चात्मनः ।
कन्यादाने तु पुरुषत्रयम् ॥

अतो वचनात् सम्प्रदानानन्तरं दातुर्नामगोत्रकीर्त्तनमायातम् ।

यमः— योऽर्चितं प्रतिगृह्णाति योऽर्च्चयित्वा प्रयच्छति ।
तावुभौ वसतः स्वर्गे विपरीते विपर्ययः ॥

अर्चितं—द्रव्यम् । अर्च्चयित्वा ब्राह्मणमिति शेषः । ब्राह्मणाऽर्च्चने मन्त्र उक्तः—
स्नात्वाऽभ्यर्च्च्य व्याहृतिभिर्दद्याद्दानं कुशोदकम् ।

उदकस्तुतिमभिधाय हारीतः— तस्मादद्भिरवोक्ष्य दद्यादालभ्य वा ।

अवोक्ष्य—अभ्युक्ष्य । आलभ्य—सोदकेन पाणिना स्पृष्ट्वा ।

---

(1) अग्नि. पु. (209–57/62) । (2) अग्नि. पु. (209/22) ।

(क) विषयोऽयं घङ्च नास्ति ।

विष्णुधर्मोत्तरे—द्रव्यस्य नाम गृह्णीयाद्ददानीति तथा वदेत् ।
तोयं दद्यात् तथा दाता दाने विधिरयं स्मृतः ।।

तोयमित्युपलक्षणम् । तथा च श्लोकगौतमः—

अन्तर्जानु करं कृत्वा सकुशं तु तिलोदकम् ।
फलं समभिसन्धाय प्रदद्याच्छ्रद्धयान्वितः ।।

प्रचेताः— दक्षिणहस्तमध्ये ब्राह्मणस्याग्नेयं तीर्थम् ।।
आग्नेयेन गृह्णीयात् ।

आग्नेये— स्नातः सम्यगुपस्पृश्य गृह्णीयात् प्रयतः शुचिः ।
विष्णुदेवमिदं द्रव्यं प्रतिगृह्णामि वै वदेत् ।।

विष्णुदेवमिति । देयद्रव्यदेवताया उपलक्षणम् ।

नामगोत्रं समुच्चार्य प्राङ्मुखो देयकीर्त्तनात् ।
उदङ्मुखाय विप्राय दत्त्वाऽन्ते स्वस्ति वाचयेत् ।।

[2]विष्णुधर्मोत्तरे—प्रतिग्रहीता सावित्रीं सर्वत्रैव तु कीर्त्तयेत् ।

व्यासः— सर्वेषामेव दानानां सुवर्णं दक्षिणेष्यते ।

आग्नेये— यथानामसगोत्राय विप्रायामुकशर्मणे ।
अस्य दानप्रतिष्ठार्थं सुवर्णं दक्षिणां ददेत् ।।

लिङ्गपुराणे— नित्यं श्राद्धं देवपूजा सर्वमेतददक्षिणम् ।
अदक्षिणा तथा च स्यादनवस्थाप्रसगंतः ।।
सत्त्वोत्सृष्टो प्रदातानि दक्षिणारहितानि वै ।।

[3]विष्णुधर्मोत्तरे—

प्रतिग्रहं पठेदुच्चैः प्रतिगृह्य द्विजोत्तमात् ।
मन्दं पठेत्तु राजन्यादुपांशु च तथा विशः ।।
मनसा तु तथा शूद्रात् स्वस्तिवाचनिकं तथा ।

---

(1) विष्णुधर्मोत्त. (3-301-90) ।

(2) विष्णुधर्मोत्त. (3-301-10) ।

(3) विष्णुधर्मोत्त. (3-301/12-14) ।

सोंकारं ब्राह्मणे कुर्यान्निरोकारं महीपतौ ॥
उपांशु च तथा वैश्ये स्वस्ति शूद्रे प्रकीर्त्तितम् ॥

इति दानप्रतिग्रहे कर्त्तव्यतानिर्णयः ॥

क
अथ विष्णुदैवतभूमिदानम्

तत्र स्कन्दपुराणे—

यस्तु भूमिं प्रयच्छेत्तु ब्राह्मणाय महात्मने ।
स सर्वलोके सुखी स्याद् विमानेन सुवर्चसा ॥
बहून्यब्दसहस्राणि चरते कामरूपवान् ।
यदि मानुष्यमायाति नरः कालविपर्ययात् ।
तत्र कामदुघा तस्य मही भवति सर्वतः ॥

महात्मनेऽत्यन्तदानपात्राय । दानवाक्ये प्रियदत्तां भूमिमिति वाच्यम् । तथा च [1]महाभारते— नामास्याः प्रियदत्तेति गुह्यं देव्याः सनातनम् ।
दानं वाऽप्यथवाऽऽदानं नामास्याः प्रथमं प्रियम् ॥

प्रदक्षिणीकरणं स्वीकारः । विष्णुधर्मे—

सुवर्णदानं गोदानं पृथिवीदानमेव च ।
एतत् प्रयच्छमानो हि सर्वपापैः प्रमुच्यते ॥

विष्णुधर्मोत्तरे— गृहभूमिं नरो दत्त्वा वसूनां लोकमाप्नुयात् ।

गृहभूमिं गृहकरणयोग्यभूमिम् ।

तथा— उद्यानभूमिं दत्त्वा तु गन्धर्वैः सह मोदते ।

वृद्धवसिष्ठः— यत् किञ्चित् कुरुते पापं जन्मप्रभृति मानवः ।
अपि गोचर्ममात्रेण भूमिदानेन शुध्यति ॥
गवां शतं वृषश्चैको यत्र तिष्ठेदतन्द्रितः ।
तद्धि गोचर्ममात्रन्तु प्राहुर्वेदविदो जनाः ॥

---

(1) महा. अनु. (62-12) ।

(क) विषयोऽयं घङच नास्ति ।

तथा— दशहस्तेन वंशेन दशवंशा समं ततः ।
पञ्च चाभ्यधिकं दद्यात्तु गोचर्मं उच्यते ॥

पञ्चाभ्यधिकमिति एकस्मिन् पार्श्वे दशवंशाधिकं वेति ।

दानसागरे— उभयपार्श्वे पञ्चवंशाधिकम् ।

योगीश्वरदानविवेके—

[1]यत् किञ्चित् कुरुते पापं पुरुषो वृत्तिकर्शितः ।
अपि गोचर्ममात्रेण भूमिदानेन शुध्यति ॥
दशहस्तेन दण्ड़ेन त्रिशद्दण्डान्निवर्त्तनम् ।
अन्ये च दशविस्तारा एतद् गोचर्मं उच्यते ॥
सप्तहस्तेन दण्ड़ेन त्रिशद्दण्डा निवर्त्तनम् ।
त्रिभागहीनं गोचर्ममानमाह प्रजापतिः ॥

इति विष्णुदैवतभूमिदानम् ।

क

अथ प्रजापतिदैवतधान्यदानम्

तत्र [2]मनुः— "धान्यदः शाश्वतं सौख्यं" प्राप्नोतीति सम्बन्धः ।
[3]मुष्टिग्रहणं स्वीकारः । [4]विष्णुधर्मोत्तरे—

धान्यानामुत्तमं दानं कथितं द्विजपुङ्गवाः ।
धान्येभ्योऽपि परं धान्यं रक्तशालिः प्रकीर्त्तितः ॥
रक्तशालिं नरो दत्त्वा [5]स्वर्गलोके महीयते ।
तथा दत्त्वा सुगन्धांश्च गन्धर्वैः सह मोदते ॥

---

(1) मनु. (4-229), महा. अनु. (62-19) ।

(2) मनु. (4-232) ।

(3) प्रतिग्रहकाले प्रतिग्रहीत्रा द्रव्यसमुदायात् मुष्टिमात्रग्रहणेन समुदायद्रव्यस्वीकारो भवतीत्यर्थः ।

(4) विष्णुधर्मोत्त. (3-314/1-10) । (5) सूर्यं इति विष्णुधर्मो. ।

(क) विषयोऽयं घङच नास्ति ।

कलमानां प्रदानेन शक्रलोके महीयते ।
महाशालेः प्रदानेन वसूनां लोकमाप्नुयात् ॥
काष्ठशालिं तथा दत्त्वा अलकायां प्रमोदते ।
व्रीहिणां चान्यधान्यानां प्रदाने स्वर्गमाप्नुयात् ॥
यवप्रदानेन नरः स्वर्गलोके महीयते ।
तथा गोधूमदानेन वसूनां लोकमाप्नुयात् ॥
प्रियो भवति लोकस्य प्रियङ्गुं यः प्रयच्छति ।
ददाति यस्तु श्यामाकं तस्य प्रीयन्ति देवताः ॥
अन्येषां शुकधान्यानां प्रदाननिरतो नरः ।
स्वर्गलोकमवाप्नोति नात्र कार्या विचारणा ॥
मुद्गदः शक्रलोक तु यमलोकं तु माषदः ।
यथेष्टं लोकमाप्नोति यथा विप्रस्तिलप्रदः ॥
षष्टिकानां प्रदानेन लोकं नैर्ऋतकं लभेत् ।
[1]सतीनं चणकं दत्त्वा वारुणं लोकमाप्नुयात् ॥
वायव्यश्च मसूराणि राजमाषाणि धान्यदम् ।
अन्येषां शिम्बिधान्यानां दानात् स्वर्गमवाप्नुयात् ॥

सतीनः—कलायः । षष्टिको—वनमुद्गः ।

इति प्रजापतिदैवतधान्यदानम् ।

अथप्रजापतिदैवततिलदानं

तत्र विष्णुधर्मोत्तरे—

लवणस्य प्रदातारस्तिलानां सर्पिषस्तथा ।
तेजस्विनोऽभिजायन्ते भोगिनश्चिरजीविनः ॥

प्रार्थनावाक्यम्—विष्णुदेहोद्भवाः पुण्याः सर्वपापहरास्तिलाः ।
मम शान्तिं प्रयच्छन्तु संसारार्णवतारकाः ।

---

(1) "सचीण" इति विष्णुधर्मोत्तरे ।

वराहपुराणे— तिलान् गाश्च हिरण्यञ्च पृथिवीं चापि शाश्वतीम् ।
ब्राह्मणेभ्यः प्रयच्छन्ति न गच्छन्ति न संशयः ॥

न गच्छन्ति यमालयमिति शेषः । महाभारते—

तिलपूर्णं तु यो दद्यात्ताम्रपात्रं द्विजातये ।
सहेमदक्षिणं शक्त्या सर्वपापैः प्रमुच्यते ॥

सहेमदक्षिणमिति । हेम्ना दक्षिणया च सहितमित्यर्थः । एतेन सकाञ्चनतिलपात्रदानमायातम् ॥ इति प्रजापतिदैवततिलदानम् ।

अथ सोमदैवतलवणदानम्[क]

तत्र विष्णुधर्मोत्तरे—

लवणस्य प्रदातारस्तिलानां सर्पिषां तथा ।
तेजस्विनोऽभिजायन्ते भोगिनश्चिरजीविनः ॥

विष्णुधर्मोत्तरे— सर्वान् कामानवाप्नोति नरो वै लवणप्रदः ।
सचन्द्रलोकमासाद्य मोदते शरदां शतम ॥

इति सोमदैवतलवणदानम् ।

अथ सोमदैवतदुग्धदधिदानम्

तत्र विष्णुः— क्षीरं दधि घृतं चापि मधु तैलं गुडं तथा ।
ये प्रयच्छन्ति विप्रेभ्यः परां मुक्तिमुपागताः ॥
ते वृषैरश्वयानैश्च दिव्यस्रग्दामभूषितैः ।
उपगीयमाना गन्धर्वैर्यान्ति शक्रपुरं नराः ॥ इति ।

अथ विष्णुदैवतघृतदानम्

तत्र विष्णुः— मधुघृततिलदानेनारोग्यम् ।

यमः— तथा घृतप्रदानेन दीर्घं विन्दति जीवितम् ।
फलकामो यशस्कामस्तेजस्कामश्च नित्यदः ॥
घृतं दद्याद् द्विजातिभ्यः पुरुषः शुचिरात्मवान् ॥ इति ।

(क) विषयोऽयं घङच नास्ति ।

अथ वरुणदैवतगुड़लवणैक्षवदानम्

तत्र सम्वर्तः— गुड़मिक्षुरसं चैव लवणं व्यञ्जनानि च ।
रसं त्रीणि यानि दत्त्वाऽत्यन्तं सोऽपि सुखी भवेत् ।।

[1]विष्णुधर्मोत्तरे—गुडप्रदस्तथारोग्यं सितादः काममीप्सितम् ।
फाणितस्य प्रदानेन परां तृप्तिमवाप्नुयात् ।।
खण्डप्रदश्च सौभाग्यं सर्वान् काम्यान् मधुप्रदः ।। इति

[क] अथ प्रजापतिदैवताऽन्नदानम्

तत्र महाभारते—कृत्वाऽपि पातकं कर्म यो दद्यादन्नमर्थिने ।
ब्राह्मणाय विशेषेण न स पापेन लिप्यते ।।

विष्णुधर्मोत्तरे— देवमुद्दिश्य विप्राय यो ददातीह भोजनम् ।
स देवः प्रीतिमान् तस्य कामानिष्टान् प्रयच्छति ।।

महाभारते— यस्य ह्यन्नमुपाश्नन्ति ब्राह्मणाश्च शतं दश ।
दुष्टेन मनसा दत्तं न स तिर्यग् गतिं लभेत् ।।
ब्राह्मणानां सहस्राणि दश भोज्य नरर्षभ ।
नरोऽधर्मात् प्रमुच्येत जापेष्वभिरतः सदा ।। इति ।

अथ गन्धर्वदैवतताम्बूलदानम्

तत्र भारते— चन्दनागुरुधूपांश्च विप्रेभ्यो यः प्रयच्छति ।
ताम्बूलञ्च स्रजं चैव स्वर्गं स वसते नरः ।।

[2]सम्वर्तः— ताम्बूलं चैव यो दद्याद् ब्राह्मणेभ्यो विचक्षणः ।
मेधावी सुभगः प्राज्ञो दर्शनीयश्च जायते ।। इति ।

---

(1) विष्णुधर्मोत्त. (3–314/11–12) ।

(2) सम्वर्तः (श्लो. 56) इति धर्म. सं. (पृ–226) ।

(क) विषयोऽयं खघङ्च नास्ति ।

क

अथ गन्धर्वदैवतगन्धद्रव्यादिदानम्

तत्र [1]विष्णुधर्मोत्तरे—

नरश्चन्दनदानेन सर्वपापैः प्रमुच्यते ।
तथैवागुरुदानेन यशसा च विराजते ।।
सौभाग्यकारकं प्रोक्तं प्रदानं कुङ्कुमस्य तु ।
तथा कर्पूरदानेन सर्वान् कामानवाप्नुयात् ॥
मृगचर्मप्रदानेन [2]सौभाग्यमपि विन्दति ।

ब्रह्मपुराणे— सुगन्धागुरुकर्पूरपुष्पधूपान् द्विजोत्तमाः ।
प्रयच्छन्ति द्विजातिभ्यो भक्त्या परमया युता ।।
सुगन्धाश्च सुवेशाश्च सुप्रभाः स्रग्विभूषिताः ।
याति धर्मपुरं यानैर्विविधैरभ्यलङ्कृताः ।।

सुगन्धमनेकसुगन्धद्रव्ययोगरूपम् । पुष्पं वनस्पतिदैवतम् ।

महाभारते— स्रग्धूपगन्धान्यनुलेपनानि, स्नानादि माल्यानि च मानवो यः ।
दद्याद् द्विजेभ्यः स भवेदरोगस्तथाभिरूपश्च नरेन्द्रलोके ।।

माल्यस्य विष्णुर्देवता ।। इति ।

ख

अथ बृहस्पतिदैवतवस्त्रदानम्

तत्र [3]विष्णुधर्मोत्तरे—

दत्त्वा कार्पासिकं वस्त्रं स्वर्गलोके महीयते ।
दत्त्वा सरोमसाङ्कुरं फलं दशगुणं भवेत् ।।
आविकं वसनं दत्त्वा भृगूणां लोकमाप्नुयात् ।

---

(1) विष्णुधर्मोत्त. (3-319/19-21) ।

(2) "यशसा भुवि राजते" इति विष्णुधर्मोत्तरे ।

(3) विष्णुधर्मोत्त. (3-313/4-6) ।

(क) विषयोऽयं घङच नास्ति । (ख) विषयोऽयं घङच नास्ति ।

छागं दत्त्वा चाङ्गिरसं क्षौमं दत्त्वा बृहस्पतेः ॥
वसूनां लोकमाप्नोति दत्त्वा कौशेयवाससी ।
कृमिजं च तथा दत्त्वा सोमलोके महीयते ॥

सरोमसाङ्कुरं तूलपटीमिति यावत् । कृमिजं [1]पतनीसूत्रोद्भवम् ।

[2]तथा— कुसुम्भरक्तं दत्त्वा च सौभाग्य महदश्नुते ।
दानात् कुङ्कुमरक्तस्य लावण्यं महदाप्नुयात् ॥
रङ्गैरन्यैरनीलैश्च रक्तं दत्त्वा सुखी भवेत् ॥

शिवपुराणे— यस्तु वस्त्रं प्रयच्छेत सम्वीतं ब्राह्मणाय च ।
सोमलोकमवाप्नोति क्रीडते कालमक्षयम् ॥

[3]दशाग्रहणं स्वीकारः । इति ॥

अथ विष्णुदैवतयज्ञोपवीतदानम्

तत्र[4] विष्णुधर्मोत्तरे—

यज्ञोपवीतदानेन वस्त्रदानफलं लभेत् ।

नन्दिपुराणे— यज्ञोपवीतदानेन सुरेभ्यो ब्राह्मणाय च ।
भवेद् विप्रश्चतुर्वेदी शुद्धवीर्य्यो न संशयः ॥ इति ।

अथ विष्णुदैवतछत्रदानम्

तत्र [5]महाभारते—

छत्रोपानहदानेन श्रियं पुत्रांश्च विन्दति ।
निदाघकाले विप्राय छत्रं यस्तु प्रयच्छति ॥
नास्य कश्चिन्मनोदाहः कदाचिदपि जायते ॥
छत्रदाने सुखं छायां लभते परलोकगः ॥

---

(1) पतनी—कीटः, लूता वा । (2) विष्णुधर्मोत्त. (3–313/10-11) ।
(3) दशादेशे वस्तुप्रतिग्रहो विधेयः । (4) विष्णुधर्मोत्त. (3-311-10) ।
(5) महा. अनु. (65-18) ।

वराहपुराणे–चित्रगुप्तवाक्ये—

उपानहौ बृहच्छत्रं जलं भोजनमेव च ।
असकृद् येन दत्तानि तस्मिन् पूजां प्रयच्छति ॥

असकृद्—आवृत्त्या । दण्डग्रहणं स्वीकारः । इति ॥

अथोत्तानाङ्गिरोदैवतोपानद्दानम्

तत्र महाभारते – छत्रोपानहदानेन श्रियं पुत्रांश्च विन्दति ।

[1]तथा— उपानहौ प्रयच्छेद् यो ब्राह्मणेभ्यः समाहितः ॥
मर्दते कण्टकान् सर्वान् विषमान्निस्तरत्यपि ।
[2]उपर्युपरि शत्रूणां संतिष्ठति युधिष्ठिर ॥
यानं चाश्वतरीयुक्तं तस्य शुभ्रं विशाम्पते ।
उपतिष्ठति कौन्तेय रौप्यकाञ्चनभूषितम् ।
शकटं दम्यसंयुक्तं दत्तं भवति चैव हि ॥

अत्र फलबाहुल्याद् ब्राह्मणेभ्य इति बहुवचनाच्च बहूपानद्युगलदानविषयमिदम् ।

[3]विष्णुः— "उपानत्प्रदानेन अश्वतरीयुतं रथं प्राप्नोती"ति शेषः ।

बृहस्पतिः— असिपत्रवनं मार्गं क्षुरधारसमन्वितम् ।
तीक्ष्णातपश्च तरति छत्रोपानत्प्रदो नरः ॥

छत्रोपानत्प्रद इति द्वितयनिर्देशाद् यद्यप्युभयोः क्रियासम्बन्धमात्रेणोपपद्यते, तथापि चण्डातपजातक्लेशस्य छत्रोपानद्भ्यामेव वारयितव्यत्वात् सहितयोरेव दानम् । उपानहारोहणं स्वीकारः । इति ॥

[क]

अथोत्तानाङ्गिरोदैवतकाष्ठपादुकादानम्

तत्र महाभारते—ब्राह्मणाय सुशीलाय यो दद्यात् काष्ठपादुके ।
स वाहनेन दिव्येन स्वर्गं गच्छति भोगवान् ॥

---

(1) महा. (13-65/2-4) । (2) "स शत्रूणामुपरि च" इति महाभा. ।
(3) विष्णु स्मृ. (92-28) ।

(क) विषयोऽयं खगघङ्च नास्ति ।

ब्रह्मपुराणे— काष्ठपादुकदानानि पीठकान्यासनानि च ।
यैर्दत्तानि द्विजातिभ्यस्तेऽध्वानं यान्ति वै सुखम् ।।
सुवर्णपादपीठेषु पादौ कृत्वोत्तमेषु च ।
ते प्रयान्ति विमानैस्तु अप्सरोगणमण्डितैः ।।

द्विजातिभ्य इति बहुवचनं दातृबहुत्वापेक्षम् । आरोहणं स्वीकारः ।

[1]विष्णुधर्मोत्तरे—नृवाह्यं पुरुषो यस्तु द्विजे सम्यक् प्रयच्छति ।
अश्वमेधफलं तस्य कथितं द्विजसत्तमाः ।।

नृवाह्यं—दोला । सम्यगित्युपधानादिसहितम् ।। इति ।

[क] अथ वरुणदैवतजलभाजनदानम्

तत्र विष्णुः— करकं कुण्डिकां कुम्भीं वारिधाराञ्च कर्करीम् ।
यः प्रयच्छति विप्राय तस्य पुण्यफलं शृणु ।।
ब्रह्मकूर्च्चसहस्रस्य सम्यक् चीर्णस्य यत् फलम् ।
तत् फलं समवाप्नोति जलभाजनदो नरः ।।

[2]विष्णुधर्मोत्तरे—समुद्रजानां भाण्डानां शंखादीनां प्रदायकः ।
पात्रीभवति कामानां यशसश्च न संशयः ।।
रुक्मपात्रप्रदानेन पुत्री भवति मानवः ।
सर्वेषामेव [3]दानानां यशसस्त्रिदिवस्य च ।
रूप्यदो रूप्यमाप्नोति भोगमाप्नोति ताम्रदः ।
लोहारकूटयोर्दानात् [4]तदेवाप्नोत्यसंशयम् ।।

---

(1) विष्णुधर्मोत्त. (3-312-1)

(2) विष्णुधर्मोत्त. (3-311-24, 3-310/17-19) ।

(3) 'कामानां' इति विष्णुधर्मोत्तरे ।

(4) "कुप्यमानो" इति विष्णुधर्मोत्तरे ।

(क) विषयोऽयं खघङच नास्ति ।

[1]आयसस्तु प्रदानेन स्थैर्यं सुमहदश्नुते ।
त्रपुसीसकयोर्दानाद् [2]बुद्धिवृद्धिमवाप्नुयात् ॥ इति ।

क

अथ विष्णुदैवतनानापात्रदानम्

तत्र स्कन्दपुराणे—

ताम्रं यो भाजनं दद्याद् ब्राह्मणाय विशेषतः ।
स भवेद् यक्षराजस्य यक्षो वलसमन्वितः ॥

मार्कण्डेयपुराणे—दर्पणं यो नरो दद्यान्निर्मलञ्च द्विजातये ।
सचन्द्रलोकमासाद्य मोदते शरदां शतम् ॥ इति ।

ख

अथ वायुदैवतव्यजनदानम्

तत्र विष्णुधर्मोत्तरे—

प्रदाय व्यजनं वांशं वंशे महति जायते ।
चार्मणं कर्मणां सिद्धिं दत्त्वा व्यजनमश्नुते ॥
ग
तथैवान्ते आयुरेन पुरे तस्य महीयते ।
पात्रेण पात्रतामेति वांशेण स्त्रैणवल्लभः ॥

पात्रेण पत्रनिर्मितेन ॥ इति ।

घ

अथ विष्णुदैवतरत्नदानम्

तत्र [3]विष्णुधर्मोत्तरे—

वज्रदः शक्रलोकन्तु पद्मरागप्रदो रवेः ।
[4]मर्त्यो मरकतं दत्त्वा विष्णुलोके महीयते ॥

---

(1) "यथेष्टं लोहपात्रञ्च यः प्रदद्याद्द्विजातये" इति विष्णुधर्मोत्तरे ।

(2) "वह्नि" इति विष्णुधर्मोत्तरे ।

(3) विष्णुधर्मोत्त. (3-310/24-26) । (4) "सद्यो" इति विष्णुधर्मोत्तरे ।

(क) विषयोऽयं खगघङ्च नास्ति । (ख) विषयोऽयं खघङ्च नास्ति ।

(ग) तथा तेषामायुरेव इति ग पाठः । (घ) विषयोऽयं घङ्च नास्ति ।

मुक्ताफलप्रदानेन वारुणं लोकमश्नुते ।
वैडुर्यस्य प्रदानेन द्वीपानां सप्त मोदते ॥
रत्नान्यन्यानि दत्त्वा च राजराजस्य च द्विजाः ॥

प्रार्थना यथा— यथा रत्नेषु सर्वेसु सर्वे देवाः प्रतिष्ठिताः ।
तथा शान्ति प्रयच्छन्तु रत्नदानेन मे सुराः ॥ इति ।

क
अथ विष्णुदैवतालंकारदानम्

तत्र नन्दिपुराणे—

[1]अलंकारं तु यो दद्याद्विप्रायाथ सुराय वा ।
स गच्छेद् वारुणं लोकं नानाभरणभूषितः ॥
जातः पृथिव्यां कालेन भवेद् द्वीपपतिर्नरः ॥

[2]विष्णुधर्मोत्तरे— कङ्कणस्य प्रदानेन सर्वबाधाभ्यः मुच्यते ।

आचमनं स्वीकारः । इति ।

ख
अथ विष्णुदैवतगृहदानम्

तत्र [3]बृहस्पतिः—

रसान्नोपस्करयुतं गृहं विप्राय योऽर्पयेत् ।
तस्य न क्षीयते वंशः स्वर्गं प्राप्नोत्यसंशयः ॥

भविष्योत्तरे–बहुविधोपकरणानन्तरमुक्तम्—

---

(1) अलंकारदानफलं हेमाद्रौ ब्रह्मवैवर्त्ते यथा—

द्विजातिभ्यस्तु यो दद्यादलंकारान् समुज्ज्वलान् ।
सोऽलंकृतः स्वर्गलोके क्रीडत्यप्सरसाङ्गणैः ॥
अलंकारप्रदानेन सुरूपः सुभगो भवेत् ।
तथालंकारदानेन दीर्घमायुश्च विन्दति ॥

(2) विष्णुधर्मोत्त. (3-311/25) । (3) हे. दान (पृ–646) ।

(क) विषयोऽयं खघङ्च नास्ति । (ख) विषयोऽयं घङ्च नास्ति ।

अलंकृत्य सपत्नीकान् वासोभिरथ पूजयेत् ।
सुगन्धिस्रग्धरान् कृत्वा शान्तिकर्मणि योजयेत् ॥
गृहाङ्गणे कारयित्वा कुण्डमेकं समेखलम् ।
गृहयज्ञः प्रकर्त्तव्यः पुष्टितुष्टिकरः सदा ॥
रक्षोघ्नानि च सूक्तानि पठेयुर्ब्राह्मणास्ततः ।
वास्तोः पूजा प्रकर्त्तव्या दिक्षु भूतबलिं क्षिपेत् ॥
ततः पुण्याहघोषेण ब्राह्मणास्तेषु वेश्मसु ।
प्रवेशयित्वा शय्यायां सभार्यान् तान् प्रवेशयेत् ॥
यजमानस्ततः प्राज्ञः शुक्लाम्बरधरः शुचिः ।
यद्यस्य विहितं पूर्वं तत्तस्य प्रतिपादयेत् ॥
इदं गृहं गृहाण त्वं सर्वोपकरणैर्युतम् ।
तव विप्रप्रसादेन ममास्त्वभिमतं फलम् ॥ इति ॥

(क) अथ प्रजापतिदैवतशय्यादानम्

तत्र [1]याज्ञवल्क्यः—

यानं वृषं प्रियं शय्यां दत्त्वाऽत्यन्तं सुखी भवेत् ।

शिवपुराणे— शय्याप्रदानयोगात्तु ब्राह्मणेषु विशेषतः ।
षष्टिवर्षसहस्राणि स्वर्गलोके महीयते ॥
ततः कालक्षयं गत्वा जायते विपुले कुले ॥

ब्राह्मणेष्विति बहुवचनाच्च फलबाहुल्याच्च अनेकशय्यादानविषयमिदम् ।

[2]विष्णुधर्मोत्तरे—शय्यादानेन प्राप्नोति भार्यां ब्राह्मणसत्तम ।
वितानकप्रदानेन सर्वपापैः प्रमुच्यते ॥ इति ॥

---

(1) या स्मृ. (1/211) ।

(2) विष्णुधर्मोत्त. (3-311-1) ।

(क) विषयोऽयं खघङच नास्ति ।

क

अथ प्रजापतिदैवतासनदानम्

तत्र [1]विष्णुधर्मोत्तरे—

नरस्त्वासनदानेन स्थानं सर्वत्र विन्दति ।

ब्रह्मपुराणे— काष्ठपादूकपीठानि यानान्या[2]सनकानि च ॥

यैर्दत्तानि द्विजातिभ्योऽध्वानं यान्ति हि ते सुखम् ।

सुवर्णमणिपीठेषु पादौ कृत्वोत्तमेषु च ।

ते प्रयान्ति विमानैस्तु अप्सरोगणभूषितैः ॥

अत्रासनपदं सन्निधानात् पीठपरम् ॥ इति ।

ख

अथ रुद्रदैवतधेनुदानम्

तत्र [3]याज्ञवल्क्यः—

यथा कथञ्चिद् दत्त्वा गां धेनुं वाऽधेनुमेव वा ।

[4]आरोग्यमपरिक्लिष्टां दाता स्वर्गे महीयते ॥

पुच्छग्रहणं स्वीकारः । वराहपुराणे—

तिलान् गाश्च हिरण्यञ्च पृथिवीं वाऽपि शाश्वतीम् ।

ब्राह्मणेभ्यः प्रयच्छन्ति न गच्छन्ति न संशयः ॥

न गच्छन्ति यमपुरमिति शेषः । तस्य प्रस्तुतत्वात् ।

यानि कानि च दुर्गाणि दुष्कृतानि कृतानि च ।

तरन्ति चैव पाप्मानं धेनुं ददति ये प्रभो ॥

---

(1) विष्णुधर्मोत्त. (3–311–1) ।

(2) आसनदानफलं देवीभागवते (9-30-5) यथा—

देवेभ्यो ब्राह्मणेभ्यो वा ददाति चाऽऽसनं यदि ।

महीयते विष्णुलोके वर्षाणामयुतं दिवि ॥

(3) या. स्मृ. (1/208) । (4) 'अरोगाम्' इति या. स्मृ. पाठः ।

(क) विषयोऽयं खघङच नास्ति । (ख) विषयोऽयं खघङच नास्ति ।

यममार्गानुवृत्तौ विष्णुधर्मे—

क्षीरप्रपाभिर्दिव्याभिर्मधुसर्पिभिरेव च ।
[1]गोप्रदानाल्लभते तस्मिन् देशे न संशयः ॥

सुदुर्लभाम् इमां धेनुं सवत्सामिति विशेषणीयम् । तथैव स्मरणात् । तदुक्तं

रामायणे— प्राक् लाङ्गूलविकृष्टार्द्रा विधिना भूमिमुत्तमः ।
कृत्वा विधानतो धेनुं सवत्सामित्यवासृजेत् ।।
गोसहस्रप्रदानेन मुच्यते नरकार्णवात् ।
गवां शत प्रदानेन सर्वं तरति दुष्कृतम् ।।

एतद् दुस्तरनिस्तरणाय देयम् । गोशतमेकस्मै ब्राह्मणाय देयम् ।

तदुक्तम्— एवं संख्यासमायुक्तं देयं यद् गोशतादिकम् ।
तदेकस्मै प्रदातव्यं न विभज्य कदाचन ।।

गोशतदानं प्रक्रम्योक्तो दानविधिः—

अर्चयित्वा तु वस्त्रेण गन्धमाल्यैर्द्विजोत्तमः ।
गामेकां तु समालभ्य चन्दनेन सुगन्धिना ।।
प्रदक्षिणं ततः कृत्वा धेनूनाञ्च शतं त्रिधा ।
गोनामानि समुच्चार्य गोमन्त्रं तु जपेत् पुनः ।।
स्मृत्वा नारायणं देवं ततो दद्याद् द्विजातये ।
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ।।

समालभ्येति पूजालक्षणम् ।

---

(1) गोदानफलमुक्तं बृहन्नारदीये—

ब्राह्मणाय ब्रह्मविदे यो दद्याद् गां पयस्विनीम् ।
स याति विष्णुभवनं पुनरावृत्तिवर्जितम् ।। दा.क्रि.कौ. (पृ–56) ।

अङ्गिराः— गौरेकस्यैव दातव्या श्रोत्रियस्य विशेषतः ।
सा हि तारयते पूर्वान् सप्त च सप्त च सप्त ॥

भारते— न गोदानात् परं दानं किञ्चिदस्तीति मे मतिः ।
स गौर्न्यायार्जिता दत्ता कृत्स्नं तारयते कुलम् ॥ दा.म. (पृ–203)

कामा प्रियाऽसि भव्यासि पूज्ये रन्ते सरस्वति ।
महि विश्रुति वायव्ये गोनामानि विदुर्बुधाः ॥

[1] गोमतीमाह— गावः सुरभयो नित्यं गावो गुग्गुलुगन्धिकाः ।
गावः प्रतिष्ठाभूतानां गावः स्वस्त्ययनं महत् ॥
अन्नमेव परं गावो देवानां हविरुत्तमम् ।
पावनं सर्वभूतानां क्षरन्ति च हविषी च ॥
हविषा मन्त्रपूतेन तर्पयन्त्यमरान् दिवि ।
ऋषीणामग्निहोत्रेषु गावो होमप्रयोजिकाः ॥
सर्वेषामेव भूतानां गावः शरणमुत्तमम् ।
गावः पवित्रं परमं गावो मङ्गलमुत्तमम् ॥
गावः स्वर्गस्य सोपानं गावो धन्याः सनातनाः ।
नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।
ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम् ॥
एकत्र मन्त्रास्तिष्ठन्ति हविरन्यत्र तिष्ठति ।
सुवर्णं दक्षिणामाहु गोप्रदाने महाद्युते ।
सुवर्णं परमं ह्युक्तं दक्षिणार्थं न संशयः ॥

गोशते दातव्ये स्त्रीगवादीनामेव दानम् । न तु जातिसम्बन्धाद् वृषभसम्बन्धः । येन शतसंख्यापूरणम् ।

घृतक्षीरवहा नद्यो यत्र पायसकर्दमाः ।
दधिह्रदाऽक्षया यत्र तत्र गच्छन्ति गोप्रदाः ॥

इति फलश्रुतिवाक्ये क्षीरघृतप्राप्तिप्रतिपादनात् । अतएव "प्रदक्षिणं ततः कृत्वा धेनूनाञ्च शतं त्रिधा" । इत्यत्र धेनुशब्दो योग्यतया स्त्रीगवीमात्रोपलक्षणम् । काम्यमपि गोशतदानमस्ति ।

तथा च— "स्वर्गं गोशतदानेन विन्दते नन्दिकेश्वरः ।"

---

(1) दा.म. (पृ-205), यम इति प्रायश्चित्तकल्पतरुः । यम इति परा.मा. (3/41)

तथा च मार्कण्डेयः—

स्त्रियं मेषमजं चैव गां तथा तुरगं नरम् ।
एकमेव प्रदातव्यमेकस्य बहवोऽपि वा ।।
एकं बहूनां दत्त्वा तु ध्रुवं नरकमृच्छति ।।

भविष्योत्तरे च विधानान्तरमुक्तं–युधिष्ठिर उवाच—

गोशताख्यप्रदानस्य कथयस्व यदूत्तम ।
विधानं दानकालञ्च फलञ्चैव विशेषतः ।।

कृष्ण उवाच— गोशताख्यं तथा दानं प्रवक्ष्यामि नृपोत्तम ।
यत् प्रदानादिहामुत्र तरेद् वै दुस्तरं नरः ।।
सर्वदा दानकालोऽयं नात्र कार्या विचारणा ।
देवालयेऽथ गोष्ठे वा तीर्थे स्वभवनाङ्गणे ।।
प्रागुदक्प्रवणे देशे गोशतं धारयेद् बुधः ।
रक्षाविधानमेतस्य पानीयं ग्रासमेव च ।।
कुर्यादादानपर्यन्तं यत्नेन तु विचक्षणः ।
यजमानः ततः स्नात्वा शुक्लाम्बरधरः शुचिः ।।
गोशताकां समग्रां गामरोगां सवृषां तु ताम् ।
सुवर्णश्च खुरैः रौप्यैर्वस्त्रवेष्टैः विभूष्य च ।।
ब्राह्मणं समलंकृत्य ब्राह्मणं वेदपारगम् ।
गन्धपुष्पादिभिः सम्यग् गोशतं सवृषाञ्च गाम् ।।
सम्पूज्य यजमानस्तु कृत्वा तां त्रिः प्रदक्षिणम् ।।
दत्त्वा पुष्पाञ्जलिं गोभ्यः प्रणमेद् दण्डवत् क्षितौ ।।
प्राञ्जलिः पुरतः स्थित्वा गोनामानि च कीर्त्तयेत् ।
काम्या प्रियासि भव्यासि [1]विलेरन्ते सरस्वति ।।
महित्वं [2]विश्रुतिश्चाद्ये तथा गावः पराः शुभाः ।

---

(1) "इडारन्ता" इति धर्म. शब्द. ।

(2) "विश्रुता चान्या" इति धर्मशास्त्रशब्दकोषे ।

गावः सुरभयो नित्यं गावो गुग्गुलुगन्धिकाः ॥

इत्यादि पूर्ववत् पठित्वा यथा—

इति संकीर्त्त्य पूर्वेद्युरथवाऽऽसाद्य गोशतम् ।
रात्रौ होमः प्रकर्त्तव्यः स्वाहान्तैस्तैस्तु नामभिः ॥
घृतेन त्रिभिरेकस्य होमशेषं समाप्य च ।
यस्मिन् दिने यताहारो भवेदक्षारभोजनम् ॥
ततः प्रभाते सुस्नातो नित्यकर्म समाप्य च ।
पूजयेत् पूर्ववद् गां तां सवृषां गोशतं तथा ॥
ब्राह्मणन्तु समभ्यर्च्च्य गोशतं प्रतिपादयेत् ।
दक्षिणाञ्च ततो दत्त्वा दाता मन्त्रमिमं पठेत् ॥
गावो ममाग्रतः सन्तु गावस्तिष्ठन्तु पृष्ठतः ।
गावो मे हृदये सन्तु गवां मध्ये गसाम्यहम् ॥
गर्भिण्यर्घेन सम्मिश्रमृषभैकादशेन च ।
मुनयः केचिदिच्छन्ति गोशते साम्प्रदानिके ॥
फलञ्च तत् प्रवक्ष्यामि शृणु पार्थ समाहितः ।
एवं दत्त्वा[क] विधानेन दीर्घायुर्भवतीह वै ॥
यावन्ति पशुरोमाणि संख्याय युगसंख्यया ।
शिवलोके वसेत् तावन्मम लोके स्वयम्भुवः ॥
तत्र भोगान् प्रभुक्त्वाऽसावन्ते मोक्षमवाप्नुयात् ।
इति मे सर्वमाख्यातं दानं गोशतसंज्ञितम् ॥
तस्मात्त्वमपि कुर्वीथा यस्मात् सर्वधरो भवेत् ।

यो गोशतं सविधिकं च समाहिताय, दद्याच्च वेदविदुषे सुबहुश्रुताय ।
भूयः कलौ तरति दुस्तरमप्यथान्ते मुक्त्वा शिवादि भवनेष्वथ याति मुक्तिम् ॥

(क) "दद्यात्" इति ख पाठः ।

[1]मनुः— अनडुहः श्रियं पुष्टां गोदो ब्रध्नस्य विष्टपम् ।
मार्कण्डेयः— दत्त्वा वत्सतरीं चैव स्वर्गलोके महीयते ।। इति ।।

क
अथालंकृतगवीदानम्

तत्र यमः— रुक्मशृङ्गीं रौप्यखुरां मुक्ताभूषितलाङ्गूलाम् ।
कांस्योपदोहां धेनुश्च वस्त्रच्छन्नामलंकृताम् ।।
दत्त्वा द्विजेन्द्राय नरः स्वर्गलोके महीयते ।
यावन्ति धेनुरोमाणि तावतोऽब्दान्न संशयः ।।

मुक्ताभूषितलाङ्गूलाम् । अलंकृतामिति । होमतिलकादिनेति शेषः ।। इति ।

ख[2]
अथ उभयतोमुखीदानम्

तत्र [3]याज्ञवल्क्यः—

सवत्सां रोमतुल्यान्तु युगान्युभयतो मुखीम् ।
दाताऽस्याः स्वर्गमाप्नोति पूर्वेण विधिना ददत् ।।
यावद् वत्सस्य द्वौ पादौ मुखं योन्यां च दृश्यते ।
तावद् गौः पृथिवी ज्ञेया यावद् गर्भं न मुञ्चति ।।

पूर्वेण विधिनेति शृङ्गीविधानेनेत्यर्थः ।

तच्च [3]तदीयं यथा—

हैमशृङ्गी शफैः रौप्यैः सुशीला वस्त्रसंयुता ।
सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा ।।
दाताऽस्याः स्वर्गमाप्नोति वत्सरान् [4]रोमसम्मितान् ।। इति ।

---

(1) मनु. (4–231) ।
(2) या. स्मृ. (1-206/207) ।
(3) या. स्मृ. (1-204/205) ।
(4) उभयतोमुखीगोः दानफलं यथा देवीभागवते (9–30–9)—

यश्चोभयमुखीदानं करोति ब्राह्मणाय च ।
तल्लोममानवर्षञ्च विष्णुलोके महीयते ।।

(क) विषयोऽयं घङच नास्ति ।
(ख) विषयोऽयं घङच नास्ति ।

क

अथ महाशृङ्गीदानम्

तत्र पुराणे— दशसौवर्णिकं शृङ्गं खुराः पञ्चपलान्विताः ।
पञ्चाशत् पलिकं कांस्यं ताम्रं चापि तथैव च ॥
दाताऽस्याः स्वर्गमाप्नोति यावदाभूतसंप्लवम् ॥

शृङ्गमित्येकवचननिर्देशात् प्रतिशृङ्गं दशसुवर्णघटितमित्यभिधेयम् । तथा कूर्मपुराणे—कपिलादानप्रस्तावे तदलंकरणमभिधायोक्तम्—

महाशृङ्गीविधानेन प्रत्येकं शृङ्गमण्डलम् ।
सुवर्णशृङ्गीभिः शेषो विधिः पूर्ववदेव तु ॥

शेषविधिश्च कपिलादानविधावेवावगन्तव्या । उक्तोपकरणैर्विना दानमस्ति उभयतोमुखीम् । तथा चादित्यपुराणे—

अथ वत्सस्य चरणौ दृश्येते साम्मुखं यदा ।
सा चोभयमुखी देया मनोरथगतप्रदा ॥ इति ।

ख

अथ वैतरणीदानम्

तत्र विश्वामित्रः—आसन्नमृत्युना देया गौश्च विप्राय पूर्ववत् ।
अभावे केवला देया तत्तुं वै नरकं ध्रुवम् ॥
[1]वै नाम तु नदी प्रोक्ता रक्तपूयमहारया ।
तस्मात्तारयते या गौः सा गौः वैतरणी स्मृता ॥
यमद्वारे महाघोरे कष्टां वैतरणीनदीम् ।
तर्त्तुकामो ददाम्येतां कृष्णां [2]वैतरणीं च गाम् ॥

अनु० हेमाद्रौ दान (पृ–476) खण्डे विष्णुरपि—

अथ प्रसूयमाना गौः पृथिवी भवति तामलंकृत्य ससुवर्णां विप्राय दत्त्वा पृथिवीदान फलमाप्नोति ।

(1) वैंनदी वैतरणीनदी । अत्र नामैकदेशेन नाममात्रमुच्यते ।

(2) वैतरणीनदीतरणसाधनत्वेन देया गौरपि वैतरणीसंज्ञां लभते ।

(क) विषयोऽयं घङ्च नाश्ति । (ख) विषयोऽयं गघङ्च नास्ति ।

तदा यदि न शक्नोति दातुं वैतरणीं यदि ।
शक्तोऽप्यरुक् तदा दद्यादन्यो दद्यान्मृतस्य च ॥

गौश्चेति चकारात् वत्सः । शक्तोऽप्यरुक् इत्यत्राप्यन्य इति सम्बन्धनीयम् । तथा च व्यासः—

आसन्नमृत्युना देया गौः सवत्सा च पूर्ववत् ।
तदभावे च गौरेव नरकोद्धारणाय वै ॥
तदा यदि न शक्नोति दातुं वैतरणीं च गाम् ।
शक्तोऽप्यरुक् तदा दद्यादन्यो दद्यान्मृतस्य च ॥

पूर्ववदिति—सुवर्णशृङ्गीविधिना । तदभावे—सुवर्णशृङ्गाद्यभावे ।

वैतरणीरूपसम्पन्ना सुशीला च पयस्विनी ।
वर्णसौन्दर्यमापन्ना वत्सस्तस्याः सुरूपवान् ॥
ताम्रपृष्ठं तु कर्त्तव्यं पलसप्तसमन्वितम् ।
त्रिपलं कांस्यदोहञ्च घण्टापलचतुष्टया ॥
वासोयुगेन संछाद्य सप्तहस्तप्रशस्ततः ।
शृङ्गं तत्र प्रदातव्यं स्वर्णमाषत्रयोद्भवम् ॥
रुप्यखुरश्च कर्त्तव्यमेकमाषप्रमाणतः ।
शिरसो रूप्यचन्द्रश्च माषैकेन सुशोभनम् ॥
पुच्छे तु चामरं शुक्लं कर्णे तस्याः प्रवालकम् ।
नासिकायाश्च दातव्यं मुक्तावैडुर्यमेव च ॥
चक्षुषो रूप्यनीलश्च धेनुरेव त्वलंकृता ।
एवं चैव तु सम्पाद्य प्रदद्याद् धेनुमेव च ॥
दक्षिणां शतमानश्च धेनुं चैव प्रदापयेत् ।
वैतरण्याः प्रदानस्य संक्षेपविधिरुच्यते ॥
एवं दद्यान्नरो यस्तु स्वर्गं याति स मानवः ।
यमलोकं परित्यज्य स्वर्गलोके महीयते ॥

यमद्वारे इति श्लोकं पठित्वैव । अद्येहेत्यादि [1]तुभ्यमन्तं वाक्यं कृत्वा धेनुं दद्यात् ।

---

(1) अमुकसगोत्राय अमुकवेदस्य अमुकशाखाशाखैकदेशाध्यायिने ब्राह्मणाय तुभ्यमिति अन्ते यस्य वाक्यस्य तद् वाक्यं कृत्वा इत्यर्थः ।

उत्तुंगोपरितां धेनुं सूर्यदेहसमुद्भवाम् ।
कृत्वा प्रकाशयेद् विद्वान् छत्रोपानहसंयुताम् ॥
इदमुच्चारयेन्मन्त्रं संगृह्योक्तकमण्डलुम् ॥ इति ॥

यमद्वारे महाघोरे इत्यादि ब्रह्मवैवर्त्तेऽभिधानात् ।

ब्रह्मवैवर्त्ते— ब्रह्मरूपद्विजश्रेष्ठ भूदेव पंक्तिपावन ।
सदक्षिणा मया दत्ता तुभ्यं वैतरणी च गौः ॥ इति ॥

दानमन्त्रः । दानशब्दोऽत्र दक्षिणादानानन्तरभाविसमर्पणपरः । सदक्षिणा इति मन्त्रलिङ्गात् । तथा—

पुच्छं संगृह्य तद्धेनोरग्रे कृत्वा च ब्राह्मणम् ।
धेनुके त्वं प्रतीक्षस्व यमद्वारे महाभये ॥
उत्तितीर्षुरहं देवि वैतरण्यै नमो नमः ॥

अनुव्रजन्मन्त्रः— अनुव्रजेच्च गच्छन्तं सर्वं तस्य गृहं नयेत् ।
एवं कृते महीपाल सा सरित् सुखदा भवेत् ॥ इति ।

अथ यमदैवतमहिषीदानम्[क]

तत्र [1]विष्णुधर्मोत्तरे—

वारुणं लोकमाप्नोति दत्त्वा च महिषीं नरः ।

एतदलंकृतमहिषीदानविधायकम् ।

अलंकृतां तु तां दत्त्वा गोदानफलमाप्नुयात् । [3]इति ।

अलंकृतमहिषीदानस्याग्रे वक्ष्यमाणत्वात् ।

आग्नेयपुराणे— दद्यान्मन्त्रेण राजेन्द्र पुराणविहितेन च ।

इन्द्रादि लोकपालानामित्यादिमन्त्रद्वयं पठित्वा । अद्यामुक सगोत्रायेत्यादि वाक्यपूर्वकं दद्यात् ।

[4]तथा— महिषस्य प्रदानेन याम्यलोके महीयते ।।

---

(1) विष्णुधर्मोत्त. (3–306–60) । (2) "ततो" इति विष्णुधर्मोत्तरे ।
(3) विष्णुधर्मोत्त. (3–306–59) । (4) विष्णुधर्मोत्त (3–306–61) ।

(क) विषयोऽयं घङच नास्ति ।

क

अथ सोमदैवतदुग्धदधिदानम्

क्षीरं दधि घृतं वाऽपि मधु तैलं गुडं तथा ।
ये प्रयच्छन्ति विप्रेभ्यः परां मुक्तिमुपागताः ॥
ते वृषैरश्वयानैश्च दिव्यस्रग्दामभूषितैः ।
[1]उपायमाना गन्धर्वैर्यान्ति शक्रपुरं नराः ॥ इति ।

ख

अथ दशमहादानानि

तत्र कूर्मपुराणे—दशदानविधिं वक्ष्ये कनीयो मध्यमोत्तमम् ।
वित्तानुसारात् त्रिविधं संसारार्णवतारणम् ॥
[2]कनकाश्वतिलानागादासीरथमहागृहाः ।
कन्या च कपिलाधेनुर्महादानानि वै दश[3] ॥
यथालाभं प्रदेयानि क्रमतो वा फलार्थिभिः ।
सत्पात्रदेशकालादीनासाद्यापि मुमुक्षुभिः ॥ इति ।

तत्राद्यौ कनकदानम्

पञ्चकृष्णलको माषः स्वर्णस्य रजतस्य च ।
द्विकृष्णलको भवेन्माषस्ताम्रिकः पणः ॥
सुवर्णमेकं द्विगुणं त्रिगुणं वाऽप्यनुक्रमात् ।
कनकं स्यात् सुवर्णन्तु त्रिभिर्द्वाभ्यां सदक्षिणम् ॥

---

(1) उपायमाना—उपेताः परिवृता इत्यर्थः । (2) श्लोकोऽयं दा. म. (पृ–164) ।

(3) दशदानानि गौडीयश्राद्धप्रकाशे (पृ–46) यथा—
गोभूतिलहिरण्याज्यवासोधान्यगुडानि च ।
रौप्यं लवणमित्याहुर्दशदानान्यनुक्रमात् ।
एतानि दशदानानि नराणां मृत्युजन्मनोः ।
कुर्यादभ्युदयार्थं तु प्रेतेऽपि हि परत्र वै ।

(क) विषयोऽयं खगघङ्च नास्ति । (ख) विषयोऽयं घङ्च नास्ति ।

उत्तमे तु पलादूर्ध्वं दक्षिणां वा यथारुचि ।
मध्यमेऽर्धपलादूर्ध्वं सुवर्णं तु कनीयसः ॥

आग्नेये— सुवर्णस्य विनिर्दिष्टो राजषोडशमाषक ।
शक्तितो वस्त्रयुग्मेन स्वर्णालंकरणेन च ॥
अलंकृत्य द्विजं तस्मै नामगोत्रे त्रिपौरुषम् ।
समुच्चार्यात्मनो वाऽपि [1]फलमुद्दिश्य दैवतम् ॥
महादान प्रदेयं स्यादन्यत्र विधिपूर्वकम् ।

"तेनामुकदानं दातुं पात्रत्वेन त्वामहं वृण" इति वाक्येन प्राङ्मुखं द्विजं स्वयमुदङ्मुखो वृणीयात् । तथा च वृद्धवसिष्ठः—

उत्तराभिमुखो दाता वरणे प्राङ्मुखो द्विजः ।
हिरण्यगर्भसालोक्यफलदं कनकं स्मृतम् ॥ इति ।

अथाश्वदानम्

एवमश्वप्रदानस्य विधिः सम्यक् प्रवक्ष्यते ।
अश्वस्तन्मूल्यमथवा कनीयो मध्यमोत्तमम् ॥
पुराणपञ्चदशकं कनीयोमध्यमोत्तमम् ।
त्रिंशत्तमोत्तमं पञ्चचत्वारिंशत् प्रकीर्त्तितम् ॥
तत्र तारागणोऽश्वत्थपत्राकृतिर्मनोहरम् ।
ललाटवस्त्रावरणं पर्याणं शस्त्रयोजितम् ॥
शफाः पञ्चपलैरूप्यैर्वस्त्रयुग्मैर्विभूषितम् ।
उपरिष्टाद् वितानन्तु कांस्येन पलघण्टिकाम् ॥
अर्घ्यपात्रं प्रकल्प्यैवं विप्रायालंकृताय च ।

---

(1) स्वर्णदानस्य फलं, यथा दानक्रियाकौमुद्यां (पृ–51) सम्वर्त्तः—

हिरण्यदः समृद्धिश्च तेजश्चायुश्च विन्दति ।

हेमाद्रेः दानखण्डे(पृ–572)ऽपि स्कन्दपुराणवचनं—

सुवर्णस्य सुवर्णस्य सुवर्णं यः प्रयच्छति ।
सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते ॥

दत्त्वाऽश्वं दक्षिणां दद्यात् पूर्ववन्मन्त्रमुच्चरेद् ॥
विष्णुस्त्वमश्वरूपेण यस्मादमृतसंक्रमः ।
चन्द्रार्कवाहनो नित्यमतः शान्तिं प्रयच्छ मे ॥
ग्रहीता तु यमाय त्वेत्येवं मन्त्रमुदीरयेत् ।
दातुः पृष्ठे पदं दत्त्वा कवचादिविभूषितः ॥
प्राङ्मुखो हयमारुह्य व्रजेत् सप्तपदानि तु ।
सूर्यलोकं स्मरन् दाताऽनुव्रजेद् विनयान्वितः ॥

ताम्रपात्रसहितं यमदैवतम् अश्वम् । यतो [1]यमाय त्वेति मन्त्रजपः । फलम्—

सर्वोपकरणोपेतं युवानं दोषवर्जितम् ।
योऽश्वं ददाति विप्राय स्वर्गलोके महीयते ॥

स्कान्दे— अश्वं यस्तु [2]प्रयच्छेद् वै हेमचित्रं सलक्षणम् ।
स तेन कर्मणा देवि गान्धर्वं लोकमश्नुते ॥

इत्यश्वदानम् ।

अथ तिलपुरुषदानम्

अश्वदानविधिस्त्वेष तिलदानविधिस्ततः ।
अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलः ॥
चतुर्भिः पुष्कलैराढः स्याद्द्रोणश्चतुराढक ।
द्रोणेन द्रोणैर्द्रोणाभ्यां त्रिधा वित्तानुसारतः ॥
शुचौ कम्बलमास्तीर्य तत्र कृष्णमृगाजिनम् ।
तत्र कृष्णमृगान् दत्त्वा सुवर्णमुपरि न्यसेत् ॥
चत्वारि कांस्यपात्राणि चतुर्दिक्ष्वपि वै न्यसेत् ।
दधिमध्वाज्यपयसां सुवर्णानि विधानवत् ॥

---

(1) यमाय त्वाङ्गिरस्वते पितृमते स्वाहा ।
स्वाहा घर्म्माय स्वाहा घर्मः पित्र्ये । शु. यजु. (38/9)

(2) अश्वदानफलं सौरपुराणे (10/40) यथा—
अश्विनोर्लोकमाप्नोति सौन्दर्यं घोटकप्रदः ॥

वस्त्रमाच्छाद्य पूर्वोक्तविधिना विनिवेदयेत् ।
विप्रायालंकृतायाथ दक्षिणां वाऽपि पूर्ववत् ॥

दातुर्जपः । विष्णुदेहोद्भवा इति । जपेत् प्रतिग्रहीताऽपि [1]कोऽदात् कस्मादिति ।

तस्मिन् दिने ब्रह्मचारी दाता स्याच्च तिलाशनम् ।

उत्तानाङ्गिरोदैवतान् । फलं [2]भारते—

[3]तिला गावो हिरण्यञ्च अन्नं कन्या वसुन्धरा ।
दत्तान्येतानि विधिवत्तारयन्ति महद् भयात् ॥
पितॄणां परमं भोज्यास्तिलाः सृष्टाः स्वयम्भुवा ।
[4]तिलदानेन तस्माद्वै पितृपक्षः प्रमोदते ॥
महर्षेः कश्यपस्यैते देहेभ्यो निःसृतास्तिलाः ।
ततो दिव्यं गता भावं प्रदानेषु तिलाः प्रभो ॥
पौष्टिका रूपदाश्चैव तथा पापविनाशिनः ।
तस्मात् सर्वप्रदानेभ्यस्तिलदानं प्रशस्यते ॥
आपस्तम्बश्च मेधावी शंखश्च लिखितस्तथा ।

---

(1) कोऽदात् कस्मा अदात् कामोऽदात् कामायादात् ।
कामो दाता कामः प्रतिग्रहीता कामैतत्ते ॥ शु. यजु. (7/48)

(2) महाभा. (13–65, 6-7, 10–12) ।

(3) श्लोकोऽयं विष्णुधर्मोत्तरे इति दा. म. (पृ–169) ।

(4) तिलदानफलं यथा सौरपुराणे (10-39)—

तिलदः पुत्रमाप्नोति वासोदः कान्तिमुत्तमाम् ॥

विधानपारिजाते (3–168)ऽपि सम्वर्तः—

नित्यनैमित्तिके काम्ये तिलान् दत्त्वा स्वशक्तितः ।
प्रजावान् पुत्रवान् नित्यं धनवान् जायते नरः ॥

अत्रिः— तिलपात्रन्तु सम्पूर्णं यो दद्यात् सुसमाहितः ।
ध्रुवं स गच्छति स्वर्गं नरो वै नात्र संशयः ॥

महर्षिर्गौतमश्चापि तिलदाने दिवं गतः ।
स्वाद्या आप्याश्च स्तन्याश्च मेध्याश्च सततं तिलाः ॥

इति तिलपुरुषदानम् ।

अथ गजदानम्

[1]गजस्तन्मूल्यमथवा कनीयोमध्यमोत्तमाः ।
दश सप्त च पञ्चाशत् पुराणादुत्तमादितः ॥
सुवर्णैः कल्पयेद् घण्टां मणि तारगणानपि ।
कल्पयेच्च उभौ दन्तौ रजतद्विपलेन तु ॥
नासा पञ्चपलैर्विशद्राजतैरूपशोभयेत् ।
चन्द्रातपाङ्कुशच्छत्रवस्त्रध्वजपरिच्छदैः ॥
भूषयित्वा गजं सर्वविधिनाऽथ सदक्षिणम् ।
विप्राय दानं शान्ताय दत्त्वा मन्त्रमिमं जपेत् ॥
यस्मात्त्वं देवराजस्य वाहनोच्चैः समुद्भवः ।
तस्माद् विष्णुपुरं गन्तुं [क]मत्साहाय्यकरो भव ॥
प्रतिग्रहीता [ख]तु कोदादिति मन्त्रमुदीरयेत् ।
दातुः पृष्ठे पदं दत्त्वा गजारूढो भवेत्ततः ॥
गच्छन्तमनुगच्छेत दाता सप्तपदानि तु ॥

फलं महाभारते—हस्त्यश्वोष्ट्रकटादीनि यः प्रयच्छति शक्तितः ।
द्विजाय सूपविष्टाय श्रोत्रियायाहिताग्नये ॥

---

(1) गजमूल्यं कौर्मे यथा—

दद्याद् गजं पुराणोक्तं मूल्यं पञ्चशतानि च ।
वित्तानुसारादधिकं कनिष्ठमध्यमोत्तमम् ॥ दा. म. (पृ–173)

(क) "मम शान्तिकरो" इति ख पाठः ।

(ख) "कोदादित्येव" इति ख पाठः ।

यद् [1]फलं समवाप्नोति तन्मे निगदतः शृणु ।
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ।
भोगान् भुक्त्वा परेणाऽसौ राजा स्यात्तु क्षिताविह ॥

विष्णुसंहितायाम्—कक्षारज्जुभिरावृतं शुभासनसमन्वितम् ।
मणिकाञ्चनमालाभिर्भूषितं कर्णचामरैः ॥
सुगन्धैश्च सुपुष्पैश्च भूषितं दोषवर्जितम् ।
यथालाभोपपन्नं वा यः प्रयच्छति दन्तिनम् ॥
ब्राह्मणाय दरिद्राय स्वर्गलोके महीयते ।
कर्मक्षयादिहायातो भवेद्राजा प्रजाधिपः ॥
सर्वदोषविनिर्मुक्तो जायते नात्र संशयः ॥ इति गजदानम् ।

अथ दासीदानम्

दासीं तन्मूल्यमथवा त्रिधा वित्तानुसारतः ।
पञ्चत्रिंशद्विशतिर्वा पुराणादुत्तमादितः ॥
सुवर्णालंकृतां रूप्यपलैः पञ्चभिरन्विताम् ।
वाससालंकृतां पूर्वं विधिनाऽलंकृतां शुभाम् ॥
सदक्षिणाञ्च विप्राय दत्त्वा मन्त्रमुदीरयेत् ।
क्षीरोदार्णवसम्भूता लक्ष्मीः दासीसमुद्भवा ॥
तथा संसारतरणे भव त्वं मे सहायिनी ।
प्रतिग्रहीता कोदादित्येव मन्त्रमुदीरयेत् ॥

फलम्— अलंकारवतीं दासीं यः [2]प्रदद्याद् द्विजातये ।

---

(1) गजदानफलं यथाऽग्निपुराणे (211–38)—
गजं सदक्षिणं दत्त्वा निर्मलः स्वर्गभाग् भवेत् ॥

(2) दासीदानफलं यथा विधानपारिजाते (2-190), हेमाद्रौ दानखण्डे (पृ–671) ऽपि कौर्मवचनं—
दासीं दद्याद् यथाशक्ति मूल्येनालङ्कृतां शुभाम् ।
सुवर्णरजतैः सार्धं विधिवद्दक्षिणायुताम् ॥

अनु॰

सप्तदशकुलोपेतः स्वर्गलोके महीयते ॥
तल्लोमसंख्या कालं च भुक्त्वा भोगान् यथेप्सितान् ।
पुण्यक्षयादिहायातो भवेद् भोग्यधनाधिपः ॥

इति दासीदानम् ।

अथ रथदानम्

रथस्तन्मूल्यमथवा त्रिधा वित्तानुसारतः ।
षड् द्वादशाष्टादश वा पुराणैर्मूल्यकल्पना ॥
द्विचतुः षड्दलीवर्दाः कनीयःप्रभृतिक्रमः ।
अष्टावनडुहः प्रोक्ताः पुराणान्मूल्यकल्पना ॥
षड्द्वादशाष्टादश वा कुम्भं धान्यं रथोपरि ।
सुवर्णकं पञ्चपल रूप्यं वसनपञ्चकम् ॥
धेनुदासीप्रभृतिकं गृह्योपकरणं वसु ।
वितानछत्रजालंकृतं संकल्प्यैवं रथं शुभम् ॥
ततोऽलंकृत्याविप्राय पूर्ववद्विधिनाऽर्पयेत् ।
दक्षिणां पूर्ववद् दत्त्वा जपेन्मन्त्रं मुदाऽन्वितः ॥
देवमार्गे रथत्वं मे भुक्तिमुक्तिफलप्रद ।
सज्जीभव सुवृल्लेख्यैर्मार्श्वं विष्णुपुरं नय ॥
प्रतिग्रहीता कोदादित्युच्चार्य च रथं विशेत् ।
पञ्चकृष्णलको माषः षष्टिभिस्तैः पलं स्मृतम् ॥
द्वात्रिंशद्भिः पलैः प्रस्थं खारीतैश्च प्रकीर्तितः ।
आढकस्तैश्चतुर्भिस्तु द्रोणः स्याच्चतुराढकः ॥

अनु० वित्तानुसारात्तां दत्त्वा विप्राय गृहमेधिने ।
मोदतेऽप्सरसां लोके यावत् कल्पशतत्रयम् ॥

अग्निपुराणे (211-39)ऽपि—

दासीं दत्त्वा द्विजेन्द्राय अप्सरो लोकमाप्नुयात् ।
दत्त्वा ताम्रमयीं स्थालीं पलानां पञ्चभिः शतैः ॥

द्रोणद्वयन्तु कुम्भं स्यात् सर्पश्चैवाभिधीयते ।
[1]रथदानन्तु यो दद्याच्छ्रोत्रियाय द्विजातये ।
स ब्रह्मलोके वसते यावदाचन्द्रतारकम् ॥

इति रथदानम् ॥

अथ शकटदानम्

[2]भारते— प्रदानं सर्वदानानां शकटस्य विशिष्यते ।
एवमाह महाभागः शाण्डिल्यो भगवानृषिः ॥
शकटं दम्यसंयुक्तं यो ददाति द्विजातये ।
यानमश्वतरीयुक्तं दत्तं भवति तेन वै ॥
यानेन सविचित्रेण स्वर्गलोके महीयते ॥

इति शकटदानम् ।

अथ महागृहदानम्

चतुःशालं त्रिशालं वा द्विशालं चैकमेव वा ।
गृहं वित्तानुसारेण कनीयोमध्यमोत्तमम् ॥
ऐष्टिकं दारुजं वाऽपि मृण्मयं वा स्वशक्तितः ।
रसैरष्टाभिरन्यैश्च गृहयोग्यैरुपस्करैः ॥
[3]सर्वोपकरणोपेतं यो दद्याद् विपुलं गृहम् ।
ब्राह्मणाय दरिद्राय विदुषे च कुटुम्बिने ॥

---

(1) रथदानफलं यथा विधानपारिजाते (2–192), हेमाद्रौ दानखण्डे (पृ–642) गारुडवचनम्—गन्त्रीं तुरङ्गसंयुतां यो ददाति द्विजातये ।
सर्वकामसमृद्धात्मा स राजा जायते भुवि ॥

(2) महाभा. अनुशा. (65–19/20) । महाभारते तु विशिष्यते स्थाने 'विशांपते' इति पाठः ।

(3) सर्वोपकरणयुक्तगृहदाने उपकरणानि यथा दानक्रियाकौमुद्याम्—वर्षोपभोग्यधान्यलवणतैलघृतमरीचादिवणिग्द्रव्यमुद्गमाषादिव्रीहिस्थाल्यादिरन्धनोचितसामग्रीशिलापटमूषलोलूखलसूर्पसम्मार्जनीकुद्दाल[illegible]त्र–

क्रीडित्वा सुचिरं स्वर्गे मानुषं लोकमागत ।
भवत्यव्याहतैश्वर्यः सर्वकामसमन्वितः ॥
इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतम् ।
तव विप्रप्रसादेन मम त्वव्याहतं फलम् ॥
षड्द्वादशाष्टादश वा कुम्भीधान्यैरनुक्रमात् ।
पञ्चदश दशपञ्चभृत्यानां वृत्तये स्थितैः ॥
परिपूर्णं दशधान्यैरजाद्यैः पशुजातिभिः ।
भूधेनुमहिषीदासीकृषिवाणिज्यसाधनैः ॥
शय्यासन सुगन्धाद्यैः शकटैः पेटिकादिभिः ।
सुवर्णैः पञ्चरत्नैश्च रजतैर्वस्त्रकम्बलैः ॥
यावद् गृहोपकरणैर्वित्तशाठ्यं विवर्जयेत् ।
दम्पती समलंकृत्य तस्मै विप्राय वाचयेत् ॥
मूल्यं पुराणाद् द्विचतुः षट् शतान्यथवा क्रमात् ।
कनीयो मध्यमं ज्येष्ठं प्रकल्प्य च समर्पयेत् ॥
पूर्ववद्दक्षिणां दत्त्वा विधिवन्मन्त्रमुच्चरेत् ।
देवादीनां निवासस्त्वं प्राणिनां शरणं तथा ॥
तथा मे भव विश्रान्त्यै शिवलोके गृहोत्तम ।
कोऽदादिति ग्रहीता तु जप्त्वा मन्त्रगृहं विशेत् ॥
फलं भारते— यस्तु नैवेशिकं शुभ्रं ब्राह्मणाय [1]प्रयच्छति ।
त्रिंशत्कोटिस्तु वर्षाणां स्वर्गलोके महीयते ॥
ततोऽवतीर्य कालेन मानुषं लोकमागतः ।
नराणामधिपः श्रीमान् महाराजो भवेद् ध्रुवम् ॥ इति महागृहदानम्

दीपवृक्षदर्वीमृण्मयकलसादिगृहवसत्युचितसामग्रीकाष्ठपादूकाकांस्यभाजनभोजनपात्र–पानपात्रपीठशय्यागोमहिषीदासदासीनानाविधभक्ष्यसामग्रीकनकरजतबहुविधवस्त्रादीनि ।

(1) गृहदानफलं यथा महाभारतस्यानुशासनपर्वणि (57–33)—

नैवेशिकं सर्वगुणोपपन्नं ददाति वै यस्तु नरो द्विजाय ।
स्वाध्यायचारित्रगुणान्वितस्य तस्यापि लोकाः कुरुषूत्तरेषु ॥

क

अथ विपुलगृहदानम्

तत्र [1]पुराणे— ऐष्टिकं दारवं वाऽपि मार्त्तिकं वाऽपि शक्तितः ।
सर्वोपकरणोपेतं यो दद्याद् विपुलं गृहम् ॥
ब्राह्मणाय दरिद्राय विदुषेऽथ कुटुम्बिने ।
क्रीडित्वा सुचिरं कालं मर्त्यलोकं समागतः ।
भवत्यव्याहतैश्वर्यः सर्वकामफलप्रदः ॥

तत्रायं क्रमः— वास्तुलक्षणोपेते शुभे भूभागे बहिर्वृत्तिर्वेष्टिते यथाशक्ति यथाश्रद्धं दारुमयमिष्टकामयं मृत्तिकामयं वा एकभूमिं द्विभूमिं वा प्रधानगृहं गवाक्षकपाटादिशोभितं रसवत्यादिगृहान्तरसहितं निर्माय गृहाङ्गणे चतुरस्रं वृत्तं वा कुण्डमेकं समेखलं पश्चिमयोनिं कृत्वा कर्त्तव्यादिविपुलगृहमिति तद्गृहपूजागृहप्रवेशविधिविहितवास्तुपूजाबलिदानादिकानि कर्त्तुं ब्राह्मणं वृणीते । ततः स वृतो यथाविधि स्वकर्मारभते । दाता च सम्भृतसम्भारो ब्राह्मणं सपत्नीकं गृह प्रविश्य वस्त्रालंकारैः सम्पूज्याहुतिं हुत्वा होमशेषसम्पातजले आत्मानं सम्प्रोक्ष्य दद्यात् । दक्षिणादानानन्तरं कृताञ्जलिः पठेत् ।

इदं गृहं गृहाण त्वं सर्वोपकरणैर्युतम् ।
तव विप्र प्रसादेन ममास्त्वभिमतं फलम् ॥

प्रतिग्रहान्ते कोऽदादिति मन्त्रं पठेत् ॥ इति विपुलगृहदानम् ॥

ख

अथ अनुपकरणगृहदानम्

सम्बर्तः— गृहदाता सुखी प्राज्ञो वितृप्तः सर्ववस्तुषु ।

फलं भारते— बीजैरुपेतं शयनैरुपेतं दद्याद् गृहं यः पुरुषो द्विजाय ।
सुखाभिरामं बहुरत्नपूर्णं, लभेदधिष्ठानवरं स राजन् ॥

इति अनुपकरणं गृहदानम् ॥

---

(1) गारुड़े इति दा. म. (पृ–177) ।

(क) विषयोऽयं कखघङच नास्ति । (ख) विषयोऽयं खगघङच प्रतिलिपिषु नास्ति ।

क

अथ कन्यादानम्

वृद्धवसिष्ठः— क्रीता लब्धा सुता वाऽपि कन्या देया वराय च ।
विप्राय सदृशायैव त्रिधा वित्तानुसारतः ।।
सुवर्णालंकृतां रौप्यपलैः पञ्चभिरेव च ।
गोधान्यादियौतुकेन सत्कृतां वस्त्रभूषिताम् ।।
प्रत्यङ्मुखो यदा दाता प्राङ्मुखाय वराय च ।
उदङ्मुखाय वा यत्र प्रदेया प्राङ्मुखेन च ।।
पूर्वोक्तविधिना दत्त्वा दक्षिणां मन्त्रमुच्चरेत् ।
त्वं गौरीशङ्करायास्मै वराय विनिवेदिता ।।
वेदमन्त्राऽतिवृद्ध्यर्थं कन्ये वाञ्छितमस्तु मे ।
वरः कोऽदादिति जपेद् विवाहे विधिरीरितः ।।
नामगोत्रे समुच्चार्य सम्प्रदानस्य चात्मनः ।
सम्प्रदेयं प्रयच्छन्ति कन्यादाने त्रयं त्रयम् ।।
नान्दीमुखे विवाहे च प्रपितामहपूर्वकम् ।
वाक्यमुच्चारयेद् धीमान् अन्यत्र पितृपूर्वकम् ।।
कन्यादाने पठेन्मन्त्रं द्रव्याणां न पृथक् पृथक् ।
प्रतिग्रहो द्विजश्रेष्ठ तथैकोऽत्र प्रवर्त्तते ।।

सम्वर्तः— अलंकृत्य ततः कश्चिद् वराय सदृशाय च ।
[1]ब्राह्मेण च विवाहेन दद्यात् कन्यां सुपूजिताम् ।।

---

(1) ब्राह्मादिविवाहेषु कन्यादानफलं यथा संस्कारदीपके(पृ–39) वह्निपुराणवचनं-
ब्राह्मेण तु विवाहेन यस्तु कन्यां प्रयच्छति ।
ब्रह्मलोकं व्रजेत्तिक्षप्तं ब्रह्माद्यैः पूजितः सुरैः ।।
दैवेन तु विवाहेन यस्तु कन्यां प्रयच्छति ।
भित्त्वा द्वारन्तु सूर्यस्य स्वर्गलोकं स गच्छति ।। अनु०

(क) विषयोऽयं घङच नास्ति ।

अग्निष्टोमादिमन्त्राणां शतं शतगुणीकृतम् ।
प्राप्नोति पुरुषीं दत्त्वा होममन्त्रैः सुसंस्कृताम् ॥
दत्त्वा तु विधिवत् कन्यां श्रियं विन्दति पुष्कलाम् ।
सह सद्भिः स गण्येत कीर्त्तिं च लभतेऽतुलाम् ॥
तां दत्त्वा तु पिता कन्यां भूषणाच्छादनात्मकैः ।
पूजयन् स्वर्गमाप्नोति नित्यमुत्सववृद्धिषु ॥
[1]सर्वेषामेव दानानामेकजन्मानुगं फलम् ।
हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम् ॥

शातातपः— अप्रार्थितानि दानानि प्रवदन्ति मनीषिणः ।
अन्नं कन्या तथा विद्या न प्रदेया ह्यनर्थिने ॥

इति [2]कन्यादानम् ॥

क

अथ गोचर्मभूमिदानम्

गोचर्ममात्रं भूखण्डमधिकं वा स्वशक्तितः ।
सर्वकामाप्तये सर्वं पापं नाशय यत्नतः ॥
विप्रायालंकृत्य नरः [3]प्रदद्याच्छस्यशालिनीम् ।

अनु॰ गान्धर्वेण विवाहेन यस्तु कन्यां प्रयच्छति ।
गन्धर्वलोकमासाद्य क्रीडते देववच्चिरम् ॥

(1) श्लोकोऽयं बृहस्पति (श्लो-33) इति स्मृतिसमुच्चयः, वसिष्ठ इति संस्कारदीपक (पृ-102) ।

(2) कन्यादानविषये विधा. पारि. (2-213) दा. क्रि. कौ. (पृ-80) संस्का. म. (पृ-102), हेमाद्रि. दान. (पृ-678) खण्डादिषु वर्त्तते ।

(3) गोचर्मभूमिदानस्य फलं यथा पद्मपुराणे॰ (क्रियायोग. 20·1)—

गोचर्ममात्रां भूमिं यो ददाति द्विजसत्तम ।
स गच्छेत् परमं स्थानं विमुक्तः सर्वपातकैः ॥ अनु॰

(क) विषयोऽयं कथञ्च नास्ति ।

पूर्वेण विधिना भूमिं दत्त्वा सम्यक् सदक्षिणाम् ॥
शस्यशून्यां यथाभक्ति सफलां वा जपेदिमम् ।
यथा भूमिप्रदानस्य कलां नार्हन्ति षोडशीम् ॥
दानान्यन्यानि मे शान्ति भूमिदानाद्ददत्विति ।
प्रतिग्रहीताऽथ जपेत् कोऽदान्मन्त्रं मुदाऽन्वितः ॥

गोचर्मपरिमाणं पूर्वमुक्तमेव । भूमिं गोचर्मपरिमाणमधिकां वा शस्यशालिनीं शस्यशून्यां वा प्रियदत्तेति विशेषणविशेषितां विष्णुदेवतामशेषपापक्षयकामोऽभीष्टस्वर्गादिप्राप्तिकामो वा दद्यात् । भूमेः प्रदक्षिणीकरणं स्वीकारः । अत्र फलं [1]श्रीमहाभारते—

यत् किञ्चित् कुरुते पापं पुरुषो वृत्तिकर्शितः ।
अपि गोचर्ममात्रेण भूमिदानेन शुध्यति ॥

[2]व्यासः—
फालकृष्टां महीं दत्त्वा सबीजां सफलामपि ।
उद्दिर्णं वाऽपि शरणं यथा भवति कामदः ॥
भूमिं शस्यवतीं यस्तु ब्राह्मणाय प्रयच्छति ।
यावन्ति शस्यमूल्यानि फलपत्राणि चैव हि ॥
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥
यथाऽप्सु पतितः शक्तः तैलबिन्दुः प्रसर्पति ।
तथा भूमिकृतं दानं शस्ये शस्ये विवर्धयेत् ॥
न भूमिदानादपरं किञ्चिदस्ति युधिष्ठिर ।

बृहन्नारदीये—वृत्तिहीनस्य विप्रस्य दरिद्रस्य कुटुम्बिनः ।
स्वल्पामपि महीं दत्त्वा विष्णोः सायुज्यमाप्नुयात् ।

दा. क्रि. को. (पृ–40)

कूर्मपुराणेऽपि—गोचर्ममात्रं भूखण्डमधिकं वा स्वशक्तितः ।
त्रिधा सदक्षिणं कृत्वा दत्त्वा शिवपुरं व्रजेत् ॥

विधा. पारि. (3–194)

(1) महाभा. (अनु. 62-19), वसिष्ठस्मृतौ (29-16) 'भूमिदानेन पूयते' इति ।

(2) महाभा. अनुशा. (62/20, 4-5, 7-10, 12, 31, 84) ।

तासु एव दद्युः सर्वे भूमिं ये भुञ्जते जनाः ॥
य एतां दक्षिणां दद्यादक्षयां राजसत्तम ।
पुनर्नरत्वं सम्प्राप्य स भवेत् पृथिवीपतिः ॥
यथादानं यथाभोगमिति शास्त्रे विनिश्चयः ।
संग्रामे च तनुं जह्याद् दद्याच्च पृथिवीमिमाम् ॥
इत्येतां क्षत्रबन्धूनां वदन्ति परमां श्रियम् ।
अपि पापसमाचारं ब्रह्मघ्नमपि चानृतम् ॥
पुनाति पृथिवी दत्ता दातारमिति शुश्रुम ।
नामास्याः प्रियदत्तेति [1]हृद्यं देव्याः सनातनम् ॥
दाने वाप्यथवाऽदाने नामास्याः प्रथमं प्रियम् ।
येऽपि संकीर्णकर्माणो राजानः पापकर्मिणः ॥
तेभ्यः पवित्रमाख्यातं भूमिदानमनुत्तमम् ।
भूमिं यः प्रतिगृह्णाति भूमिं यश्च प्रयच्छति ।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ ॥

इति गोचर्मभूमिदानम् ॥

[क]

अथ सोपकरणगृहदानम्

गृहं द्विशालमेकशाल वा कार्षापणशतद्वयपरिमितमूल्यं वा लवणमधुराम्लतिक्तकटुकषायषड्रसोपेतद्रव्यकं व्यययोग्यलवणमधुराम्लतिक्तकटुकषायतण्डुलघृततैलगुडपूगछत्रोपानहपादुकचामरव्यजनवस्त्रकांस्यभाजनताम्रपात्रदात्रखनित्रस्थाली घटीघटशरावदर्वीप्रभृतिगृहोपस्करसहितं षट्कुम्भीधान्यपूरितं पञ्चभृत्याब्दिकवृत्त्यौपयिकव्ययपूरितं धान्ययवगोधूममुद्गमाषमसूरकलायचणकशिम्बिकातूवरीचीनककङ्गुकोद्रवनीवारतिलसर्षपद्वादशधान्यपूरितं वा यवगोधूमशिम्बिककुलित्थकङ्गुमाषमुद्गमसूरश्यामाकसर्षपोपेतदशधान्यपूर्णं वा अश्वाद्युष्ट्रगजधेनुमहिषीदासीकृषि-

---

(1) "गुह्य" इति महाभा. पाठः ।

(क) विषयोऽयं कघङच नास्ति ।

वाणिज्यसाधनशय्यासनसुगन्धादिकटुकषायपरिपूर्णं पेटिकादियुक्तं सुवर्णरजतपञ्चपलवस्त्रकम्बलादियथोपपन्नं गृहोपस्करसहितं विष्णुदैवतं स्वर्गप्राप्तिकामो दद्यात् । अत्र फलं श्रीमहाभारते—

यस्तु नैवेशिकं शुभ्रं ब्राह्मणाय प्रयच्छति ।
त्रिंशत्कोटिं तु वर्षाणां स्वर्गलोके महीयते ॥
ततोऽवतीर्णः कालेन मानुषं लोकमागतः ।
नगराधिपतिः श्रीमान् महातेजा भवेद् ध्रुवम् ॥

इति सोपकरणगृहदानम् ॥

अथ कपिलाधेनुदानम्[क]

कपिलाधेनुरथवा पुराणाद्दशमूल्यतः[1] ।
त्रिधा वित्तानुसारेण देया विप्राय मुक्तये ॥
सुवर्णेन सुवर्णाभ्यां सुवर्णैर्दशभिक्रमात् ।
शृङ्गालंकरणं तस्याः प्रथमादिविधौ स्मृतम् ॥
शफाः पञ्चपलै रौप्यैरथवा दशभिः पलैः ।
पलैर्विंशतिभिः कुर्याद् वस्त्रालंकरणं तथा ॥
पञ्चाशत्पलकं ताम्रं पृष्ठं स्यात् कांस्यदोहनम् ।
तुरीयांशेन वत्सस्य शफाद्यालंकृतिर्भवेत् ॥
महाशृङ्गीविधानेन प्रत्येकं शृङ्गमण्डनम् ।
सुवर्णैर्दशभिश्चैव विधिरुत्तरा वक्ष्यते ॥
वत्सस्य मण्डनं स्वर्णमश्वत्थदलसन्निभः ।
ललाटे भूषणं कुर्यादेवं विधिरुदाहृतः ॥

---

(1) कपिलाधेनोः मूल्यं यथा अपरार्कटीकायां (पृ–297) सम्वर्तः—
दशधेनुप्रदानेन तुल्यैका कपिला मता ।

(क) विषयोऽयं घङच नास्ति ।

महापातकनाशाय[1] स्वर्णश्रृङ्गी प्रदीयते ।
एवं संकल्प्य कपिलां वितानेनोपशोभिताम् ॥
समलंकृत्य विप्राय पूर्वोक्तविधिनाऽर्पयेत् ।
पूर्ववद्दक्षिणां दत्त्वा जपेन्मन्त्रं मुदाऽन्वितः ॥
कपिले त्वं हि देवानां पूजनीयाऽसि रोहिणी ।
सर्वतीर्थमयी यस्मादतः शान्ति प्रयच्छ मे ॥
ग्रहीता तु जपेत् कोऽदादिति मन्त्रं मुदाऽन्वितः ॥

इति कपिलाधेनुदानम् ।

इति कूर्मपुराणोक्तदशमहादानानि ।

अथ पूर्णचक्रदानम्[क]

तत्र महाभारते—ब्राह्मणाय दरिद्राय श्रोत्रियायाऽऽहिताग्नये ।
यत्पुण्यफलमाप्नोति पूर्णचक्रप्रदो नरः ॥
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ।
भोगान् भुक्त्वाऽमरपुरे जायते हि द्विजोत्तमः ॥
भोगी भुक्त्वा सुविपुलान् ततो विष्णुपुरं व्रजेत् ।
विधि तत्र प्रवक्ष्यामि येन दुःखं न पश्यति ॥
वेणुपृष्ठचक्रद्वयं शुक्लधान्यैः परिप्लुतम् ।
पञ्चरत्नाद्यलंकारं वाससा परिवेष्टयेत् ॥

---

(1) कपिलायाः दानफलं महाभारते (अनुशा. 70-50)—
गामप्येकां कपिलां सम्प्रदाय, न्यायोपेतां कल्मषाद् विप्रमुच्येत ।
गवां रसात् परमं नास्ति किञ्चिद् गवां दानं सुमहद् वदन्ति ॥
(Smriti materials in the Mahabharata (vol. 1, P-155)
पुनश्च महाभारते (अनुशा. 57-28)—
प्रयच्छते यः कपिलां सचैलां कांस्योपदोहां कनकाग्रश्रृङ्गीम् ।
तैस्तैर्गुणैः कामदुघास्य भूत्वा नरं प्रदातारमुपैति सा गौः ॥

(क) विषयोऽयं कघङ्च नास्ति ।

वाहुङ्गवैणवंशकै द्वौ रचितशोभनौ ।
सहेमदक्षिणां दत्त्वा प्रार्थयेल्लक्ष्मीरूपिणम् ॥
कृताञ्जलिपुटः पश्यन्निमं मन्त्रमुदीरयेत् ।
त्वं पूर्णचक्र लक्ष्मीस्त्वं विष्णुदेवाधिदैवतम् ॥
वर्द्धय धान्यं देवेश वंशे दारिद्र्यं मा वहेत् ।
त्वां लक्ष्मीं पूर्णधान्यादि-पञ्चरत्नाद्यलंकृताम् ॥
ददामि दानं विप्राय समृद्धिं वर्धयस्व मे ।
विष्णुदेहोद्भवं धान्यं जगतः प्राणधारणम् ॥
सर्वपापविनिर्मुक्तं सुखं प्रीणातु मे भुवि ।
स्वीकृत्य दक्षिणां विप्र इमं मन्त्रं पठेत्ततः ॥
वैष्णवं दण्डमादत्ते उच्छ्रायस्वेति मन्त्रवित् ।
सम्वत्सरो सातिबाहु गयां शिक्यावुशिषसी ॥
प्रनूनमिति चक्रञ्च चक्षुवासोष्णिबन्धनम् ।
स्कन्धे कृत्वा रथे तिष्ठन्निमं मन्त्रमुदाहरेत् ॥
एकचक्ररथो देवः सप्ताश्वः सूर्यसंज्ञितः ।
अरुणः सारथिर्यस्य सप्रीतिं वर्द्धयस्व मे ॥
एवं दत्त्वा व्रीहीन् विप्रः सर्वपापैः प्रमुच्यते ।
लोकानन्यानतिक्रम्य ब्रह्मलोकं स गच्छति ॥

इति पूर्णचक्रदानम् ।

क

अथ कालचक्रदानम्

तत्र[1] मृत्युञ्जयपुराणे—

चक्रं रूप्यमयं कृत्वा मुक्तारश्मिमयात्मकम् ।
कृत्वा मूर्ध्नि शरच्चन्द्ररश्मिमध्यान्तरस्थितम् ॥

---

(1) विधा. पारि. (3–339), दा. म. (पृ–261) ।

(क) विषयोऽयं कपुस्तके नास्ति ।

तमः शतैकरूपाणि गात्रेषु च समन्ततः ।
एवं ध्यानवतस्तस्य सचन्द्रः कृष्णतां व्रजेत् ॥
ततोऽप्यनन्तरं पश्चात् स्थित्वा विप्रः प्रदक्षिणम् ।
तं गृहीत्वा व्रजेद्दूरमदृष्टत्वमपि व्रजेत् ॥
स्वयं वाऽमृतसंघात पूर्णकायस्थितिस्थितः ।
कालचक्रमिदं नाम्ना दानं मृत्युविनाशनम् ॥

मूर्ध्निस्थितं रूप्यमयं चन्द्रं कृष्णतां गतं ध्यात्वा पट्वन्तरिताय ब्राह्मणाय दद्यात् । दक्षिणादानानन्तरं पृष्ठतो मूर्ध्नि स्थितं चन्द्रं गृहीत्वा ब्राह्मणो गच्छेत् ।

इति कालचक्रदानम् ॥

क

अथ विष्णुदैवतदीपदानम्

तत्र [1]याज्ञवल्क्यः—

भूदीपांश्चान्नवस्त्रार्णस्तिलसर्पिः प्रतिश्रयान् ।
नैवेशिकं स्वर्णधूर्यान् दत्त्वा स्वर्गे महीयते ॥

नन्दीपुराणे— [2]दीपं ददाति यो मर्त्यः सुरब्राह्मणवेश्मसु ।
स हि दिव्येन यानेन ध्वजछत्रप्रभासिना ॥
स गच्छेत् स्वर्गमतुलं वसेत्तत्र समाः शतम् ।

शुभदिने दीपदानं संकल्प्य देवालये ब्राह्मणगृहे वा यथेच्छकालावधि प्रतिदिनं दद्यात् ।

इति विष्णुदैवतदीपदानम् ।

---

(1) या. स्मृ. (1-210) ।

(2) दीपदानफलं यथा गरुडपुराणे विधानमालायां (3-420)—

यस्तु ब्राह्मणगेहेषु दीपमालां प्रयच्छति ।
स निर्जित्य तमोघोरं ज्योतिषां लोकमाप्नुयात् ॥

(क) विषयोऽयं कघङच नास्ति ।

[क]

अथ पाकदानम्

तत्र भविष्योत्तरे—

आपाकाख्यं महादानं कथयामि युधिष्ठिर ।
दत्तेन येन कामानां पुमान् भवति भाजनम् ॥
ग्रहताराबलं लब्ध्वा भार्गवं पूजयेत्ततः ।
वासोभिर्भूषितैश्चैव पुष्पैरगुरुचन्दनैः ॥
ब्रूयात्तथैनं सम्मान्य यथा तुष्टोऽभिजायते ।
त्वं मे भाण्डानि चित्राणि गुरुणि च लघूनि च ।
मणिकादीनि [1]शुक्तानि स्थालीश्च सुमनोहराः ॥
घटकान् करकांश्चैव प्रणीताः कुण्डकानि च ।
गवादीनि च पात्राणि भाण्डमुच्चाऽवरं बहु ॥
सम्पादय महाभाग विश्वकर्मा त्वमेव हि ।
भार्गवोऽपि प्रयत्नेन नानाभाण्डसमन्वितम् ॥
आपाकं कल्पयेद्दिव्यं विधिदृष्टेन कर्मणा ।
सहस्रमेव भाण्डानां स्थापयित्वा विलक्षणः ॥
सन्धिकाले चार्पयित्वा दद्याच्चैव हुताशनम् ।
रात्रौ जागरणं कुर्याद् गीतमङ्गलनिःस्वनैः ॥
ततः प्रभाते विमले ज्ञात्वा निरर्चिषं शनैः ।
रक्तवस्त्रैः समाच्छाद्य पुष्पमाल्याभिरर्चयेत् ॥
यजमानस्ततः स्नात्वा शुक्लाम्बरधरः शुचिः ।
हेमरौप्याणि भाण्डानि ताम्रलोहमयानि च ॥
परितः स्थापयित्वा च स्वशक्त्या तानि षोडश ।
पूजयित्वा प्रयत्नेन कृत्वा चापि प्रदक्षिणम् ॥

---

(1) शुक्तानि— शुक्तं मृद्भाण्डविशेषः ।

(क) विषयोऽयं कघङच नास्ति ।

अग्निकार्यं ततः कुर्याद् यथोक्तविधिना गुरुः ।
आघारावाज्यभागौ च हुत्वा होमं समारभेत् ॥
महाव्याहृतिमन्त्रेण तिलमष्टोत्तरं शतम् ।
आद्यं मधुसमायुक्तं होतव्यं षोड़शाहुतीः ॥
पुरुषसूक्तमन्त्रेण स्विष्टकृत् प्राशनं ततः ।
ब्राह्मणान् वाचयित्वा तु भार्गवं पूजयेत्ततः ॥
नारीश्च विविधास्तत्र समुचित्य प्रपूज्य च ।
प्रदक्षिणं ततः कृत्वा मन्त्रेणानेन पूजयेत् ॥
आपाक ब्रह्मरूपोऽसि भाण्डनामानि यत्नतः ।
प्रदानात्ते प्रजापुष्टिः स्वर्गश्चास्तु तथाऽक्षयः ॥
भाण्डरूपाणि यान्यत्र कल्पितानि मया किल ।
भूत्वा स तानि रूपाणि उपतिष्ठन्तु तानि मे ॥
दानमन्त्रः— यो यस्य येन भाण्डेन न तस्य चार्पयेत्ततः ।
स्वेच्छया चैव गृह्णन्तु न निवार्यस्तु कश्चन ॥
अनेन विधिना यस्तु दानमेतत् प्रयच्छति ।
विश्वकर्मा भवेत्तुष्टः तस्य जन्मत्रयं प्रियः ॥
नारी च दत्त्वा सौभाग्यमतुलं प्रतिपद्यते ॥
गृहय सर्वगुणोपेतं भृत्यमित्रजनैर्वृतम् ॥
अवियोगं तथा मया रूपं चानुत्तमं लभेत् ।
भूदानमेतन्निर्दिष्टं प्रकारेण तवानघ ॥
विद्यते बहुभिर्भेदैर्भूमिरेषा नरेश्वर ॥

निष्पापभाण्डमथ योच्चतरं प्रयत्नादापाकदानमपि या कुरुते वरस्त्री ।
सा पुत्रपौत्रपशुवृद्धिसुखानि भुक्त्वा प्रेत्य स्वभर्तृसहिता सुखिनी सदास्ते ॥

परितः स्थापयित्वेति यथाशक्तिरचितसुवर्णरूप्यताम्रलोहानां चत्वारि भाण्डानि यथाक्रमं पूर्वाद्यष्टदिक्षु स्थापयित्वा इत्यर्थः । भार्गवं पूजयेदिति कुम्भकारतत्पत्नीभ्यां शुक्लरजतवस्त्रे दद्यादित्यर्थः ।

आपाकब्रह्मरूपोऽसि भाण्डानीमानि जन्तवः ।
प्रदानात्ते प्रजा पुष्टिः स्वर्गश्चास्तु तथाऽक्षयः ।।

इत्यनेन आपाकं गन्धपुष्पादिना पूजयेत् । ततोऽग्निस्थापनपूर्वको होमः । शान्तिकरणानन्तरमापाकमुत्सृजेत् । ॐ अद्येहेत्यादि देशकालवाक्यमुच्चार्य भाण्डरूपाणि यान्यत्रेति श्लोकं पठित्वा नानागोत्रशर्मभ्यो नानावेदशाखाशाखैकदेशाध्यायिभ्यो ब्राह्मणेभ्यः अमुकसगोत्रामुकदेवी मम अतुलसौभाग्यसर्वगुणोपेतभृत्यमित्रजनावृतगृहापत्यावियोगानुत्तमरूपपुत्रपौत्रसुखभोगशरीरानन्तरस्वभर्तृसहितमुषित्वा आसमिममापाकं नानाभाण्डपूरितं विष्णुदैवतं दानमहमुत्सृजे ।

इति आपाकदानम् ।

[क]

अथ विद्यादानम्

महाभारते— शस्त्रं शास्त्रं कलां शिल्पं यो यदिच्छेदुपार्जितम् ।
तस्योपकारकरणे पार्थ कार्यं सदा मनः ।।
वाजपेयसहस्रस्य सममिष्टस्य यत् फलम् ।
तत् फलं समवाप्नोति विद्यादानान्न संशयः ।।

नन्दीपुराणे— वेदविद्यां नरो दत्त्वा स्वर्गे कल्पत्रयं विशेत् ।
छात्राणां भोजनं भुङ्क्ते यस्तु भिक्षामथापि वा ।।
दत्त्वाप्नोति च पुरुषः सर्वकामान्न संशयः ।।

इति विद्यादानम् ।

[ख]

अथ कालपुरुषदानम्

तत्र [1]भविष्योत्तरे—

पुण्यदिनमथासाद्य भूमिभागे समे शुभे ।
पूपान् कृष्णतिलैः कृत्वा रूप्यदन्तः सुवर्णदृक् ।।

---

(1) दा. म. (पृ–260) ।

(क) चिषयोऽयं कघङच नास्ति । (ख) विषयोऽयं कघङच नास्ति ।

खड्गोद्यतकरो दीर्घो जवाकुसुममण्डलः ।
रक्ताम्बरधरः स्रग्वी शंखमालाविभूषितः ॥
तीक्ष्णाऽसि[1]पुत्र्याबन्धेने प्रसारित कटीतटः ।
उपानद्युगयुक्तांघ्रिः कृष्णकम्बलपार्श्वकः ॥
गृहीतमांसपिण्डश्च वामे करतले तथा ।
एवंविधं नरं कृत्वा गृहीतकुसुमाञ्जलिः ॥
यजमानः प्रसन्नात्मा [2]इमं मन्त्रमुदीरयेत् ।
सम्पूज्य गन्धकुसुमैः देवेशं विनिवेद्य च ॥
सर्वं कलयसे यस्मात् कालस्त्वं तेन चोच्यसे ।
ब्रह्मविष्णुशिवादीनां त्वमसाध्योऽसि सुव्रत ॥
पूजितस्तु मया भक्त्या प्राथ्र्यतश्च यथासुखम् ।
यदुच्यते तव विभो तद् कुरुष्व नमो नमः ॥
एवं सम्पूज्य जप्त्वा तं ब्राह्मणाय निवेदयेत् ।
ब्राह्मणं प्रथमं पूज्य वासोभिर्भूषणैस्तथा ॥
दक्षिणां शक्तितो दत्त्वा प्रणम्य च प्रसीदयेत् ॥
[3]अनेन विधिना यस्तु दानमेतत् प्रयच्छति ।
न च मृत्युभयं तस्य न च व्याधिकृतं भयम् ॥
भवत्यव्याहतैश्वर्यः सर्वबाधाविवर्जितः ।
देहान्ते सूर्यभवनं भूत्वा याति परं पदम् ॥
पुण्यक्षयादिहागत्य राजा भवति धार्मिकः ।
सत्रयाजी श्रियायुक्तः पुत्रपौत्रसमन्वितः ॥

सम्पूज्य गन्धकुसुमैरिति । कालपुरुषाय नमः इति मन्त्रेण । एवं सम्पूज्येति । स सर्व कलयसे इति श्लोकद्वयेन । पुनः पुष्पाञ्जलिं दत्त्वा ।

इति कालपुरुषदानम् ।

---

(1) असिपुत्री—छुरिका । (2) कोऽदादिति मन्त्रम् ।
(3) अनेन......समन्वितः "इत्यन्तोभागः हे. दान. (पृ-763) ।

क

अथ लोहदण्डदानम्

अत्र भारते— पञ्चाशत् पलसंयुक्तो दण्डश्च यस्य सर्वतः ।
वस्त्रेणाच्छाद्य दानाच्च यमदण्डो न विद्यते ॥
अरत्निहस्तमात्रं वा मानं तस्य प्रकीर्त्तितम् ॥

दण्डो दातृहस्तप्रमाणतः । प्रार्थना तु—

यस्मादायसकर्माणि तवाधीनानि सर्वदा ।
लाङ्गलाद्यायुधादीनि ततः शान्ति प्रयच्छ मे ॥

इति लोहदण्डदानम् ॥

ख

अथ नारदीये सालग्रामदानविधिः

देशकालवाक्यानन्तरम् अमुकसगोत्रः अमुकशर्मा मम श्रीभगवतो वासुदेवस्य प्रीतये नारदीयपुराणोक्त-सालग्रामदानमहं करिष्ये । पुरुषसूक्तेन पूजनम् । ततः

प्रार्थना— त्रैलोक्याधिपते श्रीमन् वासुदेव जगत्पते ।
अतस्त्वाहं प्रयच्छामि मामुद्धर महाप्रभो ॥

वासुदेवस्य प्रीतये सालग्रामशिलादानम् अनेनेति त्वामहं वृणे । पुनः प्रार्थना—

[1]सालग्रामशिलाचक्रं यो दद्याद् दानमुत्तमम् ।
भूचक्रं तेन दत्तं स्यात् सशैल[2]वनकाननम् ॥

---

(1) दा. म. (पृ–259), पद्मपुराणे इति विधा. मा. (ख–3, पृ–431), विष्णुध. इति दा. क्रि. कौ. (पृ–65) ।

(2) सालग्रामदानफलं यथा देवीभागवते (9-30-12)—

यो ददाति ब्राह्मणाय सालग्रामं सवस्त्रकम् ।
महीयते स वैकुण्ठे यावच्चन्द्रदिवाकरौ ॥

पद्मपुराणेऽपि—

शालग्रामशिला येन प्रदत्ता द्विजसत्तम ।
नूनं तेन प्रदत्तानि भुवनानि चतुर्दश ॥

(क) विषयोऽयं कघङच नास्ति । (ख) विषयोऽयं कघङच नास्ति ।

इमां सालग्रामशिलां गण्डुकीतीर्थोद्भवां वज्रकीटनिर्मितां विष्णुचक्रां लक्ष्म्यङ्कभूषितां मम आजन्मपापक्षयपूर्वक वैकुण्ठभुवनलोकप्राप्तये ब्रह्मविष्णुईशानाधिदैवतां नारदीयपुराणोक्तां दातुमहमुत्सृजे । नमोऽस्त्वनन्तायेति प्रार्थना ।सुवर्णदक्षिणा ।

इति सालग्रामदानविधिः ॥

क

अथ हिरण्यकूष्माण्डदानविधिः

ऋषय ऊचुः— सूत ! सूत ! महाबुद्धे वद नो वदताम्वर ।
मृतवत्सा च या बन्ध्या सुपुत्रा सा कथं भवेत् ॥
कथं सन्ततिरच्छिन्ना भवत्येव महीतले ।
व्रतेन तपसा वाऽपि दानेनैव महामते ॥
नारी पुत्रमवाप्नोति स्ववंशस्य च वर्धनम् ॥

सूत उवाच— एकदा नारदं दृष्ट्वा शौनको मुनिसत्तमः ।
पूजयित्वा यथान्यायं पप्रच्छेमां शुभां कथाम् ॥

शौनक उवाच—ब्रूहि नारद सर्वज्ञ [1]चतुर्मुखमनोभव ।
प्रश्नश्च परिपृच्छामि नाज्ञानं तव विद्यते ॥
मृतवत्सा च या नारी बन्ध्या च विधवा च या ।
स्ववंशवर्धनं पुत्रं लभते दीर्घमायुषम् ॥
केन दानेन तपसा केन वा पुण्यकर्मणा ।
नारी प्राप्नोति तनयं धर्मज्ञं वंशवर्धनम् ॥

नारद उवाच— शृणु शौनक वक्ष्यामि कथामेतां पुरातनीम् ।
नारीणां हृदयानन्ददायिनीं पुण्यवर्द्धिनीम् ॥
पुरा बभूव राजेन्द्र सप्तद्वीपेश्वरो नृपः ।
सगरो नाम विख्यातः स्वर्गे सुरपतिर्यथा ॥

---

(1) चतुर्मुखमनोभव—ब्रह्मणः मानसपुत्रः ।
(2) सुरपतिः—इन्द्रः ।

(क) विषयोऽयं खघङच नास्ति ।

तस्य पुत्रास्तु बहवो मृताः कपिलमुनिना ।
नष्टपुत्रो महीपालो निमग्नः शोकसागरे ।।
पुरोधा तस्य तं दृष्ट्वा राजानं शोकविह्वलम् ।
वसिष्ठस्तु शुभैर्वाक्यैः शान्त्वयामास वै नृपम् ।।
शोकं विसृज्य स पुनः वसिष्ठमिदमब्रवीत् ।।

सगर उवाच— वसिष्ठ नष्टपुत्रोऽहं शोकाब्धौ पतितं नु माम् ।
मम वंशकरं पुत्रं दत्त्वा मामुद्धर प्रभो ।।

वसिष्ठ उवाच— वदरिकाश्रमे पूर्वं कथामेतां पुरातनीम् ।
पप्रच्छुर्मुनयोर्व्यासं तेन यद् प्रोच्यते शृणु ।।

व्यास उवाच— या नष्टपुत्रा वन्ध्या वा काकवन्ध्या तु या भवेत् ।
गर्भस्रावो भवेद् यस्याः प्रतिगर्भं द्विजोत्तमाः ।।
एवं चतुर्विधा वन्ध्या भवति पृथिवीतले ।
नार्यस्तासां शृणुध्वं हि पुत्रोत्पत्ति कुलं यथा ।।
हिरण्यगर्भं कूष्माण्डं वस्त्रादिभिरलंकृतम् ।
यो ददातीह विप्राय वैदिकाय सदक्षिणाम् ।।
सा पुत्रं लभते शीघ्रं वंशवृद्धिकरं द्विजाः।
निर्धनं ब्राह्मणं शान्तं वेदसुतं सलक्षणम् ।।
विवाहं कारयित्वा तु लभते सा सुतं शुभम् ।

ऋषय ऊचुः— कूष्माण्डदानस्य विधिं कथयस्व महामते ।
दानं दत्त्वा यथा नारी बहुपुत्रं लभेच्छुभम् ।।

व्यास उवाच— एतद्दानस्य च विधिं कथयामि समासतः ।
शृणुध्वं मुनयः सर्वे रहस्यमिदमुत्तमम् ।।
वरुणादींस्तु सम्पूज्य घटे पञ्चोपचारकैः ।
स्वस्तिवाचनकं कुर्याद् ब्राह्मणैः वेदपारगैः ।।
आचार्यं वरयेत्तत्र वृद्धिश्राद्धन्तु कारयेत् ।
ब्राह्मणं वरयेत् पश्चात् ततः पूजां समाचरेत् ।।

[1]त्र्यम्बकेनैव मन्त्रेण रुद्रं तत्र प्रपूजयेत् ।
कूष्माण्डफलमानीय न्यायेन ब्राह्मणो महत् ॥
तस्य गर्भे हिरण्यञ्च त्रिमाषं हि नियोजयेत् ।
स्नापयेत् पञ्चगव्येन तीर्थतोयेन वा पुनः ॥
चन्दनाद्यैरलंकृत्य वस्त्रेणाच्छादयेत्ततः ।
[2]या फलिनीति मन्त्रेण शतं वा दश वा हुनेत् ॥
ब्रह्मणे दक्षिणां दत्त्वा पूर्णपात्रं वरोऽथवा ।
गृहीत्वा चैव कूष्माण्डं नारी नत्वा च [3]त्र्यम्बकम् ॥
वैदिकं ब्राह्मणं शान्तं दद्याद्दानं सदक्षिणम् ।
आचार्यं दक्षिणां दत्त्वा चाच्छिद्रमवधारयेत् ॥
पयस्विनीं सवत्सां तु दक्षिणार्थं प्रकल्पयेत् ।
एवं या कुरुते दानं वन्ध्या कूष्माण्डमुत्तमम् ॥
सा पुत्रं लभते शीघ्रं धार्मिकन्तु शतायुषम् ॥
वसिष्ठवचनं श्रुत्वा सगरः स महीपतिः ॥
हिरण्यगर्भं कूष्माण्डं दत्त्वा च द्विजपुङ्गवम् ।
अचिराल्लभते पुत्रं धार्मिकं लोकविश्रुतम् ॥
सर्वसौभाग्यसम्पत्ति पुत्रपौत्रप्रवर्द्धनम् ।
कूष्माण्डफलदानेन तत्सर्वं सर्वदाऽस्तु मे ॥
कूष्माण्डफलं यस्मात्त्वं नरसन्तानवर्द्धनम् ।
तव प्रसादात् सफला मम सन्तु मनोरथाः ॥
दान प्रार्थना— यस्मात् फलेषु सर्वेषु त्वमसि वरकोपमः ।
तस्मात् सर्वफलप्राप्तिरस्तु मे जन्मजन्मनि ॥

---

(1) त्र्यम्बकं यजामहे सुगन्धि पुष्टिवर्द्धनम् । ऊर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ शु. यजु. (3/60) ।

(2) या फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः । बृहस्पति प्रसूतास्तानो मुञ्चन्त्वंहसः ॥ शु. यजु. (12–89) ।

(3) त्र्यम्बकं—महादेवम् ।

मनोरथफलं त्वञ्च प्रददासि सदा नृणाम् ।
पुत्रपौत्रविवृद्ध्यर्थं तस्माच्छान्ति प्रयच्छ मे ॥

दानकालमाह— योग्ये तीर्थे सिन्धुतीरे ग्रहणे चन्द्रसूर्ययोः ।
अपुत्रा मृतवत्सा च ब्राह्मणाय निवेदयेत् ॥
यजमानः शुचिर्भूत्वा संकल्पविधिमाचरेत् ॥

अस्य विधिः— यजमानः शुचिर्भूत्वा नवाम्बरं परिधाय घटे वरुणादीन् सम्पूज्य स्वस्तिवाचनं कृत्वा संकल्पमाचरेत् । ततः नवपीठे त्र्यम्बकमावाह्य वस्त्रगन्धपुष्पादिभिः सम्पूज्य वृद्धिश्राद्धं कुर्यात् । ततः कूष्माण्डमानीय हिरण्यवस्त्रादिभिरलंकृत्य तत्पूजामाचरेत् । ॐ सहिरण्यवस्त्रालंकरणक कूष्माण्डदानाय नमः । एतत् सम्प्रतिग्रहीत्रे ब्राह्मणाय नमः । ब्राह्मणं वस्त्रयुग्मालंकरणादिभिः सम्पूजयेत् ।

संकल्पं यथा— देशकालवाक्यानन्तरं महावाक्यं कृत्वा ब्राह्मणस्य नामगोत्रमुच्चार्य अमुकसगोत्रायाः अमुकदेव्याः मम इहजन्मप्रभृति जन्मान्तरप्रभृति वा ज्ञानाज्ञानसकृदत्यन्ताभ्यासकृतसर्वपापक्षयपूर्वक इह जन्मनि पुत्रपौत्राद्यव्यवछिन्नसत्पुत्रप्राप्तये सहिरण्यवस्त्रालंकरणक कूष्माण्डदानसंकल्पमहं कुर्वीयेति ।

ततः कूष्माण्डं ब्राह्मणाय दद्यात् । ब्राह्मण इदं कूष्माण्डं सहिरण्यवस्त्रालंकरणकं प्रतिगृह्णामि इति वदेत् । स्वस्तित्रिवारमुच्चार्य कोऽदादिति कामगायत्रीं पठेत् । ततो दक्षिणादानम् । दत्तैतत् कूष्माण्डदानकर्मणः साङ्गतासिद्ध्यर्थम् इदं सुवर्णमग्निदैवतं ब्राह्मणाय तुभ्यमहं सम्प्रददे । सुवर्णं— षोड़शमाषकम् । प्रार्थना पूर्ववत् । ततोऽछिद्रावधारणम् । ब्राह्मणभोजनम् । आशीः प्रदानम् ।

इति श्रीब्रह्मपुराणे बन्ध्यापुत्रफलप्रद हिरण्यगर्भकूष्माण्डदानविधिः ।

[क] अथ [1]पद्मपुराणस्य कर्मविपाकोक्तपुत्रहीनतानिदानम्

तत्प्राप्तिहेतुमाह—शौनक उवाच—

कथयस्व महाप्राज्ञ पुत्रहीनो जनो भवेत् ।
कर्मणा केन वै सूत पुत्रो भवति केन च ॥

---

(1) पद्मपुराण—ब्रह्मखण्ड—(5/1-38) ।

(क) विषयोऽयं खगघङ्च नास्ति ।

सूत उवाच— एतत् पृष्टः पुरा ब्रह्मा नारदेन महात्मना ।
स यदाह तदा तच्च शृणुष्व मुनिपुङ्गव ॥
नारद उवाच— पितामह महाप्राज्ञ सर्वतत्त्वार्थपारग ।
अपुत्रो वै भवेन्मर्त्यः कर्मणा केन पद्मज ॥
वन्ध्या स्त्री वा भवेत् केन वृजिनेन ममाग्रतः ।
कथय शृण्वतो वै मे सर्वप्राणिहिते रत ॥
दुहिता जायते केन कर्मणा वा नपुंसकः ।
मृतवत्सो भवेत् केन मृतवत्सातिदुःखिता ॥
केन पुण्येन भो ब्रह्मन् पुनः पुत्रो भवेद् वद ॥
ब्रह्मोवाच— कथयामि समासेन सावधानेन तच्छृणु ।
वृत्तान्तं पृच्छसि त्वं वै शृण्वतां विस्मयप्रदम् ॥
पूर्वजन्मनि यो मर्त्यो वर्त्तनं ब्राह्मणस्य च ।
[1]हारयेद् धारयेद् वाऽपि पुत्रहीनो भवेत्किल ॥
इह जन्मनि यो मर्त्यः पुराणश्रवणं हि च ।
भूमिं सशस्यां दानञ्च [2]कुर्याद्वै श्रद्धयान्वितः ॥
धेनुं [3]बहुतरां हैमीं बहुदुग्धां सदक्षिणाम् ।
सुवर्णप्रतिमाञ्चैव तस्य पुत्रो भवेद् ध्रुवम् ॥
पूर्वजन्मनि या नारी परबालकघातनम् ।
करोति कपटेनैव बालहीना भवेद् ध्रुवम् ॥
सुवर्णप्रतिमादानं या नारी श्रद्धयाऽन्विता ।
कुर्यात् पानं ब्राह्मणस्य भक्त्या वै चरणोदकम् ॥
पुराणश्रवणं चैव दद्याद्वै बहुदक्षिणाम् ।
बह्वपत्या जीवद्वत्सा [1]सा भवेन्नात्र संशयः ॥

---

(1) "हरेद्वा हारयेदत्र" इति पद्म. पु. पाठः ।

(2) "दद्याद्वै श्रवणान्वितः" इति पद्म. पु. पाठः ।

(3) "गुणां हैमीं" इति पद्मपु. पाठः । (4) "भवेन्नोऽस्त्यत्र" इति पद्मपु. पाठः ।

जले निमग्नं बालं यो दृष्ट्वा या न समुद्धरेत् ।
इह जन्मन्यपुत्रो वै साऽपुत्री च भवेद् ध्रुवम् ॥
वृषभञ्चैव कूष्माण्डं ससुवर्णं सवस्त्रकम् ।
दद्याद्दानं ब्राह्मणाय कुर्याद् बालव्रतं यथा ॥
गौरीं कन्यां तथा कुर्यात् पुराणश्रवणं [1]द्विजः ।
पुत्रो वै जायते तस्य सर्वपातकनाशनम् ॥
पूर्वजन्मनि यो मर्त्यो निराशं चातिथिं द्विज ।
कुर्यात् क्रोधेन [2]वै दण्डं पुत्रहीनो भवेद् ध्रुवम् ॥
ब्राह्मणं चातिथिं चैव कुर्याद् भक्त्या प्रपूजनम् ।
अन्नदानं जलं चैव तथा देवालयं [3]द्विज ॥
पूर्वजन्मनि या नारी भ्रूणहत्यां च यो नरः ।
कुर्यात् सा मृतवत्सा च मृतवत्सो भवेद् ध्रुवम् ॥
या नारी स्वामिसहिता कुर्याच्च हरिवासरम् ।
सुपुत्रा भर्तृसुभगा भवेत् सा प्रतिजन्मनि ॥
यो नरो गोवधं कृत्या गुप्तं कृत्वा विमोहितः ।
ब्राह्मणी[4]हरणाद्वाऽपि कर्मणा वै[5] नपुंसकः ॥
इदन्तु वृजिनं [6]कृत्वा पश्चात् पुण्यं करोति यः ।
इह पुण्यप्रभावे [7]तु दुहिता जायते द्विज ॥
आसीत् त्रेतायुगे राजा श्रीधरो नामतो द्विजः ।
अपुत्रो धनवांस्तस्य जाया हेम प्रभावती ॥
व्यासं सकलशास्त्रज्ञं सर्वलोकहितैषिणाम् ।
आगतं चैव पप्रच्छ ह्यपुत्रोऽहं कथं वद ॥

---

(1) "हि यः" इति पद्मपु. पाठः । (2) "दण्डञ्च" इति पद्मपु. पाठः ।
(3) "शुभम्" इति पद्मपु. पाठः । (4) "हरणं वाऽपि" इति पद्मपु. पाठः ।
(5) "स" इति पद्मपु. पाठः । (6) "कुर्यात्" इति पद्मपु. पाठः ।
(7) "न" इति पद्मपु. पाठः ।

वचनं नृपतेः श्रुत्वा निर्मलं विनयान्वितम् ।
राज्ञा दत्ते च पीठे च निर्मिते कनकादिभिः ॥
राजा राज्ञी तस्य पादौ धौतं कृत्वाऽतिहर्षितौ ।
पीत्वा पादोदकं [1]तौ च सर्वपातकनाशनम् ॥
व्यास उवाच— राजञ्छृणुष्व यत् पृष्टमपुत्रो येन कर्मणा ।
राज्ञी तवेयं चापुत्री चैकपत्नीव्रतस्तथा ॥
पूर्वजन्मनि [2]शूद्रस्त्वं नाम्ना वरतनुः स्मृतः ।
भार्या तवापि शुभ्राङ्गी नाम्ना वै शङ्करी स्मृता ॥
एकदा पथि यातौ हि नीचपुत्रं जलेऽपि च ।
मग्नं दृष्ट्वा हेलया च गतौ स पञ्चतां गतः ॥
बहुपुण्यप्रभावेण राज्ञी राजा च तौ युवाम् ।
तेन कर्मविपाकेन युवयोर्न भवेत् सुतः ॥
राजोवाच— इदानीं केन पुण्येन सुतो वै जायते प्रभो ।
[3]अपुत्राणां नराणां वै जीवनं हि निरर्थकम् ॥
व्यास उवाच— सवत्सञ्चैव कूष्माण्डं वृषभं ससुवर्णकम् ।
देहि दानं [4]द्विजातिभ्यस्तथा बालव्रतं कुरु ॥
गौरीकन्यां तथा देहि पुराणश्रवणं कुरु ।
पुत्रो वै जायते तत्र सर्वपातकनाशनम् ॥
ब्रह्मोवाच— इति श्रुत्वा ततो राजा व्यासोक्तं दानमुत्तमम् ।
पुराणश्रवणञ्चैव चकार गतकिल्बिषः ॥
ततः पुत्रो वर्षमध्ये बभूव सर्वपूजितः ।
अभूद्राजा सार्वभौमः सुन्दरः कुलनायकः ॥
श्रीसूत उवाच— य इदं शृणुयाद् भक्त्या करोति दानमुत्तमम् ।

---

(1) "द्वौ" इति पद्मपु. पाठः । (2) "चन्द्र" इति पद्मपु. पाठः ।

(3) 'अपुत्रस्य मनुष्याणाम्" इति पद्मपु. पाठः ।

(8) "ब्राह्मणस्य" इति पद्मपु. पाठः ।

अपुत्रो लभते पुत्रं संक्षेपात् कथ्यते मया ॥
भक्त्या श्रुत्वा तु या नारी कुर्याद् ब्राह्मणपूजनम् ।
सुपुत्रा सा भवेन्नित्यं शास्त्रोक्तविधिना द्विज ॥
सुवर्णं रजतं पुष्पं वस्त्रमाल्यञ्च चन्दनम् ।
यो दद्यात् पुस्तके भक्त्या सर्वपापप्रणाशनम् ॥
पूर्वजन्मनि यो मूढो ब्रह्मबालकघातकः ।
[1]सोऽपुत्री च भवेन्नित्यं सप्तजन्मान्तरं द्विज ॥

इति श्रीपद्मपुराणे व्यासजैमिनिसम्वादे सूतशौनकसम्वादे च कर्मविपाको नाम पञ्चमोऽध्यायः । इति ।

अथ बौधायनोक्तकूष्माण्डदानविधिः[क]

कर्मविपाके— कूष्माण्डकस्य दानस्य विधिं बौधायनोदितम् ।
तदहं सम्प्रवक्ष्यामि लोकानां हितकारकम् ॥
काकवन्ध्या च या नारी मृतवत्सा च या भवेत् ।
या नारी पञ्चमे मासि तृतीये वा चतुर्थके ॥
गर्भस्रावञ्च कुरुते या च षष्ठाष्टमेऽपि वा ।
कोष्ठिदोषेण जायन्ते याः स्त्रियः पुत्रदुःखिताः ॥
तासां कर्मविपाकार्थं वक्ष्यामि दानमुत्तमम् ।
देवतानां यथा विष्णुरिन्द्रियाणां यथा मनः ॥
तेजसां भास्करो यद्वद् दानानां तद्वदिष्यते ।
वृद्धकूष्माण्डदानेन पुत्रांश्च लभते ध्रुवम् ॥
कूष्माण्डफलदानेन पुत्रांश्च लभतेऽचिरात् ।
विधानं तस्य वक्ष्यामि पूजाहोमादिकं तथा ॥
संक्रान्त्यां पौर्णमास्यां वा ग्रहणे चन्द्रसूर्ययोः ।

---

(1) "तस्य करो भवेत्पुत्रः" इति पद्मपु. पाठः ।

(क) विषयोऽयं घङच नास्ति ।

तीर्थक्षेत्रे तथा गोष्ठे सागरस्य कुलेऽपि च ।।
तत्पतिश्च तया सार्धं दानं कृत्वाऽतियत्नतः ।
ब्राह्मणैः फलमानीय ब्राह्मणस्यापि मन्दिरात् ।।
कूष्माण्डफलमानीय स्नात्वा पञ्चामृतेन च ।
ततः शुद्धोदकेनैव [1]या फलिनीति मन्त्रकैः ।।
भद्रपीठासने स्थाप्य कल्पयेत् पुरुषाकृतिम् ।
रौप्यनेत्रद्वयं दत्त्वा स्वर्णयज्ञोपवीतकम् ।।
नासा स्वर्णमयी कार्या श्रोत्रे ताम्रमयेऽपि च ।
मुक्तां कण्ठे विजानीयात् स्वर्णचित्रकमेव[2] च ।।
कङ्कणन्तु करे दद्यात् सिन्दूरं कज्जलादिकम् ।
भूषाद्यैर्भूषयित्वैवं वस्त्रयुग्मेन वेष्टनम् ।।
तस्य गर्भे हिरण्यञ्च माषमेकं नियोजयेत् ।
वक्षसि स्थापयेद्धेमं वित्तशाठ्यं न कारयेत् ।।
पलं तु कल्पयेद्देवं पुरुषाकृतिमेव च ।
जीवन्यासादिकं कृत्वा या फलिनीति पूजयेत् ।।
मृत्युञ्जयं महादेवं तत्राप्यावाहनं कृतम् ।
[3]भद्राख्यं मण्डलं कृत्वा भद्रपीठे तु स्थापयेत् ।।
एवं संस्थाप्य विधिना तत्कर्म विधिमाचरेत् ।
वरुणं पूजयेदादौ घृतदीपपुरःसरम् ।।
संकल्पं चैव कुर्वीत स्वस्तिवाचनपूर्वकम् ।
पुण्याहवाचनं कुर्यात् प्रयतः पूर्वदिङ्मुखः ।।
आचार्यं वरयेत्तत्र सवस्त्राभरणान्वितम् ।
भूतशुद्धि मातृकाञ्च कुर्याद् यत्नेन कामिकः ।।
वैदिकाग्निविधानेन होमं कुर्यात् प्रयत्नतः ।

---

(1) शु. जजु. (12-89) ।

(3) भद्राख्यं—सर्वतोभद्रम् ।

(2) चित्रकं—शिरोलंकारविशेषः, चिता इति प्रसिद्धः ।

या फलिनीति मन्त्रेण शतमष्टोत्तरं हुनेत् ॥
मृत्युञ्जयस्य मन्त्रेण शतमष्टोत्तरं तथा ।
पूर्णाहुतिं ततः कुर्यात्ततो दानं समाचरेत् ॥
कुटुम्बिने दरिद्राय श्रोत्रियाय विचक्षणः ।
यद्दानं दीयते तस्मै तद्दानं शुभकारकम् ॥
रुष्टो न दीयते दानं तथैव दक्षिणां दिशेत् ।
दक्षिणा दीयते तद्वद् यथा तुष्टो भवेद् द्विजः ॥
प्रार्थयेद्देवदेवेशं फलं चैव द्विजन्मनः ।
मृत्युञ्जय महादेव रक्ष मां शरणागतम् ।
कूष्माण्डफलदानेन देहि मे तनयं शुभम् ॥
हिरण्यगर्भपुरुष परात्पर फलोत्तम ।
तव दानेन देवेशो ददातु तनयं शुभम् ॥
वर्णोत्तम द्विजश्रेष्ठ भूदेव पंक्तिपावन ।
सदक्षिणं फलं दत्तं देहि मे तनयं परम् ॥
अनेन विधिना यस्तु कूष्माण्डदानमुत्तमम् ।
सोऽचिराल्लभते पुत्रान् कुलधर्मसमन्वितान् ॥
दिव्येनैवोपचारेण भोजयेद् द्विजपुंगवान् ।
एवं कृत्वा प्रयत्नेन हविष्यविधिपूर्वकम् ॥

इति श्री बौधायनोक्त–कर्मविपाके कूष्माण्डदानविधिः । इति ।

क

अथ बौधायनोक्तमेषदानविधिः

ग्रहदोषोपशान्त्यर्थं मेषदानं विधीयते ।
ग्रहणे चैव संक्रान्तौ शनिवारे विशेषतः ॥
पौर्णमास्याममायां च विशेषमग्निसन्निधौ ।
संकल्पं विधिवत् कार्यं महावाक्यपुरःसरम् ॥

(क) विषयोऽयं घङच नास्ति ।

ततो मेषं समादाय कृष्णवर्णं विशेषतः ।
धौतं चतुष्पदं तस्य यजमानः प्रपूजयेद् ॥
रक्तचन्दनपुष्पैश्च रक्तवस्त्रयुगेन च ।
पूजयेत् परया भक्त्या ग्रहसन्तुष्टमानसः ॥
पृष्ठे वस्त्रं समागृह्य वस्त्रैकं गलवेष्टनम् ।
हिरण्यं मस्तके दद्याच्छृङ्गयोः रौप्यकं न्यसेत् ॥
कर्णयोः सीसकं न्यस्य नासायां नीलकं न्यसेत् ।
चक्षुर्द्वये ताम्रखण्डं खुरेष्वायसकं न्यसेत् ॥
कांस्यपात्रं पृष्ठदेशे गले चैव प्रबालकम् ।
पुच्छे च चामरं कृष्णं कोषे पित्तलकोषकम् ॥
एवं संन्यस्य विधिवत् ततः पूजां समाचरेत् ।
मूर्ध्नि श्वेतां समभ्यर्च्च्य चन्द्रादित्यौ च चक्षुषोः ॥
वदने करिणं पूज्य धूम्रं नासाद्वयेऽपि च ।
रसनायां स्थिता तम्बा राजते लिङ्गिनी तथा ॥
ओष्ठद्वये ज्वलिनी च महामाया च स्कन्धयोः ।
शृङ्गदेशे च रुचिरा रोमकूपेषु देवताः ॥
उदरे वैष्णवी प्रोक्ता हिरण्यश्चैव पुच्छके ।
गुह्यदेशे च ब्रह्माणी चिबुके शोकनाशिनी ॥
अग्निं सम्पूज्य विधिवत् पृष्ठदेशे तु कामिकः ।
लिङ्गे स्थिता तथा गङ्गा मांसे काली प्रकीर्त्तिता ॥
भूतानि वृषणे विद्याच्चतुष्पादेऽप्यलक्ष्मिका ।
मेवंस्थानि ग्रहान् सर्वान् ततो मेषाग्निदैवतम् ॥
प्रणवादिचतुर्थ्यन्तं देवनामनमोयुतम् ।
पूजामन्त्रमिदं प्रोक्तं सर्वत्रार्च्चनकर्मणि ॥
मेषं सम्पूज्य विधिवत् दानं दद्याद् द्विजातये ।
ततस्तु प्रार्थनां कुर्याद् ब्राह्मणं मेषकं पुनः ।

विष्णुरूप द्विजश्रेष्ठ भूदेव पंक्तिपावन ।
सदक्षिणो मया दत्तस्तुभ्यं मेषः सुभूषितः ॥
देवानां यन्मुखं हव्यवाहनः सर्वपूजितः ।
अतोऽहं त्वां प्रदास्यामि ममारिष्टं विनाशय ॥
पूर्वस्मिन्निह यत् पापं रोगं शोकं विनाशय ।
वाङ्मनःकायजं नित्यं यत् किञ्चिद् दुष्कृतं मम ॥
तत्सर्वं नाशय क्षिप्रं जाठराग्नि प्रवर्धय ।
ब्राह्मणांश्च भोजयित्वा ततोऽच्छिद्रावधारणम् ॥

इति श्री वौधायनोक्त–मेषदानविधिः ।

[क] अथ शिव[1]सम्प्रदानकानि

तत्र विष्णुधर्मोत्तरे—

स्वपनार्थं तथा दत्त्वा धेनुं रुद्रमुदात्मये ।
रुद्रलोकमवाप्नोति स्वर्गलोकञ्च गच्छति ॥
श्वेतञ्च वृषभं दत्त्वा फलमानन्त्यमश्नुते ॥

शिवपुराणे— वृषभस्य प्रदानेन चान्नं कृशरमेव वा ।
रथेन वृषयुक्तेन स्वर्गं याति विशेषतः ॥

तथा— यस्तु छत्रं प्रयच्छेद्वै मम ताराऽधिपानने ।
सोममण्डलसंकाशं दिवि व्रजन्ति शुक्तवत् ॥

स्कन्दपुराणे— दीपमालां तु यः कुर्यात् कार्त्तिके मासि वै मम ।
तथाऽश्विने दीपमालां ब्राह्मणान् तर्पयच्छुचिः ॥
गाणपत्यस्य लभते दीप्त्या ते न विधि यथा ॥

इति शिवसम्प्रदानकानि ।

---

(1) दानसागरस्य 56 अध्याये वर्त्तते ।

(क) विषयोऽयं कगघङच नास्ति ।

[क] अथ हरि[1]सम्प्रदानकानि

तत्र विष्णुधर्मोत्तरे—

विष्णोरायतने दत्त्वा तत्कथापुस्तकं नरः ।
ब्रह्मलोकमवाप्नोति बहूंश्च वत्सरान् द्विजाः ॥
विष्णोः शंखप्रदानेन वारुणं लोकमश्नुते ।
तथा घण्टप्रदानेन महान्यशस्तथाऽश्नुते ॥
यः कुम्भं देवकर्म्मार्थं नरो दद्यान्नवं शुभम् ।
वारुणं लोकमाप्नोति सर्वपापेभ्य मुच्यते ॥
कमण्डलुप्रदानेन गोदानफलमाप्नुयात् ।
समुद्रजानि पात्राणि दत्त्वा वै तैजसानि तु ॥
पात्रं भवति कामानां विद्यानाञ्च धनस्य च ।
पतङ्गस्य प्रदानेन सर्वपापमपोहति ॥
दर्पणस्य प्रदानेन दर्पवान् रूपवान् भवेत् ।
तथा शय्याप्रदानेन स्थितिर्भवति शाश्वती ॥
[2]उत्तरच्छददानेन सर्वान् कामानवाप्नुयात् ।
वितानकप्रदानेन पुण्यं सुमहदश्नुते ॥
कुसुम्भनीलीरक्तादि शेषैरङ्गै र्द्विजोत्तमाः ।
दत्त्वा भवति धर्मात्मा सर्वव्याधिविवर्जितः ॥
दुकूलकप्रदानेन अग्निष्टोमफलं लभेत् ।
सलोमानि च वस्त्राणि यः प्रयच्छति धर्मवित् ॥
कृतानि वरवर्णानि अश्वमेधफलं लभेत् ।
आरक्तान् वाऽपि विप्रेन्द्रा वासांस्याभरणानि च ॥

---

(1) दानसागरस्य 57 अध्याये वर्त्तते ।

(2) उत्तरच्छदः—शय्याया उपरि आस्तरणवस्त्रम् ।

(क) विषयोऽयं कगघङ्च नास्ति ।

दत्त्वैवं देवदेवाय वह्निष्टोमफलं लभेत् ।
सुवर्णस्य प्रदानेन सर्वान् कामानवाप्नुयात् ॥

शुभम्— उत्कृष्टद्रव्यघटितं सुरूपञ्च ।

इति हरिसम्प्रदानकानि ॥

क

अथ दानद्रव्यदैवतान्याह

दानसागरे–[1]विष्णुधर्मोत्तरे च—

अभयं सर्वदैवत्यं भूमिर्वै विष्णुदेवता ।
कन्यादानं तथा दासी प्राजापत्यो प्रकीर्त्तिता ॥
[2]प्राजापत्यो गजः प्रोक्तस्तुरगो यमदैवतः ।
तथा चैकशफं सर्वं कथितं यमदैवतम् ॥
महिषं च तथा याम्यं चोष्ट्रं वै नैर्ऋतं भवेत् ।
रौद्रीधेनुर्विनिर्दिष्टा छाग आग्नेय उच्यते ॥
मेषन्तु वारुणं विद्याद् वराहो वैष्णवः स्मृतः ।
आरण्याः पशवः सर्वे कथिता वायुदैवताः ॥
जलाशयानि सर्वाणि वारिधानी कमण्डलुः ।
कुम्भश्च करकश्चैव वारुणानि [3]विनिर्दिशेत् ॥
समुद्रजानि [4]सत्त्वानि सामुद्राणि तथैव च ।
आग्नेयं कनकं प्रोक्तं सर्वलोहानि वाऽप्यथ ॥
[5]सर्वलोकहिरण्याद्याः कथिता अग्निदैवताः ।
प्राजापत्यानि शस्यानि पक्वान्नमपि च द्विजाः ।
ज्ञेयानि सर्वगन्धानि गान्धर्वाणि विचक्षणैः ॥

---

(1) विष्णुधर्मोत्ति (3-301/14–28) । (2) पंक्तिरियं विष्णुधर्मोत्तरे नास्ति ।
(3) 'द्विजोत्तमाः इति विष्णुधर्मोत्तरि । (4) 'रत्नानि' इति विष्णुधर्मोत्तरे ।
(5) पंक्तिरियं विष्णुधर्मोत्तरे नास्ति ।

(क) विषयोऽयं खगघङ्च नास्ति ।

बार्हस्पत्यं स्मृतं वासः सौम्यान्यथ रसानि च ।
पक्षिणश्च तथा सर्वे वायव्याः परिकीर्त्तिताः ॥
विद्या ब्राह्मी विनिर्दिष्टा विद्योपकरणानि च ।
सारस्वतानि ज्ञेयानि [1]पुस्तकानि विचक्षणैः ॥
सर्वेषां शिल्पभाण्डानां विश्वकर्मा तु देवता ।
द्रुमाणामथ पुष्पाणां [2]शाकानां हरितैः सह ॥
फलानामपि सर्वेषां तथा ज्ञेयो वनस्पतिः ।
मत्स्यमांसं विनिर्दिष्टं प्राजापत्यं तथैव च ॥
छत्रं कृष्णाजिनं शय्या रथमासनमेव च ।
उपानहौ तथा यानं यच्चान्यत् प्राणवर्जितम् ॥
उत्तानाङ्गिरसे त्वेतत् प्रतिगृह्णीत वै[3] द्विजाः ।
[4]कार्मुकञ्च तथा सीरं शस्त्रवर्मध्वजादिकम् ॥
[5]रक्षोपकरणं सर्वं कथितं [6]शुक्रदैवतम् ।
[7]गृह्णन्तु सर्वदैवत्यं [8]यदनुक्तं द्विजोत्तमाः ॥
तज्ज्ञेयं विष्णुदैवत्यं सर्वं वा [9]विष्णुदैवतम् ॥

प्रतिग्रहमाग्नेयतीर्थेन । करमध्यञ्चाग्नेयतीर्थम् । इति दानद्रव्यदैवत्यानि ।

क
अथ प्रतिग्रहनिर्णयः

विष्णुधर्मोत्तरे—गजस्य दन्ते तुरगस्य कर्णे, गोश्चापि पुच्छे महिषस्य पृष्ठे ।
दासीषु जङ्घे हरिणस्य शृङ्गे, अजास्तने मेषकनाभिमध्ये ।

---

(1) "काव्यानि पण्डितैः" इति विष्णुधर्मोत्तरे ।
(2) 'शाकहारितकैः' इति विष्णुधर्मोत्तरे ।
(3) 'मानवः' इति विष्णुधर्मोत्तरे ।
(4) 'पर्जन्याय' इति विष्णुधर्मोत्तरे ।
(5) 'रणोप' इति विष्णुधर्मोत्तरे ।
(6) 'चक्रदं' इति विष्णुधर्मोत्तरे ।
(7) 'ग्रहन्तु' इति विष्णुधर्मोत्तरे ।
(8) 'यद्यदुक्तम्' इति विष्णुधर्मोत्तरे ।
(9) 'द्विजसत्तमाः' इति विष्णुधर्मोत्तरे ।

(क) विषयोऽयं खगपुस्तके नास्ति ।

हलाग्रकाष्ठे रथचक्रमध्ये वृषः खुरे दक्षिणपादमध्ये,
दासस्य केशे पशवश्च पुच्छे कुर्याच्च दानं द्विजहस्तमध्ये ॥
[1]भूमेः प्रतिग्रहं कुर्याद् भूमिं कृत्वा प्रदक्षिणम् ॥
करे गृह्य तथा कन्यां दासीदासौ द्विजोत्तमाः ।
करं तु हृदि विन्यस्य धर्म्यो ज्ञेयः प्रतिग्रहः ॥
आरुह्य च गजस्योक्तः [2]कर्णेऽश्वस्य प्रकीर्त्तितः ।
तथा चैकशफानां च सर्वेषामविशेषतः ॥
प्रतिगृह्णीत गां पुच्छे ह्यन्ते कृष्णाजिनं तथा ।
[3]आरण्याः पशवश्चान्ये ग्राह्या पुच्छे विचक्षणैः ॥
[4]प्रतिग्रहमथोष्ट्रस्य आरुह्य च तथा भवेत् ।
बीजानां मुष्टिमादाय रत्नान्यादाय सर्वतः ॥
[5]वस्त्रं दशान्तादादद्यात् परिधाय तथा पुनः ।
आरुह्योपानहौ यानमारुह्यैव च पादुके ॥
[6]ईषायान्तु रथं गृह्य छत्रं दण्डेन[7] धारयेत् ।
द्रुमाणामथ सर्वेषां मूले न्यस्तकरो द्विजाः ॥
आयुधानि समादाय तथोन्मुच्य विभूषणम् ।
चर्मध्वजौ तथा स्पृष्ट्वा प्रविश्य च तथा गृहम् ॥
अवतीर्य च सर्वाणि जलस्थानानि वै द्विजाः ।
द्रव्याण्यन्यान्यथादाय स्पृष्ट्वा वा ब्राह्मणः पठेत् ॥
तथा समापयेत् पश्चात् कामस्तुत्या प्रतिग्रहम् ॥

इति प्रतिग्रहनिर्णयः ।

---

(1) 'भूमेः प्रतिग्रहं...प्रतिग्रहम्' इत्यन्तोभागः विष्णुधर्मोत्त. (3-301/28-36) ।
(2) 'चाश्वस्य कीर्त्तितः' इति विष्णुधर्मो. (3) 'कर्णेऽजाः' इति विष्णुधर्मोत्तरे ।
(4) 'प्रतिग्रहस्त्वथोष्ट्रस्य' इति विणुधर्मो. (5) 'वसुम्' इति विष्णुधर्मोत्तरे ।
(6) 'ईषाद्यस्तु' इति विष्णुधर्मोत्तरे । (7) 'तु वाचयेत्' इति विष्णुधर्मोत्तरे ।

क

अथ मूल्याध्यायज्ञानम्

धर्मशास्त्रे— द्वात्रिंशद् राशिका गावश्चतुः कार्षापणावराः ।
वृषः षट्कार्षापणकोऽप्यष्टावनडुहः स्मृताः ॥
दश कार्षापणा धेनुरश्वे पञ्चदशैव तु ।
हिरण्ये कार्षापणके एकोऽधिकस्तथा पणः ।।
वक्ष्ये कार्षापणश्छागेऽष्टौ पण वा दशाधिकाः ।
वृषल्यामथ पञ्चाशन्मूल्यं कार्षापणाः स्मृताः ।।
निष्के पञ्चाशदेव स्याद् गजे पञ्चशतानि च ।
पञ्चकार्षापणाः प्रोक्ताः दोलाया षड्रथे तथा ।।
गृहेऽष्टौ कार्षापणकास्ताम्र कर्षे पणाः स्मृतः ।
कांस्यकर्षेऽपि च तथा इति मूल्यप्रकल्पना ।।

इति मूल्याध्यायज्ञानम् ।

ख

अथ मकरतण्डुलसाधनम्

[1]तण्डुलान् कारयेच्छुभ्राच्छालेर्नान्यस्य कस्यचित् ।
स्नानोदकेन सम्मिश्रान् रात्रौ तत्रैव वासयेत् ।।
मृण्मये भाजने कृत्वा आदित्यस्याग्रतः शुचिः ।
प्राङ्मुखोपोषितः स्नानं शिरः स्थापितपत्रकम् ।।
तण्डुलान् भक्षयित्वा [2]त्वश्वत्थे निष्ठीवयेत् त्रिधा ।
लोहितं दृश्यते यस्य [3]भग्नतालुश्च शीर्यति ।
गात्रञ्च कम्पते यस्य तमशुद्धं विनिर्दिशेत् ।।

---

(1) 'तण्डुलान्...नरस्यवृत्तम्' इत्यन्तोभागः मिता (पृ–214) ।
(2) 'तु पत्रे' इति मिता. पाठः । (3) 'हनुतालुश्च' इति मिता. पाठः ।

(क) विषयोऽयं खगघङ्च नास्ति । (ख) विषयोऽयं खगघङ्च नास्ति ।

पत्नश्च— एह्येहि भगवन् धर्म दिव्यमेतद् समाविश ।
सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः ॥
आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये, धर्मश्च जानाति नरस्य वृत्तम् ॥

इति मकरतण्डुलसाधनम् ॥

क

अथ होमद्रव्यपरिमाणम्

[1]कर्षमात्रं घृतं होमे [2]शुक्तिमात्रं पयः स्मृतम् ।
उक्तानि पञ्चगव्यानि तत्समानि मनीषिभिः ॥
तत्समं मधुदुग्धान्नं कर्षमात्रमुदाहृतम् ।
दधि [3]प्रसूतिमात्रं स्याल्लाजाः स्युर्मुष्टिसम्मिताः ॥
पृथकास्तत्प्रमाणाः स्युः सक्तवोऽपि तथोदिताः ।
गुडं पलार्द्धमात्रं स्याच्छर्करांऽपि तथाविधाः ॥
ग्रसार्द्धं चरुमानं स्यादिक्षुः पर्वावधिः स्मृतः ।
एकैकं पत्रपुष्पाणि तथा पूपानि कल्पयेत् ॥
कदलीफलनारङ्गफलान्यैकैकशो विदुः ।
मातुलङ्गं चतुःखण्डं पनसं दशधावृतम् ॥
अष्टधा नारिकेलानि खण्डितानि विदुर्बुधाः ।
त्रिधाकृतं फलं वैल्वं कपित्थं खण्डितं द्विधा ॥
उर्वारुकफल होमे खण्डितं चोदितं त्रिधा ।

---

(1) 'कर्षमात्रं... यवास्तथा' इत्यन्तोभागः शारदातिलकटीकायां पदार्थादर्शे इति व्रतराज (पृ–15) ।

(2) शुक्तिमात्रं—कर्षद्वयमिति भावप्रकाशे इति धर्मशास्त्रशब्दकोषे ।

(3) प्रसृतिमात्रं— संयुक्ताङ्गुलिपञ्चकेन प्रसारितपाणिना ग्राह्यं वस्तु ।
प्रसृतिः पलद्वयमिति भावप्रकाशे इति धर्मशास्त्रशब्दकोषे ।

(क) विषयोऽयं खगघङच नास्ति ।

फलं विद्याद् द्विखण्डानि समिधः स्युर्दशाङ्गुलाः ॥
दूर्वात्रयं समुदिष्टं गुलूची चतुरङ्गुला ।
व्रीहयो मुष्टिमात्राः स्युर्मुद्गा माषा यवास्तथा ॥
तण्डुलाः स्युस्तदर्धांशाः कोद्रवाः मुष्टिसस्मिताः ।
गोधूमचक्रकवल विहिता मुष्टिमानतः ॥
तिलाश्चलुकमात्राः स्युः सर्षपास्तत् प्रमाणतः ।
मुष्टिप्रमाणं लवणं मरीचान्यपि विंशतिः ॥
[1]पुरं वदरमानं स्यात् रामठं तत्समं स्मृतम् ।
चन्दनागुरुकर्पूरकस्तूरीकुङ्कुमानि च ॥
तिन्तीरी बीजमानानि समुद्दिष्टानि देशिकैः ।
वैश्वानरं स्थितं ध्यायेत् समिद्धोमेषु देशिकः ।
शयानं सर्पिर्होमेषु निषण्णं शेषवस्तुषु ॥

इति होमद्रव्यपरिमाणम् ॥

इति श्रीकृतिबृहस्पतिविरचितायां कृत्यकौमुद्यां
दानप्रकरणं समाप्तम् ।

इति श्री कृतिबृहस्पतिबिरचिता कृत्यकौमुदी समाप्ता ।
समाप्तोऽयं ग्रन्थः ॥

* * *

KENDRIYA SANSKRIT VIDYAPEETHA
Accession No. 16999
Date 16-6-93
GURUVAYOOR

---

[1] पुरं—गुग्गुलुः ।

परिशिष्टम्

(क) कृत्यकौमुद्यामुद्धृता ग्रन्थाः ग्रन्थकाराश्च

[अधोलिखिता अङ्का मूलग्रन्थस्य पृष्ठपत्रसंख्यां सूचयन्ति]

कात्यायनपरिशिष्टम्— 239
गृह्यपरिशिष्टम् – 283
छन्दोगपरिशिष्टम्— 36, 45, 237, 239, 252
तैत्तिरीयश्रुतिः— 238
निगमः— 194, 236, 269
परिशिष्टम्—36, 123, 190, 192 267, 281, 282, 284, 289
बह्वृचपरिशिष्टम्— 46
यजुर्विधानम्— 297
शतपथस्मृतिः— 232, 234
श्रुतिः— 41, 227, 241, 269, 291
अङ्गिराः—246, 294, 295, 299 300, 301, 302, 303, 312, 313, 317, 318, 322, 324, 325, 328, 330, 334, 360, 361, 365
अत्रिः— 289
आपस्तम्बः— 262, 280, 310, 311, 312, 314, 315, 317 318, 319, 320, 322, 323, 332, 333, 334, 335, 360, 365
आश्वलायनः— 284
उद्दालकः— 198
उशनाः – 232, 302, 308, 337, 360, 365
ऋष्यशृङ्गः – 208, 220, 284, 285, 290
कर्मविपाकः – 429
कल्पतरुकारः— 39
कात्यायनः—36, 45 132, 194, 202, 206, 209, 212, 213, 233, 237, 238, 239, 252, 269, 278, 286, 287
कालादर्शः – 223, 227
कार्ष्णाजिनिः— 224, 226, 228, 268, 270, 271
काश्यपः— 294, 321, 322
कुथुमिः— 285, 287
गर्गः— 167, 191, 192; 292, 295
गार्ग्यः— 35; 223, 226, 280; 361
गालवः— 167, 220
गोभिलः—35, 224, 228, 229, 234, 235, 268
गौतमः— 132, 206, 216, 227 302, 308, 364, 369
चतुर्विंशतिमतम्— 303, 306
च्यवनः— 330
छागलेयः— 304, 316
जातूकर्ण्यः— 270, 272
जाबालिः— 189, 193, 197; 218, 219, 237, 243, 272 335, 366, 368

जीमूतवाहनः— 72, 138, 248
दक्षः— 320
दानविवेकः— 379
दानसागरः— 379, 435
देवलः— 190, 210, 247, 248, 255, 256, 257, 260, 317 319, 326, 331
धर्मशास्त्रम— 438
धवलसंग्रहः— 140, 266 272
धौम्यः— 232, 337
नारदः— 248
पराशरः—254 282, 305, 309 311, 315, 320, 326, 327 328, 331, 332, 335, 360 366, 367
पितामहः 132, 271
पुलस्त्यः— 328
पृथ्वीचन्द्रोदयः— 3
पैठीनसिः— 326, 327, 329
प्रचेताः— 200, 202, 205, 219 233, 235; 331, 377
बृहत्प्रचेताः— 312
बृहन्मनुः 189, 225, 280
बृहद्विष्णु— 322, 333, 375
बृहद्वसिष्ठः — 322, 376, 378
बृहद्व्यासः— 334
बृहस्पतिः—289, 307, 310, 313 314, 324, 338, 362, 385, 388
बौधायनः—190, 193, 195,214 214, 217, 223, 231, 236 238, 239, 323, 3 4, 326 327, 328, 329, 370, 429 431
भवदेवः— 332
भारद्वाजः — 336, 337
मध्यमाङ्गिराः— 308
मनुः—21, 224, 230, 231,244 274, 277, 280, 303, 330 334, 338, 360, 362, 375 379, 395
मरीचिः—226, 227, 280, 338
माण्डव्यः— 294
मार्कण्डेयः— 19, 35, 189, 209 219, 244, 245, 248; 267 275, 276, 321, 322, 323 393, 365
यमः— 219, 249, 265, 278, 295, 304, 310, 321, 322 323, 325, 330, 331; 334, 362, 372, 376, 381, 395
यवनः— 293
याज्ञवल्क्यः— 34; 37, 38, 39; 43, 45, 223, 277, 279; 297, 298, 308, 315, 326 332, 350, 356, 360, 361 365, 374, 389, 390; 395 416
योगियाज्ञवल्क्यः— 39
योगीश्वरः— 379

लक्ष्मीधरः—239, 243, 310, 311 317, 331
लघ्वापस्तम्बः—333
लघुहारीतः - 221, 232, 239, 325
लौगाक्षिः—226
वराहः— 60
वसिष्ठः— 69, 256, 257 258 302, 324, 337, 360, 365 369
बादरायणः— 138
विज्ञानेश्वरः – 303, 307, 310, 311, 312, 334, 338, 362, 365
विद्याकर— 236
विरिञ्चिः— 289
विश्वामित्रः -- 22, 396
विष्णुः— 120, 139, 199, 210, 248, 265 275, 277, 286 312, 326, 335, 336 374 375, 381, 385, 386
विष्णुगुप्तः 375
विष्णुसंहिता— 404
वृद्धगार्ग्यः-- 259, 257
वृद्धवसिष्ठः—321, 322 323, 400 409
वृद्धशातातपः— 316, 317, 320 322, 325, 367, 368
वैशम्पायनः— 269, 361
व्याघ्रपादः— 247
व्यासः—41, 60, 250, 285, 286 287, 303, 309 337, 377 397, 411
व्रतप्रदीपकारः— 104
शंखः— 221, 224, 249, 287, 306, 307, 325, 332, 333 361
शंखलिखितौ— 235, 332, 369
शतानन्दः— 35, 60, 138, 191, 184
शतानन्दसंग्रहः— 69, 122
शाट्यायनिः— 269, 271, 272,
शातातपः—226, 246; 248, 249 256, 262, 314; 320, 327 330, 332, 333, 337, 367 410
शुद्धिचन्द्रिका— 222
शुद्धिदीपिका— 58, 59
श्लोकगौतमः— 377
षट्त्रिंशन्मतम्— 308, 312, 336, 359
संवत्सरप्रदीपकारः— 129
सत्यः— 20, 290
सत्यतपः— 289, 291
सत्यव्रतः— 285
सनत्कुमारीयः— 207
संवर्त्तः—311, 332, 382, 408, 409
सुमन्तुः— 14, 224, 307, 329, 330, 331

स्मृतिः— 32, 151, 160, 192, 208, 217, 219, 220, 221 222, 223, 244, 245, 247, 254, 268, 271, 274, 275 279, 285, 288, 332, 338

स्मृत्यन्तरम्— 35, 190, 217, 236 237, 239, 256 257, 271 289, 290, 302, 305

स्मृतिमीमांसा— 207, 263

स्मृतिसमुच्चयः—34, 35, 69, 146 207, 250, 252 275, 278

स्मृतिसारः— 222, 223

हारीतः— 219, 221, 227, 280 281, 285, 286, 295, 302 304, 316, 317, 318, 324 326, 332, 338, 372, 374 376

आग्नेयपुराणम्—18, 56, 62, 103 168, 190, 192, 211, 339 342, 376, 377, 398, 400

आदित्यपुराणम्— 211, 212, 396

एकादशीविधानम्— 143

एकाम्रपुराणम्— 136, 180

कपिलसंहिता— 136

कूर्मपुराणम्—75, 76, 138, 167 170, 196, 204, 205, 206 213, 320, 396, 399

गरुडपुराणम्— 110, 152, 158 191, 200, 212, 294

चन्द्रकेतुचरितम्— 208

तार्क्ष्यपुराणम्— 169, 176, 177

देवीपुराणम्—27, 114, 137, 229 250, 255, 257, 258, 259 278, 280

नन्दीपुराणम्—17, 384, 388 416 419

नरसिहपुराणम्— 214, 291

नारदीयपुराणम्— 131, 132 134 141, 143, 192, 196, 203 204, 205, 217, 266, 287 421, 422

पद्मपुराणम्—37, 140, 141, 142 144, 189, 229, 231, 425

पद्मावतीपुराणम्— 160

पारिजातहरिवंशम्— 71

पुराणम्— 28, 31, 67, 145, 152, 212, 220, 236, 237 273, 396, 408

पुरुषोत्तमपुराणम्— 24

प्रभासपुराणम् – 155

बृहद्धर्मपुराणम्— 19

ब्रह्मपुराणम्— 17, 18, 21, 22, 23, 25, 48, 68, 106, 108 123, 124, 139, 146, 160 209, 210, 215, 241, 245 248, 265, 269, 276, 279 313, 314 315 320, 362 383, 386, 390, 425

ब्रह्मवैवर्त्तपुराणम्— 55, 398

ब्रह्माण्डपुराणम्— 48, 54, 70, 99, 102, 104, 105, 106,

107, 122, 175, 176, 179
195, 229, 241, 247, 271
273, 274, 289
भगवतीपुराणम्—279, 294, 332
भविष्यपुराणम्—18, 21, 31, 48
82, 195, 198, 209, 213
222, 224, 233, 264 265
267, 270, 271, 274 303
304, 329
भविष्योत्तरपुराणम्— 16, 27, 28
32, 33, 46, 49. 50,53 54
55, 71; 74, 77, 93, 98,
102, 104, 105, 108, 109
120, 124, 125, 128, 132
133, 137, 141, 199, 201
258, 288, 295, 388, 393
417, 419
भागवतम्—109, 110, 201,240
भारतम्— 30, 144, 168, 382
402, 406, 407, 408, 421
मत्स्यपुराणम्— 17, 30, 52, 75
76, 98, 104, 105, 106
107, 112, 132, 146, 197
199, 200, 203, 210, 216
217, 229, 232, 233, 247
251, 252, 273, 278, 339
351
महाभारतम्–15,275, 281, 378
381, 382, 383, 384, 385
403, 411, 413, 414,419
मार्कण्डेयपुराणम्— 191, 387
मृत्युञ्जयपुराणम्— 415
रामायणम्— 209, 391
लिङ्गपुराणम्— 3, 4, 110, 111
120, 138, 154, 246, 247
295, 377
वराहपुराणम्— 145, 175, 194
196, 208, 211, 288, 381
385, 390
वह्निपुराणम्— 54, 55, 75, 76
194
वायुपुराणम्— 4, 25, 172, 175
216; 268, 269, 272, 277
278, 279, 294
विष्णुधर्मः— 28, 176, 196,378
391
विष्णुधर्मोत्तरम्—14, 15, 17, 18
19, 72, 73, 76, 122, 133
139, 193, 200, 201, 204
207, 214, 254, 263, 266
341, 343, 356, 359, 377
378, 379, 380, 381, 382
383, 384, 386, 387, 388
389, 390, 398, 433, 434
435, 436
विष्णुपुराणम्— 52, 70, 166,
168, 262
विष्णुरहस्यम्—29, 97, 100,102
129, 131, 195, 204, 205
208, 266
शंकरगीता—190, 191, 215

शाम्बपुराणम्—117

शिवधर्मपुराणम्—157

शिवपुराणम्— 179, 384, 389 433

शिवरहस्यम्— 283

सौरधर्मोत्तरपुराणम्— 194, 200 202, 203

स्कन्दविजयपुराणम्— 6, 12

स्कन्दपुराणम्— 4, 21, 27, 76 93, 136, 166, 172, 179 182, 193, 194, 195, 196 197, 198, 199, 201, 206 209, 211, 214, 378, 387 401, 433

हरिवंशम्— 72

ज्योतिःपराशरः— 282

ज्योतिःशास्त्रम्—22, 71, 98, 127 166, 189, 246, 255, 259 262, 275, 280, 284, 288 292

ज्योतिषम्— 179

बृहत्संहिता— 98

राजमार्त्तण्डः— 26, 59, 60, 70 71, 72, 132, 175, 178 193, 201, 215, 221, 241 254, 258, 259, 281, 291 293

काश्यपपञ्चरात्रम्— 27

तत्त्वसागरसंहिता— 197, 198

प्रपञ्चसारः— 122

मोहचूडोत्तरम्— 8, 9

सोमशम्भुपद्धतिः— 4

स्कन्दजामलम्— 113

ग्रन्थे— 277

परिशिष्टकारः— 290

पाणिनिः— 266

लिङ्गानुशासनम्— 233

—*—

परिशिष्टम्

ख. सहायकग्रन्थसूची

ग्रन्थनाम	प्रकाशनस्थानम्	प्रकाशनकालः
अग्निपुराणम्	चोखम्बासंस्कृतसंस्थानम्, वाराणसी	1966
आङ्गिरसस्मृतिः	ए. एन्. कृष्ण-आयंगारः, आड्यारलाइब्रेरी मद्रास	1953
अथर्ववेदः	माधवपुस्तकालयम्, कमलानगर, दिल्ली	1978
अमरकोषः	चौखम्बासंस्कृतसीरीज-आफीस, वाराणसी	1970
आपस्तम्बधर्मसूत्रम्	चौखम्बासंस्कृतसीरीज-आफीस, वाराणसी	1932
आश्वलायनश्रौतसूत्रम्	लाइब्रेरी, श्री सं. के. सं. विद्यापीठम्, पुरी	
उत्कल इतिहासर एक अज्ञात अध्याय	फ्रेण्ड्स् पब्लिशर्स, कटक	1969
ऋग्वेदः	वैदिकयन्त्रालयः, आजमीर	1907
एकादशीतत्त्वम्	सिद्धेश्वरयन्त्रालयः, कलिकता	1895
ऐतरेयब्राह्मणम्	आनन्दाश्रममुद्रणालयः, पुना	1896
ओडिशा परिचय	कोणार्क प्रकाशनी, भुवनेश्वर	1976
ओडिशार पर्वपर्वाणि ओशाव्रत ओ यानियात्रा	उत्कल पाठक संसद, कटक	
ओडिशार संस्कृत लेखा ओ लेखक	ओड़िशा साहित्य एकाड़ेमी, भुवनेश्वर	
ओडिशार सांस्कृतिक इतिहास	कलचराल फोरम्, भुवनेश्वर	1978
कठोपनिषत्	मोतीलाल बनारसीदास, वाराणसी	1977
कालमाधवः	वेंकटेश्वर छीम् प्रेस, कल्याण, बम्बई	1951
कूर्मपुराणम्	एसियाटिक् सोसाइटि आफ् बेंगल, कलिकता	1890
कृत्यकल्पतरुः	ओरिएण्टाल इनष्टीच्यूट्, वरोदा	1950
कृत्यरत्नाकरः	एसियाटिक सोसाइटि आफ् बेंगल, कलिकता	1925

ग्रन्थनाम	प्रकाशनस्थानम्	प्रकाशनकालः
कौशीतक्युपनिषत्	मोतीलाल बनारसीदास, वाराणसी	1970
गरुडपुराणम्	चौखम्बा संस्कृत संस्थान वाराणसी	1969
गौडीयश्राद्धप्रकाशः	वेंकटेश्वर स्टीम प्रेस, कल्याण, बम्बई	1911
गौतमधर्मसूत्रम्	चौखम्बा संस्कृत सीरीज आफिस, वाराणसी	1966
चतुर्वर्गचिन्तामणिः	१) काशीहिन्दुविश्वविद्यालयः, वाराणसी	1971
	२) एसियाटिकसोसाइटीआफ्बेंगल, कलिकता	1911
छान्दोग्योपनिषत्	आनन्दाश्रममुद्रणालयः, पुना	1910
तिथितत्त्वम्	श्रीसिद्धेश्वरयन्त्रालयः, कलिकता	1895
तैत्तिरीयब्राह्मणम्	आनन्दाश्रममुद्रणालयः, पुना	1898
तैत्तिरीयोपनिषत्	आनन्दाश्रममुद्रणालयः, पुना	1911
त्रिस्थलीसेतुः	आनन्दाश्रममुद्रणालयः, पुना	
दानमयूखः	गुजराती प्रिंटिंग प्रेस, मुम्बई	1934
देवीभागवतम्	ठाकुरप्रसाद एण्ड सन्स, वाराणसी	
धर्मशास्त्रेतिहासः	भण्डारकर ओरियण्टाल	
	रिसर्च इनस्टीच्युट्, पुना	1958
धर्मशास्त्र का इतिहास	सम्मेलनमुद्रणालयः, प्रयाग	1966
धर्मसिन्धुः	चौखम्बा संस्कृत सीरीज आफिस, वाराणसी	1968
निरुक्तम्	निर्णयसागरप्रेस, कल्याण, मुम्बई	1930
पद्मपुराणम्	कलिकता	1957
पराशरमाधवीयम्	एसिआटीक सोसाइटी आफ बेंगल, कलिकता	1974
पूर्वमीमांसा	आनन्दाश्रममुद्रणालयः, पुना	1976
प्रायश्चित्तविवेकः	जीवानन्दविद्यासागर, कलिकता	
बौधायनधर्मसूत्रम्	चौखम्बा संस्कृत सीरीज आफिस, वाराणसी	1939
ब्रह्माण्डपुराणम्	मोतीलाल बनारसीदास, वाराणसी	1973
भगवद्गीता	निर्णयसागरप्रेस, बम्बई	1912

ग्रन्थनाम	प्रकाशनस्थानम्	प्रकाशनकालः
मत्स्यपुराणम्	आनन्दाश्रममुद्रणालयः, पुना	1907
मदनपारिजातम्	एसिआटिक सोसाइटी आफ् वेंगल, कलिकता	1888
मनुस्मृतिः	(मन्वर्थमुक्तावली) चौखम्बा संस्कृत सीरीज अफिस, वाराणसी	
मनुस्मृतिः	(मेधातिथिभाष्यसहिता) कलिकता	
महाभारतम्	गीताप्रेस, गोरखपुर	1967
महाभाष्यम्	मोतीलाल वनारसीदास, वाराणसी	1971
मेदिनीकोषः	सारसुधानिधियन्त्रालयः, कलिकता	1872
याज्ञवल्क्यस्मृतिः	(मिताक्षरा) निर्णयसागरप्रेस, बम्बई	1949
याज्ञवल्क्यस्मृतिः	अपरार्कटीका, आनन्दाश्रममुद्रणालय, पुना	1904
याज्ञवल्क्यस्मृतिः	विश्वरुपटीका, ब्रह्मवादिन् प्रेस, मद्रास	
याज्ञवल्क्यस्मृतिः	वालम्भट्टी, आर्यभूषणप्रेस, पुना	1914
योगशास्त्रम्	चौखम्बा संस्कृत बुक् ड़िपोट्, वनारस	1911
रामायणम्	ओरियण्टल इनष्टीच्युट, वरोदा	1962
वराहपुराणम्	वेङ्कटेश्वर ष्टीम् प्रेस, बम्बई	1923
वसिष्ठधर्मसूत्रम्	भाण्डारकर ओरियण्टाल रिसर्च इनष्टीच्युट, पुना	1931
विष्णुधर्मोत्तरपुराणम्	वेंकटेश्वर ष्टीम् प्रेस, बम्बई	1912
विष्णुपुराणम्	गीताप्रेस, गोरखपुर	1972
विष्णुस्मृतिः	चौखम्बा संस्कृत सीरीज अफिस, वाराणसी	1962
वैशेषिकसूत्रम्	एसिआटिक सोसाइटी आफ वेंगल, कलिकता	1909
शब्दस्तोम महानिधिः	चौखम्बा प्रकाशन, वाराणसी	1907
शतपथब्राह्मणम्	एसिआटिक सोसाइटी आफ वेंगल, कलिकता	1908
शाश्वत धर्मदीपिका	मेडिकाल हल प्रेस, वनारस	1883
शुक्लयजुर्वेदः	संपूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी	1978



Born on 4th September 1957 at Ranpur Garh, Puri, Orissa, Studied at Sadashiva Kendriya Sanskrit Vidyapeetha, Puri, received Grad & P.G. Scholarships during 6 years of the study including Central Govt. Research Scholarship, completed his research work at Sadashiva Kendriya Sanskrit Vidyapeetha and got Vidyavaridhi (Ph.D.) from Rastiya Sanskrit Sansthan, an autonomous body under the Union Ministry of Education, Govt. of India and completed his Post Doctoral (D.Litt) research at Kameswara Singh Darabhanga Sanskrit University. He is rewarded prizes in various Sanskrit elocution contests. Edited numerous manuscripts, prepared guidelines for other researchers. Published two books (Nirnaya Kautukam and A critical study of Kritya Kaumudi) and 12 research papers in various journals.

CSUGCKL
Q2:4
1
16999
Acc.No: 16999